

श्रीपरमात्मने नमः ।

सनातनजैनग्रंथमालायाः

प्रथमं खंडं ।

१

आप्तपरीक्षा

२

पत्रपरीक्षा च ।



संपादक :-

श्रीयुत पंडित गजाधरलालजैनशास्त्री ।

ग्रंथसूची ।

	पृष्ठ संख्या
१ । ग्रंथकर्तुः परिचयः	१–८
२ । आप्तपरीक्षा सटीका (संपूर्णा)	१–९५
३ । पत्रपरीक्षा (संपूर्णा)	१–१३

नियमावली ।

१ । इस ग्रंथमालामें मूल संस्कृत प्राकृत तथा संस्कृतटीकासहित दिगंबरजैनाचार्यकृत दर्शन, सिद्धांत, न्याय, अध्यात्म, व्याकरण, काव्य, साहित्य, पुराण, गणित, ज्योतिष वैद्यक प्रभृति सर्वप्रकार के प्राचीन ग्रंथ छपते हैं ।

२ । इस ग्रंथमालाका प्रत्येक खंड (अंक) दश फारमसे (८० पृष्ठ से) कम नहीं होगा और प्रत्येक खंडमें एक दो या तीन से अधिक ग्रंथ नहीं रहेंगे ।

३ । इस ग्रंथमाला का मूल्य १२ खंडों का सर्वसाधारण से ८) रु. प्रथम ही ले लिया जायगा और नैयायिक, वैदांतिक और संस्कृत पुस्तकालयोंकी सेवामें यह ग्रंथमाला बिना मूल्य भी भेजी जायगी । परंतु पोष्टेज खर्च प्रत्येक अंक का =) या ≡) वी. पी. से सबको देना होगा ।

४ । जो महाशय एक साथ १००) रु. भेजेंगे वे यावज्जीव स्थायीग्राहक समझे जावेंगे । परंतु मार्ग व्यय उनको भी जुदा देना होगा ।

५ । जो महाशय पुस्तकालयों मंदिरों, विद्यार्थियों वा विद्वानोंको वितरण करनेकेलिये ग्राहक बनेंगे उनको १००) रु. पेशगी भेजनेसे १२ खंड तक पंद्रह २ प्रति प्रत्येक खंडकी भेजी जायगी । मार्गव्यय पृथक् देना होगा ।

मूल्य वा पत्र भेजनेका पता—**पन्नालाल जैन**

मंत्री—श्रीजैनधर्मप्रचारिणीसभा काशी

पोष्ट—बनारस सिटी ।

जैनी भाइयोंसे प्रार्थना ।

यह ग्रंथमाला प्राचीन जैनग्रंथोंके जीर्णोद्धारार्थ व जैनधर्मके प्रचारार्थ प्रकाशित की जाती है । इसमें जो कुछ द्रव्य लाभ होगा वह भी धर्मप्रचार व परोपकारमें ही लगाया जायगा । इसकारण प्रत्येक धर्मात्मा उदार महाशयोंको चाहिये कि प्रथम तो एक २ या दो दो ग्रंथोंको छपाकर जीर्णोद्धार करनेकेलिये द्रव्य प्रदान करें । दूसरे प्रत्येक मंदिरजीके शास्त्रभंडारमेंसे ग्राहक बनकर इन सब ग्रंथोंका संग्रह करके रक्षा करें अथवा स्वयं ग्राहक बनकर अपने यहांके संस्कृत पढनेवाले विद्यार्थियोंको अथवा संस्कृतज्ञ अन्यमती विद्वानोंको दान देकर सत्यार्थ पदार्थों का प्रचार करें । शास्त्रदानी महाशयोंकेलिये ही हमने पांचवां नियम बनाया है ।

प्रार्थी—**पन्नालाल बाकलीवाल ।**



श्रीपरमात्मने नमः ।

सनातनजैनग्रंथमालायाः

प्रथमं खंडं ।

स्याद्वादविद्यापतिश्रीमद्विद्यानंदस्वामिविरचिता

१

आप्तपरीक्षा

२

पत्रपरीक्षा च

श्रीयुत पंडितगजाधरलालजैनशास्त्रिणा संपादिते

ते च

उस्मानाबादनिवासिस्वर्गीयश्रेष्ठिवर्यकस्तूरचंद्रस्यात्मजबालचंद्रस्य स्मरणार्थं
श्रीजैनधर्मप्रचारिणीसभाया मंत्रिणा
श्रीपन्नालालजैनेन

काशीस्थचंद्रप्रभाभिधे मुद्रणयंत्रालये
प्रकाशिते ।

श्रीवीरनिर्वाणसंवत्सरः २४३९ । खिष्टाब्दः १९१३ ।

प्रथमं संस्करणं] ❀ [अस्य खंडस्य मूल्यमेको रूप्यकः ।

Printed by Gauri Shanker Lal Manager,
at the Chandraprabha Press Benares City
Published by Panna lall Jain Benares.

प्रस्तावना ।

—१०१—

विद्वन्निकर !

प्रावर्तिष्ट किलार्हतदुरवबोधानवद्यसिद्धांताकूतवहिष्कृतात्मभिरुपवर्णयद्भिश्चामलकेवलकलाकलितकेवलिलपनभुवनविलसितानवद्यतत्त्वनिकरं तत्त्वाभासतया, हृदयवेल्लनकारणनास्तिकाद्यनल्पविगर्हणं कैश्चित् । तत्र नोपागच्छंतीमेऽस्मत्पुरः सर्वथा कलंकभाजनतां । किंत्वार्हतमताचलावस्थानभूतामलतत्त्वोपदर्शनप्रत्यूहव्यूहस्वरूपजिनसत्पथगामिनामेवायं महान् दोषः । नियतं चैतत्, वातप्रम्यनवद्यपरीक्षादक्षमानसोऽपि न हि तदभिमुखानयनमंतरा समंजसतया परीक्षितुं क्षमते । वस्तुतस्तु निखिलमलविरहितासमुखविनिर्गताभिप्रायसाकल्यं समंजसतयानवगच्छमाना अप्यकारणाक्षेपकरणप्रवणा विद्वांसोऽपीमे न तत्त्वबुभुत्सुजनसत्करणसख्यौ समज्ञाभाजनतामुपढौकंते तेषामनालोचितपथगामितया रागद्वेषप्रखरमलमलिनात्मत्वेन च परंरहितप्रतिपादकवचनवहिष्कृतत्वात् उन्मत्तविलसिताक्षेपोपेक्षयोरिव तत्कृताक्षेपोपेक्षयोर्निर्धारितत्वात्, लोकेपि निर्हेतुकमपरमाक्षिपन्नुपेक्षमाणश्च न हि विदुषां पुरस्तादंशमात्रमपि सन्मतिभाजनतां बिभर्ति । अभिमतिरियं किल बलवत्यस्माकं यदीमे विद्वान्सोनुपेक्षमाणा अनाक्षिपंतश्चार्हतमतं व्यलोकिषतादर्शिषत चार्हतपथगामिनस्तेभ्यो विचित्रकीटकस्थानभूतकरंडकेभ्यो बहिर्विधाय निर्मलहितप्रतिपादनप्रवणानि नैकविधशास्त्राणि तदा नापतदयं जैनधर्मो जैनेतरप्राज्ञनिकरोपेक्षाक्षेपकक्षायां, किं च जैनतत्त्वोपदर्शनसामिग्यभावे आक्षेपोपेक्षादिकरणहेतुमा कुत्रापि प्राक् युक्तिमत्पथाप्रस्थायिपरपूर्वाचार्यदुर्वचनादिस्खलितविलोकनमात्रत एव सर्वथा वेपितमानसा अप्यार्हतसरंणिशरणा वयं नाद्यापि तद्दुर्वचनकलंकं प्रमार्ष्टुं समुत्सहंते । सहंते च सांप्रतिकजैनेतरविद्वन्निकरमुखनिःसृतनास्तिकवाममार्गीत्यादिदुर्वचनर्तामिस्रपरिहरणप्रवणादित्यायमानशास्त्रराशिं बिभ्राणा अपि तेभ्योऽवज्ञामिति बलवद्बालिशाधिक्यमाक्षिपति जैनानामस्मानतलस्पर्शपारावारे । यावन्नार्हतानवद्यतत्त्वस्वरूपमवभोत्स्यते आर्हतमतबहिर्भूतप्राज्ञसंदोहो न संप्रतिपत्स्यते तावन्नास्तिकादिजैनेतरविद्वन्निकरमुखनिःसृतदुर्वचनानां परिमार्जनं । अतो दुर्वचनपरिमार्जनाबाधितकारणं, जैनतत्त्वप्रदर्शनमेव जैनेतरविदुषां पुरस्तादस्मद्बुद्धिं परामृशति । ततएव दुर्वचनाहतचित्तस्य निम्नलिखितश्रेष्ठिवर्यसाहाय्यतः प्रादुर्भूतं किलेदं **सनातनजैनग्रंथमालाभिधं** कठिनतमं कार्यं । अत्र च तद्ग्रंथसाकल्यं प्रकाशपदतामुपलप्स्यते यत्स्यात् प्रधानतयार्हततत्त्वस्वरूपावबोधकं । आशासे शुभेच्छुविद्वत्परिकरो नियतमेतद्ग्रंथमालासमुद्घाटितग्रंथपारावारविलसिततत्त्वस्वरूपामलामृतं स्वात्महितावाप्तिसमीहया लेक्ष्यते । नोपेक्ष्यते च नास्तिकाद्यविनीतजनप्रलपितदुर्वचनकक्षां समाश्रित्य पावनमिदमार्हतमतं, आत्माहितसंपादनप्रवणरागद्वेषौ च कृक्ष्यते । आर्हतमतपथगमनशालिनामपि पुरस्तादास्माकाभ्यर्थनेयं यत्तेऽपि दुर्वचनपरिमार्जनकारणार्हततत्त्वोपदर्शनप्रयासाकुलाः स्युः । सांप्रतं प्रथमांके, **आप्तपरीक्षापत्रपरीक्षेति**ग्रंथरत्नद्वयमुपस्थाप्यते, एतद्ग्रंथमालातो विदुषां पुरस्तात् । प्रणेता किलैतद्रत्नद्वयस्य स्याद्वादपतिर्विभुः**श्रीविद्यानंद**स्वामी । महात्मायं कदा कुत्र कतमं पत्तनमात्मीयवैदुष्येण विभूषयामासेत्यवगमिष्यति पाठकपरिकरो महोदयस्यैतज्जीवनविषयकोल्लेखनविलोकनतः । कीदृशमेतद्वैदुष्यं जैनतत्त्वस्वरूपं च कीदृशमिति प्रकटीकरणाय न व्यतीमो वयं विफलं स्वीयं समयं, विज्ञास्यते स्वयमेव विद्वत्सदोहः, एतन्महोदयकरविलसितग्रंथद्वयभरिततत्त्वस्वरूपामृतपानतएव । महात्मैतत्करविलसितभाष्यभूता**ष्टसहस्री श्लोकवार्तिका**दिविविधग्रंथसंदोहदिवाकरोऽपि विद्योतते जैनधर्ममेनं । संदोहेऽस्मिन् केचन ग्रंथा मुद्रणपथमानीता आनेष्यंते च केचनाविलंबितकालएवेति नात्र संशीतिः । संतुष्यति ग्रंथानिमान् विलोक्य प्राज्ञपरिकरः इति दृढीयसी विश्वस्तिश्च ।

न हि वारणपर्याणं वोढुं शक्तो वनायुजः ।

इति नीतिविद्वचनानुसरणसरणिप्रवेशे प्रखरवैदुष्यमार्तंडमयूखनिकरसकलभुवनविद्योतकविभुः **श्रीविद्यानंदी** क्व, क्वाहं ज्ञानलवानंतभागेनापि विरहितात्मा मूढधीः इति दुरवबोधग्रंथरत्नद्वयसंपादनाय न वरी-

वर्ति सामर्थ्यलेशोऽपि मयि । तथापि प्रखरधार्ष्ट्यवशंवदात्मतया श्रीमत्प्रकाशकमहोदयैर्मद्बालसमारोपितभारतया चारोपीदं कार्यं मया । मौर्ख्यं मामकीनमनवगणयमानोऽवगच्छमानश्च प्राथमिकं कार्यमिदं नियतं क्षमिष्यते विद्वत्परिकरो बहुत्रात्र मत्स्खलितविलोकनात्, इति विराजते प्राज्ञप्रवरसन्निकृष्टे विनतिततिर्महती

पूज्यपादश्रीमन्मत्सहोदरादिचक्षुरादिरुङ्निकरकारणकलापे समुपस्थिते मदनुपस्थितावनुष्ठितं भूरिसाहाय्यमेतद्ग्रंथसंशोधनानेहसि महनीयविद्वद्वरपंडितलालारामैस्ततोऽस्म्यहमनुग्रहभाजनं चिरमुक्तपावनात्मनां ।

उस्मानाबादमंडनायमानश्रेष्ठिवर्यश्रीमद्बालचंद्रकस्तूरचंद्रात्मजश्रीमन्नेमिचंद्रप्रवादिभिरार्हतमतसमुद्धरणाय चाविर्भावाय तदनवद्यतत्त्वस्वरूपं भुवि, ग्रंथरत्नद्वयप्रकाशाय साकल्येन स्वकरसंपादितपवित्रद्रव्यव्ययमकृत तेषामयं महानुग्रहः । प्रार्थ्यते चेमे पुरस्तादापीत्थमेवोपकृतये सकलजनहितंकरायै ।

उपाध्यायमहनीयपदविभूषितमित्रवरश्रीमत्पण्डितवासुदेवनेमिनाथप्रेषितैकाप्तपरीक्षाप्रतिमूर्तिर्मत्पार्श्वे । सा च प्रायोतीवशुद्धासीत्ततएव मुद्रितं किलाप्तपरीक्षाभिधं महद्रत्नमित्येतदनुष्ठितसाहाय्याय चिरमनुगृहीतोऽस्मि श्रीमदुपाध्यायानां ।

ईडरपत्तनभारतीभवनादप्येतद्ग्रंथमुद्रणसाहाय्याय पुस्तकद्वयं समुपलब्धं तच्च शुद्धतममासीत् । पुरातनकरविलसितग्रंथनिकरानुस्वारप्रवणपरिपाटीविलोकनतो ग्रंथमालैतद्विलसितग्रंथसाकल्ये पंचमाक्षरमुपेक्षमाणैरस्माभिरनुस्वारसत्कृतिरेवाकृत भूरितया ।

प्रस्तावनोल्लेखे समुत्तरनिबंधसंकलने संपादने चैतद् ग्रंथरत्नद्वयस्य यद्यभूत्कुत्रापि मात्राक्षरादिस्खलितं मामकीनं तन्नियतं क्षमार्हमेवेति मुहुर्विदुषां पुरस्ताद्विनतशिरसाभ्यर्थना ।

काशी
भाद्रपदकृष्णा प्रतिपत्
वीरनिर्वाण संवत् २४३९ ।

विदुषामनुचरो—
गजाधरलालजैनः ।

ॐ

ग्रंथकर्तुः

स्याद्वादविद्यापतिश्रीविद्यानंदस्वामिनः

परिचयः ।

(जैनहितैषितः समुद्धृतः)

नैकविधप्रखरपाटवनिकरकोविदसाक्षरसंदोह !

विदितमेवैतन्निखिलकलाधुरीणानां श्रीमतां विदुषां यद्दर्शनन्यायाद्यनेकविषयपारगामीनि भूयांसि विद्वद्रत्नानि परिभूषयांचक्रिरे रत्नगर्भेत्यन्वर्थसंज्ञां बिभ्रतीमिमां वसुंधरां । तत्र समुपालेभे दिगंबरजैनसंप्रदाये दार्शनिकनैयायिकादिविद्वत्परिपाट्यां दार्शनिको नैयायिकश्च श्रीमद्**विद्यानंदी विद्यानंदस्वामी** वा प्राकर्ष्येण विश्रुतिं। वैदुष्यं खल्वेतस्य महोदयस्यानन्यजनसंभव्येव समजनिष्ट । अद्याप्येतत्करसरोरुहलालितविविधविषय सुगंधभरितानेकग्रंथसमुदयमारुतो व्याप्नोति तत्कीर्तिगंधं सर्वासु दिक्षु । भविष्यति च यावद्दर्शनन्यायादि विषयसत्कृतिः संसृतौ व्याप्स्यत्येव तत्कीर्तिगंधमभितः स हि—

पात्रकेसरीति ।

महात्मनः किलैतस्य विद्यानंदिस्वामिनः पात्रकेसरिसंज्ञयापि भुवि विश्रुतिः परावर्तिष्ट अभिमतिरियं किल विषयेऽस्मिन् भूयसां विदुषां यत्पात्रकेसरीत्यनवद्यसंज्ञां दधानोऽपर एव कश्चित्समजनि विद्वान्, किंतु निम्नलिखितप्रमाणपरिपाट्यावसीयते यत् पात्रकेसरीत्यपरनामभाग् **विभुर्विद्यानंद** एव संवृत्तो नान्यः ।

सम्यक्त्वप्रकाशग्रंथे समुद्घोषितमेकत्र—

"तथा श्लोकवार्तिके विद्यानंद्यपरनामपात्रकेसरिणा यदुक्तं तच्च लिख्यते तत्त्वार्थश्रद्धानं सम्यग्दर्शनं, ननु सम्यग्दर्शनशब्दनिर्वचनसामर्थ्यादेव सम्यग्दर्शनस्वरूपनिर्णयादशेषतद्विप्रतिपत्तिनिवृत्तेः सिद्धत्वात्तदर्थे तल्लक्षणवचनं न युक्तिमदेवेति कस्यचिदारेका तामपाकरोति ।

अत्र संदर्भे श्लोकवार्तिकप्रणेता विद्यानंद एव सूचितः ।

किं च श्रवणबेलगुलपत्तनमंडनायमान**श्रीदौर्बलिजिनदासशास्त्रि**विहितग्रंथसंग्रहे यो हि ताडपत्रोपरिखचितादिपुराणग्रंथस्तद्विप्पण्यामपि पात्रकेसरिसंज्ञां दधानो विभुर्विद्यानंद एवेत्युद्घोषितः ।

अपरंच **श्रीब्रह्मनेमिदत्त**करकमलकलित**कथाकोष**विलसितपात्रकेसरिकथातोपीत्येवानुमीयते परापरविचारपरिपाट्या, यदुल्लेखः स हि विद्यानंदस्यैव नापरस्येति ।

अन्यच्च **श्रीमद्वादिचंद्रसूरिणापि** स्वकरकलित**ज्ञानसूर्योदय**नाटकतुरीयांके पात्रीभूतयाष्टशल्याख्यया स्त्रिया पुरुषं प्रति ख्यापितः, यत्—

"देव ततोहमुत्तालितहृदया श्रीमत्पात्रकेसरिमुखकमलं गता तेन साक्षात्कृतसकलस्याद्वादाभिप्रायेण लालिता पालिताष्टसहस्रीतया पुष्टिं नीता । देव ! स यदि नापालयिष्यत् तदा कथं त्वामद्राक्षम् ।

अयमाकूतः किलैतस्य संदर्भस्य यदस्ति श्रीमद्भट्टाकलंककरनिर्मि**ताष्टशती**संज्ञको दुरवबोधोग्रंथः, तदनवद्यतात्पर्यमनवगच्छमाना कियंतो विद्वान्सः मानपित्तज्वरवशंवदात्मतयानवद्यमपि तत्तात्पर्यक्षीरं विप-

रीतमेवांगीकुर्वाणाश्च कुपिता संबभूवुः आचक्रमुश्च तदुपरि । विलोक्य तदविनीतवृत्तिमिमां श्रीमद्विद्यानंदिप्रभुः विरचयामास तदाशयं समंजसतया विशादीकुर्वाणाष्टशतीसंज्ञकं भाष्यग्रंथं । अतोनुमीयते श्रीमदष्टसहस्रीरचयिता पात्रकेसरीत्यपराभिधानो विद्यानंदस्वाम्येवेति ।

अन्यच्च **हुमचा**नगरशिलालेखोद्धृतचरमवाक्यतोऽपि विद्यानंद्येव पात्रकेसरीति विनिश्चीयते । इति प्रमाणपंचकेनावगम्यते निस्संशयं किलैतद्विद्यानंद्येव पात्रकेसरीत्यपराभिधानो नापर इति ।

विज्ञायते किलैतदस्माभिर्यद्यावद्विदांवरोयं महात्माहतदीक्षादीक्षितो नाभूत्तावदेव पात्रकेसरीत्यभिहितिमधत्त । आर्हतपथानुगामिसमये तु निखिलजनहृदयानंददां विद्यानंदसंज्ञामभार्षीत् अतएव श्रीब्रह्मनेमिदत्तमहोदयेनैतदार्हतपथानुगामित्वोल्लेखे यावन्नाजन्ययं महात्मा जैनमार्गानुगामी तावत्पात्रकेसरीत्यभिधया विज्ञापितः । जैनधर्मदीक्षादीक्षितत्वे तु विद्यानंदिनाम्नेति तत एव महात्मायं पुरातनस्वीयनामोल्लेखनानावश्यकतामवगच्छमानो नाविर्भावयांचक्रे पात्रकेसरीत्यात्मीयं पाराचीनं नाम कुत्रापि स्वकरकलितग्रंथसंदोहे ।

विभुरयं विद्यानंदी समजनि खलु नंदिसंघस्याचार्य इत्यनुमीयते । न खलु निश्चयेन प्रतिपादयितुं शक्यते । विशुद्धात्मनः किलैतस्य दीक्षाचार्यः कः कश्चोपाध्यायपदाधिरुढोऽभूदिति न समंजसतयावसीयतेऽस्माभिः । कृतमेऽपि स्वकररचितग्रंथे समुल्लेखोऽपि न कृतोनेन स्वामिना स्वगुरुपरंपरायाः ।

पात्रकेसरिकथा ।

भट्टारक श्रीमत्प्रभाचंद्रब्रह्मनेमिदत्ताभ्यां या स्वरचितकथाकोशग्रंथे पात्रकेसरिणः कथा विलिखिता ततएव किंचिद् विज्ञायते न ततोऽधिकं किमप्यनवद्यप्रतिभस्यैतस्य विदुषो जीवनेतिहासे समीचीनतयावगम्यते खेदयति किलाऽस्मद्देशीयेतिहाससामिग्रयभावोयमस्मन्मनः ।

वरीवर्ति पात्रकेसरिणः किलेत्थं कथा—

शास्तिस्म कश्चिन्मगधदेशांतोऽहिच्छत्रपुरेऽन्वर्थसंज्ञां बिभ्राणोऽवनिपालोनामावनिपालः तस्य च परिषदि वेदवेदांगादिविविधविषयपारावारपारदर्शिनः शतपंचकब्राह्मणविद्वद्रत्नानि समभूवन् । राजधान्यां च तस्यावनिपालस्य राजतेस्म कश्चिन्नानाविधमणितोरणादिविभूषितः **श्रीपार्श्वजिनेंद्रमंदिरः**—अथकदाचित्ससजनि कुतूहलस्तेषां विदुषां पार्श्वजिनालयं विलोकयितुं । यदा च सर्वे ते तं विलोकयितुमगमन् तदा तत्र पार्श्वजिनाभिमुखीभूय जिनभक्तिवशंगतश्चारित्रभूषणाभिधानः कश्चित्परमर्षिः देवागमस्तोत्रं पठन् दृष्टिगोचरतां समापतत् । समाकर्ण्य च तन्मुनिलपननिःसृतस्तोत्रमवोचत्तदन्यतमाविद्वदग्रणीः श्रीमत्पात्रकेसरी विदांवरः । मुने ! समंजसतयाभाति किल भवल्लपननिःसृतं स्तोत्रमिदं अनुगृह्य मुहुः श्रावयतु पापठ्येदमिति श्रुत्वा भक्तिवशंवदतद्विज्ञवचनं, यतिभंगादिदोषं परिहरमाणः स मुनिः पुनरपि तत्स्तोत्रं पठितुमारेभे विद्वान् पात्रकेसर्यपि तत्तात्पर्यं हृदयस्थं समीहमानो भक्त्या शुश्राव च । यदा च तत्स्तोत्रं परिपूर्णतामगमत् तत्तात्पर्यं च श्रीमत्पात्रकेसरिबुद्धिस्थमभूत्, तदात्वे एव तस्य विदुषः प्रबलदर्शनमोहकर्मणः क्षयोपशमः संप्रत्यपादि । विचचार च स्वचेतासि स यज्जीवाजीवादितत्त्वस्वरूपोपवर्णनमार्हतमार्गानुसार्येवानवद्यं नान्यस्येति, स्थिते सत्येवं प्रत्यहमेतन्महोदयस्य, आर्हतमततत्त्वबुभुत्सालता वृद्धिं समुपागच्छत् । स्वसहचारिभिः सह परावृत्य च जिनालयान्महात्मायमेनमेवविषयं परामर्ष परंतु रजन्यां स्वशयनावासे शयानस्य तस्य विदुषः साहसिकोयं विचारो बुद्धौ समारुरोह यत् यद्यप्यार्हमते प्रमाणपद्धतिः समीचीना किंत्वनुमानप्रमाणलक्षणं किमभिमतमिति नावगतं, चिंतापारावारे निमग्ने सत्येवं तस्मिन् विदुषि अवधिबलतस्तत्तात्पर्यं जानती भगवती पद्मावती पुरस्तात्समुपस्थायावोचत् प्राज्ञप्रवर ! नैवंविधचिंताभाजनमसि । भगवत्पार्श्वदर्शनसमयएवैतच्छंसीतिपरावृत्तिर्भविष्यति भवतां । विज्ञास्यते चानवद्यानुमानस्वरूपमित्युक्त्वांतरधात् गत्वा च जिनालये पार्श्वजिनफणमंडपोपरि विलिलेख च ।

---

१ ब्रह्मचारी नेमिदत्तोयं समजनि किल भट्टारकनेमिचंद्रांतेवासी । अभूदयं १६ तमायां शताब्दौ । भट्टारकप्रभाचंद्रकरकलितकथाकोशस्यानेनैव ब्रह्मचारिणा पद्यानुवादोविहितः ।

"अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किं । नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किं" ॥

इत्यनवद्यपद्यम् ।

अपरस्मिन्नहनि विद्वान् स हि पात्रकेसरी प्रत्यूषसि संप्रत्यगाद्भगवत्पार्श्वजिनमंदिरे । परावृते च तस्य महात्मनोऽगम्यसंशीतिभर्गवत्फणोपरिदृष्टिसंपाते श्रीमद्देवीशयकुशेशयखचितानवद्यपद्यं पठित्वा । निर्धारितं चैतत्तेन यदन्यथानुपपन्नत्वरूपव्याप्तिज्ञानमेवानवद्यानुमानं, रीत्या किलानया संप्रत्यभूत्तद्भदीयं महती विश्वस्तिर्यत्, भगवन्नर्हन्नेवाप्तस्तल्पनाविर्भूतधर्मएव लोकद्वयसुखावहो महान् धर्मः, तदनु श्रीपात्रकेसरिविदुषा स्वसहचारिणां पुरस्तादष्यार्हतधर्मप्रशंसा कृता उपदिष्टाश्च ते । तदुपदेशमश्रोतुकामा द्विषंतश्च शास्त्रार्थमार्गेण पराभूता तथा च पर्यन्ते श्रीमत्पात्रकेसरिवैदुष्यदिवाकरस्य पुरस्तादात्मीयवैदुष्यं दीपकल्पं विज्ञाय सहावनिपालभूपतिना सर्वे ते अनवद्यार्हतधर्मसेविनः संप्रतिपेदिरे । कथयानया परमिदमेवानुगम्यते विभुः श्रीविद्यानंदी मगधराज्यांतर्गताहिच्छत्रपुरनिवासी ब्राह्मणकुलोत्पन्नश्चासीत् जैनधर्मधारणात्प्रागयं महात्मा नैयायिकमीमांसकादिवैदिकाद्यन्यतमधर्मानुयायीचाभूत् । संप्रत्यपि **अहिच्छत्रस्थानं अहिक्षितिपार्श्वनाथ**ाभिधया भुवि वर्तते **रामनगरोप्यस्यै**वापराभिधा । स्थानमिदमुत्तरप्रांते **बरेली**पत्तनासन्नेऽस्ति । श्रीपार्श्वजिनेंद्रायामलकेवलबोधावाप्तिरत्रैव समजनि । अकृत च कमठासुरोऽत्रैवानल्पोपसर्गं पार्श्वजिनोपरि । निवृते च छत्रीभूयधरणेन्द्रेण तत् अतोऽस्तीदं जैनानां पावनं क्षेत्रं । आमनंति च भक्तिविनतास्ते तत् । एतत्क्षेत्रस्थपार्श्वजिनालयतो समस्ति भुवि महती विश्रुतिः क्षेत्रस्यास्य । अभूदत्र कश्चिदवनिपालो भूपालः (?) प्रत्यगात्तस्य राजधान्यात्मतां क्षेत्रमिदमितिनिर्णयाय न वरीवर्ति पार्श्वेऽस्माकं किमपि बलवत्तरं गमकं ।

विद्यानंदिनिवासस्थितिः ।

विभुर्विद्यानंदी उत्तरप्रांतमंडनएवासीदित्येवोद्बोध्यते कथयानया किं तु दक्षिणात्यकार्णाटिकग्रंथकर्तृभिरेव तज्जीवनविषयकोल्लेखविशेषकरणात् दक्षिणकर्णाटकशिलालेखेष्वेव तदुल्लेखविशेषदर्शनाच्च निष्प्रत्यूहं विज्ञायतेऽस्माभिर्यदयं विद्वान् दाक्षिणात्यः कार्णाटिक एव वासीत् । किं च यस्मिन् समये श्रीमानयं परजनहितप्रतिपादनतया दाक्षिणं कार्णाटिक वा भारतवर्षभागमलंचकार तदात्वे एव स हि भारतवर्षभागः शंकरभट्टमंडनमिश्रप्रभृतिवैदिकविदुषां जैनविदुषां चासीद्विवादालयं, **श्रीमद्भट्टाकलंकप्रभाचंद्रजिनसेनमाणिक्यनंद्यादिजैनाचार्या** अपि तत्समकालीना एव समभूवन् स हि समयः प्रदेशश्च तथाविध एवासीत् यदत्र विद्यानंदिसदृशप्रखरविद्वद्भिरेव भवितव्यं ।

कर्णाटकदेशस्थ**शिमोगा**प्रांतांतर्गतहुमचाग्रामप्राप्तशिलालेखे येषां येषां भूपतीनां सभासु विभुर्विद्यानंदी प्रखरविद्वद्भिः शास्त्रार्थपथा विजयमवापेत्युल्लेखो वर्तते ते सर्वे भूपतयो दाक्षिणात्या कार्णाटिकाश्चासन्निति प्रमाणेनापि दाक्षिणात्येन कार्णाटिकेनैव वा भाव्यं श्रीमद्विद्यानंदिनोत्यनवद्यं निश्चीयते ।

हुमचानगरप्राप्तशिलालेखाभिप्रायमिदं ।

१ । नजराजपट्टणमहीपति**नंज**परिषदि **श्रीमद्विद्यानंदिस्वामिना नंदनमल्लिभट्ट**ाभिधोविदग्धो विहितानवद्यविवादमर्यादया विजिग्ये ।

२ । हृद्यानवद्यपद्यैकप्रभावेण **श्रीशतवेंद्र**नरपतिसभायां **श्रीविद्यानंदि**विभुना निखिलश्रोतारो विस्मयपदमानीताः ।

३ । **शल्वमल्लि**भूपतिसंसदि स्वीयामलवचनपाटवपराभूतवादिविदुषः क्षमतेस्म विद्यानंदिप्रभुः ।

४ । **सलूवदेव**पृथ्वीपतिपरिषदि नैकविधपरवादिमंडललपनविनिर्गतसिद्धांतसंदोहं सिद्धांताभासतयाऽनृतीकृत्यार्हतमतं प्रभावितं ।

५ । **विलगीपत्तन**मंडननरपति**नरसिंहसंसदि** समुद्बोधितः किल प्रभावो जैनमतस्य **श्रीमद्विद्यानंदि**प्रभुणा ।

६। **कारकलनगरस्थभैरवाचार्य**राजपरिषदि जैनमतगौरवं प्रदर्श्य तत्प्रभावं विजजृंभे **श्रीविद्यानंदिप्रभुः**।

७। **विदरीनगर**निवासिभावुकलोकेभ्यः श्रीमद्विद्यानंदिप्रभुणा स्वधर्मज्ञानप्राकर्ष्येण सम्यक्त्वा वाप्तिः कारिता।

८। यस्य **नरसिंहराजात्मजकृष्णराजस्य** संसदि नमातिस्म नरपतिसहस्रकं तस्यां परिषदि हेविद्यानंदिप्रभो त्वया समुद्दीपितो जैनधर्मः पराभूताश्च मत्तपरवादिनः।

९। **कोप्पना**द्यनेकतीर्थक्षेत्रेषु कारयित्वा द्रव्यवैपुल्यव्ययं हे **विद्यानंदि**प्रभो त्वयार्हतधर्मः प्रभावितः। भूषितश्च श्रवणबेलगुलनगरस्थजैनसंघः कनकवसनादिप्रदापनतः। विधाय च **गैरसप्पानगरासन्न**मुनिसंदोह संघं स्वशिष्यमंडलं स विभूषितः। **गौतमभद्रबाहुविशाखाचार्योमास्वामिसमंतभद्राकलंकादि** विद्वान्सो विजयंता भुवि **सामंतभद्रभाष्य**मंगलाचरणदेवागमोपरि विरचितं भाष्यं **श्रीमदकलंकदेवेन**। समंजसतया**प्तमीमांसा**ग्रंथविबोधयित्रे **श्रीमद्विद्यानंदिने** नमः। **श्लोकवार्तिक**प्रणेता कविचूडामणिः तार्किकसिंहो विद्वान् यति**र्विद्यानंदी** चिरंजीयाद्भुवि धरणीधरसन्निकृष्टोग्रतपस्वी ध्यानी मुनिः **पात्रकेसर्येव** समजनिष्ट नान्यः। ४६ तमः शिलालेखः।

इतोऽधिकमिदमपि विमर्शणीयं यत् (यथा समयनिर्णीतौ सत्यां विज्ञाप्येत पुरस्तात्) **अकलंकविद्यानंदिस्वामिनौ** समकालीनावेव समजनिषातां॥ श्रीमदकलंदेवकरविरचिता**ष्टसत्य**भिधग्रंथस्योपरि भाष्यं च वरीवर्ति **श्रीमद्विद्यानंदि**विरचिता**ष्टसहस्र्याख्यं**। यद्ययं महात्मा मागधएव भवेत् दाक्षिणात्यः कर्णाटिकोवा न स्यात् तदा नैवं सम्भाव्येत यद**ष्टशत्यु**पर्यचिरकालएवैतस्य महात्मनो**ष्टसहस्र्याख्यं** भाष्यं स्यात् किं तु दाक्षिणात्यत्वे कार्णाटिकत्व एववैतस्य महात्मनस्तथाविधा संभावना। निश्चयेन त्विदमेवावसीयेत यदयं विद्यानंदी विभुःअकलंकदेवशिष्यकल्पसहचर एवाभूत्तत एवानेनाविलंबितकाल एव तथाविध**मष्टशत्यु**पर्य**ष्टसहस्र्य**मिधं भाष्यं व्यरचि।

विभुरयं विद्यानंदी प्राङ्मागधः पश्चात् वादकंडूयनवशंवदात्मतया दक्षिणं कर्णाटकं वा देशं सनाथीकृतवान् इत्यपि बलवती संभावना भवितुमर्हत्यतो मागधो नासीदयं प्रभुर्दाक्षिणात्यः कार्णाटिक एव वेत्यत्रापि न किमप्यनवद्यं गमकं। नात्रापि किमपि बलवत्तरं गमकं **कथाकोश**लेखमुज्झित्वा यदयं महात्मा मागधएवासीदिति। वस्तुतस्तु कथाकोशलेखोऽपि न प्रमाणपदमधिरोहति जनश्रुतिकुक्षिप्रविष्टत्वात्तल्लेखस्य। यतो येन ग्रंथकर्त्रा पात्रकेसरिकथा विलिखिता स समजनि शतसप्तकवर्षाणां पश्चात् श्रीविद्यानंदिप्रभोः, सा च कथा जैनधर्मप्रभावनां लक्ष्यीकृत्यैव किंवदंत्या विलिखिता नेतिहासदृष्ट्या (यदि भवेदितिहासदृष्ट्या कथं नोल्लिखितस्तेन श्रीविद्यानंदिसंवत्सरादिनिर्णयः) अतो श्रीमद्विद्यानंदिप्रभोर्मगधदेशस्थितिनिर्णये नेयं विलिखिता कथा प्रमाणपदमंचति ततोयं विद्यानंदी महात्मा मागधो दाक्षिणात्यः कार्णाटिको वेति विषयः सर्वथा संशयापन्नऐवति॥

समयविचारः।

विभुरयं महात्मा विद्यानंदी कदा पावनात्मीयजीवनेन. भारतभूमिं कामयांचक्रे इति न निर्णिन्येयं महोदयः कतमेऽपि स्वकरकलितग्रंथे। परंतु निश्चीयते कियद्भिः प्रमाणैर्यदयं प्रभुः ८ तमायाः स्त्रीष्टाब्देरतेः आदौ च ९ तमायाः शताब्देः समजनिष्ट।

तानि चेमानि कियंति चित्प्रमाणानि।

स्वकरविलसिताष्टसहस्र्याख्यग्रंथे **श्रीमद्विद्यानंदिप्रभुणा भर्तृहरि**रचितवाक्यपदीयग्रंथस्य पद्यमिदमुद्धृतं।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते अनुविद्धमिवाभाति सर्वं शब्दे प्रतिष्ठितं ॥ इति ।

श्रीभर्तृहरिविदुषः प्रोफेसरोपाधिविभूषितश्रीमत्पाठकप्रमुखविद्वद्भिः समयश्च ६९० तमक्रीष्टाब्दासन्नेऽवसितः ।

किं च चीनदेशनिवासी कश्चित् **हुएनसंग**ाभिधःपुरुषः ६२९ तमे क्रीष्टाब्दे विविधदेशसंदोहं विलोकयन् भ्रमन् भारतेऽयासीत् अवात्सीच्च ६३५ तमक्रीष्टाब्दपर्यंतं भारते, तेनापि स्वप्रवासोल्लेखे विलिखितः। यत् "संप्रति व्याकरणशास्त्रवैदुष्ये भर्तृहरेर्विदुषो महती विश्रुतिः" अतो निश्चीयते श्रीमद्विद्यानंदिप्रभुः ६९० तमक्रीष्टाब्दानंतरमभूत् ॥

स्वरचिताष्टसहस्र्यभिधे महति ग्रंथे **श्रीमद्विद्यानंदिप्रभुणा** प्रख्यातवेदांतिविद्वत्कुमारिलभट्टस्य **भट्टपदे**नोल्लेखःकृतः प्रैत्याख्यातश्च पदे २ तत्सिद्धांतः । कुमारिलभट्टसमयश्च ७०० तमक्रीष्टाब्दात् ७६० तमक्रीष्टाब्दपर्यंतं विनिर्णीतः अतस्ततोप्युनुमीयते विभुर्विद्यानंदी तत्समकालीनस्तदचिरकालानंतरं वा समञ्जनीति ।

सुरेश्वरेत्यपराभिधा मंडनमिश्रस्यैवासीदिति **चिद्विलासकृतशंकरदिग्विजयतो** विज्ञायते । स च सुरेश्वरोतेवास्यासीत् **प्रथमशंकराचार्यस्येति** नियतमेव । **आद्यशंकराचार्यस्य** कालश्च ७६० तमक्रीष्टाब्दात् ८३८ तमक्रीष्टाब्दपर्यंतं निश्चितःअतः सुरेश्वरस्य मंडनमिश्रस्य वायमेवकालइति मंतव्यं। मंडनमिश्रविहितोऽस्ति कश्चि**द्बृहदारण्यक**ाभिधोग्रंथस्तत्तृतीयाध्यायात्समुद्धृताः किलेमे निम्नलिखितश्लोकाः श्रीमद्विद्यानंदिप्रभुणा प्रत्याख्यातश्च **मिश्रसिद्धातः** । तदुक्तं बृहदारण्यवार्तिके—

आत्मापि सदिदं ब्रह्म मोहात्पारोक्ष्यदूषितं । ब्रह्मापि स तथैवात्मा सद्वितीयतयेक्ष्यते ॥ १ ॥
आत्मा ब्रह्मेति पारोक्ष्यसद्वितीयत्वबाधनात् । पुमर्थे निश्चितं शास्त्रमिति सिद्धं समीहितं ॥ २ ॥
त्वत्पक्ष्ये बहुकल्प्यं स्यात्सर्वं ज्ञानविरोधि च । कल्प्या विद्यैव मत्पक्षे साचानुभवसंश्रये ॥ ३ ॥

इति कश्चित् सोऽपि न प्रेक्षावान् ।

ब्रह्मा विद्यावदिष्टं चेन्ननु दोषो महानयं निरवद्ये च विद्याया आनर्थक्यं प्रसज्यते ॥ १ ॥

अमुना प्रमाणबलेनापि श्रीमद्विद्यानंदिसमयो मंडनमिश्रसन्निकृष्ट अर्थात् ८३८ तमक्रीष्टाब्दपर्यंतमेव निश्चेतुं पार्यते ।

अष्टसहस्रीपत्रपरीक्षयोः श्रीमद्विद्यानंदिना विश्रुतबौद्धविद्वद्धर्मकीर्तेरप्युल्लेखः[3] कृतः अजनिष्ट संखल्व प्राज्ञः सप्ततमायां शताब्दौ । उल्लेखश्च स ह्रीत्थं—

यदुक्तं धर्मकीर्तिना—

अतद्रूपं परावृत्तवस्तुमात्रप्रदेनात् । सामान्यविषयं प्रोक्तं लिंगं भेदाप्रतिष्ठिते ॥ १ ॥
अर्थोपयोगोऽपि पुनः स्मार्ते शब्दानुयोजनं । अक्षधीर्यद्यपेक्ष्येत सोर्थो व्यवहितो भवेत् ॥ २ ॥

किं चाष्टसहस्र्यां **दिङ्नागोद्योतकरप्रभाकर (प्रज्ञाकर) शवरस्वामिप्रभृतिविदुषा**मपि समुल्लेखः कृतः श्रीमद्विद्यानंदिप्रभुणा ।

आदिपुराणप्रणेत्रा भगवज्जिनसेनाचार्येणापि स्वकरविलसितादिपुराणे पात्रकेसर्यभिधया श्रीमद्विद्यानंद्युल्लिखितः तद्यथा—

भट्टाकलंकश्रीपालपात्रकेसरिणां गुणाः । विदुषां हृदयारूढा हारायंते ऽतिनिर्मलाः ॥

---

१ भावना यदि वाक्यार्थौ नियोगो नेति का प्रमा । तावुभौ यदि वाक्यार्थौ हतौ भट्टप्रभाकरौ ॥
कार्येर्थे चोदनाज्ञानं स्वरूपे किं न तत्प्रमा । द्वयोश्चेद्भेत तौ नष्टौ भट्टवेदांतवादिनौ ॥ अष्टसहस्री ।

२ विलोक्यतां बाम्बेरायलएशियाटिकसोसाइटीवाल्युमअष्टादशमपृष्ठे २३३ ।

३ पत्रपरीक्षायां धर्मकीर्तेः कीर्तिपदनोल्लेखः

आदिपुराणे प्रथमंपर्वणि ।

७६० तमशकसंवत्सरात् ७७० तमशकसंवत्सरमध्ये विरचितः किलादिपुराणः श्रीमद्भगवज्जिनसेनाचार्यैरित्यस्येकविधया [1]निश्चितिः अतोनुमीयते यत् ७६० तमशकसंवत्सरस्य अर्थात् ८३८ तमख्रीष्टाब्दस्य सांनिध्ये व्यस्तार्षीत् कीर्तिवल्ली श्रीमद्विद्यानंदिप्रभोः ।

श्रीमदकलंकविवृतां समंतभद्रोक्तमत्र संक्षेपात् । परमागमार्थविषयामष्टसहस्रीं प्रकाशयति ॥ १ ॥

इत्यष्टसहस्र्या दशमाध्यायस्यानेनपद्येन श्रीमद्विद्यानंदिनाष्टशतीकर्तुः श्रीमदकलंकदेवस्योल्लेखः कृतः । परीक्षामुखप्रणेता **श्रीमन्माणिक्यनंदिविभुः,** निम्नलिखितपद्येन श्रीमदकलंकदेवविद्यानंदिनौ सस्मार ।

सिद्धं सर्वजनप्रबोधजननं सद्योऽकलंकाश्रयं विद्यानंदसमंतभद्रगुणतो नित्यं मनोनंदनं ।
निर्दोषं परमागमार्थविषयं प्रोक्तं प्रमालक्षणं युक्त्या चेतसि चिंतयंतु सुधियः श्रीवर्द्धमानं जिनं ॥१॥

प्रथमाध्यायः ।

एवं **श्रीमत्प्रभाचन्द्रैरपि** श्रीमन्माणिक्यनंदिकररचितपरीक्षामुखभाष्यभूतप्रमेयकमलमार्तंडेऽनेकत्र श्रीविद्यानंदिनां समुल्लेखः कृतः तैरेव च स्वरचितश्रीन्यायकुमुदचंद्रोदये श्रीमद्भट्टाकलंकदेवस्याप्यनेनपद्येन समुल्लेखो विहितः ।

बोधः कोप्यसमः समस्तविषयं प्राप्याकलंकं पदं जातस्तेन समस्तवस्तुविषयं व्याख्यायते तत्पदं ।
किं न श्रीगणभृज्जिनेंद्रपदतः प्राप्तप्रभावः स्वयं व्याख्यात्यप्रतिमं वचो जिनपतेः सर्वात्मभाषात्मकं ॥

एवं **श्रीमज्जिनसेनाचार्यैरपि** अकलंकप्रभाचंद्रपात्रकेसरीतित्रयाणां विदुषामादिपुराणप्रारंभे संस्मृतिर्विहिता । इमे सर्वे विद्वच्छिरोमणयः समकालीना एवेति निर्धार्यतेऽस्माभिः प्रतिपादितोल्लेखसमष्ट्या । क्रमश्चैषां **अकलंकः, विद्यानंदी, माणिक्यनंदी, प्रभाचंद्रः जिनसेन** इत्येवं पर्यवस्यते । आदिपुराणनिर्माणानेहसि सर्वेषांखल्वमीषां विदुषां कीर्तिलताः, भूमंडले वितस्तरुरित्यप्यभिमतिः । श्रीमदकलंकदेवैः कुत्रापि विद्यानंद्याद्याचार्योल्लेखस्यांशस्याप्यकरणात् सर्वतः प्राक्त्वकलंकएव संप्रत्यपादि अभूच्चैतस्मायेव महनीयत्व सौभाग्यावाप्तिर्निखिलेष्वेष्विति प्रतीयते । समयश्चैतस्य महनीयस्य, राष्ट्रकूटवंशीयसाहसतुंग (शुभतुंग) नरपतिपरिषदि निम्नलिखितपद्यस्य प्रतिपादनात् अष्टमशताब्दावेवाङ्गीकृतः । श्रवणवेलगुलमाल्लिषेणप्रशस्तौ विलिखितं चैतत्पद्यं ।

राजन् साहसतुंग संति बहवः श्वेतातपत्रा नृपाः किंतु त्वत्सदृशो रणे विजयिनस्त्यागोन्नता दुर्लभाः ।
तद्वत्संति बुधा न संति कवयो वागीश्वरा वाग्मिनो । नानाशास्त्रविचारचातुरधियः काले कलौ मद्विधाः ॥

भूपति**श्रीसाहसतुंग**महोदयः **कृष्णराजा**भिख्ययापि भुवि समुपालेभे विश्रुतिं । नरपतिरयं ७ ५२–७७५ तमे ख्रीष्टाब्दे समजनिष्टेति दाक्षिणेतिहासे **श्रीडाक्टरभांडार**करमहोदयैः पर्यवसितमित्यतोऽपि निर्धार्यते श्रीमदकलंकदेवास्तित्वमष्टमशताब्दौ तदुत्तरार्धे वा प्रतिप्रद्यमानमलमकारीद्भारतं वर्षं निस्संशयं । तथा **बोधःकोपी**त्युपरिसमुद्घोषितपद्यतोप्येवं प्रतीयते यदभूच्छ्रीमत्**प्रभाचंद्रः श्रीमद्भट्टाकलं**कांतेवासी

---

१ विलोकयतु जैनमित्रकार्यालयबंबइद्वाराप्रकाशितविद्वद्रत्नमालायां जिनसेनगुणभद्राचार्यशीर्षकनिबंधे ।

२ ताडपत्रोपरिलिखितैका प्रतिमूर्तिरस्य ग्रंथस्य श्रवणबेलगुलमठे विद्यते ।

३ चंद्राशुशुभ्रयशसं प्रभाचंद्रकविं स्तुवे । कृत्वा चंद्रोदयं येन शश्वदाह्लादितं जगत् ॥४७॥

४ स्वकरविलसितप्रमेयकमलमार्तंडग्रंथावसाने निम्नलिखितपद्याभ्यां श्रीमत्प्रभाचंद्राचार्यैः श्रीमत्पद्मनंदिरत्ननंदिनौ स्वगुरू ख्यापितौ अतोनुमीयते यदयं महात्मा प्रभाचंद्रः प्राक् श्रीमदकलंकदेवचरणसान्निध्यमुपेत्य चाधीत्य विद्यां जग्राह श्रीमत्पद्मनंदिरत्ननंदिनोरासन्ने, आर्हतीं दीक्षां । ततः समजनिषातामेतन्महात्मनो दीक्षागुरू श्रीपद्मरत्ननंदिनौ अथवा पूर्वमकलंकदेवचरणसांनिध्ये विद्यामधीत्य पश्चादनयोः पार्श्वेऽध्यैष्टेत्यतोऽपि तयोरेतन्महात्मनोगुरुत्वमवगम्यते ॥

समुपादाच्च श्रीमदकलंकचरणपंकेरुहपरागप्रभावत एव जगत्यखर्ववैदुष्यं ॥ **प्रभाचंद्रैश्चा**कृत स्वकरविलसितग्रंथे श्रीमद्विद्यानंदिसमुल्लेखस्ततोनिर्धार्यते श्रीभट्टाकलंकप्रभाचंद्रयोरवांतर एव समयः श्रीमद्विद्यानंद्यस्तित्वस्य । एवं ७५३ तमखीष्टाब्दात् (नरपतिकृष्णराजराज्यप्रारंभतः) ८३८ तमादिपुराणविनिर्णीतसमयावांतरे, श्रीभट्टाकलंकविद्यानंदिप्रभृतिविदुषामवसीयते कालः ।

यदा विरचितः श्रीमत्प्रथमजिनसेनैर्हरिवंशपुराणो न तावदुपालेभिरे श्रीमदकलंकविद्यानंदिप्रभृतिसूरिणो भुवि विश्रुतिं । अथवा न व्यरचयिषतेमे तावदष्टशत्यष्टसहस्र्यादिप्रसिद्धग्रंथान् । यतो हि हरिवंशपुराणप्रारंभे स्वपूर्वकालीन**सिद्धसेनसमंतभद्रदेवनंद्याद्याचार्यान्** स्तुवतः, कुर्वतश्च स्तवनं तदात्वे यत्किंचिद्ग्रंथरचनानिर्माणकृताभ्यासस्य श्रीमद्द्वितीयजिनसेनस्य, नाकलंकविद्यानंदिप्रभृतयो विद्वान्सः स्तुतिपथमगुः श्रीमत्प्रथमजिनसेनस्येत्यतोप्यनुमीयते यद्यदीमौ श्रीमद्भट्टाकलंकविद्यानंदिनौ श्रीमत्प्रथमजिनसेनसमये ग्रंथकर्तारौ प्राभूतां तदा हरिवंशपुराणप्रारंभे नियतं स्तुतिभाजनतामुपालेभाते । हरिवंशपुराणनिर्माणसमयश्च ७८४ तमे खीष्टाब्दे । ततोकलंकविद्यानंदिनोः विशेषविश्रुतिसमयो ग्रंथप्रणेतृत्वसमयश्च ७८४ तमखीष्टाब्दानंतरमेव निर्धारणीयं ।

भर्तृहरिकुमारिलेतिस्वकरविलसिते निबंधद्वये **प्रोफेसरश्रीमत्पाठकैः । इंडियनमेडिकलर्जि-**

गुरुः श्रीनंदमाणिक्यो नंदिताशेषसज्जनः । नंदताद्दुरितैकांतरजो जैनमतार्णवः ॥ ३ ॥

श्रीपद्मनंदिसैद्धांतशिष्योऽनेकगुणालयः । प्रभाचंद्रश्चिरं जीयाद्रत्ननंदिपदे रतः ॥ ४ ॥

२ इति श्रीभोजदेवराष्ट्रे श्रीमद्धारानिवासिना परमपरमेष्ठिप्रणामार्जितामलपुण्यनिराकृतकर्ममलकलंकेन श्रीमत्प्रभाचंद्रपंडितेन निखिलप्रमाणप्रमेयस्वरूपोद्योतपरीक्षामुखपदं विवृतमिति प्रमेयकमलमार्तंडप्रशस्तौ विलसितमित्यतो निर्धार्यते यदभूदयं प्रमेयकमलमार्तंडकर्ता श्रीमत्प्रभाचंद्रो धाराधीशश्रीमद्भोजराजास्तित्वसमये । कालश्चैतन्नरपतेः १०२२ तमखीष्टाब्दात् १०५६ तमखीष्टाब्दांतं निर्धारितः कालेऽस्मिन्नेव शशसायं नृपतिर्भुवि । अतएव न्याय**कुमुदचंद्रोदय**प्रणेतृतः पृथगयं **प्रभाचंद्रः** समजनीत्यनुमीयते ॥ यतः—

चंद्रांशुशुभ्रयशसं प्रभाचंद्रकविं स्तुवे । कृत्वा चंद्रोदयं येन शश्वदाल्हादितं जगत् ॥

श्रीमज्जिनसेनाचार्यैरमुना पद्येन चंद्रोदयप्रणेतुः, आदिपुराणे स्तुतिरकृत निर्माणसमयश्चादिपुराणस्य ८३८ तमखीष्टाब्दसान्निध्ये परंतु नांचत्यनुमानमिदं प्रमाणपदं प्रमेयकमलमार्तंडन्यायकुमुदचंद्रोदययोरेकस्यैव कर्तुर्निर्धारणात् मार्तंडचंद्रोदययोरेकएव कर्तेति चंद्रोदयप्रारंभलिखितपद्येनानेन सर्वथा स्पष्टीभवति ।

माणिक्यनंदिपदमप्रतिमप्रबोधं व्याख्याय बोधनिधिरेष पुनः प्रबंधः ।
प्रारभ्यते सकलसिद्धिविधौ समर्थे मूले प्रकाशितजगत्रयवस्तुसार्थे ॥

इत्यतो विज्ञायते यदष्टमखीष्टाब्दौ वृद्धभोजेत्यपराभिधां दधानोऽपरभोज एवाजनिष्ट धारापुर्यां ।

द्वितीयभोजकालीनोभूत्कश्चित्प्रभाचंद्रः प्राज्ञवर इत्यत्र प्रमेयकमलमार्तंडभूमिकोल्लेखनसमये प्रादर्शि प्रमाणमिदं विद्वद्वरश्रीमत्पंडित**वंशीधर**शास्त्रिभिः यत् प्रमेयकमलमार्तंडे श्रीमन्नेमिचंद्रसैद्धांतिकचक्रवर्तिविरचिताः समुद्धृताः कियत्यो गाथाः । नेमिचंद्रसिद्धांतचक्रवर्ती च १००० तमे श्रीमन्नरपतिचामुंडरायास्तित्वसमये तत्समयसांनिध्ये वा समुदपादि । कन्नडचामुंडरायपुराणे श्रीमच्चामुंडरायनरपतिना (८९९ तमे खीष्टाब्दसमये, उत्तरपुराणप्रणेता) श्रीमद्गुणभद्रस्वामी प्रास्तुत । उत्पतिश्च श्रीमच्चामुंडरायभूपतेः ९७८ तमे खीष्टाब्दे समजनिष्टेत्यतः, १००० तमे खीष्टाब्दे श्रीमच्चामुंडरायास्तित्वमभूदित्यत्र न कापि संशीतिः । परंतु प्रमेयकमलमार्तंडसमुद्धृतगाथा न श्रीमन्नेमिचंद्रस्वामिस्वकरविलसिताः किंतु परंपरागताएव प्रमेयकमलमार्तंडवन्नेमिचंद्रैरपि स्वकरविलसितग्रंथसंदोहे ताः समुद्धृताः, अतः प्रमेयकमलमार्तंडचंद्रोदयरचयिता प्रभाचंद्र एक एव भुवि समुदपादि व्यरचि च मार्तंडानंरं चंद्रोदयं स इति दृढीयान् प्रत्ययः ।

काभिधे ग्रंथे । एम. ए. इत्यादिविविधपदविभूषितकालिकताकालेजाधिष्ठातृमहोमहापाध्याय **श्रीशतीशचंद्र** विद्याभूषणैश्च स्याद्वादपतिश्रीमद्विद्यानंदास्तित्वसमयः ८०० तमस्त्रीष्टाब्दसान्निध्य एव विनिर्धारितः ।

अतः प्रमाणपरिपाट्यानयाऽष्टमशताब्दस्य शेषार्द्धः प्रारंभश्च नवमशताब्दस्येति यथाविधः समयोऽस्माभिः पूर्वं विज्ञापितः सएव श्रीविद्यानंदस्वाम्यस्तित्वसमयः प्रमाणपदमधिरोहति न तत्र कापि संशीतिः । समजनि खल्वयं समयो दाक्षिणे कार्णाटिके वेतिहासेऽतीवमहत्वस्य धर्मक्रांतिश्चाभून्महती किल भुवि समयेऽस्मिन् ।

जैनवैदिकबौद्धधर्मधुरंधरविद्वान्सः समुपालेभिरेऽस्तित्वमेतस्मिन्नेवावसरे, आसीन्न्यायशास्त्रमेतर्ह्येवंत्युन्नतिपराकाष्ठामापन्नं व्यधत्त किलैतत्कालीनविद्वत्परिकरेण न्यायशास्त्रपथा स्वमतसत्यताविर्भावाय भूयान् प्रयासः समजनिषत च तदात्वे वादविवादशास्त्रार्थाः अवसाने किमजनि धार्मिकविवादफलं, विजयं च कस्तेषु समुपादात्, विजयश्च सहि वैदुष्येण कारणांतरेण वाभूदित्यवशिष्टं वरीवार्तीतिहासज्ञानां परीक्षणाय । परंतु नात्र संशीतिर्यद्विवादास्तित्वकाले दिगंबरजैनसंप्रदायनिकेतनस्तंभायमानश्रीमदकलंकविद्यानंदादि दिग्विजयिविदुषां दर्शनसौभाग्यं नाभूद्बाहुल्येन सर्वेषां ।

ग्रंथरचना ।

दार्शनिको नैयायिकश्च समजनि श्रीमद्विद्यानंदिप्रभुरिति पूर्वं प्रतिपादितमतएवैष महात्मा विषयद्वयएवास्मिन् ग्रंथान् व्यरचि एतन्महोदयवैदुष्यमार्तंडप्रखरमयूखायमानः, **आप्तमीमांसालंकारदेवालंकृतीत्य** परनामभाक् विश्रुतग्रंथोऽष्टसहस्र्याभिधः । श्रीमदुमास्वामिविरचिततत्त्वार्थसूत्रस्योपरि विद्यते गंधहस्तिमहाभाष्यं । तत्प्रारंभे पंचदशाधिकशतपद्यविनिर्मिता**प्तमीमांसाख्यं देवागमस्तोत्राभिधं** वा मंगलाचरणं । तदुपरि श्रीमदकलंकदेवरचिताष्टशत्यभिधो ग्रंथस्तद्भाष्यभूतएवायमष्टसहस्र्याभिधो महान् ग्रंथः । अपरश्चैतस्य महात्मनो जैनदर्शनग्रंथतत्त्वार्थसूत्रोपरि **श्लोकवार्तिकाभिधं**[1] भाष्यं तृतीयश्च सामंतभद्र**युक्त्यनुशासन**टीकाग्रंथः । **आप्तपरीक्षापि** विश्रुतग्रंथोस्य महोदयस्य । सतीष्वपि भूयसीषु तद्ग्रंथटीकासु, एतन्महोदयकरविलसिताप्तपरीक्षालंकृतीत्यपराभिधा टीकाप्तपरीक्षायाः । ग्रंथचतुष्टयादस्मात् **पत्रपरीक्षाप्रमाणपरीक्षाप्रमाणमीमांसाप्रमाणनिर्णयविद्यानंदमहोदयबुद्धेश**[2]**भवनव्याख्यान**प्रभृतयोनेके ग्रंथा[3] महात्मैतद्वैदुष्यविलसिताः संन्ति भुवि इति समाप्यतेऽयं निबंधोविधायपत्रपरीक्षां मंगलाचरणं ।

जीयान्निरस्तनिश्शेषसर्वथैकांतशासनं । सदा श्रीवर्द्धमानस्य शासनं जिनशासनं ॥ ४ ॥*

विदुषामनुचरो

गजाधरलालोजैनः ।

---

१ श्लोकवार्तिकं लक्ष्यीकृत्यं विलिखितं श्रीमद्वादिराजसूरिणा पार्श्वनाथचरिते ।

ऋजुसूत्रं स्फुरद्रत्नं विद्यानंदस्य विस्मयः । शृण्वतामप्यलंकारं दीप्तिरङ्गेषु रंगति ॥

२ मैसूरकुर्गेतिपत्तनद्वयशिलालेखाभिधे ग्रंथेऽपि मि. ल्युई राईसमहोदयैरेतद्ग्रंथनामोल्लिखितं ।

३ यशोधरचरितकाव्यप्रस्तावनाशयमल्लिषेणप्रशस्तिनिम्नालिखितपद्यं समुद्धृत्य श्रीमत्पात्रकेसरिणां त्रिलक्षणकदर्थनाभिधोग्रंथः कल्पितः परंतु त्रिलक्षणकदर्थनाभिधानो नापरः कश्चिदपि ग्रंथः किंतु पार्श्वजिनेन्द्रफणोपरि श्रीमत्पात्रकेसर्यनुमानविषयकभ्रमनिराकरणाय यत् पद्यं व्यलेखि श्रीमत्या पद्मावतीदेव्या तस्यैवात्र तात्पर्यं ।

महिमा स पात्रकेसरिगुरोः परं भवति यस्य भक्तयासीत् पद्मावती सहाया त्रिलक्षणकदर्थनं कर्तुं ॥ १ ॥

* सारांशभूतोयं निबंधः किल श्रीयुततांत्यानेमिनाथपांगललिखितमहाराष्ट्रीयलेखस्य तत्र मूललेखकानेकविचारासम्मतत्वात् परिवर्तितोयं बहुभिरस्माभिः संशुध्येतिहासिकपुस्तकान्तरात् स्वतश्च विचारबाहुल्यं समुद्बोधितं चात्रेति ।



नमः सिद्धेभ्यः ।

सनातनजैनग्रंथमाला ।

१.

आचार्यप्रवरश्रीविद्यानंदिस्वामिविरचिता

आप्तपरीक्षा ।

प्रबुद्धाशेषतत्त्वार्थबोधदीधितिमालिने ।
नमः श्रीजिनचंद्राय मोहध्वांतप्रभेदिने ॥ १ ॥

कस्मात्पुनः परमेष्ठिनः स्तोत्रं शास्त्रादौ शास्त्रकाराः प्राहुरित्यभिधीयते–

श्रेयोमार्गस्य संसिद्धिः प्रसादात्परमेष्ठिनः ।
इत्याहुस्तद्गुणस्तोत्रं शास्त्रादौ मुनिपुंगवाः ॥ २ ॥

श्रेयो निःश्रेयसं परमपरं च । तत्र परं सकलकर्मविप्रमोक्षलक्षणं बंधहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्ष इति वचनात् । ततोऽपरमार्हंत्यलक्षणं घातिकर्मक्षयादनंतचतुष्टयस्वरूपलाभस्यापरनिःश्रेयसत्वात् । न चाऽत्रकस्य चिदात्माविशेषस्य कृत्स्नकर्मविप्रमोक्षोऽसिद्धः साधकप्रमाणसद्भावात् । तथाहि । कश्चिदात्मविशेषः कृत्स्नकर्मभिर्विप्रमुच्यते कृत्स्नबंधहेत्वभावनिर्जरावत्त्वात् । यस्तु न कृत्स्नकर्मभिर्विप्रमुच्यते स न कृत्स्नबंधहेत्वभावनिर्जरावान् यथा संसारी कृत्स्नबंधहेत्वभावनिर्जरावांश्च कश्चिदात्मविशेषस्तस्मात्कृत्स्नकर्मभिर्विप्रमुच्यते । ननु बंध एवात्मनोऽसिद्धस्तद्धेतुश्चेति कुतो बंधहेत्वभाववत्त्वं, प्रतिषेधस्य विधिपूर्वकत्वात् । बंधाभावे च कस्य निर्जरा, बंधफलानुभवनं हि निर्जरा बंधाभावे तु कुतस्तत्फलानुभवनमतः कृत्स्नकर्मनिर्जरावत्त्वमप्यसिद्धं । न चासिद्धं साधनं साध्यसाधनायालमिति कश्चित्, सोऽप्यनालोचिततत्त्वः प्रमाणतो बंधस्य प्रसिद्धेः । तथा हि । विवादाध्यासितः संसारी बंधवान् परतंत्रत्वादालानस्तंभागतहस्तिवत् । परतंत्रोऽसौ हीनस्थानपरिग्रहवत्त्वात् कामोद्रेकपरतंत्रवेश्यागृहपरिग्रहवच्छोत्रियब्राह्मणवत् । हीनस्थानं हि शरीरं तत्परिग्रहवांश्च संसारी प्रसिद्ध एव । कथं पुनः शरीरं हीनस्थानमात्मन इत्युच्यते । हीनस्थानं शरीरमात्मनो दुःखहेतुत्वात् कस्यचित्कारागृहवत् । ननु देवशरीरस्य दुःखहेतुत्वाभावात् पक्षाव्यापको हेतुरिति चेत् न । तस्यापि मरणे दुःखहेतुत्वसिद्धेः पक्षव्यापकत्वव्यवस्थानात् । तदेवं संक्षेपतो बंधस्य प्रसिद्धौ तद्धेतुरपि सिद्धस्तस्याहेतुकत्वे नित्यत्वप्रसंगात् । सतो हेतुरहितस्य नित्यत्वव्यवस्थितेः 'सदकारणवन्नित्यमिति' परैरभिधानात् । तद्धेतुश्च मिथ्यादर्शनाविरतिप्रमादकषाययोगविकल्पात्पंचविधः स्यात् । बंधो हि संक्षेपतो द्वेधा भावबंधो द्रव्यबंधश्चेति । तत्र भावबंधः क्रोधाद्यात्मकस्तस्य हेतुर्मिथ्यादर्शनं, तद्भावे भावादभावे चाभावात् । क्वचिद्क्रोधादिविषये हि क्रोधादिविषयत्वश्रद्धानं मिथ्यादर्शनं तस्य विपरीताभिनिवेश-

लक्षणस्य सकलास्तिकप्रसिद्धत्वात् तस्य च सद्भावे बहिरंगस्य सत्यंतरंगे द्रव्यक्रोधादिबंधे भावबंधस्य सद्भावः तदभावेचासद्भावः सिद्ध एवेति मिथ्यादर्शनहेतुको भावबंधः । तद्वदविरतिहेतुकश्च समुत्पन्नसम्यग्दर्शनस्याऽपि कस्यचिदप्रकृष्टो भावबंधः सत्यामविरतौ प्रतीयते एव ततोऽप्यप्रकृष्टो भावबंधः। प्रमादहेतुकः स्यादविरत्यभावेऽपि, कस्यचिद्विरतस्य सति प्रमादे तदुपलब्धेः ततोऽप्यप्रकृष्टः । कषायहेतुकः सम्यग्दृष्टेर्विरतस्याऽप्रमत्तस्याऽपि कषायसद्भावे भावात् । ततोऽप्यप्रकृष्टवपुरज्ञानलक्षणो भावबंधो योगहेतुकः क्षीणकषायस्याऽपि योगसद्भावे तत्सद्भावात् । केवलिनस्तु योगसद्भावेऽपि न भावबंधः, तस्य जीवन्मुक्तत्वान्मोक्षप्रसिद्धेः । न चैवमेकैकहेतुक एव बंधः पूर्वस्मिन् पूर्वस्मिन्नुत्तरस्योत्तरस्य बंधहेतोः सद्भावात् । कषायहेतुको हि बंधो योगहेतुकोऽपि प्रमादहेतुकश्च योगकषायहेतुकोऽपि । अविरतिहेतुकश्च योगकषायप्रमादहेतुकः प्रतीयते । मिथ्यादर्शनहेतुकश्च योगकषायप्रमादाविरतिहेतुकः सिद्ध इति मिथ्यादर्शनादिपंचविधप्रत्ययसामर्थ्यान्मिथ्याज्ञानस्य बंधहेतोः प्रसिद्धेः षट्प्रत्ययोऽपि बंधोऽभिधीयते । न चायं भावबंधो द्रव्यबंधमंतरेण भवति, मुक्तस्यापि तत्प्रसंगादिति द्रव्यबंधः सिद्धः । सोऽपि मिथ्यादर्शनाविरतिप्रमादकषाययोगहेतुक एव बंधत्वाद्भावबंधवदिति मिथ्यादर्शनादिबंधहेतुः सिद्धः । तदभावः कुतः सिद्ध्येदिति चेत् तत्प्रतिपक्षभूतसम्यग्दर्शनादिसात्मीभावात् । सति हि सम्यग्दर्शने मिथ्यादर्शनं निवर्तते तद्विरुद्धत्वात् । यथोष्णस्पर्शे सति शीतस्पर्श इति प्रतीतं । तथैवाऽविरतिर्विरत्यां सत्यामपैति । प्रमादश्चाप्रमादपरिणतौ कषायोऽकषायतायां योगश्चायोगतायामिति बंधहेत्वभावः सिद्धोऽपूर्वकर्मणां आस्रवनिरोधः संवर, इति वचनात् । ननु च स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रेभ्यो भवतीति सूत्रकारमतं न पुनः सम्यग्दर्शनादिभ्य इति न मंतव्यं । गुप्त्यादीनां सम्यग्दर्शनाद्यात्मकत्वात् । न हि सम्यग्दर्शनरहिता गुप्त्यादयः संति सम्यग्ज्ञानरहिता वा तेषामपि विरत्यादिरूपत्वात् । चारित्रभेदा ह्येते प्रमादरहिताः कषायरहिताश्चायोगतामपि लभंते । ततो न कश्चिद्दोषः । कथमात्मनः पूर्वोपात्तकर्मणां निर्जरा सिद्ध्येदित्यभिधीयते । क्वचिदात्मनि कात्स्न्यतः पूर्वोपात्तानि कर्माणि निर्जीर्यंते तेषां विपाकांतत्वात् । यानि तु न निर्जीर्यंते तानि न विपाकांतानि यथा कालादीनि, विपाकांतानि च कर्माणि तस्मान्निर्जीर्यंते । विपाकांतत्वं नासिद्धं कर्मणां । तथा हि विपाकांतानि कर्माणि फलावसानत्वाद्वृक्षादिवत् । तेषामन्यथा नित्यत्वानुषंगात् । न च नित्यानि कर्माणि नित्यं तत्फलानुभवनप्रसंगात् । यत्र चात्मविशेषे अनागतकर्मबंधहेत्वभावादपूर्वकर्मानुत्पत्तिस्तत्र पूर्वोपात्तकर्मणां यथाकालमुपक्रमाच्च फलदानात्कात्स्न्येन निर्जरा प्रसिद्धैव । ततः कृत्स्नबंधहेत्वभावनिर्जरावत्त्वं साधनं प्रसिद्धं कृत्स्नकर्मविप्रमोक्षं साधयत्येव । ततस्तल्लक्षणं परं निःश्रेयसं व्यवतिष्ठते । तथाऽर्हत्यलक्षणमपरं सुनिश्चितासंभवद्बाधकप्रमाणत्वात् सुखादिवादिति सर्वज्ञत्वसिद्धौ निर्णेष्यते । श्रेयसो मार्गः श्रेयोमार्गो निःश्रेयसोपायो वक्ष्यमाणलक्षणस्तस्य संसिद्धिः संप्राप्तिः सम्यग्ज्ञप्तिर्वा सा हि परमेष्ठिनः प्रसादाद्भवति मुनिपुंगवानां यस्मात्तस्मात्ते मुनिपुंगवाः सूत्रकारादयः शास्त्रस्यादौ तस्य परमेष्ठिनो गुणस्तोत्रमाहुरिति संबंधः । परमेष्ठी हि भगवान् परमोऽर्हन् तत्प्रसादात्परमागमार्थनिर्णयोपरस्य परमेष्ठिनो गणधरदेवादेः संपद्यते तस्माच्चापरपरमेष्ठिनः परमागमशब्दसंदर्भो द्वादशांग इति । परापरपरमेष्ठिभ्यां परमागमार्थशब्दशरीरसंसिद्धिस्तद्विनेयमुख्यानां तेभ्यश्च स्वशिष्याणामिति गुरुपूर्वक्रमात्सूत्रकाराणां परमेष्ठिनः प्रसादात्प्रधानभूतपरमार्थस्य श्रेयोमार्गस्य संसिद्धिरभिधीयते । प्रसादः पुनः परमेष्ठिनस्तद्विनेयानां प्रसन्नमनोविषयत्वमेव वीतरागाणां तुष्टिलक्षणप्रसादासंभवात्कोपासंभववत् । तदाराधकजनैस्तु प्रसन्नेन मनसोपास्यमानो भगवान् प्रसन्न इत्यभिधीयते रसायनवत् । यथैव हि प्रसन्नेन मनसा रसायनमासेव्य तत्फलमवाप्नुवंतः संतो रसायनप्रसादादिदमस्माकमारोग्यादिफलं समुत्पन्नमिति प्रतिपद्यंते तथा प्रसन्नेन मनसा भगवंतं परमेष्ठिनमुपास्य तदुपासनफलं श्रेयोमार्गाधि-

गमलक्षणं प्रतिपद्यमानास्तद्विनेयजना भगवत्परमेष्ठिनः प्रसादादस्माकं श्रेयोमार्गाधिगमः सम्पन्न इति समनुमन्यंते । ततः परमेष्ठिनः प्रसादात्सूत्रकाराणां श्रेयोमार्गस्य संसिद्धेर्युक्तं शास्त्रादौ परमेष्ठिगुणस्तोत्रं । मंगलार्थं तदित्येके । तेऽप्येवं प्रष्टव्याः । किं साक्षान्मंगलार्थं परमेष्ठिगुणस्तोत्रं परंपरया वा । न तावत्साक्षात्तदनंतरमेव मंगलप्रसंगात् । कस्यचिदपि मंगलानवाप्त्ययोगात् । परंपरया चेत् न किंचिदनिष्टं । परमेष्ठिगुणस्तोत्रादात्मविशुद्धिविशेषः प्रादुर्भवन् धर्मविशेषं स्तोतुः साधयत्येवाऽधर्मप्रध्वंसं च । ततो मंगं सुखं समुत्पद्यत इति तद्गुणस्तोत्रं मंगलं मंगं लातीति मंगलमिति व्युत्पत्तेः । मलं गालयतीति मंगलमिति वा । मलस्याधर्मलक्षणस्य परंपरया तेन प्रध्वंसनात् । केवलं सत्पात्रदानजिनेंद्रार्चनादिकमप्येवं मंगलमिति न तद्गुणस्तोत्रमेव मंगलमिति नियमः सिद्ध्यति । स्यान्मतं मंगं श्रेयोमार्गसंप्राप्तिननितं प्रशमसुखं तल्लात्यस्मात्परमेष्ठिगुणस्तोत्रात्तदराधक इति मंगलं परमेष्ठिगुणस्तोत्रं । मलं वा श्रेयोमार्गसंसिद्धौ विघ्ननिमित्तं पापं गालयतीति मंगलं तदिति । तदेतदनुकूलं नः परमेष्ठिगुणस्तोत्रस्य परममंगलत्वप्रतिज्ञानात् । तदुक्तं—

" आदौ मध्येऽवसाने च मंगलं भाषितं बुधैः । तज्जिनेंद्रगुणस्तोत्रं तदविघ्नप्रसिद्धये " ॥

ननु चैवं भगवद्गुणस्तोत्रं स्वयं मंगलं न तु मंगलार्थमिति न मंतव्यं । स्वयं मंगलस्यापि मंगलार्थत्वोपपत्तेः । यदा हि मलगालनलक्षणं मंगलं तदा सुखादानलक्षणमंगलाय तद्भवतीति सिद्धं मंगलार्थं । यदापि सुखादानलक्षणं तन्मंगलं तदा पापगालनलक्षणमंगलाय प्रभवतीति कथं न मंगलार्थं । यदाप्येतदुभयलक्षणं मंगलं तदा तु मंगलांतरापेक्षया मंगलार्थं तदुपपद्यत एव आनिःश्रेयसप्राप्तेः परापरमंगलसंततिप्रसिद्धेरित्यलं विस्तरेण । शिष्टाचारपरिपालनार्थं नास्तिकतापरिहारार्थं निर्विघ्नतः शास्त्रपरिसमाप्त्यर्थं च परमेष्ठिगुणस्तोत्रमित्यन्ये । तेऽपि तदेव तथेति नियमयितुमसमर्था एव । तपश्चरणादेरपि तथात्वप्रसिद्धेः । न हि तपश्चरणादिः शिष्टाचारपरिपालनाद्यर्थं न भवतीति शक्यं वक्तुं । यदि पुनरनियमेन भगवद्गुणसंस्तवनं शिष्टाचारपरिपालनाद्यर्थमभिधीयते तदा तदेव शास्त्रादौ शास्त्रकारैः कर्तव्यमिति नियमो न सिद्ध्यति । न च क्वचित्तन्न क्रियते इति वाच्यं । तस्य शास्त्रे निबद्धस्यानिबद्धस्य वा वाचिकस्य मानसस्य वा विस्तरतः संक्षेपतो वा शास्त्रकारैरवश्यं करणात् । तदकरणे तेषां तत्कृतोपकारविस्मरणादसाधुत्वप्रसंगात् । साधूनां कृतस्योपकारस्याविस्मरणप्रसिद्धेः । ' न हि कृतमुपकारं साधवो विस्मरंति ' इति वचनात् । यदि पुनः स्वगुरोः संस्मरणपूर्वकं शास्त्रकरणमेवोपकारस्तद्विनेयानामिति मतं । तदा सिद्धं परमेष्ठिगुणस्तोत्रं स्वगुरोरेव परमेष्ठित्वात् । तस्य गुरुत्वेन संस्मरणस्यैव तद्गुणस्तोत्रत्वसिद्धेरित्यलं विवादेन । किं पुनस्तत्परमेष्ठिनो गुणस्तोत्रं शास्त्रादौ सूत्रकाराः प्राहुरिति निगद्यते—

मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृतां । ज्ञातारं विश्वतत्त्वानां वंदे तद्गुणलब्धये ॥१॥

अत्र मोक्षमार्गादिपदानामर्थः पुरस्ताद्वक्ष्यते । वाक्यार्थस्तूच्यते । मोक्षमार्गस्य नेतारं कर्मभूभृतां भेत्तारं विश्वतत्त्वानां ज्ञातारमहं वंदे तद्गुणलब्ध्यर्थित्वात् । यो यद्गुणलब्ध्यर्थी स तं वंदमानो दृष्टः । यथा शास्त्रविद्यादिगुणलब्ध्यर्थी शास्त्रविद्यादिविदं तत्प्रणेतारं च । तथा चाहं मोक्षमार्गप्रणेतृत्वकर्मभूभृद्भेतृत्वविश्वतत्त्वज्ञातृत्वगुणलब्ध्यर्थी । तस्मान्मोक्षमार्गस्य नेतारं कर्मभूभृतां भेत्तारं विश्वतत्त्वानां ज्ञातारं वंदे इति शास्त्रकारः शास्त्रप्रारंभे श्रोता तस्य व्याख्याता वा भगवंतं परमेष्ठिनं परमपरं च मोक्षमार्गप्रणेतृत्वादिभिर्गुणैःसंस्तौति । तत्प्रसादाच्छ्रेयोमार्गस्य संसिद्धेः समर्थनात् । किमर्थं पुनरिदं भगवतोऽसाधारणं विशेषणं मोक्षमार्गप्रणेतृत्वं कर्मभूभृद्भेतृत्वं विश्वतत्त्वज्ञातृत्वं चात्र प्रोक्तं भगवद्भिरित्याह—

इत्यसाधारणं प्रोक्तं विशेषणमशेषतः ।
परसंकल्पितापाप्तानां व्यवच्छेदप्रसिद्धये ॥ ३ ॥

परैर्वैशेषिकादिभिः संकल्पिताः परसंकल्पितास्ते च ते आप्ताश्च परसंकल्पिताप्ता महेश्वरादयः तेषामशेषतो व्यवच्छेदप्रसिद्ध्यर्थं यथोक्तमसाधारणं विशेषणमाचार्यैः प्रोक्तमिति वाक्यार्थः । न हीदमीश्वरकपिलसुगतादिषु संभवति बाधकप्रमाणसद्भावात् । भगवत्यर्हत्येव तत्सद्भावसाधनाच्चासाधारणविशेषणमिति वक्ष्यामः । ननु चेश्वरादीनामप्याप्तत्वे किं दूषणं येन तद्व्यवच्छेदार्थमसाधारणं विशेषणं प्रोच्यते किं वान्ययोगव्यवच्छेदान्महात्मनि परमेष्ठिनि निश्चिते प्रतिष्ठितं स्यादित्यारेकायामिदमाह—

अन्ययोगव्यवच्छेदान्निश्चिते हि महात्मनि ।
तस्योपदेशसामर्थ्यादनुष्ठानं प्रतिष्ठितं ॥ ४ ॥

भवेदिति क्रियाध्याहारः । ननु चात्रान्येषामन्ययोगव्यवच्छेदाभावेऽपि भगवतः परमेष्ठिनस्तत्त्वोपदेशादनुष्ठानं प्रतिष्ठामियर्त्येव तेषामविरुद्धभाषित्वादिति चेत् न । परस्परविरुद्धसमयप्रणयनात् तत्त्वनिश्चयायोगात् तदन्यतमस्याप्युपदेशप्रामाण्यनिश्चयादनुष्ठानप्रतिष्ठानुपपत्तेः । ननु मोक्षोपायानुष्ठानोपदेशमात्रे नेश्वरादयो विप्रपद्यंते ततोऽर्हदुपदेशादिवेश्वराद्युपदेशादपि नानुष्ठानप्रतिष्ठानुपपन्ना यतस्तव्यवच्छेदेन परमेष्ठी निश्चीयत इति कश्चित् । सोऽपि न विशेषज्ञः सम्यग्मिथ्योपदेशविशेषाभावप्रसंगात् । स्यान्मतं । वैशेषिकैरभिमतस्याप्तस्य निःश्रेयसोपायानुष्ठानोपदेशस्तावत्समीचीन एव बाधकप्रमाणाभावात् । श्रद्धाविशेषोपगृहीतं हि सम्यग्ज्ञानं वैराग्यनिमित्तं परां काष्ठामापन्नमंत्यनिःश्रेयसहेतुरित्युपदेशः । तत्र श्रद्धाविशेषस्तावदुपादेयेषूपादेयतया हेयेषु हेयतयैव श्रद्धानं । सम्यग्ज्ञानं पुनर्यथावस्थितार्थाधिगमलक्षणं, तद्धेतुकं च वैराग्यं रागद्वेषप्रक्षयः एतदनुष्ठानं च तद्भावनाभ्यासस्तस्यैतस्य निःश्रेयसोपायानुष्ठानस्योपदेशो न प्रत्यक्षेण बाध्यते । जीवन्मुक्तेस्तत एव प्रत्यक्षतः कैश्चित् (केषांचित्) स्वयं संवेदनात् । परैः संहर्षायासविमुक्तैरनुमीयमानत्वात् । जीवन्नेव हि विद्वान् संहर्षायासाभ्यां विमुच्यत इत्युपदेशाच्च नानुमानागमाभ्यां बाध्यते जीवन्मुक्तिवत् । परममुक्तेरप्यत एवानुष्ठानात् संभावनोपपत्तेः । नचान्यत्प्रमाणं बाधकं तदुपदेशस्य तद्विपरीतार्थव्यवस्थापकत्वाभावादिति । तदपि न विचारक्षमं । श्रद्धादिविशेषविषयाणां पदार्थानां यथावस्थितार्थत्वासंभवात् । द्रव्यादयो हि षट्पदार्थास्तावदुपादेयाः सदात्मानः प्रागभावादयश्चासदात्मानस्ते च यथा वैशेषिकैर्व्यावर्ण्यते तथा न यथार्थतया व्यवतिष्ठंते तद्ग्राहकप्रमाणाभावात् । द्रव्यं हि गुणादिभ्यो भिन्नमेकं, गुणश्चेतरेभ्यो भिन्न एकः, कर्म चैकमितरेभ्यो भिन्नं, सामान्यं चैकं, विशेषश्चैकः पदार्थः समवायवत् यद्यभ्युपगम्यते तदा द्रव्यादयः षट्पदार्थाः सिद्ध्येयुः । न च द्रव्यपदस्यैकोऽर्थः परैरिष्यते गुणपदस्य कर्मपदस्य सामान्यपदस्य विशेषपदस्य च, यथा समवायपदस्यैकः समवायोऽर्थः इति कथं षट्पदार्थव्यवस्थितिः । स्यान्मतं । पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नव द्रव्याणि द्रव्यपदस्यार्थ इति कथमेको द्रव्यपदार्थः ? सामान्यसंज्ञाभिधानादिति चेत् न । सामान्यसंज्ञायाः सामान्यवद्विषयत्वात् । तदर्थस्य सामान्यपदार्थत्वे ततो विशेषेष्वप्रवृत्तिप्रसंगात् । * द्रव्यपदार्थस्यैकस्यासिद्धेश्च । पृथिव्यादिषु हि द्रव्यमिति संज्ञा द्रव्यत्वसामान्यसंबंधनिमित्ता । तत्र द्रव्यत्वमेकं न द्रव्यं किंचिदेकमस्ति । द्रव्यलक्षणमेकमिति चेत् तत्किमिदानीं द्रव्यपदार्थोऽस्तु न चैतद्युक्तं लक्ष्यस्य द्रव्यस्याभावे तल्लक्षणानुपपत्तेः । पृथिव्यादीनि

* सामान्यरूप = द्रव्यपदार्थ—

लक्ष्याणि क्रियावद्गुणवत्समवायिकारणमिति द्रव्यलक्षणं यदि प्रतिज्ञायते । तदानेकत्र लक्ष्ये लक्षणं कथमेकमेव प्रयुज्यते तस्य प्रतिव्यक्तिभेदात् । न हि यदेव पृथिव्यां द्रव्यलक्षणं तदेवोदकादिष्वस्ति तस्यासाधारणरूपत्वात् । यदि पुनर्द्रव्यलक्षणं पृथिव्यादीनां गुणादिभ्यो व्यवच्छेदकतया तावदसाधारणो धर्मःपृथिव्यादिषु नवस्वपि सद्भावात्साधारणः कथमन्यथातिव्याप्त्यव्याप्ती लक्षणस्य निराक्रियेते सकललक्ष्यवस्तुषु हि व्यापकस्य लक्षणस्याव्याप्तिपरिहारस्तदलक्ष्येभ्यश्च व्यावृत्तस्यातिव्याप्तिपरिहारः । सकलैर्लक्ष्यलक्षणैरभिधीयते नान्यथेति मतिः । तदापि नैको द्रव्यपदार्थः सिद्ध्यति । द्रव्यलक्षणादन्यस्य लक्ष्यस्य द्रव्यस्यैकस्यासंभवात् । नवापि पृथिव्यादीनि द्रव्याण्येकलक्षणयोगादेको द्रव्यपदार्थ इति चेत् न । तथोपचारमात्रप्रसंगात् । पुरुषो यष्टिरिति यथा यष्टिसाहचर्याद्धि पुरुषो यष्टिरिति कथ्यते न पुनः स्वयं यष्टिरित्युपचारः प्रसिद्ध एव तथा पृथिव्यादिरनेकोऽपि स्वयमेकलक्षणयोगादेक उपचर्यते न तु स्वयमेक इत्यायातं । न च लक्षणमप्येकं पृथिव्यादिषु पंचसु क्रियावत्स्वेव क्रियावद्गुणवत्समवायिकारणमिति द्रव्यलक्षणस्य भावात् निःक्रियेष्वाकाशकालदिगात्मसु क्रियावत्त्वस्याभावात् । गुणवत्समवायिकारणमित्येतावन्मात्रस्य ततोऽन्यस्य द्रव्यलक्षणस्य सद्भावात् लक्षणद्वयस्य प्रसिद्धेः । तथा च द्रव्यलक्षणद्वययोगात् द्वावेव द्रव्यपदार्थौ स्यातां । यदि पुनर्द्वयोरपि द्रव्यलक्षणयोर्द्रव्यलक्षणत्वाविशेषादेकं द्रव्यलक्षणमित्युच्यते तदापि किं तद्द्रव्यलक्षणयोर्द्रव्यलक्षणत्वमेकं न तावत्सामान्यं तस्य द्रव्यगुणकर्माश्रयत्वात् । न चैते द्रव्यलक्षणे । द्रव्ये स्वेष्टविघातात् । नापि गुणौ । द्रव्याश्रयी अगुणवान् संयोगविभागेष्वप्यकारणमनपेक्ष इति गुणलक्षणाभावात् । प्रत्ययात्मकत्वात्तयोर्गुणत्वमिति चेत् न । प्रत्ययात्मनोर्लक्षणयोः पृथिव्यादिष्वसंभवात् । तयोस्तदसाधारणधर्मत्वासंभवादेतेनाभिधानात्मनोर्द्रव्यलक्षणयोर्गुणत्वं प्रत्याख्यातं । नापि ते कर्मणी । परिस्पंदात्मकत्वासंभवादेकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणस्याभावाच्च । तयोरेकद्रव्यत्वे नवविधत्वप्रसंगाद्द्रव्यलक्षणस्य कुतो द्वित्वमेकत्वं वा व्यवतिष्ठते । यतो द्रव्यलक्षणत्वमेकं तत्र प्रवर्तमानमेकत्वं व्यवस्थापयेत्तथोपचरितोपचारप्रसंगश्च द्रव्यलक्षणत्वेनैकेन योगाद्द्रव्यलक्षणयोरेकत्वादेकं द्रव्यलक्षणं तेन चोपचरितेन द्रव्यलक्षणेनैकेन योगात्पृथिव्यादीन्येको द्रव्यपदार्थ इति कुतः पारमार्थिको द्रव्यपदार्थः कश्चिदेकः सिद्ध्येत् । यदप्यभ्यधायि वैशेषिकैः पृथिव्यादीनां नवानां द्रव्यत्वेनैकेनाभिसंबंधादेकत्वमिति द्रव्यं नामैकः पदार्थ इति तदपि न युक्तं । परमार्थतो द्रव्यपदार्थस्यैकस्यासिद्धेः तस्योपचारादेव प्रसिद्धेः । एतेन चतुर्विंशतिगुणानां गुणत्वेनैकेनाभिसंबंधादेको गुणपदार्थः, पंचानां च कर्मणां कर्मत्वेनैकेनाभिसंबंधादेकः कर्मपदार्थ इत्येतत्प्रत्याख्यातं । तथा वास्तवगुणकर्मपदार्थाव्यवस्थितेः कथं चैवं सामान्यपदार्थ एकः सिद्ध्येद्विशेषपदार्थो वा समवायपदार्थो वा । परापरसामान्ययोः सामान्यांतरेणैकेनाभिसंबंधायोगाद्विशेषाणां चेति समवाय एवैकः पदार्थः स्यात् । यदि पुनर्यथेहेदमिति प्रत्ययाविशेषाद्विशेषप्रत्ययाभावादेकः समवायः तथा द्रव्यमिति प्रत्ययाविशेषादेको द्रव्यपदार्थः स्यात् गुण इति प्रत्ययाविशेषाद्गुणपदार्थः कर्मेति प्रत्ययाविशेषात्कर्मपदार्थः सामान्यमिति प्रत्ययाविशेषात्सामान्यपदार्थः विशेष इति प्रत्ययाविशेषाद्विशेषपदार्थ इत्यभिधीयते, तथापि वैशेषिकतंत्रव्याघातो दुःशक्यः परिहर्तुं स्याद्वादिमतस्यैवं प्रसिद्धेः । स्याद्वादिनां हि शुद्धसंग्रहनयात्सत्प्रत्ययाविशेषाद्विशेषलिंगाभावादेकं सन्मात्रं तत्त्वं शुद्धं द्रव्यमिति मतं । तथैवाशुद्धसंग्रहनयादेकं द्रव्यमेको गुणादिरिति, व्यवहारनयात्तु यत्सत्तद् द्रव्यं पर्यायो वेति भेदः । यद्द्रव्यं तज्जीवद्रव्यमजीवद्रव्यं च यश्च पर्यायः सोऽपि परिस्पंदात्मकोऽपरिस्पंदात्मकश्चेति सोऽपि सामान्यात्मको विशेषात्मकश्चेति । स च द्रव्यादिष्वग्रभूतो विष्वग्भूतो वेति यथा प्रतीतिर्निश्चीयते सर्वथा बाधकाभावात् । वैशेषिकाणां तु तथाऽभ्युपगमो व्याहत एव तंत्रविरोधात् । न हि तत्तंत्रे सन्मात्रमेव तत्त्वं सकलपदार्थानां तत्रैवांतर्भावादिति नयोऽस्ति । स्यान्मतं । द्रव्यपदेन सकलद्रव्य-

व्यक्तिभेदप्रभेदानां संग्रहादेको द्रव्यपदार्थः गुण इत्यादिपदेन चैकेन गुणादिभेदप्रभेदानां संग्रहाद्गुणादिरप्येकैकपदार्थो व्यवतिष्ठते "विस्तरेणोपदिष्टानामर्थानां तत्त्वसिद्धये । समासेनाभिधानं यत्संग्रहं तं विदुर्बुधाः" इति ॥ पदार्थधर्मसंग्रहः प्रवक्ष्यत इत्यत्र पदार्थसंग्रहस्य धर्मसंग्रहस्य चैवं व्याख्यानादस्त्येव तथाऽभिप्रायो वैशेषिकाणामिति । तदप्यविचारितरम्यं । परमार्थतस्तथैकैकस्य द्रव्यादिपदार्थस्य प्रतिष्ठानुपपत्तेः । तस्यैकपदविषयत्वेनैकत्वोपचारात् । न चोपचरितपदार्थसंख्याव्यवस्थायां पारमार्थिकी पदार्थसंख्या समवतिष्ठतेऽतिप्रसंगात् । न चैकपदवाच्यत्वेन तात्त्विकमेकत्वं सिद्ध्यति व्यभिचारात्सेनावनादिपदेन हस्त्यादिधवादिपदार्थस्यानेकस्य वाच्यस्य प्रतीतेः । ननु सेनापदवाच्य एक एवार्थः प्रत्यासत्तिविशेषः संयुक्तसंयोगात्पीयस्त्वलक्षणो हस्त्यादीनां प्रतीयते, वनशब्देन च धवादीनां तादृशप्रत्यासत्तिविशेष इत्येकपदवाच्यत्वं न तात्त्विकीमेकतां व्यभिचरति । तथा चैवमुच्यते द्रव्यमित्येकः पदार्थः एकपदवाच्यत्वात् यद्यदेकपदवाच्यं तत्तदेकपदार्थो यथा सेना वनादिस्तथा च द्रव्यमेकपदवाच्यं तस्मादेकः पदार्थः । एतेन गुणादिरप्येकः पदार्थः प्रसिद्धोदाहरणसाधर्म्यात्साधितो वेदितव्य इति कश्चित् सोऽपि न विपश्चित् । सेनाशब्दादनेकत्र हस्त्याद्यर्थे प्रतीतिप्रवृत्तिप्राप्तिसिद्धेः । वनशब्दाच्च धवखदिरपलाशादावनेकत्रार्थे । यत्र हि शब्दात्प्रतीतिप्रवृत्तिप्राप्तयः समधिगम्यते स शब्दस्यार्थः प्रसिद्धस्तथा वृद्धव्यवहारात् । न च सेनावनादिशब्दात्प्रत्यासत्तिविशेषे प्रतीतिप्रवृत्तिप्राप्तयोऽनुभूयंते येन स तस्यार्थः स्यात् । प्रत्यासत्तिविशिष्टा हस्त्यादयो धवादयो वा सेनावनादिशब्दानामर्थ इति चेत्सिद्धस्तर्ह्येकपदवाच्योऽनेकोर्थः । तेन च कथमेकपदवाच्यत्वं न व्यभिचरेत् । तथा गौरिति पदेनैकेन पश्वादेर्दशप्रकारस्यैकादशप्रकारस्य वा वाच्यस्य दर्शनाच्च व्यभिचारी हेतुः । कश्चिदाह न गौरित्येकमेव पदं पश्वादेरनेकस्यार्थस्य वाचकं तस्य प्रतिवाच्यभेदादन्य एव हि गौरिति शब्दः पशोर्वाचकोऽन्यश्च दिगादेः अर्थभेदाच्छब्दभेदव्यवस्थितेः । अन्यथा सकलपदार्थस्यैकपदवाच्यत्वप्रसंगादिति । तस्याप्यनिष्टानुषंगः स्यात् । द्रव्यमिति पदस्याप्यनेकत्वप्रसंगात् । पृथिव्याद्यनेकार्थवाचकत्वात् अन्यदेव हि पृथिव्यां द्रव्यमिति पदं प्रवर्तते । अन्यदेवाप्सु तेजसि वाय्वाकाशे काले दिश्यात्मनि मनसि चेत्येकपदवाच्यत्वं द्रव्यपदार्थस्यासिद्धं स्यात् । ननु द्रव्यत्वाभिसंबंध एको द्रव्यपदस्यार्थो नानेकः पृथिव्यादिः तस्य पृथिव्यादिशब्दवाच्यत्वात् । तत एकमेव द्रव्यपदं नानेकमिति चेत् । किमिदानीं द्रव्यत्वाभिसंबंधो द्रव्यपदार्थः स्यात् ? न चासौ द्रव्यपदार्थस्तस्य द्रव्यत्वोपलक्षितसमवायपदार्थत्वात् । एतेन गुणत्वाभिसंबंधो गुणपदस्यार्थः कर्मत्वाभिसंबंधः कर्मपदस्येत्येतत्प्रतिव्यूढं गुणत्वाभिसंबंधस्य गुणत्वोपलक्षितसमवायपदार्थत्वात् कर्मत्वाभिसंबंधस्य च कर्मत्वोपलक्षितसमवायपदार्थस्य कथनात् । न चैवं सामान्यादिपदार्थः सिद्ध्यति । सामान्यादिषु सामान्यांतराभिसंबंधस्यासंभवादित्युक्तं प्राक् । एतेन पृथिवीत्वाद्यभिसंबंधात्पृथिवीत्यादिशब्दार्थस्य व्याख्यानं प्रत्याख्यातं । न हि पृथिवीत्वाभिसंबंधः पृथिवीशब्दवाच्यः । पृथिवीत्वोपलक्षितस्य समवायस्य पृथिवीत्वाभिसंबंधस्य पृथिवीशब्देनावचनात् । द्रव्यविशेषस्य पृथिवीशब्देनाभिधानाददोष इति चेत् । कःपुनरसौ वृक्षक्षुपादिपृथिवीभेदव्यतिरिक्तः पृथिवीद्रव्यविशेषः । पृथिवीति पदेन संगृह्यमाण इति चेत् । कथं पुनः पृथिवीपदेनैकेनानेकार्थः संगृह्यते ? द्रव्यादिपदेनैवेति दुःरवबोधं । कश्चायं संग्रहो नाम ? शब्दात्मकः प्रत्ययात्मकोऽर्थात्मको वा । न तावच्छब्दात्मकः शब्देनानंतानां द्रव्यादिभेदप्रभेदानां वा संग्रहीतुमशक्यत्वात् । तत्र संकेतस्य कर्तुमशक्यत्वादस्मदादेस्तदप्रत्यक्षत्वात् । क्रमेण युगपद्वा अननुमेयत्वाच्च । न चाप्रत्यक्षेऽननुमेये वा सर्वथाप्यप्रतिपन्नेऽर्थे संकेतः शक्यक्रियोऽस्ति । सर्वज्ञस्तत्र संकेतयितुं समर्थोऽपि नाऽसर्वज्ञान् संकेतं ग्राहयितुमलमिति कुतः संकेतः । न चासंकेतितेऽर्थे शब्दः प्रवर्तते यतः

संगृह्यतेऽनंताः पदार्थाः येन शब्देन स शब्दात्मा संग्रहः सिद्ध्यत्येव । माभूच्छब्दात्मकः संग्रहः प्रत्ययात्मकस्त्वस्तु । संगृह्यते अर्था येन प्रत्ययेन स संग्रह इति व्याख्यानात्तेन तेषां संग्रहीतुं शक्यत्वादिति चेत् । कुतः पुनरसौ प्रत्ययः प्रत्यक्षादनुमानादागमाद्वा ? न तावदस्मदादिप्रत्यक्षात् । तस्यानंतद्रव्यादिभेदप्रभेदागोचरत्वात् । नापि योगिप्रत्यक्षात् । योगिन एव तत्संग्रहप्रसंगादस्मदादीनां तदयोगात् । न हि योगिप्रत्यक्षादस्मदादयः संप्रतियंति योगित्वप्रसंगात् । नाप्यनुमानादनंतद्रव्यादिभेदप्रभेदप्रतिबद्धानामेकस्योऽनंतलिंगानामप्रतिपत्तेरस्मदाद्यप्रत्यक्षादनुमानांतरात्तल्लिंगप्रतिपत्तावनवस्थानुषंगात् प्रकृतानुमानोदयायोगात् । यदि पुनरागमात्संग्रहात्मकः प्रत्ययः स्यात्तदा युक्त्यानुगृहीतात्तयाऽननुगृहीताद्वा । न तावदाद्यः पक्षस्तत्र युक्तेरेवासंभवात् । नापि द्वितीयो युक्त्याऽननुगृहीतस्यागमस्य प्रामाण्यानिष्टेस्तदिष्टौ वाऽतिप्रसंगात् । न चाप्रमाणकः प्रत्ययः संग्रहस्तेन संगृहीतानामसंगृहीतकल्पनात् । यदि पुनरर्थात्मकः संग्रहोऽभिधीयते तदा संग्रह्यत इति संग्रहः संग्रह्यमाणः सकलोऽर्थः स्यात् । स चासिद्ध एव तद्व्यवस्थापकप्रमाणाभावादिति कथं तस्य व्याख्यानं युज्यते यतः पदार्थधर्मसंग्रहः प्रवक्ष्यत इति प्रतिज्ञासाधीयसीष्यते । संग्रहाभावे च कस्य महोदयत्वं साध्यतेऽसिद्धस्य स्वयमन्यसाधनत्वोपपत्तेः । एतेन पदार्थधर्मसंग्रहः सम्यग्ज्ञानमिति व्याख्यानं प्रतिव्यूढं । तदभावस्य समर्थनान्महतो निःश्रेयसस्याभ्युदयस्य चोदयोऽस्मादिति महोदय इत्येतद्व्याख्यानं बंध्यासुतसौभाग्यादिव्यावर्णनमिव प्रेक्षावतामुपहास्यास्पदमाभासते । तदेवं द्रव्यादि पदार्थानां यथावस्थितार्थत्वाभावान्न तद्विषयं सम्यग्ज्ञानं नापि हेयोपादेयव्यवस्था । येनोपादेयेषूपादेयत्वेन हेयेषु च हेयत्वेन श्रद्धानं श्रद्धाविशेषस्तत्पूर्वकं च वैराग्यं तदभ्यासभावनानुष्ठानं निःश्रेयसकारणं सिध्येत् । तदसिद्धौ च कथमर्हदुपदेशादिवेश्वरोपदेशादप्यनुष्ठानं प्रतिष्ठितं स्यात् । ततस्तद्व्यवच्छेदादेव महात्मा निश्चेतव्यः । कपिलसुगतव्यवच्छेदादिवेति सूक्तमिदमन्ययोगव्यवच्छेदान्महात्मनि निश्चितं तदुपदेशसामर्थ्यादनुष्ठानं प्रतिष्ठितं स्यादिति । एतेन ' प्रणम्यहेतुमीश्वरं मुनिं कणादमन्वतः ' इति परापरगुरुनमस्कारकरणमपास्तमीश्वरकणादयोराप्तत्वव्यवच्छेदात् । तयोर्यथाव्यवस्थितार्थज्ञानाभावात्तदुपदेशाप्रामाण्यादित्यलं विस्तरेण । विश्वतत्त्वानां ज्ञातुः कर्मभूभृतां भेत्तुरेव मोक्षमार्गप्रणयनोपपत्तेराप्तत्वनिश्चयात् ॥४॥

तत्रासिद्धं मुनींद्रस्य भेत्तृत्वं कर्मभूभृतां ।
ये वदंति विपर्यासात्तान्प्रत्येवं प्रचक्ष्महे ॥ ५ ॥

तत्र तेषु मोक्षमार्गप्रणेतृत्वकर्मभूभृद्भेत्तृत्वाविश्वतत्त्वज्ञातृत्वेषु कर्मभूभृतांभेत्तृत्वमसिद्धं । मुनींद्रस्य विपर्यासात्तदभेत्तृत्वात् कर्मभूभृदसंभवात्सदाशिवस्य ये वदंति योगास्तान्प्रत्येवं वक्ष्यमाणप्रकारेण प्रचक्ष्महे प्रवदाम इत्यर्थः ॥५॥

प्रसिद्धः सर्वतत्त्वज्ञस्तेषां तावत्प्रमाणतः ।
सदाविध्वस्तनिःशेषबाधकात्स्वसुखादिवत् ॥ ६ ॥

यदि नाम विश्वतत्त्वज्ञः प्रमाणात्सर्वदा विध्वस्तबाधकादात्मसुखादिवत्प्रसिद्धो योगानां तथापि किमिष्टं भवतां सिद्धं भवेदित्याह—

ज्ञाता यो विश्वतत्त्वानां स भेत्ता कर्मभूभृतां ।
भवत्येवान्यथा तस्य विश्वतत्त्वज्ञता कुतः ॥ ७ ॥ इति ।

स्याद्वादिनामस्माकं कर्मभूभृद्भेत्तृत्वं मुनीन्द्रस्येष्टं सिद्धं भवतीति वाक्यार्थः । तथाहि–भगवान् परमात्मा कर्मभूभृतां भेत्ता भवत्येव विश्वतत्त्वानां ज्ञातृत्वात् । यस्तु न कर्मभूभृतां भेत्ता स न विश्वतत्त्वानां ज्ञाता यथा रथ्यापुरुषः । विश्वतत्त्वानां ज्ञाता च भगवान् निर्बाधबोधसिद्धः । तस्मात् कर्मभूभृतां भेत्ता भवत्येवेति केवलव्यतिरेकी हेतुः साध्याऽव्यभिचारात् । न तावदयमसिद्धः प्रतिवादिनो वादिनो वा । ताभ्यामुभाभ्यां परमात्मनः सर्वज्ञत्वसाधनात् । नाप्यनेकांतिकः कात्स्न्र्यतो देशतो वा विपक्षे वृत्त्यभावात् । तत एवं न विरुद्धः । न त्वयं कालात्ययापदिष्टस्तदागमबाधितपक्षनिर्देशानंतरं प्रयुक्तत्वात् । सदैव मुक्तः सदैवेश्वरः पूर्वस्याः कोटेर्मुक्तात्मनामिवाभावादित्यागमान्महेश्वरस्य सर्वदा कर्मणामभावप्रसिद्धेस्तद्भेत्तृत्वस्य बाधप्रसिद्धेः । सतां हि कर्मणां कश्चिद्भेत्ता स्यान्न पुनरसतामित्यपरः । सोऽपि न परीक्षादक्षमानसः । तथा तद्बाधकागमस्याप्रमाणत्वात् तदनुग्राहकानुमानाभावात् । ननु च नेश्वराख्यः सर्वज्ञः कर्मभूभृतां भेत्ता सदा कर्ममलैरस्पृष्टत्वात् । यस्तु कर्मभूभृतां भेत्ता स न कर्ममलैः शश्वदस्पृष्टो यथेश्वरादन्योमुक्तात्मा शश्वदस्पृष्टश्च कर्ममलैर्भगवान्महेश्वरस्तस्मान्न कर्मभूभृतां भेत्तेत्यनुमानं प्रकृतपक्षबाधकागमानुग्राहकं । न चात्रासिद्धसाधनं । तथाहि–शश्वत्कर्ममलैः अस्पृष्टः परमात्माऽनुपायसिद्धत्वात् । यस्तु न तथा स नानुपायसिद्धो यथा सादिर्मुक्तात्मा । अनुपायसिद्धश्च सर्वज्ञो भगवान् तस्मात्कर्ममलैः शश्वदस्पृष्ट इत्यतोऽनुमानांतरात्तत्सिद्धेरिति वदंतं प्रत्याह–

नास्पृष्टः कर्मभिः शश्वद्विश्वदृश्वास्ति कश्चन ।
तस्यानुपायसिद्धस्य सर्वथाऽनुपपत्तितः ॥ ८ ॥

न ह्यनुपायसिद्धत्वे कुतश्चित्प्रमाणादप्रसिद्धे तद्बलात्कर्मभिः शश्वदस्पृष्टत्वसाधनं सिद्धिमध्यास्ते । तदसिद्धौ च न कर्मभूभृद्भेत्तृत्वाभावस्ततः सिध्यति । येनेदमनुमानं प्रस्तुतपक्षबाधकागमस्यानुग्राहकं सिद्ध्येत्तत्प्रामाण्यं साधयेत् । न चाप्रमाणभूतेनागमेन प्रकृतः पक्षो बाध्यते हेतुश्च कालात्ययापदिष्टः स्यात् । नन्वीश्वरस्यानुपायसिद्धत्वमनादित्वात्साध्यते । तदनादित्वं च तनुकरणभुवनादौ निमित्तकारणत्वादीश्वरस्य । न चैतदसिद्धं । तथा हि–तनुभुवनकरणादिकं विवादापन्नं बुद्धिमन्निमित्तकं कार्यत्वात् । यत्कार्यं तद्बुद्धिमन्निमित्तकं दृष्टं यथा वस्त्रादि । कार्यं चेदं प्रकृतं तस्माद् बुद्धिमन्निमित्तकं । योऽसौ बुद्धिमांस्तद्धेतुः स ईश्वर इति प्रसिद्धं साधनं तदनादित्वं साधयत्येव । तस्य सादित्वे ततः पूर्वे तन्वाद्युत्पत्तिविरोधात् । तदुत्पत्तौ वा तद्बुद्धिमन्निमित्तत्वाभावप्रसंगात् । यदि पुनस्ततः पूर्वमन्यबुद्धिमान्निमित्तकत्वमिष्यते तदा ततोऽपि पूर्वमन्यद्बुद्धिनिमित्तकत्वमिष्यते तदा ततोऽपि पूर्वमन्यबुद्धिमन्निमित्तकत्वमित्यनादीश्वरसंततिः सिद्ध्येत् । न चैषा युक्तिमती । पूर्वेश्वरस्यानंतस्य सिद्धावुत्तरसकलेश्वरकल्पना वैयर्थ्यात् । तेनैव तन्वादिकार्यपरम्परायाः सकलाय निर्माणात् । ततोऽपि पूर्वस्यानंतस्य महेश्वरस्य सिद्धौ तस्य वैयर्थ्यादन्यथा परस्परमिच्छाव्याघातप्रसंगादनेकेश्वरकारणत्वापत्तेश्च जगतः । सुदूरमपि गत्वाऽनादिरेक एवेश्वरोऽनुमंतव्यः । स पूर्वेषामपि गुरुः कालेनाविच्छेदादिति तस्य जगन्निमित्तत्वसिद्धेरनादित्वमंतरेणानुपपत्तेरित्यनादित्वसिद्धिः । ततो न कर्मभूभृतां भेत्ता मुनींद्रः शश्वत्कर्मभिरस्पृष्टत्वात् । यस्तु कर्मभूभृतां भेत्ता स न शश्वत्कर्मभिरस्पृष्टः । यथोपायान्मुक्तः । शश्वत्कर्मभिरस्पृष्टश्च भगवांस्तस्मान्न कर्मभूभृतां भेत्ता शश्वत्कर्मभिरस्पृष्टोऽसावनुपायसिद्धत्वात् । यस्तु न तथा स नानुपायसिद्धः । यथा सोपायमुक्तात्मा अनुपायसिद्धश्चायं तस्मात्सदा कर्मभिरस्पृष्टः । अनुपायसिद्धोऽयमनादित्वात् । यस्तु न तथा स नानादिः । यथेतरो मुक्तात्मा । अनादिश्चायं तस्मादनुपायसिद्धः । अनादिरयं तनुकरणभुवनादिनिमित्तत्वात् । यस्तु नानादिः स न त

नुकरणभुवनादिनिमित्तकः । यथाऽपरोमुक्तात्मा । तनुकरणभुवनादिनिमित्तं च भगवांस्तस्मादनादिः । तनुकरणभुवनादिनिमित्तं तु तस्य तन्वादेर्बुद्धिमन्निमित्तत्वसाधनात् । तन्वादयो बुद्धिवन्निमित्तकाः कार्यत्वात् । यत्कार्यं तद्बुद्धिमन्निमित्तकं दृष्टं । यथा वस्त्रादि । कार्यं च तन्वादयो विवादापन्नास्तस्माद् बुद्धिमन्निमित्तका इत्यनुमानमालाऽमला । कर्मभूभृतां भेत्तारमपास्यत्येव । न चेदं कार्यत्वमसिद्धं तन्वादेर्वादिप्रतिवादिनोः कार्यत्वाभ्यनुज्ञानात् । नाप्यनेकांतिकं, कस्यचित्कार्यस्याबुद्धिमन्निमित्तस्यासंभवाद्विपक्षे वृत्त्यभावात् । न चेश्वरशरीरेण व्यभिचारस्तदसिद्धेरीश्वरस्याशरीरत्वात् । नापीश्वरज्ञानेन । तस्य नित्यत्वात्कार्यत्वासिद्धेः । न चेश्वरेच्छया । तस्येच्छाशक्तेरपि नित्यत्वात् क्रियाशक्तिवत् । तत एव न विरुद्धं साधनं सर्वथा विपक्षे संभवाभावात् । नचायं कालात्ययापदिष्टो हेतुः पक्षस्य प्रत्यक्षादिप्रमाणेनाबाधित्वात् । न हि तन्वादेर्बुद्धिमन्निमित्तत्वं प्रत्यक्षेण बाध्यते तस्यातींद्रियतया तदविषयत्वात् । नाप्यनुमानेन तस्य तद्विपरीतसाधनस्यासंभवात् । ननु तनुभुवनकरणादयो न बुद्धिमन्निमित्तका दृष्टकर्तृकप्रसादादिविलक्षणत्वादाकाशादिवदित्यनुमानं पक्षस्य बाधकमिति चेत् न । असिद्धत्वात् । सन्निवेशादिविशिष्टत्वेन दृष्टकर्तृकप्रासादाद्यविलक्षणत्वात्तन्वादीनां यदि पुनरगृहीतसमयस्य कृतबुद्ध्युत्पादकत्वाभावात्तन्वादीनां दृष्टकर्तृकविलक्षणत्वमिष्यते तदा कृत्रिमाणामपि मुक्ताफलादीनामगृहीतसमयस्य कृतबुद्ध्यनुत्पादकत्वादबुद्धिमन्निमित्तकत्वप्रसंगः । न च दृष्टकर्तृकत्वादृष्टकर्तृकत्वाभ्यां बुद्धिमन्निमित्तत्वेतरत्वसिद्धिः साधीयसी तदविनाभावाभावात् । न ह्यदृष्टकर्तृकत्वमबुद्धिमन्निमित्तत्वेन व्याप्तं जीर्णप्रासादादेरदृष्टकर्तृकस्यापि बुद्धिमन्निमित्तत्वसिद्धेरिति न दृष्टकर्तृकविलक्षणत्वमबुद्धिमन्निमित्तत्वं साधयेत् यतोऽनुमानबाधितः पक्षः स्यात् कालात्ययापदिष्टं च साधनमभिधीयेत । नाप्यागमेन प्रकृतः पक्षो बाध्यते तत्साधकस्यैवागमस्य प्रसिद्धेः । तथा हि "विश्वतश्चक्षुरुत विश्वतोमुखो, विश्वतो बाहुरुत विश्वतः पात्, संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनन्, यन् देव एक" श्रुतेः सद्भावात् । तथा व्यासवचनं च । "अज्ञो जंतुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा" इति पक्षस्यानुग्राहकमेव न तु बाधकं । ततो न कालात्ययापदिष्टो हेतुरबाधितपक्षनिर्देशानंतरं प्रयुक्तत्वात् । तत एव न सत्प्रतिपक्षः बाधकानुमानाभावादित्यनवद्यं कार्यत्वसाधनं तन्वादीनां बुद्धिमन्निमित्तत्वं साधयत्येव । यदप्युच्यते कैश्चिद्बुद्धिमन्निमित्तत्वसामान्ये साध्येतन्वादीनां सिद्धसाधनमनेकतदुपभोक्तृबुद्धिमन्निमित्तत्वसिद्धेः । तेषां तददृष्टनिमित्तत्वात्तददृष्टस्य चेतनारूपत्वात् चेतनायाश्च बुद्धित्वाद् बुद्धिमन्निमित्तत्वसिद्धेरिति । तदप्यसारं । तन्वाद्युपभोक्तृप्राणिनामदृष्टस्य धर्माधर्मसंज्ञकस्य चेतनत्वासिद्धेरबुद्धित्वात् । अर्थग्रहणं हि बुद्धिश्चेतना न च धर्मोऽर्थग्रहणमधर्मो वा तयोर्बुद्धेरन्यत्वात् प्रयत्नादिवदिति नानेकबुद्धिमन्निमित्तत्वं तन्वादीनां सिद्ध्यति यतः सिद्धसाधनं बुद्धिमन्निमित्तत्वसामान्ये साध्येऽभिधार्यते ॥ ननु च वस्त्रादि सशरीरेणासर्वज्ञेन च बुद्धिमता कुविंदादिना क्रियमाणं दृष्टमिति तन्वादिकार्यमपि सशरीरासर्वज्ञबुद्धिमन्निमित्तं सिद्ध्येदितीष्टविरुद्धसाधनाद्विरुद्धं साधनं । सर्वज्ञनाशरीरेण क्रियमाणस्य कस्यचिद्वस्त्रादिकार्यस्यासिद्धेश्च साध्य विकलमुदाहरणमिति कश्चित् । सोऽपि न युक्तवादी तथा सर्वानुमानोच्छेदप्रसंगात् । तथा हि साग्निरयं पर्वतो धूमवत्त्वान्महानसवदित्यत्रापि पर्वतादौ महानसपरिदृष्टस्यैव खादिरपालाशाद्यग्निनाग्निभावस्य सिद्धेर्विरुद्धसाधनाद्विरुद्धं साधनं स्यात् । तार्णाद्यग्निनाग्निमत्वस्य पर्वतादौ साध्यस्य महानसादावभावात् साध्यविकलमुदाहरणमप्यनुषज्येत । यदि पुनरग्निमत्वसामान्यं देशादिविशिष्टं पर्वतादौ साध्यत इति नेष्टविरुद्धं साधनं । नापि साध्यविकलमुदाहरणं महानसादावपि देशादिविशिष्टस्याग्नि-

---

१ अबुद्धिमन्निमित्तादिकं विपक्षः । २ कार्यज्ञानं विवादाध्यासितं । ३ वचनं । ४ व्यापारः ५ व्यापित्वं ६ पुण्यपापाभ्यां । ७ परमाणुभिः ।

मत्त्वस्य सद्भावादिति मतं तदा तन्वादिषु बुद्धिमन्निमित्तत्वसामान्यं तन्वादिस्वकार्यविनिर्माणशक्ति विशिष्टं साध्यत इति नेष्टविरुद्ध साधनो हेतुः । नापि साध्यविकलो दृष्टांतः स्वकार्यविनिर्माणशक्ति विशिष्टस्य बुद्धिमन्निमित्तत्वसामान्यस्य साध्यस्य तत्र सद्भावात् । सिद्धे च बुद्धिमन्निमित्तत्वसामान्ये किमयं बुद्धिमान् हेतुः सशरीरोऽशरीरोवेति विप्रतिपत्तौ तस्याशरीरत्वं साध्यते सशरीरत्वे वाधक-सद्भावात् । तच्छरीरं हि न तावन्नित्यमनादि सावयवत्वादस्मदादिशरीरवत् । नाप्यनित्यं सादि तदु-त्पत्तेः पूर्वमीश्वरस्याशरीरत्वसिद्धेः शरीरांतरेण सशरीरत्वेऽनवस्थाप्रसंगात् । तथा किमसौ सर्वज्ञोऽस-र्वज्ञोवेति विवादे सर्वज्ञत्वं साध्यते तस्यासर्वज्ञत्वे समस्तकारकप्रयोक्तृत्वानुपपत्तेः तन्वादिकारणत्वाभा-वप्रसंगात् । तन्वादि सकलकारकाणां परिज्ञानाभावेऽपि प्रयोक्तृत्वे तन्वादिकार्यव्याघातप्रसंगात् । कुविंदादेर्वस्त्रादिकारकस्यापरिज्ञाने तद्व्याघातवत् । न चेश्वरकार्यस्य तनुकरणभुवनादेः कदाचिद्व्याघातः संभवति महेश्वरसमीहितकार्यस्य यथाकारकसंपातं[1] विचित्रस्यादृष्टादेरव्याघातदर्शनात् । यदप्यभ्य-धायि तनुकरणभुवनादिकं नैकस्वभावेश्वरकारणकृतं विचित्रकार्यत्वात् । यद्विचित्रं कार्यं तन्नैकस्वभा-वकारणकृतं दृष्टं यथा घटपटमुकुटशकटादि, विचित्रकार्यं च प्रकृतं तस्मान्नैकस्वभावेश्वराख्यका-रणकृतमिति तदप्यसम्यक् सिद्धसाध्यतापत्तेः । न ह्येकस्वभावमीश्वराख्यं तन्वादेर्निमित्तकारणमि-ष्यते तस्य ज्ञानशक्तीच्छाशक्तिक्रियाशक्तित्रयस्वभावत्वात् । तनुकरणभुवनाद्युपभोक्तृप्राणिगणा-दृष्टविशेषवैचित्र्यसहकारित्वाच्च विचित्रस्वभावोपपत्तेः घटपटमुकुटादिकार्यस्यापि तन्निदर्शनस्य तदुत्पादनविज्ञानेच्छाक्रियाशक्तिविचित्रतदुपकरणसचिवेनैकेनपुरुषेण समुत्पादनसंभवात्साध्यविकल-तानुषंगात् तदेवं कार्यत्वं हेतुस्तनुकरणभुवनादेर्बुद्धिमन्निमित्तत्वं साधयत्येव सकलदोषरहितत्वादिति वैशेषिकाः समभ्यमंसत तेऽपि न समंजसवाचः । तनुकरणभुवनादयो बुद्धिमन्निमित्तका इति पक्षस्य व्यापकानुपलंभेन वाधितत्वात् कार्यत्वादिहेतोः कालात्ययापदिष्टत्वाच्च । तथा हि तन्वादयो न बुद्धि-मन्निमित्तकास्तदन्वयव्यतिरेकानुपलंभात् । यत्र यदन्वयव्यतिरेकानुपलंभस्तत्र न तन्निमित्तकत्वं दृष्टं यथा घटघटीशरावोदंचनादिषु कुविंदाद्यन्वयव्यतिरेकाऽननुविधायिषु न कुविंदादिनिमित्तकत्वं । बुद्धिमदन्वयव्यतिरेकाऽनुपलंभश्च तन्वादिषु, तस्मान्नबुद्धिमन्निमित्तकत्वमिति व्यापकानुपलंभः तत्कार-णकत्वस्य तदन्वयव्यतिरेकोपलंभेन व्याप्तत्वात् कुलालकारणकस्य घटादेः कुलालान्वयव्यतिरेकोपलंभ प्रसिद्धेः सर्वत्र वाधकाभावात् । तस्य तद्व्यापकत्वव्यवस्थानात् । न चायमसिद्धस्तन्वादीनामीश्वरव्य-तिरेकानुपलंभस्य प्रमाणसिद्धत्वात् । स हि न तावत्कालव्यतिरेकः शाश्वतिकत्वादीश्वरस्य कदाचिद-भावासंभवात् । नापि देशव्यतिरेकः तस्य विभुत्वेन क्वचिदभावानुपपत्तेरीश्वराभावे कदाचित्काचित्त-न्वादिकार्याभावानिश्चयात् । स्यान्मतं महेश्वरासिसृक्षानिमित्तत्वात्तन्वादिकार्यस्यायमदोष इति । तदप्यसत्यं । तादिच्छाया नित्यानित्यविकल्पद्वयानतिवृत्तेः । तस्यानित्यत्वे व्यतिरेकासिद्धिः । सर्वदा-सद्भावात्तन्वादिकार्योत्पत्तिप्रसंगात् । नन्वीश्वरेच्छायानित्यत्वेऽप्यसर्वगतत्वात् व्यतिरेकः सिद्ध एव क्वचिन्महेश्वरसिसृक्षापाये तन्वादिकार्यानुत्पत्तिसंभवादिति चेन्न । तद्देशे व्यतिरेकाभावसिद्धेः । देशांतरे सर्वदा तदनुपपत्तेः कार्यानुदयप्रसंगात् । अन्यथा तदनित्यत्वापत्तेः अनित्यैवेच्छास्त्विति चेत् सा तर्हि सिसृक्षा महेश्वरस्योत्पद्यमाना सिसृक्षांतरपूर्विका यदीष्यते तदाऽनवस्थाप्रसंगः परापर-सिसृक्षोत्पत्तावेव महेश्वरस्योपक्षीणशक्तिकत्वात्प्रकृततन्वादिकार्यानुदयएव स्यात् यदि पुनः प्रकृत-तन्वादिकार्योत्पत्तौ महेश्वरस्य सिसृक्षोत्पद्यते सापि तत्पूर्वसिसृक्षात इत्यनादिसिसृक्षासंततिर्नानवस्था-दोषमास्कंदति सर्वत्रकार्यकारणसंतानस्यानादित्वसिद्धेर्बीजांकुरादिवदित्यभिधीयते तदा युगपन्नानादे-शेषु तन्वादिकार्यस्योत्पादो नोपपद्येत यत्र यत्कार्योत्पत्तये महेश्वरासिसृक्षा तत्र तस्यैवकार्यस्योत्पत्ति-

[1] कारकसंघातमित्यपि पाठः

घटनात् । न च यावत्सु देशेषु यावंति कार्याणि संभूष्णूनि तावंत्यः सिसृक्षास्तस्येश्वरस्य सकृदुपजायंत इति वक्तुं शक्यं युगपदनेकेच्छाप्रादुर्भावविरोधादस्मदादिवत् । यदि पुनरेकैव महेश्वरसिसृक्षा युगपन्नानादेशकार्ये जननाय प्रजायत इतीष्यते तदा क्रमतोऽनेकतन्वादिकार्योत्पत्तिविरोधस्तादिच्छायाः शश्वदभावात् । अथ मतमेतत् यत्र यदा यथा यत् कार्यमुत्पित्सु तत्र तदा तथा तदुत्पादनेच्छा महेश्वरस्यैकैव तादृशी समुत्पद्यते ततो नानादेशेष्वेकदेशे च क्रमेण युगपच्च तादृशमन्यादृशं च तन्वादिकार्यं प्रादुर्भवन्नविरुध्यत इति तदप्यसंभाव्यं क्वचिदेकत्र प्रदेशे समुत्पन्नायाः सिसृक्षाया दविष्टदेशेषु विभिन्नेषु नानाविधेषु नानाकार्यजनकत्वविरोधात् अन्यथा तदसर्वगतत्वेऽपि देशव्यतिरेकानुपपत्तेः । यदि हि यद्देशा सिसृक्षा तद्देशमेव कार्यजन्म नाऽन्यदेशमिति व्यवस्था स्यात्तदा देशव्यतिरेकः सिद्ध्येन्नान्यथेति सिसृक्षाया न व्यतिरेकोपलंभो महेश्वरवत् । व्यतिरेकाभावे च नान्वयनिश्चयः शक्यः कर्तुं सतीश्वरे तन्वादिकार्याणां जन्मेत्यन्वयो हि पुरुषांतरेष्वपि समानः । तेष्वपि सत्सु तन्वादिकार्योत्पत्तिसिद्धेः । न च तेषां सर्वकार्योत्पत्तौ निमित्तकारणत्वं दिक्कालाकाशानामिव संमतं । परेषां सिद्धांतविरोधान्महेश्वरनिमित्तकारणत्ववैयर्थ्याच्च । यदि पुनस्तेषु पुरुषांतरेषु सत्स्वपि कदाचित्तन्वादिकार्यानुत्पत्तिदर्शनान्न तन्निमित्तकारणत्वं तदन्वयाभावश्चेति मतं तदेश्वरे सत्यपि कदाचित्तन्वादिकार्यानुत्पत्तेरीश्वरस्यापि तन्निमित्तकारणत्वं माभूत् । तदन्वयासिद्धिश्च तद्वदायाता । एतेनेश्वरसिसृक्षायां नित्यायां सत्यामपि तन्वादिकार्याजन्मदर्शनादन्वयाभावः साधितः । कालादीनां च तेषु सत्स्वपि सर्वकार्यानुत्पत्तेः । स्यान्मतं सामग्रीजनिका कार्यस्य नैकं कारणं ततस्तदन्वयव्यतिरेकावेव कार्यस्यान्वेषणीयौ नैकेश्वरान्वयव्यतिरेकौ सामग्री च तन्वादिकार्योत्पत्तौ तत्समवायिकारणमसमवायिकारणं निमित्तकारणं चेति । तेषु सत्सु कार्योत्पत्तिदर्शनादसत्सुचादर्शनादिति सत्यमेतत् । केवलं यथा संमवाय्यसमवायिकारणानामनित्यानां धर्मादीनां च निमित्तकारणानामन्वयव्यतिरेकौ प्रसिद्धौ कार्यजन्मनि तथा नेश्वरस्य नित्यसर्वगतस्य तदिच्छाया वा नित्यैकस्वभावाया इति तदन्वयव्यतिरेकानुपलंभः प्रसिद्धएव । न हि सामग्र्येकदेशस्यान्वयव्यतिरेकसिद्धौ कार्यजन्मनि सर्वसामग्र्यास्तदन्वयव्यतिरेकसिद्धिरिति शक्यं वक्तुं । प्रत्येकं सामग्र्येकदेशानां कार्योत्पत्तावन्वयव्यतिरेकनिश्चयस्य प्रेक्षापूर्वकारिभिरन्वेषणात् । पटाद्युत्पत्तौ कुविंदादिसामग्र्येकदेशवत् । यथैव हि तंतुतुर्यांवेमशलाकादीनामन्वयव्यतिरेकाभ्यां पटस्योत्पत्तिर्दृष्टा तथा कुविंदान्वयव्यतिरेकाभ्यामपि । तदुपभोक्तृजनादृष्टान्वयव्यतिरेकाभ्यामिवेति सुप्रतीतं । ननु सर्वकार्योत्पत्तौ दिक्कालाकाशादिसामग्र्यन्वयव्यतिरेकानुविधानवदीश्वरादिसामग्र्यन्वयव्यतिरेकानुविधानस्य सिद्धेर्न व्यापकानुपलंभः सिद्ध इति चेत् न दिक्कालाकाशादीनामपि नित्यसर्वगतानिरवयवत्वे क्वचिदन्वयव्यतिरेकानुविधानायोगादुदाहरणवैषम्यात् तेषामपि हि परिणामित्वे सप्रदेशत्वे च परमार्थतः स्वकार्योत्पत्तौ निमित्तत्वसिद्धेः ॥ नन्वेवमीश्वरस्यापि बुद्ध्यादिपरिणामैः स्वतोऽर्थांतरभूतैः परिणामित्वात् सकृत्सर्वमूर्तिमद्द्रव्यसंयोगनिबंधनप्रदेशसिद्धेश्च तन्वादिकार्योत्पत्तौ निमित्तकारणत्वं युक्तं तदन्वयव्यतिरेकानुविधानस्य तन्वादेरुपपन्नत्वात् । स्वतोनर्थांतरभूतैरेव हि ज्ञानादिपरिणामैरीश्वरस्य परिणामित्वं नेष्यते स्वारंभकावयवैश्च सावयवत्वं निराक्रियते । न पुनरन्यथा, विरोधाभावान्न चैवमनिष्टप्रसंगः द्रव्यांतरपरिणामैरपि परिणामित्वाप्रसंगात् तेषां तत्रासमवायात् । ये हि यत्र समवायंति परिणामास्तैरेव तस्य परिणामित्वं । परमाणोश्च स्वारंभकावयवाभावेऽपि सप्रदेशत्वप्रसंगो नानिष्टापत्तये नैयायिकानां । परमाण्वंतरसंयोगनिबंधनस्यैकस्य प्रदेशस्य परमाणोरपीष्टत्वात् । न चोपचरितप्रदेशप्रतिज्ञा आत्मादिष्वेवं विरुद्ध्यते स्वारंभकावयवलक्षणानां प्रदेशानां तत्रोपचरितत्वप्रतिज्ञानात् । मूर्तिमद्द्रव्यसंयोगनिबंधनानां तु तेषां पारमार्थिकत्वात् अन्यथा सर्वमूर्तिमद्द्रव्यसंयोगानां युगपद्धविनामुपचरितत्वप्रसगात् विभुद्रव्याणां सर्वगतत्वमप्यु-

पचरितं स्यात् । परमाणोश्च परमाण्वंतरसंयोगस्य पारमार्थिकासिद्धेर्द्व्यणुकादिकार्यद्रव्यमपारमार्थिकमासज्येत । कारणस्योचरितत्वेकार्यस्यानुपचरितत्वायोगादिति केचित्प्रचक्ष्यते । तेऽपि स्याद्वादिमतमंधसर्पविलप्रवेशन्यायेनानुसरंतोऽपि नेश्वरस्य निमित्तकारणत्वं तन्वादिकार्योत्पत्तौ समर्थयितुमीशते । तथापि तदन्वयव्यतिरेकानुविधानस्य साधयितुमशक्यत्वादात्मांतरान्वयव्यतिरेकानुविधानवत् । यथैव ह्यात्मांतराणि तन्वादिकार्योत्पत्तौ न निमित्तकारणानि तेषु सत्सु भावादन्वयासिद्धावपि तच्छून्ये च देशे क्वचिदपि तन्वादिकार्यानुत्पत्तेर्व्यतिरेकसिद्धावपि च । तथेश्वरे सत्येव तन्वादिकार्योत्पत्तेस्तच्छून्ये प्रदेशे क्वचिदपि तदनुत्पत्तेस्तच्छून्यस्य प्रदेशस्यैवाभावादन्वयव्यतिरेकसिद्धावपीश्वरो निमित्तकारणं माभूत् सर्वथा विशेषाभावात् । स्यान्मतं महेश्वरस्य बुद्धिमत्त्वात् समस्तकारकपरिज्ञानयोगात्तत्प्रयोक्तृत्वलक्षणं निमित्तकारणत्वं तन्वादिकार्योत्पत्तौ व्यवतिष्ठते । न पुनरात्मांतराणामज्ञत्वात्तल्लक्षणनिमित्तकारणत्वाघटनादिति । तदपि न समीचीनं सर्वज्ञस्य समस्तकारकप्रयोक्तृत्वासिद्धेः योग्यंतरवत् । न हि योग्यंतराणां सर्वज्ञत्वेऽपि समस्तकारकप्रयोक्तृत्वमिष्यते । ननु तेषां समस्तपदार्थज्ञानस्यांत्यस्य योगाभ्यासविशेषजन्मनः सद्भावे सकलमिथ्याज्ञानदोषप्रवृत्तिजन्मदुःखपरिक्षयात्परमनिःश्रेयससिद्धेः समस्तकारकप्रयोक्तृत्वासिद्धिः । न पुनरीश्वरस्य तस्य सदा मुक्तत्वात् सदैवेश्वरत्वाच्च संसारिमुक्तविलक्षणत्वात् । न हि संसारिवदज्ञोमहेश्वरः प्रतिज्ञायते नापि मुक्तवत् समस्तज्ञानैश्वर्यरहित इति तस्यैव समस्तकारकप्रयोक्तृत्वलक्षणं निमित्तकारणत्वं कायादिकार्योत्पत्तौ संभाव्यत इति केचित् । तेऽपि न विचारचतुरचेतसः । कायादिकार्यस्य महेश्वराभावे क्वचिदभावासिद्धेर्व्यतिरेकासंभवस्य प्रतिपादितत्वात् । निश्चितान्वयस्याप्यभावात् । ननु च यत्र यदा यथा महेश्वरसिसृक्षा संभवति तत्र तदा तथा कायादिकार्यमुत्पद्यते । अन्यत्रान्यदाऽन्यथा तदभावान्नोत्पद्यत इत्यन्वयव्यतिरेकौ महेश्वरसिसृक्षायाः कायादिकार्यमनुविधत्ते कुंभादिकार्यवत् कुलालादिसिसृक्षायाः । ततो नान्वयव्यतिरेकयोर्व्यापकयोरनुपलंभोऽस्ति यतो व्यापकानुलंभः पक्षस्य बाधकः स्यादितिचेन्न । तस्या महेश्वरसिसृक्षायाः कायादिकार्योत्पत्तौ नित्यानित्यत्वाविकल्पद्वयेऽपि निमित्तकारणत्वनिराकरणात् । तदन्वयव्यतिरेकानुविधानस्यासिद्धेर्व्यापकानुपलंभः प्रसिद्ध एव पक्षस्य बाधक इत्यनुमानबाधितपक्षत्वात् कालात्ययापदिष्टहेतुत्वाच्च न बुद्धिमन्निमित्तत्वसाधनं साधीयः सिद्धं यतोऽनुपायसिद्धः सर्वज्ञोऽनादिः कर्मभिरस्पृष्टः सर्वदा सिद्ध्येदिति सूक्तं "तस्यानुपायसिद्धस्य सर्वथाऽनुपपत्तित" इति । योप्याह मोक्षमार्गप्रणीतिरनादिसिद्धसर्वज्ञमंतरेण नोपपद्यते सोपायासिद्धस्य सर्वज्ञस्यानवस्थानात् मोक्षमार्गप्रणीतेरसंभवात् अवस्थाने वा तस्य समुत्पन्नतत्त्वज्ञानस्यापि साक्षान्न तत्त्वज्ञानं मोक्षस्य कारणं तद्भावभावित्वाभावात्तत्त्वज्ञानात्पूर्वं मोक्षमार्गस्य प्रणयने तदुपदेशस्य प्रामाण्यायोगादतत्त्वज्ञवचनाद्व्याप्तुरुषवचनवत् । नापि प्रादुर्भूतसाक्षात्तत्त्वज्ञानस्यापि परमवैराग्योत्पत्तेः पूर्वमवस्थानसंभवान्मोक्षमार्गप्रणीतिर्युक्ता । साक्षात्सकलतत्त्वज्ञानस्यैव परमवैराग्यस्वभावत्वात् । एतेन सम्यग्दर्शनज्ञानचारित्रप्रकर्षपर्यंतप्राप्तौ निःश्रेयसमिति वदतोऽपि न मोक्षमार्ग प्रणयनसिद्धिरिति प्रतिपादितं बोद्धं । केवलज्ञानोत्पत्तौ क्षायिकसम्यग्दर्शनस्य क्षायिकचारित्रस्य च परमप्रकर्षपरिप्राप्तस्य सद्भावात् सम्यदर्शनादित्रयप्रकर्षपर्यंतप्राप्तौ परममुक्तिप्रसंगादवस्थानायोगान्मोक्षमार्गोपदेशासंभवात् तदाप्यवस्थाने सर्वज्ञस्य न तावन्मात्रकारणत्वं मोक्षस्य स्यात् तद्भावभावित्वाभावादेव ज्ञानमात्रवदिति तन्मतमप्यनूद्य विचारयन्नाह—

प्रणीतिर्मोक्षमार्गस्य न विनाऽनादिसिद्धतः ।
सर्वज्ञादिति तत्सिद्धिर्न परीक्षासहा स हि ॥९॥

प्रणेता मोक्षमार्गस्य नाशरीरोऽन्यमुक्तवत् ।
सशरीरस्तु नाऽकर्मा संभवत्यज्ञजंतुवत् ॥१०॥

यस्मादनादिसिद्धात्सर्वज्ञान्मोक्षमार्गप्रणीतिः सादिसर्वज्ञान्मोक्षमार्गप्रणयनासंभवभयादभ्यनुज्ञायते । सोऽशरीरो वा स्यात्सशरीरो वा गत्यंतराभावात् । न तावदशरीरो मोक्षमार्गस्य प्रणेता संभवति तदन्यमुक्तवद्वाक्प्रवृत्तेरयोगात् । नापि सशरीरः सकर्मकत्वप्रसंगादज्ञप्राणिवत् । ततो न अनादिसिद्धस्य सर्वज्ञस्य मोक्षमार्गप्रणीतिः परीक्षां सहते यतोऽसौ व्यवस्थाप्यते । ननु चाशरीरत्व सशरीरत्वयोर्मोक्षमार्गप्रणीतिप्रत्यनंगत्वात्तत्त्वज्ञानेच्छाप्रयत्ननिमित्तत्वात्तस्याः कायादिकार्योत्पादनवत् । तन्मात्रनिबंधनत्वोपलब्धेः कार्योत्पादनस्य । तथा हि कुंभकारः कुंभादिकार्यं कुर्वन्न सशरीरत्वेन कुर्वीत सर्वस्य सशरीरस्य कुविंदादेरपि कुंभादिकरणप्रसंगात् । नाप्यशरीरत्वेन कश्चित्कुंभादिकार्यं कुरुते मुक्तस्य तत्करणप्रसंगात् । किं तर्हि कुंभादिकार्योत्पादनज्ञानेच्छाप्रयत्नैः कुंभकारः कुंभादिकार्यं कुर्वन्नुपलभ्यते तदन्यतमापायेऽपि तदनुपपत्तेः ज्ञानापाये कस्यचिदिच्छतोऽपि कार्योत्पादनादर्शनात् । कार्योत्पादनेच्छापाये च ज्ञानवतोऽपि तदनुपलब्धेः । तत्र प्रयत्नापाये च कार्योत्पादनज्ञानेच्छावतोऽपि तदसंभवात् । ज्ञानादित्रयसद्भावे च कार्योत्पत्तिदर्शनात् तत्त्वज्ञानेच्छाप्रयत्ने निबंधनमेव कार्यकरणमनुमंतव्यं । तदास्ति च महेश्वरज्ञानेच्छाप्रयत्नत्रयं । ततोऽसौ मोक्षमार्ग प्रणयनं कायादिकार्यवत्करोत्येव विरोधाभावादिति कश्चित् सोऽपि न युक्तवादी विचारासहत्वात् । सदा कर्मभिरस्पृष्टस्य कचिदिच्छाप्रयत्नयोरयोगात्तदाह—

न चेच्छा शक्तिरीशस्य कर्माभावेऽपि युज्यते ।
तादिच्छावाऽनभिव्यक्ता क्रियाहेतुः कुतोऽज्ञवत् ॥११॥

न हि कुंभकारस्येच्छाप्रयत्नौ कुंभाद्युत्पत्तौ निःकर्मणःप्रतीतौ सकर्मण एव तस्य तत्प्रसिद्धेः । यदि पुनः संसारिणः कुंभकारस्य कर्मनिमित्तेच्छा सिद्धा सदामुक्तस्य तु कर्माभावेऽपीच्छाशक्तिः । संभवति सोपायमुक्तस्येच्छापायात् न च तद्वदीश्वरस्य तदसंभव इति मतं । तदा सा महेश्वरेच्छाशक्तिरभिव्यक्तानभिव्यक्ता वा । न तावदभिव्यक्ता तदभिव्यंजकाभावात् तज्ज्ञानमेव तदभिव्यंजकमितिचेत् न तस्य शश्वत्सद्भावादीश्वरस्य सदेच्छाभिव्यक्तिप्रसंगात् । न चैवं तस्याः कादाचित्कत्वात् । अन्यथा वर्षशतांते वर्षशतांते महेश्वरेच्छोत्पद्यते इति सिद्धांताविरोधात् । यदि पुनस्तन्वाद्युपभोक्तृ प्राणिगणादृष्टं तदभिव्यंजकमिति मतिः तदा तददृष्टमीश्वरेच्छानिमित्तकमन्यनिमित्तकं वा । प्रथमपक्षे परस्पराश्रयदोषः सत्यामीश्वरेच्छाभिव्यक्तौ प्राणिनामदृष्टं सति च तददृष्टे महेश्वरेच्छाभिव्यक्तिरिति । स्यान्मतं प्राणिनामदृष्टं पूर्वेश्वरेच्छानिमित्तकं तदभिव्यक्तिश्च तत्पूर्वप्राण्यदृष्टनिमित्तात् तदपि तददृष्टं पूर्वेश्वरेच्छानिमित्तकमित्यनादिरियं कार्यकारणभावेन प्राणिगणादृष्टेश्वरेच्छाभिव्यक्त्योः संततिः । ततो न परस्पराश्रयदोषो बीजांकुरसंततिवदिति । तदनुपपन्नं । एकानेकप्राण्यदृष्टनिमित्तत्वविकल्पद्वयानतिक्रमात् । सा हीश्वरेच्छाभिव्यक्तिर्यद्येकप्राण्यदृष्टनिमित्ता तदा तद्भोग्यकायादिकार्योत्पत्तावेवनिमित्तं स्यात् न सकलप्राण्युपभोग्यकायादिकार्योत्पत्तौ, तथा च सकृदनेकप्राण्युपभोग्य कायादिकार्योपलब्धिर्न स्यात् । यदि पुनरनेकप्राण्यदृष्टनिमित्ता तदा तस्या नानास्वभावप्रसंगो नानाकायादिकार्यकरणात् । न ह्येकप्राण्युपभोग्यकायादिनिमित्तेनैकेन स्वभावेनेश्वरेच्छाभिव्यक्ता, नानाप्राण्युपभोग्यकायादिकार्यकरणा समर्था, अतिप्रसंगात् । यदि पुनस्तादृश एवैकस्वभावो नानाप्राण्यदृष्टनिमित्तो येन नानाप्राण्युपभोग्यकायादिकार्याणां नानाप्रकाराणामीश्वरेच्छा निमित्तकारणं

भवतीति मतं तदा न किंचिदनेकस्वभावं वस्तु सिद्ध्येत् विचित्रकार्यकरणैकस्वभावादेव भावाद्विचित्रकार्योत्पत्तिघटनात् । तथा च घटादिरपि रूपरसगंधस्पर्शाद्यनेकस्वभावाभावेऽपि रूपादिज्ञानमनेकं कार्यं कुर्वीत, शक्यं हि वक्तुं तादृगेकस्वभावो घटादिर्येन चक्षुराद्यनेकसामग्रीसन्निधानादनेकरूपादिज्ञानजननिमित्तं भवेदिति । कुतः पदार्थनानात्वव्यवस्था । प्रत्ययनानात्वस्यापि पदार्थैकत्वेऽपि भावाविरोधात् । न हि द्रव्यमेकः पदार्थः नानागुणादिप्रत्ययविशेषजननैकस्वभावो विरुध्यते । यदि पुनः प्रत्ययविशेषादिकार्यभेदाद्द्रव्यगुणादिपदार्थनानात्वं व्यवस्थाप्यते तदा महेश्वरेच्छायाः सकृदनेकप्राण्युपभोगयोग्यकायादिकार्यनानात्वान्नानास्वभावत्वं कथमिव न सिध्येत् । यदि पुनरीश्वरेच्छाया नानासहकारिण एव नानास्वभावास्तद्व्यतिरेकेण भावस्य स्वभावायोगादिति मतं तदा स्वभावतद्वतो र्भेदकांताभ्युपगमःस्यात् तस्मिंश्च स्वभाव तद्भावविरोधः सह्यविंध्यवदापनीपद्येत प्रत्यासत्तिविशेषान्नैवमिति चेत् कः पुनरसौ प्रत्यासत्तिविशेषः समवायिनां सहकारिणां समवायोऽसमवायिनां कार्यैकार्थसमवायः कार्यकारणैकार्थसमवायो वा निमित्तकारणानां तु कार्योत्पत्तावपेक्षा कर्तृसमवायिनी कर्मसमवायिनी वाऽपेक्षमाणता प्रत्यासत्तिरितिचेत् ईश्वरादिक्कालाकाशादीनि च सर्वकार्याणामुत्पादककारणस्वभावत्वं प्रतिपद्येरन् तस्य तेषां च तदुत्पत्तौ निमित्तकारणत्वात् । तथा सकलप्राण्यदृष्टानां कार्यादिकार्यसमवाय्यसमवायिकारणानां च महेश्वरस्वभावत्वं दुर्निवारं कायादिकार्य्योत्पत्तौ तत्सहकारित्वसिद्धेरिति सर्वमसमंजसमासज्येत नानास्वभावैकेश्वरतत्त्वासिद्धेः तथा च परमब्रम्हेश्वरइति नाममात्रं भिद्येत परमब्रह्मणएवैकस्य नानास्वभावस्य व्यवस्थितेः । स्यान्मतं कथमेकं ब्रह्म नानास्वभावयोगि भावांतराभावे भवेत्,भावांतराणामेव प्रत्यासत्तिविशिष्टानां स्वभावत्वादिति । तदप्यपेशलं । भावांतराणां स्वभावत्वे कस्यचिदेकेन स्वभावेन प्रत्यासत्तिविशेषेण प्रतिज्ञायमाने नानात्वविरोधात् । प्रत्यासत्तिविशेषैर्नानास्वभावैस्तेषां स्वभावत्वान्नानात्वं तेऽपि प्रत्यासत्तिविशेषाः स्वभावास्तद्वतोऽपरैः प्रत्यासत्तिविशेषाख्यैः स्वभावर्भवंयुरित्यनवस्थाप्रसंगात् सुदूरमपि गत्वा स्वभाववतः स्वभावानां स्वभावांतरानिरपेक्षत्वे प्रथमेऽपि स्वभावाः स्वभावांतरनिरपेक्षाः प्रसज्येरन् । तथा च सर्वे सर्वस्य स्वभावा इति स्वभावसंकरप्रसंगः तं परिजिहीर्षता न स्वभावतद्वतोर्भेदैकांतोऽभ्युपगंतव्यः तदभेदैकांते च स्वभावानां तद्वति सर्वात्मनानुप्रवेशात्तदेवैकं तत्त्वं परमब्रह्मेति निगद्यमानं न प्रमाणविरुद्धं स्यात् तदप्यनिच्छता स्वभावतद्वतोः कथंचित्तादात्म्यमेषितव्यं । तथा चेश्वरेच्छायाः नानास्वभावाः कथंचित्तादात्म्यमनुभवंतोऽनेकांतात्मिकामीश्वरेच्छां साधयेयुः । तामप्यनिच्छतैकस्वभावेश्वरेच्छा प्रतिपत्तव्या, साचैकेन प्राण्यदृष्टेनाभिव्यक्ता तदेकप्राण्युपभोगयोग्यमेव कायादिकार्यं कुर्यात् ततो न सकृदनेककायादिकार्योत्पत्तिरिति न प्राण्यदृष्टनिमित्तेश्वरेच्छाऽभिव्यक्तिः सिध्येत् । एतेन पदार्थांतरनिमित्ताऽपीश्वरेच्छाऽभिव्यक्तिरपास्ता । स्यान्मतं महेश्वरेच्छाऽनभिव्यक्तैव कार्यजन्मनि निमित्तं, कर्मनिबंधनाया एवेच्छायाः कचिदभिव्यक्ताया निमित्तदर्शनात्तदिच्छायाः कर्मनिमित्तत्वाभावादिति । तदप्यसंबद्धं । कस्याश्चिदिच्छायाः सर्वथाऽनभिव्यक्तायाः कचित्कार्ये क्रियाहेतुत्वासिद्धेरज्ञजंतुवत् । कर्माभावेचेच्छायाः सर्वथाऽनुपपत्तेः । तथा हि विवादाध्यासितः पुरुषविशेषो नेच्छावान् निःकर्मत्वात् यो यो निःकर्मा स स नेच्छावान् यथामुक्तात्मा निःकर्माचायं तस्मान्नेच्छावानिति नेश्वरस्येच्छासंभवः तदभावे च न प्रयत्नः स्यात् तस्येच्छापूर्वकत्वात् तदभावे भावविरोधात् इति बुद्धीच्छाप्रयत्नमात्रादीश्वरोनिमित्तं कायादिकार्योत्पत्तौ कुंभाद्युत्पत्तौ कुंभकारवदिति न व्यवतिष्ठते । स्यादाकूतं ते विवादापन्नः पुरुषविशेषः प्रकृष्टज्ञानयोगी सदैवैश्वर्ययोगित्वात् यस्तु न प्रकृष्टज्ञानयोगी नासौ सदैवैश्वर्ययोगी यथा संसारी । मुक्तश्च सदैवैश्वर्ययोगी च भगवान् तस्मात्प्रकृष्टज्ञानयोगी सिद्धः । स च प्राणिनां भोगभूतये कायादिकार्योत्पत्तौ सिसृक्षावन् प्रकृष्टज्ञानयोगित्वात् यस्तु न

तथा स न प्रकृष्टज्ञानयोगी यथा संसारी । मुक्तश्च प्रकृष्टज्ञानयोगीचायं तस्मात्तथेति तस्येच्छावत्त्वसिद्धिः । तथा च प्रयत्नवानसौ सिसृक्षावत्त्वात् । यो यत्र सिसृक्षावान् स तत्र प्रयत्नवान् दृष्टः यथा घटोत्पत्तौ कुलालः । सिसृक्षावांश्च तनुकरणभुवनादौ भगवान् तस्मात्प्रयत्नवानिति ज्ञानेच्छाप्रयत्नत्वसिद्धेः । निःकर्मणोऽपि सदाशिवस्याशरीरस्यापि तन्वादिकार्योत्पत्तौ निमित्तकारणत्वसिद्धेर्मोक्षमार्गप्रणीतावपि तत्कारणत्वसिद्धिः बाधकाभावादिति । तदेतदप्यसमंजसं । सर्वथा निःकर्मणः कस्यचिदैश्वर्यविरोधात् । तथा हि विवादाध्यासितः पुरुषो नैश्वर्ययोगी निःकर्मकत्वात् यो यो निःकर्मा स स नैश्वर्ययोगी यथा मुक्तात्मा । निःकर्माचायं तस्मान्नैश्वर्ययोगी । नन्वेनोमलैरवास्पृष्टत्वादनादियोगजधर्मेण योगादीश्वरस्य निःकर्मत्वमसिद्धमिति चेत् न तर्हि सदामुक्तोऽसौ धर्माधर्मक्षयादेव मुक्तिप्रसिद्धेः शश्वत्क्लेशकर्मविपाकाशयैरपरामृष्टत्वादनादियोगजधर्मसंबंधेऽपि जीवन्मुक्तेरविरोधएव वैराग्यैश्वर्यज्ञानसंबंधेऽपि तदविरोधवदिति चेत् तर्हि परमार्थतो मुक्तामुक्तस्वभावता महेश्वरस्याभ्युपगता स्यात् तथाचानेकांतसिद्धिर्दुर्निवारा । एतेनानादिबुद्धिमान्निमित्तत्वयोगादीश्वरस्य धर्मज्ञानवैराग्यैश्वर्ययोगात् शश्वत्क्लेशकर्मविपाकाशयैरपरामृष्टत्वाच्च सदैवं मुक्तत्वं सदैवेश्वरत्वं ब्रुवाणो नैकांतमभ्यनुजानातीति निवेदितं प्रतिपत्तव्यं । कथंचिन्मुक्तत्वस्य कथंचिदमुक्तत्वस्य च प्रसिद्धेः । ततोऽनेकांतात्मकत्वप्रसंगपरिजिहीर्षुणा सर्वथा मुक्तएवेश्वरः प्रवक्तव्यः तथा च सर्वथा निःकर्मत्वं तस्योररीकर्तव्यमिति नासिद्धं साधनं । नाप्यनैकांतिकं विपक्षे वृत्त्यसिद्धेः । क्वचिदैश्वर्ययोगिनि त्रिदशेश्वरेत्यादौ सर्वथा निःकर्मत्वस्य वृत्त्यसिद्धेः तत एव न विरुद्धं । नापि कालात्ययापदिष्टं पक्षस्य प्रमाणेनाबाधनात् । न हि प्रत्यक्षतोऽस्मदादिभिरैश्वर्ययोगी कश्चिन्निःकर्मोपलभ्यते यतः प्रात्यक्षबाधितः पक्षः स्यात् । नाप्यनुमानतस्तत्र सर्वस्यानुमानस्य व्यापकानुपलंभेन बाधितपक्षस्य कालात्ययापदिष्टत्वसाधनात् । नाप्यागमतस्तस्योपलंभस्तत्र तस्य युक्त्यानभ्युपगृहीतस्य प्रामाण्यविरोधात् । तदनुग्राहिकाया युक्तेरसंभवादेव युक्त्यनुगृहीतस्यापि न तत्रागमस्य संभावना यतः प्रामाण्येनाबाध्यमानः पक्षो न सिद्ध्येत् हेतोश्चकालात्ययापदिष्टत्वं परिहारो न भवेत् । एतेन सत्प्रतिपक्षत्वं साधनस्य निरस्तं । प्रतिपक्षानुमानस्य निरवद्यस्य संभवाभावसाधनात् । तदेवमस्मादनुमानादैश्वर्यविरहसाधने महेश्वरस्येच्छाप्रयत्नविरहोऽपि साधितः स्यात् धर्मविरहवत् । यथैव हि निःकर्मत्वमैश्वर्यविरहं साधयति तथेच्छाप्रयत्नमपि तस्य तेन व्याप्तिसिद्धेः । कस्यचिदिच्छावतः प्रयत्नवतश्च परमैश्वर्ययोगिनोऽपींद्रादेर्निःकर्मत्वविरोधसिद्धेः । ज्ञानशक्तिस्तुनिःकर्मणोऽपि कस्यचिन्न विरुध्यते चेतनात्मवादिभिः कैश्चिद्वैशेषिकसिद्धांतमभ्युपगच्छद्भिर्मुक्तात्मन्यपि चेतनायाः प्रतिज्ञानात् । चेतना च ज्ञानशक्तिरेव न पुनस्तद्व्यतिरिक्ता चिच्छक्तिरपरिणामिन्यप्रतिसंक्रमाऽदर्शितविषया शुद्धा चाऽनंता च यथा कापिलैरुपवर्ण्यते तस्याः प्रमाणविरोधात् तथा च महेश्वरस्य कर्मभिरस्पृष्टस्यापि ज्ञानशक्तिरशरीरस्यापि च मुक्तात्मन इव प्रसिद्धा तत्प्रसिद्धौ च ।

ज्ञानशक्त्यैव निःशेषकार्योत्पत्तौ प्रभुः किल ।
सदेश्वर इति ख्यानेऽनुमानमनिदर्शनं ॥ १२ ॥

न हि कश्चित्कस्यचित्कार्योत्पत्तौ ज्ञानशक्त्येव प्रभुरुपलब्धा यतोविवादाध्यासितः पुरुषो ज्ञानशक्त्यैव सर्वकार्याण्युत्पादयति प्रभुत्वादित्यनुमानमनुदाहरणं न भवेत् । ननु साधर्म्योदाहरणाभावेऽपि वैधर्म्योदहरणसंभवान्नाऽनुदाहरणमिदमनुमानं । तथा हि यस्तु ज्ञानशक्त्यैव न कार्यमुत्पादयति स न प्रभुः यथा संसारी कर्मपरतंत्र इति वैधर्म्येण निदर्शनं संभवत्येवेति न मंतव्यं । साधर्म्योदाहरणविरहेऽन्वयनिर्णयाभावाद्व्यतिरेकनिर्णयस्य विरोधात् । तथा शक्तादर्शनेच्छाप्रयत्नविशेषै

स्वकार्यं कुर्वतः प्रभुत्वेन व्यभिचाराच्च नहींद्रोज्ञानशक्त्यैव स्वकार्यंकुरुते तस्येच्छाप्रयत्नयोरपि भावात् नचास्य प्रभुत्वमसिद्धं प्रभुत्वसामान्यस्य सकलामरविषयस्य स्वातंत्र्यलक्षणस्यापि सद्भावात् ॥ प्रतिवादि प्रसिद्धमपि निदर्शनमनूद्यनिराकुर्वन्नाह —

समीहामंतरेणापि यथावक्ति जिनेश्वरः ।
तथेश्वरोऽपि कार्याणि कुर्यादित्यप्यपेशलं ॥ १३ ॥
सति धर्मविशेषे हि तीर्थकृत्त्वसमाह्वये ।
ब्रूयाज्जिनेश्वरो मार्गं न ज्ञानादेव केवलात् ॥ १४ ॥
सिद्धस्यापास्तनिःशेषकर्मणे वागसंभवात् ।
विना तीर्थकरत्त्वेन नाम्ना नार्थोपदेशना ॥ १५ ॥

महेश्वरः समीहामंतरेणापि प्रयत्नं च ज्ञानशक्त्यैव मोक्षमार्गप्रणयनं तन्वादिकार्यं च कुर्वीत महेश्वरत्वात् यथा प्रतिवादिप्रसिद्धो जिनेश्वरः प्रवचनोपदेशमिति प्रतिवादिप्रसिद्धमपि निदर्शनमनुमानस्य नोपपद्यते स्याद्वादिभिः प्रतिज्ञायमानस्य जिनेश्वरस्य ज्ञानशक्त्यैव प्रवचनलक्षणकार्यकारणासिद्धेः सत्येव तीर्थकरत्वनामपुण्यातिशये दर्शनविशुद्ध्यादिभावनाविशेषनिबंधने समुत्पन्नकेवलज्ञानस्योदय प्राप्ते प्रवचनाख्यतीर्थकरणप्रसिद्धेः । प्रक्षीणाशेषकर्मणः सिद्धस्य वाक्प्रवृत्तेरसंभवात्तीर्थकरत्वनामपुण्यातिशयापाये केवलिनोऽपि वाक्प्रसिद्ध्यसंभववत् ? इति धर्मविशेषविशिष्टएवोत्तमसंहननशरीरः केवली प्रवचनाख्यतीर्थस्य कर्ताप्रसिद्ध इति कथमसौ निदर्शनं महेश्वरस्यापि ॥ १६ ॥

तथा धर्मविशेषोऽस्य योगश्च यदि शाश्वतः ।
तदेश्वरस्य देहोऽस्तु योग्यंतरवदुत्तमः ॥ १६ ॥

यस्य हि धर्मविशेषो योगविशेषश्च महर्षियोगिनः प्रसिद्धः तस्य देहोऽप्युत्तम एवायोगिजनदेहाद्विशिष्टः प्रसिद्धःस्तथा महेश्वरस्यापि देहेनोत्तमेन भवितव्यं तमंतरेण धर्मविशेषस्य योगविशेषस्य वाऽनुपपत्तिरैश्वर्यायोगाद्वैराग्यायोगवत् । कुतोजगन्निमित्तकरणत्वं सिद्ध्यदज्ञजंतुवन्मुक्तात्मवच्च मतांतरमाशंक्य निराकुर्वन्नाह ।

निग्रहानुग्रहौ देहं स्वं निर्मायान्यदेहिनां ।
करोतीश्वर इत्येतन्नपरीक्षाक्षमं वचः ॥ १७ ॥

कस्यचिदुष्टस्य निग्रहं शिष्टस्य चानुग्रहं करातीश्वरः प्रभुत्वात् लोकप्रसिद्धप्रभुवत् । न चैवं नानेश्वरसिद्धिः नानाप्रभूणामेकमहाप्रभुतंत्रत्वदर्शनात् । तथा हि विवादाध्यासिता नानाप्रभव एक महाप्रभुतंत्रा एव नानाप्रभुत्वात् ये ये नानाप्रभवस्ते ते अत्रैकमहाप्रभुतंत्रा दृष्टाः यथा सामंत मांडलिकादय एकचक्रवर्तितंत्राः प्रभवश्चैते नानाचक्रवर्तीद्रादयः तस्मादेकमहाप्रभुतंत्रा एव योऽसौ महाप्रभुः स महेश्वर इत्येकेश्वरसिद्धिः । स च स्वदेहनिर्माणकरोऽन्यदेहिनां निग्रहानुग्रहकरत्वात् यो योऽन्यदेहिनां निग्रहानुग्रहकरः स स्वदेह निर्माणकरो दृष्टो यथा राजा । तथा चायमन्यदेहिनां निग्रहानुग्रहकरः तस्मात्स्वदेहनिर्माणकर इति सिद्धं । तथा सति स्वं देहं निर्मायान्यदेहिनां निग्रहानुग्रहौ करोतीश्वर इति केषां चित् वचः तच्च न परीक्षाक्षमं महेश्वरस्याशरीरस्य स्वदेहनिर्माणानुपपत्तेः तथा हि ।

देहांतराद्विना तावत्स्वदेहं जनयेद्यदि ।
तदा प्रकृतकार्येऽपि देहाधानमनर्थकं ॥ १८ ॥
देहांतरात्स्वदेहस्य विधाने चानवस्थितिः ।
तथा च प्रकृतं कार्यं कुर्यादीशो न जातुचित् ॥ १९ ॥

यदि हीश्वरो देहांतराद्विनाऽपि स्वदेहमनुध्यानमात्रादुत्पादयेत्तदाऽन्यदेहिनां निग्रहानुग्रहलक्षणं कार्यमपि प्रकृतं तथैव जनयेदिति तज्जनने देहाधानमनर्थकं स्यात् । यदि पुनर्देहांतरादेव स्वदेहं विदधीत तदा तदपि देहांतरमन्यस्माद्देहादित्यनवस्थितिः स्यात्, तथाचापरापरदेहनिर्माण एवोपक्षीणशक्तिकत्वात् न कदाचित्प्रकृतं कार्यं कुर्यादीश्वरः यथैव हि प्रकृतकार्यजननायापूर्वं शरीरमीश्वरो निष्पादयति तथैव तच्छरीरनिष्पादनायापूर्वं शरीरांतरं निष्पादयेदिति कथमनवस्था विनिवार्येत, न हि केषांचित्प्राणिनां निग्रहानुग्रहकरणात्पूर्वं शरीरमीश्वरस्य प्रयुज्यते ततोऽपि पूर्वं शरीरांतरप्रसंगात् । अनादिशरीरसंतति सिद्धेरशरीरत्वविरोधात् । न चैकेन निर्माणशरीरेण नानादिग्देशवर्तिप्राणिविशेषनिग्रहानुग्रह विधानमीश्वरस्य घटते, यतो युगपन्नानानिर्माणशरीराणि तस्य न स्युः तदभ्युपगमे च तन्निर्माणाय नानाशरीरांतराणि भवेयुरित्यनादिनानाशरीरसंततयः कथमीश्वरस्य न प्रसज्येरन् । यदि पुनरेकेन शरीरेण नाना स्वशरीराणि कुर्वीत युगपत्क्रमेण वा तदैकेनैव देहेन नानादिग्देशवर्तिप्राणिगणनिग्रहानुग्रहावपि तथैव कुर्वीत । तथा च कणादगजासुराद्यनुग्रहनिग्रहविधानायोलूकादितदनुरूपशरीरनानात्वकथनं न युक्तिपथप्रस्थायि स्यात् । यदि पुनर्न देहांतराद्विना स्वदेहं जनयेत्, नापि देहांतरात्, स्वयमीश्वरस्य सवर्था देहाविधानादिति मतं तदपि दूषयन्नाह—

स्वयं देहाविधाने तु तेनैव व्यभिचारिता ।
कार्यत्वादेः प्रयुक्तस्य हेतोरीश्वरसाधने ॥ २० ॥

यदि हीश्वरो न स्वयं स्वदेहं विधत्ते तदाऽसौ तद्देहः किं नित्यः स्यादनित्यो वा न तावन्नित्यः सावयवत्वात् । यत्सावयवं तदनित्यं दृष्टं यथा घटादि । सावयवश्चेश्वरेदहस्तस्मान्न नित्य इति बाधकसद्भावात् । यदि पुनरनित्यः तदा कार्योऽसौ कुतः प्रादुर्भवेत् । महेश्वरधर्मविशेषादेवेति चेत् तर्हि सर्वे प्राणिनां शुभाशुभशरीरादिकार्यं तद्धर्माधर्मेभ्य एव प्रादुर्भवेदिति, किं कृतमीश्वरेण निमित्तकारणतया परिकल्पितेन । तथा च विवादापन्नं तनुकरणभुवनादिकं बुद्धिमन्निमित्तकं कार्यत्वात् स्वारंभकावयव सन्निवेशविशिष्टत्वादचेतनोपादानत्वादित्यादेर्हेतोरीश्वरसाधनाय प्रयुक्तस्येश्वरदेहेन व्यभिचारिता स्यात् तस्यानीश्वरनिमित्तत्वेऽपि कार्यत्वादिसिद्धेरिति ततो नेश्वरसिद्धिः संभाव्यते । सांप्रतं शंकरमतमाशंक्य दूषयन्नाह—

यथाऽनीशः स्वदेहस्य कर्ता देहांतरान्मतः ।
पूर्वस्मादित्यनादित्वान्नानवस्था प्रसज्यते ॥ २१ ॥
तथेशस्यापि पूर्वस्मादेहादेहांतरोद्भवात् ।
नानवस्थेति यो ब्रूयात्तस्याऽनीशत्वमीशितुः ॥ २२ ॥
अनीशः कर्मदेहेनाऽनादिसंतानवर्तिना ।
यथैव हि सकर्मानस्तद्वन्न कथमीश्वरः ॥ २३ ॥

---

१ चिंतनमात्रात् ।

न ह्यनीशः स्वशरीरस्य शरीरांतरेण विना कर्ता प्रतिवादिनः सिद्धोयमुदाहरणीकृत्याशरीरस्यापीशस्य स्वशरीरनिर्माणाय सामर्थ्यं समर्थ्यते अनवस्था चापाद्यमाना निषिध्यते। पूर्वपूर्वशरीरापेक्षयापि तदुत्तरोत्तरशरीरकरणे। किं तार्हि कार्मणशरीरेण सशरीर एवानीशः शरीरांतरमुपभोगयोग्यं निष्पादयतीति परस्य सिद्धांतः तथा यदीशः पूर्वकर्मदेहेन स्वदेहमुत्तरं निष्पादयेत्तदा सकर्मैव स्यात् न शश्वत्कर्मभिरस्पृष्टः सिद्ध्येत्तस्यानीशवदनादिसंतानवर्तिना कर्मशरीरेण संबंधसिद्धेः। सकलकर्मणोऽप्यपाये स्वशरीरकरणायोगान्मुक्तवत् सर्वथा निःकर्मणोबुद्धीच्छाद्वेषप्रयत्नासंभवस्यापि साधनात्॥

ततो नेशस्य देहोऽस्ति प्रोक्तदोषानुषंगतः।
नापि धर्मविशेषोऽस्य देहाभावे विरोधतः॥ २४॥
येनेच्छामंतरेणापि तस्य कार्ये प्रवर्तनं।
जिनेंद्रवद् घटेतेति नोदाहरणसंभवः॥ २५॥

इत्युपसंहारश्लोकौ। सांप्रतमशरीरस्य सदाशिवस्य यैर्ज्ञानमभ्युपगतं त एव प्रष्टव्याः किमीशस्य ज्ञानं नित्यमनित्यं चेति पक्षद्वयेऽपि दूषणमाह—

ज्ञानमीशस्य नित्यं चेदशरीरस्य न क्रमः।
कार्याणामक्रमाद्धेतोः कार्यक्रमविरोधतः॥ २६॥

ननु च ज्ञानस्य महेश्वरस्य नित्यत्वेऽपि नाक्रमत्वं निरन्वयक्षणिकस्यैवाक्रमत्वात् कालांतरदेशांतरप्राप्तिविरोधात् कालापेक्षस्य देशापेक्षस्य च क्रमस्यासंभवात्। संतानस्याप्यवस्तुत्वात् परमार्थतः क्रमवत्त्वानुपपत्तेः कूटस्थनित्यवत् न हि यथा सांख्याः कूटस्थं पुरुषमामनंति तथा वयमीश्वरज्ञानं मन्यामहे तस्य सातिशयनित्यत्वात्क्रमोपपत्तेः निरतिशयं हि पुरुषतत्त्वं प्रतिसमयं स्वरूपेणैवास्तीति शब्दज्ञानानुपातिना विकल्पेन वस्तुशून्येन पूर्वमासीदिदानीमस्ति पश्चाद्भविष्यतीति क्रमवदिव लोकैर्व्यवहारपदवीमानीयत इति न परमार्थतः क्रमवत्त्वं तस्य सांख्यैरभिधीयते न च क्रमेणानेककार्यकारित्वं तस्याकर्तृत्वात्सदोदासीनतयाऽवस्थितत्वात्। न च क्रमेणाक्रमेण चार्थक्रियापाये तस्यावस्तुत्वमिति केषांचिद् दूषणमवकाशं लभते। वस्तुनोऽर्थक्रियाकारित्वलक्षणाप्रतिष्ठानात्। अन्यथोदासीनस्य किंचिदकुर्वतो वस्तुत्वाभाव प्रसंगात्। सत्ताया एव वस्तुलक्षणोपपत्तेरभावस्यापि वस्त्वंतर स्वभावस्य पुरुषतत्त्वस्य इव स्वसत्तानतिक्रमाद्वस्तुत्वाविरोधात् सामान्यादेरपि स्वरूपसत्त्वस्य वस्तुलक्षणस्याभ्युपगमात्। न किंचिद्वस्तु सत्तालक्षणं व्यभिचरतीति कापिलानां दर्शनं। न पुनर्वैशेषिकाणां ईश्वरज्ञानस्योदासीनस्य कल्पने तत्कल्पनावैयर्थ्यप्रसंगात् कार्यकारिणैव तेन भवितव्यं यच्च कार्यकारि तत्सातिशयमेव युक्तं। न चैवं परिणामिनित्यता ज्ञानस्य सांख्यपरिकल्पितप्रधानवत्प्रसज्यते, तदतिशयानां क्रमभुवां ततो भिन्नत्वात्, तदभेदेऽतिशयानामिवेश्वरज्ञानस्यापि नाशोत्पादप्रसंगात्। ईश्वरज्ञानवद्वा तदतिशयानामनुत्पादविनाशधर्मकत्वप्रसंगात्। तदेवमीश्वरज्ञानं क्रमेणानेकातिशयसंपाते क्रमवदेव। क्रमवतश्चेश्वरज्ञानात्कार्याणां क्रमो न विरुध्यत एव, सर्वथाप्यक्रमादेव हेतोः कार्यक्रमविरोधसिद्धेः। एतेन सांख्यैः परिकल्प्यमानस्य पुरुषस्य निरतिशयस्य सर्वदोदासीनस्य वैयर्थ्यमापादितमिति बोद्धव्यं। वैशेषिकाणामात्मादिवस्तुनो नित्यस्याप्यर्थांतरभूतैरतिशयैः सातिशयत्वोपगमात्सर्वदोदासीनस्य कस्यचिदप्रतिज्ञानादिति केचिदाचक्षते। तेऽप्येवं प्रष्टव्याः कथमीश्वरस्य ज्ञानस्य ततोऽर्थांतरभूतानामतिशयानां क्रमवत्त्वे वास्तवं क्रमवत्त्वं सिद्ध्येत्, तेषां तत्र समवायादिति चेत् समानः पर्यनुयोगः कथमर्थांतरभूतानामतिशयानामीश्वरज्ञान एव समवायो न पुनरन्यत्रेति तत्रैवेहेदमिति प्रत्ययविशेषोत्पत्तेरिति चेत् ननु स एवेहेदमिति प्रत्ययविशेषः कुतोऽन्यत्रापि न स्यात् सर्वथा

---

१ किंचिदज्ञः। २ जैनस्य। ३ सांख्यैरप्रतिपादनात्। ४ : बौद्धादीनां। ५ कस्यचिदृषे।

विशेषाभावात् । यथैव हि, इह महेश्वरज्ञानेऽतिशया इति ततोऽर्थांतरभाविनोऽपि प्रतीयंते तथेह घटे तेऽतिशयाः प्रतीयंतां । तत्रैव तेषां समवायादिहेदमिति प्रत्ययविशेषो न पुनरन्यत्रेति चेत् सोयमन्योन्यसंश्रयः । सतीहेदमिति प्रत्ययविशेषेऽतिशयानामीश्वरज्ञान एव समवायः सिद्ध्येत् तत्रैव तेषां समवायादिहेदमिति प्रत्ययविशेषो नियम्यत इति नैकस्यापि प्रसिद्धिः । भवतु वा तेषां तत्र समवायः, स तु क्रमेण युगपद्वा, क्रमेण चेत् कथमक्रममीश्वरज्ञानं क्रमभाव्यनेकातिशयसमवाय क्रमेण प्रतिपद्यत इति दुरवबोधं, क्रमवर्तिभिरतिशयांतरैरीश्वरज्ञानस्य क्रमवत्त्वसिद्धेरदोषोऽयमिति चेत् ननु तान्यप्यन्यान्यतिशयांतराणीश्वरज्ञानादर्थांतरभूतानि कथं तस्य क्रमवत्तां साधयेयुरति प्रसंगात् । तेषां तत्र समवायादिति चेत् स तर्हि तत्समवायः क्रमेण युगपद्वेत्यनिवृत्तः पर्यनुयोगोऽनवस्था च । यदि पुनर्युगपदीश्वरज्ञानेऽतिशयानां समवायस्तदा तन्निबंधनोऽपि तस्य क्रमो दूरोत्सारित एव तेषामक्रमत्वादिति सातिशयस्यापीश्वरज्ञानस्याक्रमत्वसिद्धिः । तथा चाक्रमादीश्वरज्ञानात्कार्याणां क्रमो न स्यादिति सूक्तं दूषणं । किं च तदीश्वरज्ञानं प्रमाणं स्यात्फलं वा पक्षद्वयेऽपि दोषमादर्शयन्नाह—

तद्बोधस्य प्रमाणत्वे फलाभावः प्रसज्यते ।
ततः फलावबोधस्यानित्यस्येष्टौ मतक्षतिः ॥ २७ ॥
फलत्वे तस्य नित्यत्वं न स्यान्मानात्समुद्भवात् ।
ततोऽनुद्भवने तस्य फलत्वं प्रतिहन्यते ॥ २८ ॥

नेश्वरज्ञानं नित्यं प्रमाणं सिद्ध्येत् तस्य फलाभावात् । फलज्ञानस्यानित्यस्य परिकल्पने च महेश्वरस्य नित्यानित्यज्ञानद्वयपरिकल्पनायां सिद्धांतविरोधात् । फलत्वेवेश्वरज्ञानस्य नित्यत्वं न स्यात् प्रमाणतस्तस्य समुद्भवात् । ततोऽनुद्भवे तस्य फलत्वविरोधान्न नित्यमीश्वरज्ञानमभ्युपगमनीयं तस्य निगदितदोषानुषंगेण निरस्तत्वात् । किं तर्ह्यनित्यमेवेश्वरज्ञानमित्यपरे । तन्मतमनूद्य निराकुर्वन्नाह—

अनित्यत्वे तु तज्ज्ञानस्यानेन व्यभिचारिता ।
कार्यत्वादेर्महेशेनाकरणेऽस्य स्वबुद्धितः ॥ २९ ॥
बुद्ध्यंतरेण तद्बुद्धेः करणे चानवस्थितिः ।
नानादिसंततिर्युक्ता कर्मसंतानतो विना ॥ ३० ॥

अनित्यं हीश्वरज्ञानमीश्वरबुद्धिकार्यं यदि नेष्यते तदा तेनैव कार्यत्वादिहेतुस्तनुकरणभुवनादेर्बुद्धिमत्कारणत्वे साध्येऽनैकांतिकः स्यात् । यदि पुनर्बुद्ध्यंतरेण स्वबुद्धिमीश्वरः कुर्वीत तदा परापरबुद्धिप्रतीक्षायामेवोपक्षीणत्वादीश्वरस्य प्रकृतबुद्धेः करणं न स्यादनवस्थानात् । स्यान्मतं प्रकृतबुद्धेः करणे नाऽपूर्वबुद्ध्यंतरं प्रतीक्षते महेशः । किं तर्हि पूर्वोत्पन्नां बुद्धिमाश्रित्य प्रकृतां बुद्धिं कुरुते तामपि तत्पूर्वं बुद्धिमित्यनादिर्बुद्धिसंततिरीश्वरस्य ततो नानवस्थेति । तदप्यसत् । तथाबुद्धिसंतानस्य कर्मसंतानापायेऽसंभवात् । क्रमजन्मा हि बुद्धिः परापरतद्धेतोरदृष्टविशेषस्य क्रमादुत्पद्यते नान्यथा । यदि पुनर्योगजधर्मसंततेरनादेरीश्वरस्य सद्भावादयमनुपालंभः पूर्वस्मात् समाधिविशेषाद्धर्मस्यादृष्टविशेषस्योत्पादात्ततो बुद्धिविशेषस्य प्रादुर्भावाददृष्टसंताननिबंधनाया एव बुद्धिसंततेरभ्युपगमादितिमतं तदापि कथमीश्वरस्य सकर्मता न सिद्ध्येत् । तत्सिद्धौ च सशरीरताऽपि कथमस्य न स्यात् तस्यां च सत्यां न सदा मुक्तिस्तस्य सिद्ध्येत् । सदेहमुक्तेः सदासिद्धौ तद्देहेन च कार्यत्वादेः साधनस्य तन्वादेर्बुद्धिमत्कारणत्वे साध्ये कथमनैकांतिकता परिहर्तुं शक्येति तस्य बुद्धिमत्कारणत्वासंभवात् । संभवे चानवस्थानुषंगादिति प्रागेवोक्तं । किं चेदं विचार्यते किमीश्वरज्ञानमव्यापि किं वा व्यापीति प्रथमपक्षे दूषणमाह।

---

१ अदोषः । २ जीवन्मुक्तेः । ३ नित्यत्वे । ४ जीवन्मुक्तदेहेन ।

अव्यापि च यदि ज्ञानमीश्वरस्य तदा कथं ।
सकृत्सर्वत्र कार्याणामुत्पत्तिर्घटते ततः ॥ ३१ ॥
यद्येकत्र स्थितं देशे ज्ञानं सर्वत्र कार्यकृत् ।
तदा सर्वत्र कार्याणां सकृत् किं न समुद्भवः ॥ ३२ ॥
कारणांतरवैकल्यात्तथाऽनुत्पत्तिरित्यपि ।
कार्याणामीश्वरज्ञानाहेतुकत्वं प्रसाधयेत् ॥ ३३ ॥
सर्वत्र सर्वदा तस्य व्यतिरेकाप्रसिद्धितः ।
अन्वयस्यापि संदेहात्कार्यं तद्धेतुकं कथं ॥ ३४ ॥

तदीश्वरज्ञानं तावदव्यापीष्टं प्रादेशिकत्वात् सुखादिवत् । प्रादेशिकमीश्वरज्ञानं विभुद्रव्यविशेषगुणत्वात् यदित्थं तदित्थं यथा सुखादि तथा चेश्वरज्ञानं तस्मात्प्रादेशिकमिति नासिद्धं प्रादेशिकत्वं साधनं, न च तत्साधनस्य हेतोः सामान्यगुणेन संयोगादिना व्यभिचारो, विशेषग्रहणात् । तथापि विशेषगुणेनरूपादिनाऽनैकांतिक इति न मंतव्यं विभुद्रव्यग्रहणात् । तथापीष्टविरुद्धस्यानित्यत्वस्य साधनात् विरुद्धो हेतुः विभुद्रव्यविशेषगुणत्वस्यानित्यत्वेन व्याप्तत्वात्, यथाहीदं विभुद्रव्यविशेषगुणत्वं प्रादेशिकत्वमीश्वरज्ञानस्य साधयेत् तद्वदनित्यत्वमपि तदव्यभिचारात् न हि, कश्चिद्विभुद्रव्यविशेषगुणो नित्यो दृष्ट इत्यपि नाशंकनीयं महेश्वरस्यास्मद्विशिष्टत्वात् तद्विज्ञानस्यास्मद्विलक्षणत्वात् । न ह्यस्मदादिविज्ञाने यो धर्मो दृष्टः स महेश्वरविज्ञानेऽप्यापादयितुं युक्तोऽतिप्रसंगात् । तस्यास्मदादिविज्ञानवत् समस्तार्थपरिच्छेदकत्वाभावप्रसक्तेः सर्वत्रास्मदादिबुद्ध्यादीनामेवानित्यत्वेन व्याप्तस्य विभुद्रव्यविशेषगुणत्वस्य प्रसिद्धेः विभुद्रव्यस्य वा महेश्वरस्यैवाभिप्रेतत्वात्, तेन यदुक्तं भवति महेश्वरविशेषगुणत्वात् तदुक्तं भवति विभुद्रव्यविशेषगुणत्वादिति ततोनेष्टविरुद्धसाधनो हेतुर्यतोविरुद्धः स्यात् । न चैवमुदाहरणानुपपत्तिरीश्वरसुखादेरेवोदाहरणत्वात् तस्यापि प्रादेशिकत्वात् साध्यवैकल्याभावात् महेश्वरविशेषगुणत्वाच्च साधनवैकल्यासंभवात् ततोऽस्माद्धेतोरीश्वरज्ञानस्य सिद्धं प्रादेशिकत्वं । ततश्चाव्यापि तदिष्टं यदि वैशेषिकैस्तदा कथं सकृत्सर्वत्र तन्वादिकार्याणामुत्पत्तिरीश्वरज्ञानाद् घटते तद्धि निमित्तकारणं सर्वकार्योत्पत्तौ सर्वत्रासन्निहितमपि कथमुपपद्यते कालादेर्व्यापिन एव युगपत् सर्वत्र कार्योत्पत्तौ निमित्तकारणत्वप्रसिद्धेः । विभोरीश्वरस्य निमित्तकारणत्वप्रसिद्धेः विभोरीश्वरस्य निमित्तकारणत्ववचनाददोष इति चेन्न तस्य यत्र प्रदेशेषु बुद्धिस्तत्रैव निमित्तकारणत्वोपपत्तेर्बुद्धिशून्येऽपि प्रदेशांतरे तस्य निमित्तकारणत्वेन तत्र कार्याणां बुद्धिमन्निमित्तत्वं सिद्ध्येत् तथा च व्यर्थं बुद्धिमन्निमित्तत्वसाधनं सर्वत्र कार्याणां बुद्धिमदभावेऽपि भावापत्तेः । न चैवं कार्यत्वादयो हेतवो गमकाः स्युर्बुद्धिशून्येश्वरप्रदेशवर्तिभिरबुद्धिमन्निमित्तैः कार्यादिभिर्व्यभिचारात् । ततस्तेषां बुद्धिमन्निमित्तत्वासिद्धेः । स्यान्मतं प्रदेशवर्तिनाऽपि ज्ञानेन महेश्वरस्य युगपत्समस्तकारकपरिच्छेदासिद्धेः सर्वकार्योत्पत्तौ युगपत्सकलकारकप्रयोक्तृत्वव्यवस्थितेः निखिलतन्वादिकार्याणां बुद्धिमन्निमित्तत्वोपपत्तेः नोक्तदोषोऽनुप्रसज्यत इति। तदप्यसम्यक् । क्रमेणानेकतन्वादिकार्यजन्मनि तस्य निमित्तकारणत्वायोगात् । ज्ञानं हीश्वरस्य यद्येकत्र प्रदेशे वर्तमानं समस्तकारकशक्तिसाक्षात्करणात् समस्तकारकप्रयोक्तृत्वसाधनात् सर्वत्र परंपरया कार्यकारीष्यते तदा युगपत्सर्वकार्याणां सर्वत्र किं न समुद्भवः प्रसज्यते, यतो महेश्वरस्य प्राक् पश्चाच्च कार्योत्पत्तौ निमित्तकारणत्वाभावो न सिद्ध्येत् । समर्थेऽपि सति निमित्तकारणे कार्यानुत्पादविरोधात्। स्यान्मतं न निमित्तकारणमात्रात्तन्वादिकार्याणामुत्पत्तिः समवाय्यसमवायिनिमित्तकारणांतराणामपि

सद्भावे कार्योत्पत्तिदर्शनात् न च सर्वकार्याणां युगपत्समवाय्यसमवायिनिमित्तकारणसद्भावः क्रमेणैव तत्प्रसिद्धेः । ततः कारणांतराणां वैकल्यात् तथा युगपत्सर्वत्र कार्याणामनुत्पत्तिरिति । तदपि कार्याणां नेश्वरज्ञानहेतुकत्वं साधयेत् । तदन्वयव्यतिरेकासिद्धेः सत्यपीश्वरज्ञाने केषांचित्कार्याणां कारणांतराभावेऽनुत्पत्तेः कारणांतरसद्भाव एवोत्पत्तेः कारणांतरान्वयव्यतिरेकानुविधानस्यैव सिद्धेः तत्कार्यत्वस्यैव व्यवस्थानात् । ननु च सत्येव ज्ञानवति महेश्वरे तन्वादिकार्याणामुत्पत्तेरन्वयोऽस्त्येव । व्यतिरेकोऽपि विशिष्टावस्थापेक्षया महेश्वरस्य विद्यत एव कार्योत्पादनसमर्थकारणांतरासन्निधानविशिष्टेश्वरेऽसति कार्याणामनुत्पत्तेः व्यतिरेकनिश्चयात् । सर्वत्रावस्थापेक्षयैवावस्थावतोऽन्वयव्यतिरेकप्रतीतेः । अन्यथा तदसंप्रत्ययात् । न ह्यवस्थांतरे सति कार्योत्पत्तिरिति वक्तुं शक्यं सर्वावस्थासु तस्मिन्सति तदुत्पत्तिप्रसंगात् । नाप्यवस्थावतोऽसंभवे कार्येऽस्यासंभवः सुशक्तो वक्तुं तस्य नित्यत्वादभावानुपपत्तेः । द्रव्यावस्थाविशेषाभावे तु तत्साध्यकार्यविशेषानुत्पत्तेः सिद्धो व्यतिरेकोऽन्वयवत् । न चावस्थावतो द्रव्यस्यानाद्यनंतस्योत्पत्तिविनाशशून्यस्यापन्हवो युक्तः तस्याबाधितान्वयज्ञानासिद्धत्वात् तदपह्नवे सौगतमतप्रवेशानुषंगात् । कुतः स्याद्वादिनामिष्टसिद्धिरिति कश्चिद्वैशेषिकमतमनुमन्यमानः समभिधत्ते । सोऽप्येवं प्रष्टव्यः किमवस्थावतोऽवस्था पदार्थांतरभूता किं वा नेति । प्रथमकल्पनायां कथमवस्थापेक्षयाऽन्वयव्यतिरेकानुविधानं तन्वादिकार्याणामीश्वरान्वयव्यतिरेकानुविधानं युज्यते, धूमस्य पावकान्वयव्यतिरेकानुविधाने पर्वताद्यन्वयव्यतिरेकानुविधानप्रसंगात् । पदार्थांतरत्वाविशेषात् यथैव हि पर्वतादेः पावकस्य पदार्थांतरत्वं तथेश्वरात्कारणांतरसन्निधानस्यावस्थाविशेषस्यापि सर्वथा विशेषाभावात् । यदि पुनरीश्वरस्यावस्थातो भेदेऽपि तेन संबंधसद्भावात्तदन्वयव्यतिरेकानुविधानं कार्याणामीश्वरान्वयव्यतिरेकानुविधानमेवेति मन्यते तदा पर्वतादेः पावकेन संबंधात्पावकान्वयव्यतिरेकानुविधानमपि धूमस्य पर्वताद्यन्वयव्यतिरेकानुविधानमनुमन्यतां पावकाविशिष्टपर्वताद्यन्वयव्यतिरेकानुकरणं धूमस्यानुमन्यते एव तद्वदवस्थाविशिष्टेश्वरान्वयव्यतिरेकानुकरणं तन्वादिकार्याणां युक्तमनुमंतुमिति चेन्न पर्वतादिवदीश्वरस्य भेदप्रसंगात् । यथैव हि पावकविशिष्टपर्वतादेरन्यः पावकाविशिष्टपर्वतादिः सिद्धः तद्वत्कारणांतरसन्निधानलक्षणावस्थाविशिष्टादीश्वरात्पूर्वं तदविशिष्टेश्वरोऽन्यः कथं न प्रसिद्ध्येत् । स्यान्मतं द्रव्याद्यनेकविशेषणविशिष्टस्यापि सत्तासामान्यस्य यथा न भेदः समवायस्य वाऽनेकसमवायिविशेषणविशिष्टस्याप्येकत्वमेव तद्वदनेकावस्थाविशिष्टस्यापीश्वरस्य न भेदः सिद्ध्येत् तदेकत्वस्यैव प्रमाणतः सिद्धेरिति तदेतत्स्वगृहमान्यं । सत्तासामान्यसमवाययोरपि स्वविशेषणभेदाद्भेदप्रसिद्धेर्व्यतिलंघयितुमशक्तेः । तस्यैकानेकस्वभावतयैव प्रमाणगोचरचारित्वात् । तदेतेन नानामूर्त्तिमद्द्रव्यसंयोगविशिष्टस्य व्योमात्मादिविभुद्रव्यस्याभेदः प्रत्याख्यातः स्वविशेषणभेदाद्भेदसंप्रत्ययादेकानेकस्वभावत्वव्यवस्थानात् । योऽप्यव्यवस्थावतोऽवस्थां पदार्थांतरभूतां नानुमन्यते तस्यापि कथमवस्थाभेदादवस्थावतो भेदो नःस्यादवस्थानां वा कथमभेदो न भवेत् तदर्थांतरत्वाभावात् । स्यादाकूतं अवस्थानामवस्थावतः पदार्थांतरत्वाभावेऽपि न तदभेदः तासां तद्धर्मत्वात् न च धर्मो धर्मिणोऽनर्थांतरमेव धर्मधर्मिव्यवहारभेदविरोधात् भेदे तु न धर्माणां भेदाद्धर्मिणो भेदः प्रत्येतुं शक्येत यतोऽवस्थाभेदादीश्वरस्य भेदः संपाद्यत इति । तदपि स्वमनोरथमात्रं धर्माणां सर्वथा धर्मिणोभेदे धर्मधर्मिभावविरोधात् सह्यविंध्यादिवत् । ननु धर्मधर्मिणोः सर्वथाभेदेऽपि निर्बाधप्रत्ययविषयत्वात् न धर्मधर्मिभावविरोधः । सह्यविंध्यादीनां तु निर्बाधधर्मधर्मिसंप्रत्ययविषयत्वाभावान्न धर्मधर्मिभावव्यवस्था । न हि वयं भेदमेव धर्मधर्मिव्यवस्थानिबंधनमभिदध्महे येन भेदे धर्मधर्मिभावो विरुध्यते सर्वथैवाभेद इव प्रत्ययविशेषात्तद्व्यवस्थाभिधानात् । सर्वत्राबाधितप्रत्ययोपायत्वाद्वैशेषिकाणां तद्विरोधादेव विरोधसिद्धेरिति काश्चित् । सोऽपि स्वदर्शनानुरागांधीकृत एव बाधकमवलोकयन्नपि नावधारयति । धर्मधर्मिप्रत्ययविशेषस्यैव धर्मधर्मिणोर्भेदैकांतेऽनुपपत्तेः सह्यविंध्यादिवत्प्रतिपादनात् । यदि पुनः प्रत्यासत्तिविशेषादीश्वरतदवस्थयोर्भेदेऽपि धर्मधर्मिसंप्रत्ययविशेषः स्यात् न तु सह्यविंध्यादीनां तदभावादिति मतं तदाऽसौ प्रत्यासत्तिर्धर्मधर्मिभ्यां भिन्ना

कथं च धर्मधर्मिणोरिति व्यपदिश्यते। न पुनः सह्यविंध्ययोरिति विशेषहेतुर्वक्तव्यः प्रत्यासत्त्यंतरं तद्धेतुरिति चेत् तदपि यदि प्रत्यासत्तितद्वद्भ्यो भिन्नं तदा तैव्यपदेशनियमनिबंधनं प्रत्यासत्त्यंतरमभिधानीयं तथा चानवस्थानात्कुतः प्रकृतप्रत्यासत्तिनियमव्यवस्था। प्रत्ययविशेषादेवेति चेत्। ननु स एव विचार्योवर्तते प्रत्ययविशेषः किं प्रत्यासत्तेस्तत्तद्वद्भ्यां सर्वथा भेदे सतीश्वरतदवस्थयोः प्रत्यासत्तिरिति प्रादुर्भवति किं वाऽनर्थांतरभाव एव कथंचित्तादात्म्ये वा। तत्र सर्वथा भेदाभेदयोर्बाधकसद्भावात् कथंचित्तादात्म्यमनुभवतोरेव तथा प्रत्ययेन भवितव्यं तत्र बाधकानुदयात्। ननु चैकानेकयोः कथंचित्तादात्म्यमेव धर्मधर्मिणोः प्रत्यासत्तिः स्याद्वादिभिरभिधीयते तच्च यदि ताभ्यां भिन्नं तदा न तयोर्व्यपदिश्यते तदभिन्नं चेत् किं केन व्यपदेश्यं। यदि पुनस्ताभ्यां कथंचित्तादात्म्यस्यापि परं कथंचित्तादात्म्यमिष्यते तदा प्रकृतपर्यनुयोगस्यानिवृतेः परापरकथंचित्तादात्म्यपरिकल्पनायामनवस्था स्यात्। सैव कथंचित्तादात्म्यपक्षस्य बाधिकेति कथमयं पक्षः क्षेमकरः प्रेक्षावतामक्षूणमालक्ष्यते। यदि पुनः कथंचित्तादात्म्यं धर्मधर्मिणोर्भिन्नमेवाभ्यनुज्ञायते ताभ्यामनवस्थापरिजिहीर्षयाऽनेकांतवादिना तदा धर्मधर्मिणोरेव भेदोऽनुज्ञायतां सुदूरमपि गत्वा तस्याश्रयणीयत्वात्। तदनाश्रयणे भेदव्यवहारविरोधादित्यपरः सोऽप्यनवबोधाकुलितांतःकरण एव। कथंचित्तादात्म्यं हि धर्मधर्मिणोः संबंधः स चाविष्वग्भाव एव तयोर्जात्यंतरत्वेन संप्रत्ययाव्यवस्थाप्यते। धर्मधर्मिणोरविष्वग्भाव इति व्यवहारस्तु न संबंधांतरनिबंधनो यतः कथंचित्तादात्म्यांतरं संबंधांतरमनवस्थाकारि परिकल्प्यते तत एव कथंचित्तादात्म्याद्धर्मधर्मिणोः कथंचित्तादात्म्यमिति प्रत्ययविशेषस्य करणात्। कथंचित्तादात्म्यस्य कथंचिद्भेदस्वीकारत्वात् कथंचिद्भेदाभेदौ हि कथंचित्तादात्म्यं। तत्र कथंचिद्भेदाश्रयणाद् धर्मधर्मिणोः कथंचित्तादात्म्यमिति भेदविभक्तिसद्भावात् भेदव्यवहारसिद्धिः। कथंचिदभेदाश्रयणात्तु धर्मधर्मिणावेव कथंचित्तादात्म्यमित्यभेदव्यवहारः प्रवर्तते धर्मधर्मिव्यतिरेकेण कथंचिद्भेदाभेदयोरभावात् कथंचिद्भेदो हि धर्म एव कथंचिदभेदस्तु धर्म्येव कथंचिद्भेदाभेदौ तु धर्मधर्मिणावेव एवं सिद्धौ तावेव च कथंचित्तादात्म्यं वस्तुनोऽभिधीयते। तच्छब्देन वस्तुनः परामर्शात्। तस्य वस्तुनः आत्मानौ तदात्मानौ तयोर्भावस्तादात्म्यं। भेदाभेदस्वभावत्वं कथंचिदिति विशेषणेन सर्वथा भेदाभेदयोः परस्परनिरपेक्षयोः प्रतिक्षेपात्तत्पक्षे निक्षिप्तदोषपरिहारः। परस्परसापेक्षयोश्च परिग्रहात् जात्यंतरवस्तुव्यवस्थापनात् सर्वथा शून्यवादप्रतिक्षेपसिद्धिरिति कथंचिद्भेदाभेदात्मकं कथंचिद्धर्मधर्म्यात्मकं कथंचिद्द्रव्यपर्यायात्मकमिति प्रतिपाद्यते स्याद्वादन्यायनिष्ठैस्तथैव तस्य प्रतिष्ठितत्वात्। सामान्यविशेषवन्मेचकज्ञानवच्च। तत्र विरोधवैय्यधिकरण्यादिदूषणमनेनैवापसारितमिति किं नश्चिंतया। नन्वेवं स्याद्वादिनामपि द्रव्यस्य नित्यत्वात्तदन्वयव्यतिरेकानुविधानं कार्याणां न स्यादीश्वरान्वयव्यतिरेकानुविधानवत् पर्यायाणां च क्षणिकत्वात्तदन्वयव्यतिरेकानुविधानमपि न घटते नष्टे पूर्वपर्याये स्वयमसत्येवोत्तरकार्यस्योत्पत्तेः सति चानुत्पत्तेरन्यथैकक्षणवृत्तित्वप्रसंगात्। सर्वपर्यायाणामिति तद्भावभावित्वानुपपत्तिः। यदि पुनर्द्रव्ये सत्येव कार्याणां प्रसूतेस्तदन्वयसिद्धिस्तन्निमित्तपर्यायाणामभावे वानुत्पत्तेर्व्यतिरेकसिद्धिरिति तदन्वयव्यतिरेकानुविधानमिष्यते तदेश्वरस्य तादिच्छाविज्ञानयोश्च नित्यत्वेऽपि तन्वादिकार्याणां तद्भाव एव भावात्तदन्वयस्तत्सहकारिकारणावस्थापाये च तेषामनुत्पत्तेर्व्यतिरेक इति तदन्वयव्यतिरेकानुविधानमिष्यतां विशेषाभावात् ततः सर्वकार्याणां बुद्धिमत्कारणत्वसिद्धिरिति परे प्रत्यवतिष्ठंते तेऽपि न कार्यकारणभावविदः। स्याद्वादिनां द्रव्यस्य पर्यायानिरपेक्षस्य पर्यायस्य वा द्रव्यनिरपेक्षस्य द्रव्यपर्याययोर्वा परस्परनिरपेक्षयोः कार्यकारित्वानभ्युपगमात् तथा प्रतीत्यभावात् द्रव्यपर्यायात्मकस्यैव जात्यंतरवस्तुनः कार्यकारित्वेन संप्रत्ययात् कार्यकारणभावस्य तथैव प्रसिद्धेः वस्तुनि द्रव्यरूपेणान्वयप्रत्ययविषये सत्येव कार्यस्य प्रादुर्भावात्तन्निबंधनपर्यायविशेषाभावे च कार्यस्याप्रादुर्भावात्तदन्वयव्यतिरेकानुकरणात्कार्यकारणभावो व्यवतिष्ठते। न च द्रव्यरूपेणापि वस्तुनो नित्यत्वमवधार्यते तस्य

१ प्रत्यासत्तिधर्मधर्मिभ्यः। २ धर्मधर्मिप्रत्यासत्तीनामिदं प्रत्यासत्त्यंतमिति व्यपदेशनियमस्य कारणं।

पर्यायेभ्यो भंगुरेभ्यः कथंचिदनर्थांतरभावात् कथंचिदनित्यत्वसिद्धेर्महेश्वरस्य तु वैशेषिकैः सर्वथा नित्यत्वप्रतिज्ञानात्तदन्वयव्यतिरेकानुकरणासंभवात्कार्याणामुत्पत्तेरयोगात् । पर्यायाणां च द्रव्यरूपेण नित्यत्वसिद्धेः कथंचिन्नित्यत्वात्सर्वथा नित्यत्वानवधारणात् विशिष्टपर्यायसद्भावे कार्यस्योदयात्तदभावेचानुदयात् कार्यस्य तदन्वयव्यतिरेकानुकरणसिद्धेः । निरन्वयक्षणिकपर्यायाणामेव तदघटनात् तत्र कार्यकारणभावाव्यवस्थितेः । पर्यायार्थिकनयप्राधान्यादविरोधात् द्रव्यार्थिकनयप्राधान्येन तदविरोधवत् । प्रमाणार्पणया तु द्रव्यपर्यायात्मनि वस्तुनि सति कार्यस्य प्रसवनादसति वाऽप्रसवनात्तदन्वयव्यतिरेकानुविधानं सकलजनसाक्षिकं कार्यकारणभावं व्यवस्थापयेत् सर्वथैकांतकल्पनायां तदभावं विभावयतीति कृतमतिप्रसंगिन्या कथया । महेश्वरज्ञानस्य नित्यस्याव्यापिनोऽपि सर्वत्र कार्यकरणसमर्थस्य सर्वेषु देशेषु सर्वस्मिन्काले व्यतिरेकाप्रसिद्धेरन्वयस्यापि नियतस्य निश्चेतुमशक्तेस्तन्वादिकार्यं तद्धेतुकं कारणांतरापेक्षयापि न सिध्यत्येवेति स्थितं । कस्यचिन्नित्यव्यापीश्वरज्ञानाभ्युपगमेऽपि दूषणमतिदिशन्नाह,—

एतेनैवेश्वरज्ञानं व्यापिनित्यमपाकृतं ।
तस्येशवत्सदा कार्यक्रमहेतुत्वहानितः ॥ ३५ ॥

एतेन व्यतिरेकाभावान्वयसंदेहव्यवस्थापकवचनेन व्यापिनित्यमीश्वरज्ञानं तन्वादिकार्योत्पत्तिनिमित्तमपाकृतं वेदितव्यं तस्येश्वरवत्सर्वगतत्वेन कचिद्देशे नित्यत्वेन कदाचित्काले व्यतिरेकाभावनिश्चयात् तदन्वयमात्रस्य चात्मांतरवन्निश्चेतुमशक्तेः तस्मिन्सति समर्थे युगपत्सर्वकार्याणामुत्पत्तिप्रसंगात् । सर्वदा कार्यक्रमहेतुत्वहानेः कालदेशकृतक्रमाभावात् ' सर्वथा स्वयं क्रमाभावात् ' क्रमवत्त्वे नित्यत्वसर्वगतत्वविरोधात् पावकादिवत् । स्यान्मतं प्रतिनियतदेशकालसहकारिकारणक्रममापेक्ष्य कार्यक्रमहेतुत्वं महेश्वरस्य च तद्विज्ञानस्यापि न विरुध्यते इति । तदप्यशक्यप्रतिषेधं सहकारिकारणेषु क्रमवत्सु सत्सु तन्वादिकार्याणां प्रादुर्भवतां तेष्वसत्सु चानुत्पद्यमानानां तदन्वयव्यतिरेकानुविधानात् तद्धेतुकत्वस्यैव प्रसिद्धेर्महेश्वरज्ञानहेतुकत्वं दुरुपपादमापनीपद्येत । यदि पुनः सकलसहकारिकारणानामानित्यानां क्रमजन्मनामपि चेतनत्वाभावाच्चेतनेनाधिष्ठितानां कार्यनिष्पादनाय प्रवृत्तेरनुत्पत्तेस्तुरीतंतुवेमशलाकादीनां कुविंदेनानधिष्ठितानां पटोत्पादनायाऽप्रवृत्तिवच्चेतनस्तदधिष्ठाता साध्यते । तथा हि विवादाध्यासितानि कारणांतराणि क्रमवर्तीन्यक्रमाणि च चेतनाधिष्ठितान्येव तन्वादिकार्याणि कुर्वंति स्वयमचेतनत्वात् यानि यानि अचेतनानि तानि तानि चेतनाधिष्ठितान्येव स्वकार्यं कुर्वाणानि दृष्टानि यथा तुरीतंत्वादीनि पटकार्यं, स्वयमचेतनानि च कारणांतराणि तस्माच्चेतनाधिष्ठितान्येव तन्वादिकार्याणि कुर्वंति योऽसौ तेषामधिष्ठाता स महेश्वरः पुरुषविशेषः क्लेशकर्मविपाकाशयैरपरामृष्टः समस्तकारकशक्तिपरिज्ञानभाक् सिसृक्षाप्रयत्नविशेषवांश्च प्रभुर्विभाव्यते तद्विपरीतस्य समस्तकारकाधिष्ठातृत्वविरोधात् बहूनामपि समस्तकारकाधिष्ठायिनां पुरुषविशेषाणां प्रतिनियतज्ञानादिशक्तीनामेकेन महाप्रभुणाऽधिष्ठितानामेव प्रवृत्तिघटनात् सामंतमहासामंतमंडलीकादीनामेकं चक्रवर्त्यधिष्ठितानां प्रवृत्तिवदिति महेश्वरसिद्धिः । तत्राचेतनत्वादिति हेतोर्वत्सविवृद्धिनिमित्तं प्रवर्त्तमानेन गोक्षीरेणानैकांतिकत्वमिति न शंकनीयं । तस्यापि चेतनेन वत्सेनादृष्टविशेषसहकारिणाधिष्ठितस्यैव प्रवृत्तेः । अन्यथा मृते वत्से गोभक्तेनैव तस्य प्रवृत्तिविरोधात् । न च वत्सादृष्टविशेषवशात्प्रवृत्तावपि समानोऽयं दोष इति शक्यः तत्क्षीरोपभोक्तृजनादृष्टविशेषसहकारिणापि चेतनेनाधिष्ठितस्य प्रवृत्तिघटनात् सहकारिणामप्रतिनियमात् । यदपि कश्चिदुच्यते महेश्वरोऽपि चेतनांतराधिष्ठितः प्रवर्तते चेतनत्वाद्विशिष्टकर्मकरादिवदिति । तदपि न सत्यं तदधिष्ठापकस्यैव महेश्वरत्वात् । यो ह्यंत्योऽधिष्ठाता स्वतंत्रः स महेश्वरस्ततोऽन्यस्य महेश्वरत्वानुपपत्तेन चांत्योऽधिष्ठाता न व्यवतिष्ठते तन्वादिकार्याणामुत्पत्तिव्यवस्थानामभावप्रसंगात् । परापरमहेश्वरप्रतीक्षायामेवोपक्षीणशक्तित्वात् ततो निरवद्यमिदं

साधनमिति कैश्चित्। तेऽपि न हेतुसामर्थ्यवेदिनः। अचेतनत्वस्य हेतोः संसारिजनज्ञानेषु स्वयं चेतन स्वभावात्पक्षाव्यापकत्वात्। ननु च न चेतनत्वप्रतिषेधोऽचेतनत्वं किं तर्हि चेतनासमवायप्रतिषेधः स च ज्ञानेष्वस्ति तेषां स्वयं चेतनत्वात् तत्रापरचेतनासमवायाभावात् ततोऽचेतनत्वं साधनं न पक्षाव्यापकं ज्ञानेष्वपि सद्भावादिति न मंतव्यं। संसार्यात्मसु चेतनासमवायात् चेतनत्वप्रसिद्धेरचेतनत्वस्य हेतोरभावात् पक्षाव्यापकत्वस्य तदवस्थत्वात्। यदि तु संसार्यात्मनां स्वतोऽचेतनत्वाद्चेतनत्वस्य हेतोस्तत्रसद्भावान्नपक्षाव्यापकत्वमिति मतिः। तदा महेश्वरस्याप्यचेतनत्वप्रसंगाः। तस्यापि स्वतोऽचेतनत्वात् तथा च दृष्टादृष्ट कारणांतरवदीश्वरस्यापि हेतुकर्तुश्चेतनांतराधिष्ठितत्वं साधनीयं तथा चानवस्था सुदूरमपि गत्वा कस्यचित्स्वतश्चेतनत्वानभ्युपगमात्। महेश्वरस्य स्वतोऽचेतनस्यापि चेतनांतराधिष्ठितत्वाभावे तेनैव हेतोरनेकांतिकत्वमिति कुतः सकलकारकाणां चेतनाधिष्ठितत्वसिद्धिः यत इदं शोभते "अज्ञो जंतुरनीशोऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितोगच्छेत्स्वर्गं वा श्वभ्रमेव चेति"। स्यादाकूतं चेतनाज्ञानं तदधिष्ठितत्वं सकलकारकांतराणामचेतनत्वेन हेतुना साध्यते तच्च ज्ञानं समस्तकारकशक्तिपरिच्छेदकं नित्यं गुणत्वादाश्रयमंतरेणासंभवात् स्वाश्रयमात्मांतरं साधयति स नो महेश्वर इति। तदप्ययुक्तं। संसार्यात्मनां ज्ञानैरपि स्वयं चेतनास्वभावैरधिष्ठितस्य शुभाशुभकर्मकलापस्य तत्सहकारिकदंबकस्य च तन्वादिकार्योत्पत्तौ व्यापारसिद्धेरीश्वरज्ञानाधिष्ठानपरिकल्पनावैयर्थ्यप्रसंगात्। तदन्वयव्यतिरेकाभ्यामेव तद्व्यवस्थापनात्। अथ मतमेतत् संसार्यात्मनां विज्ञानानि विप्रकृष्टार्थाविषयत्वान्न धर्माधर्मपरमाणुकालाद्यतींद्रियकारकविशेषसाक्षात्करणसमर्थानि। न च तदसाक्षात्करणे ततः प्रयोजकत्वं तेषामवतिष्ठते तदप्रयोजकत्वे च न तदधिष्ठतानामेव धर्मादीनां तन्वादिकार्यजन्मनिप्रवृत्तिः सिध्येत् ततोऽतींद्रियार्थसाक्षात्कारिणा ज्ञानेनाधिष्ठितानामेव स्वकार्य्ये व्यापारेण भवितव्यं तच्च महेश्वरज्ञानमिति। तदप्यनालोचितयुक्तिकं सकलातींद्रियार्थसाक्षात्कारिण एव ज्ञानस्य कारकाधिष्ठायकत्वेन प्रसिद्धस्य दृष्टांततयोपादीयमानस्यासंभवात्तदधिष्ठितत्वसाधने हेतोरन्वयत्वप्रसक्तेः। न हि कुंभकारादेः कुंभाद्युत्पत्तौ तत्कारकसाक्षात्कारि ज्ञानं विद्यते दंडचक्रादिदृष्टकारकसंदोहस्य तेन साक्षात्कारणेऽपि तन्निमित्तादृष्टविशेषकालादेरसाक्षात्करणात्। ननु लिंगविशेषात्तत्परिच्छित्तिनिमित्तस्य लैंगिकस्य ज्ञानस्य सद्भावात् तथा स्वादृष्टविशेषाः कुंभकारादयः कुंभादिकार्याणि कुर्वंति नेतरे तेषां तथाविधादृष्टविशेषाभावादित्यागमज्ञानस्यापि तत्परिच्छेदनिबंधनस्य सद्भावात् सिद्धमेव कुंभकारादिज्ञानस्य कुंभादिकारकपरिच्छेदकत्वं तत्प्रयोक्तृत्वेन तदधिष्ठानानिबंधनत्वं ततस्तस्य दृष्टांततयोपादानान्नहेतोरन्वयत्वापत्तिरिति चेत् तर्हि सर्वसंसारिणां यथास्वं तन्वादिकार्यजन्मनि प्रत्यक्षतोऽनुमानादागमाच्च तन्निमित्तदृष्टादृष्टकारकविषयपरिज्ञानसिद्धेः कथमज्ञत्वं येनात्मनः सुखदुःखोत्पत्तौ हेतुत्वं न भवेत् यतश्च सर्वसंसारीश्वरप्रेरित एव स्वर्गं वा श्वभ्रं वा गच्छेदिति समंजसमालक्ष्यते। ततः किमीश्वरपरिकल्पनया दृष्टादृष्टकारकांतराणामेव क्रमाक्रमजन्मनामन्वयव्यतिरेकानुविधातात्क्रमाक्रमजन्मानि तन्वादिकार्याणि भवंतु तदुपभोक्तृजनस्यैव ज्ञानवतः तदधिष्ठायकस्य प्रमाणोपपन्नस्य व्यवस्थापनात्। सांप्रतमभ्युपगम्यापि महेश्वरज्ञानं अस्वसंविदितं स्वसंविदितं वेति कल्पनाद्वितयसंभवे प्रथमकल्पनायां दूषणमाह—

अस्वसंविदितं ज्ञानमीश्वरस्य यदीष्यते।
तदा सर्वज्ञता न स्यात् स्वज्ञानस्याप्रवेदनात्॥ ३६॥
ज्ञानांतरेण तद्धि स्यात्तस्याप्यन्येन वेदनं।
वेदनेन भवेदेवमनवस्था महीयसी॥ ३७॥
गत्वा सुदूरमप्येवं स्वसंविदितवेदने।
इष्यमाणे महेशस्य प्रथमं तादृगस्तु वः॥ ३८॥

महेश्वरस्य हि विज्ञानं यदि स्वं न वेदयते स्वात्मनि क्रियाविरोधात्तदा समस्तकारकशक्तिनिकरमपि कथं संवेदयेत् । तथा हि । नेश्वरज्ञानं सकलकारकशक्तिनिकरसंवेदकं स्वासंवेदकत्वात् । यद्यत्स्वासंवेदकं तत्तन्न सकलकारकशक्तिनिकरसंवेदकं यथा चक्षुः, तथाचेश्वरज्ञानं तस्मान्न तथेति कुतः समस्तकारकाधिष्ठायकं यतस्तदाश्रयस्येश्वरस्य निखिलकार्योत्पत्तौ निमित्तकारणत्वं सिध्येत् असर्वज्ञताया एव तस्यैव प्रसिद्धेः । अथवा यदीश्वरस्य ज्ञानं स्वयमीश्वरेण न संवेद्यत इत्यस्वसंविदितमिष्यते तदा तस्य सर्वज्ञता न स्यात् स्वज्ञानप्रवेदनाभावात् । ननु च सर्वं ज्ञेयमेव जानन् सर्वज्ञःकथ्यते न पुनर्ज्ञानं तस्याज्ञेयत्वात् । नच तदज्ञाते ज्ञेयपरिच्छित्तिर्न भवेत् चक्षुरपरिज्ञाने तत्परिच्छेद्यरूपापरिज्ञानप्रसंगात् । करणापरिज्ञानेऽपि विषयपरिच्छित्तेरविरोधादित्यपि नानुमंतव्यं । सर्वग्रहणेन ज्ञानज्ञेयज्ञातृज्ञप्तिलक्षणस्य तत्त्वचतुष्टयस्य प्रतिज्ञानात् 'प्रमाणं प्रमाता प्रमेयं प्रमितिरिति चतसृषु चैवं विधासु तत्त्वं परिसमाप्यत' इति वचनात् । तदन्यतमापरिज्ञानेऽपि सकलतत्त्वपरिज्ञानानुपपत्तेः कुतः सर्वज्ञतेश्वरस्य सिध्येत् । ज्ञानांतरेण स्वज्ञानस्यापि वेदनान्नाऽस्यासर्वज्ञतेति चेत् तर्हि तदपि ज्ञानांतरं परेण ज्ञानेन ज्ञातव्यमित्यभ्युपगम्यमानेऽनवस्था महीयसी स्यात् । सुदूरमप्यनुसृत्य कस्यचिद्विज्ञानस्य स्वार्थावभासन स्वभावत्वे प्रथमस्यैव सहस्रकिरणवत् स्वार्थावभासनस्वभावत्वमुररीकृतामलमस्वसंविदितज्ञानकल्पनया, स्वार्थव्यवसायात्मकज्ञानाभ्युपगमे च युष्माकं तस्य महेश्वराद्भेदे पर्यनुयोगमाह—

तत्स्वार्थव्यवसायात्मज्ञानं भिन्नं महेश्वरात् ।
कथं तस्येति निर्देश्यमाकाशादिवदंजसा ॥ ३९ ॥
समवायेन तस्यापि तद्भिन्नस्य कुतो मतिः ।
इहेदमिति विज्ञानादबाध्याद्व्यभिचारि तत् ॥ ४० ॥
इह कुंडे दधीत्यादि विज्ञानेनास्तविद्विषा ।
साध्ये संबंधमात्रे तु परेषां सिद्धसाधनं ॥ ४१ ॥

यदि स्वार्थव्यवसायात्मकं ज्ञानमीश्वरस्याभ्युनुज्ञायते तस्यास्मदादिविशिष्टत्वात् तदा तदीश्वराद्भिन्नमभ्युपगंतव्यं । अभेदे सिद्धांतविरोधात् । तथाचाकाशादेरिव कथं तस्येति व्यपदेश्यमिति पर्यनुयुज्महे । स्यान्मतं भिन्नमपि विज्ञानं महेश्वरात्तस्येतिव्यपदिश्यते तत्र समवायात्, नाकाशादेरिति निर्दिश्यते तत्र तस्यासमवायादिति । तदप्ययुक्तं । ताभ्यामीश्वरज्ञानाभ्यां भिन्नस्य समवायस्यापि कुतः प्रतिपत्तिरिति पर्यनुयोगस्य तदवस्थत्वात् । इहेदमिति प्रत्ययविशेषाद्बाधकरहितात् समवायस्य प्रतिपत्तिः तथाहि, इदमिहेश्वरे ज्ञानमितीहेदंप्रत्ययो विशिष्टपदार्थहेतुकः सकलबाधकरहितत्वे सतीहेदमिति प्रत्ययविशेषत्वात् यो यः सकलबाधकरहितत्वे सति प्रत्ययविशेषः स स विशिष्टपदार्थहेतुको दृष्टः यथा द्रव्येषु द्रव्यमित्यन्वयप्रत्ययविशेषः सामान्यपदार्थहेतुकः सकलपदार्थबाधकरहितत्वे सति प्रत्ययविशेषश्चेहेदमिति प्रत्ययविशेषः तस्माद्विशिष्टपदार्थहेतुक इत्यनुमीयते । योऽसौ विशिष्टः पदार्थस्तद्धेतुः स समवायः, पदार्थांतरस्य तद्धेतोरसंभवात्तद्धेतुकत्वायोगाच्च, न हीह तंतुषु पट इति प्रत्ययस्तंतुहेतुकः, तंतुषु तंतव इति प्रत्ययस्योत्पत्तेः नापि पटहेतुकः पटात्पट इति प्रत्ययस्योदयात् । नापि वासनाविशेषहेतुकः तस्याः कारणरहितायाः संभवाभावात् । पूर्वं तथाविधज्ञानस्य तत्कारणत्वे तदपि कुतो हेतोरिति चिन्त्यमेतत् पूर्वतद्वासनात इति चेन्न । अनवस्थाप्रसंगात् । ज्ञानवासनयोरनादिसंतानपरिकल्पनायां कुतो बहिरर्थसिद्धिरनादिवासनाबलादेव नीलादिप्रत्ययानामपि भावात् । नचैवं विज्ञानसंताननानात्वसिद्धिः संतानांतरग्राहिणोविज्ञानस्यापि संतानांतरमंतरेण वासनाविशेषादेव तथाप्रत्ययप्रसूतेः स्वप्नसंतानांतरप्रत्ययवत् । नानासंतानानभ्युपगमे चैकज्ञानसंतानसिद्धिरपि कुतः स्यात् । स्वसंतानाभावेऽपि

तद्ग्राहिणः प्रत्ययस्य भावात् स्वसंतानस्याप्यनिष्टौ संविदद्वैतं कुतः साधयेत् स्वतःप्रतिभासनादिति चेन्न। तथा वासनाविशेषादेव स्वतःप्रतिभासस्यापि भावात्। शक्यं हि वक्तुं स्वतःप्रतिभासवासनावशादेव स्वतःप्रतिभासः संवेदनस्य न पुनः परमार्थत इति न किंचित्पारमार्थिकं संवेदनं सिध्येत्। तथाच स्वरूपस्य स्वतोगतिरिति रिक्ता वाचोयुक्तिः। तदनेन कुतश्चिल्लिंगात्परमार्थतः साधयता दूषयता वा साधनज्ञानं दूषणज्ञानं वाऽभ्रांतं सालंबनमभ्युपगंतव्यं। तद्वत्सर्वमबाधितं ज्ञानं सालंबनमिति कथमिहेदमिति प्रत्ययस्याबाधितस्य निरालंबनता येन वासनामात्रहेतुरयं स्यात्। नापि निर्हेतुकः कदाचित्कत्वात्। ततोऽस्य विशिष्टः पदार्थो हेतुरभ्युपगंतव्य इति वैशेषिकाः तेऽप्येवं प्रष्टव्याः। कोऽसौ विशिष्टः पदार्थः समवायः संबंधमात्रं वा! न तावत्समवायः, तद्धेतुकत्वे साध्येऽस्यहेदमिति प्रत्ययस्येह कुंडे दधीत्यादिना निरस्तसमस्तबाधकेन प्रत्ययेन व्यभिचारित्वात्, तदपीहेदमिति विज्ञानमबाधं भवत्येव। नच समवायहेतुकं तस्य संयोगहेतुकत्वात्। संबंधमात्रे तु तन्निबंधने साध्ये परेषां सिद्धसाधनमेव, स्याद्वादिनां सर्वत्रेहेदं प्रत्ययस्याबाधितस्य संबंधमात्रनिबंधनत्वेन सिद्धत्वात्। स्यान्मतं। वैशेषिकाणामबाधितेहेदं प्रत्ययाल्लिंगात्सामान्यतः संबंधे सिद्धे विशेषणावयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोः सामान्यतद्वतोर्विशेषतद्वतोश्च यः संबंध इहेदं प्रत्ययलिंगः स समवाय एव भविष्यति लक्षणविशेषसंभवात्। तथा हि "अयुतसिद्धानामाधार्याधारभूतानामिहेदं प्रत्ययलिंगो यः संबंधः स समवाय इति प्रशस्तकरः"। तत्र इहेदं प्रत्ययलिंगः समवाय इत्युच्यमानेऽतरालाभावनिबंधनेन इह ग्रामे वृक्ष इति इहेदं प्रत्ययेन, व्यभिचारात् संबंध इति वचनं। संबंधो हि इहेदं प्रत्ययलिंगो यः स एव समवाय इष्यते नचांतरालाभावो ग्रामवृक्षाणां संबंधइति न तेन व्यभिचारः। तथापि इहाकाशे शकुनिरिति इहेदं प्रत्ययेन संयोगसंबंधमात्रनिबंधनेन व्यभिचार इत्याधाराधेयभूतानामिति निगद्यते। न हि यथाऽवयवावयव्यादीनामाधाराधेयभूतत्वमुभयोः प्रसिद्धं तथा शकुन्याकाशयोरौत्तराधर्याद्योगात् आकाशस्य सर्वगतत्वेन शकुनेरुपर्यपि भावादधस्तादिवेति न तत्रेहेदंप्रत्ययेन व्यभिचारः। नन्वाकाशस्यातींद्रियत्वात्तदस्मदादीनामिहेदं प्रत्ययस्यासंभवात् कथं तेन व्यभिचारचोदना साधीयसीति न मंतव्यं। कुतश्चिल्लिंगादनुमितेऽप्याकाशे श्रुतिप्रसिद्धेर्वा कस्यचिदिहेदमिति प्रत्ययाविरोधात् तत्र, भ्रांतेन वा केषांचिदिहेदमिति प्रत्ययेन व्यभिचारचोदनायाः न्यायप्राप्तत्वात् तत्परिहारार्थमाधाराधेयभूतानामिति वचनस्योपपत्तेः। नन्वेवमपीह कुंडे दधीति प्रत्ययेनानेकांतस्तस्य संयोगनिबंधनत्वेन समवायाहेतुत्वादिति न शंकनीयमयुतसिद्धनामिति प्रतिपादनात्। नहि यथावयवावयव्यादयोऽयुतसिद्धास्तथा दधिकुंडादयः तेषां युतसिद्धत्वात्। तह्ययुतसिद्धानामेवेति वक्तव्यमाधाराधेयभूतानामिति वचनस्याभावेऽपि व्यभिचाराभावादिति न चेतसि विधेयं। वाच्यवाचकभावेनाकाशाकाशशब्दयोर्व्यभिचारात्॥ इहाकाशे वाच्ये वाचक आकाशशब्द इति इहेदंप्रत्ययलिंगस्यायुतसिद्धसंबंधस्य वाच्यवाचकभावप्रसिद्धेः तेन व्यभिचारोपपत्तेराधाराधेयभूतानामिति वचनस्योपपत्तेः। नन्वाधाराधेयभूतानामयुतसिद्धानामपि संबंधस्य विषयविषयिभावस्य सिद्धेः कुतः समवायसिद्धिः। नह्यात्मनि-इच्छादीनां ज्ञानमयुतसिद्धं न वर्तते। तथाहमितिज्ञानमाधाराधेयभावस्याप्यत्र भावात् नचाहमिति प्रत्ययस्यात्मविषयस्यायुतसिद्धस्यात्माधारस्य विषयविषयिभावोऽसिद्ध इति कुतस्तयोः समवाय एव सिध्येदिति न वक्तव्यं। आधाराधेयभूतानामेवायुतसिद्धानामेवेति चावधारणात्। वाच्यवाचकभावो हि युतसिद्धानामनाधाराधेयभूतानां च प्रतीयते विषयविषयिभाववत्। ततोऽनेनानवधारितविषयेण न व्यभिचारः संभाव्यते। नन्वेवमयुतसिद्धानामेवेत्यवधारणाद्व्यभिचाराभावादाधाराधेयभूतानामिति वचनमनर्थकं स्यात् आधाराधेयभूतानामेवेत्यवधारणे सत्ययुतसिद्धानामिति वचनवत्॥ विषयविषयिभावस्य वाच्यवाचकभावस्य च युतसिद्धानामप्यनाधार्याधारभूतानामिव संभवात् तेन व्यभिचाराभावादिति च

---

१ अयुतसिद्धभिन्नानामित्यर्थः।

न मननीयं । घटाद्येकद्रव्यसमवायिनां रूपरसादीनामयुतसिद्धानामेव परस्परं समवायाभावादेकार्थसमवायेन संबंधेन व्यभिचारात् । नह्ययं युतसिद्धानामपि संभवति विषयविषयिभाववद्वाच्यवाचकभाववद्वा ततोऽयुतसिद्धानामेवेत्यवधारणेऽपि व्यभिचारनिवृत्यर्थमाधार्याधारभूतानामिति वचनं । तथाऽऽधार्याधारभूतानामेवेति वचनेऽप्याधाराधेयभावेन संयोगाविशेषेण सर्वथाऽनाधार्याधारभूतानामसंभवताव्यभिचारः संभाव्यत एव तन्निवृत्त्यर्थमयुतसिद्धानामेवेति वचनमर्थवदेवेति निरवद्यमयुतसिद्धत्वाधार्याधारभूतत्वलक्षणं संयोगादिभ्योव्यवच्छेदकं संबंधस्येहेदं प्रत्ययलिंगेन व्यवस्थापितस्य समवायस्वभावत्वं साधयत्येव । अतः संबंधमात्रेऽपि साध्ये न सिद्धसाधनमिति वैशेषिकाः संचक्षते तेषामयुतसिद्धानामिति बचनं तावद्विचार्यते । किमिदमयुतसिद्धत्वं नामविशेषणं, वैशेषिकशास्त्रापेक्षया लोकापेक्षया वा स्यात् ॥ उभयथापि न साध्वित्याह ॥

सत्यामयुतसिद्धौ चेन्नेदं साधुविशेषणं ।
शास्त्रीयायुतसिद्धत्वविरहात्समवायिनोः ॥४२॥
द्रव्यं स्वावयवाधारं गुणो द्रव्याश्रयो यतः
लौकिक्ययुतसिद्धिस्तु भवेद्दुग्धांभसोरपि ॥४३॥

इह तंतुषु पट इत्यादिरिहेदं प्रत्ययः समवायसंबंधनिबंधन एव, निर्बाधत्वे सत्ययुतसिद्धेहेदंप्रत्ययत्वात् । यस्तु न समवायसंबंधनिबंधनः स नैवं यथेहसमवायिषु समवाय इति वाध्यमानेहेदं प्रत्ययः । इह कुंडे दधीति युतसिद्धेहेदं प्रत्ययश्च । निर्बाधत्वेसत्ययुतसिद्धेहेदं प्रत्ययश्चायमिहतंतुषु पट इत्यादिः, तस्मात्समवायसंबंधनिबंधन इति केवलव्यतिरेकी हेतुरासिद्धत्वादिदोषरहितत्वात् स्वसाध्याविनाभावी समवायसबंधं साधयतीति परैरभिधीयते सत्यामयुतसिद्धाविति वचनसामर्थ्यात् । तत्रेदमयुतसिद्धत्वं यदि शास्त्रीयं हेतोर्विशेषणं तदा न साधु प्रतिभासते समवायिनोरवयवावयविनोर्गुणगुणिनोः क्रिया क्रियावतोः सामान्यतद्वतोर्विशेषतद्वतोश्च शास्त्रीयस्यायुतसिद्धत्वस्य विरहात् वैशेषिकशास्त्रे हि प्रसिद्धम्- 'अपृथगाश्रयवृत्तित्वमयुतसिद्धत्वं'। तच्चेह नास्त्येव यतःकारणाद्द्रव्यं तंतुलक्षणं स्वावयवांशेषु वर्तते कार्यद्रव्यं च पटलक्षणं स्वावयवेषु तंतुषु वर्तत इति स्वावयवाधारमित्यनेनावयवावयविनोः पृथगाश्रयवृत्तित्वसिद्धेर पृथगाश्रयवृत्तित्वमसदेवेति प्रतिपादितं यतश्च गुणः कार्यद्रव्याश्रयो रूपादि । कार्यद्रव्यं तु स्वावयवाधारं प्रतीयते तेन गुणगुणिनोरपृथगाश्रयवृत्तित्वमसंभाव्यमानं निवेदितं । एतेन क्रियायाः कार्यद्रव्यवर्तनात्कार्यद्रव्यस्य च स्वावयवेषु, क्रियाक्रियावतोरपृथगाश्रयवृत्तित्वाभावः कथितः । तथा सामान्यस्य द्रव्यत्वादेर्द्रव्यादिषु वृत्तेर्द्रव्यादीनां च स्वाश्रयेषु, सामान्यतद्वतोः पृथगाश्रयवृत्तित्वं ख्यापितं तथैवापरविशेषस्य कार्यद्रव्येषु प्रवृत्तेः कार्यद्रव्याणां च स्वावयवेषु विशेषतद्वतोरपृथगाश्रयवृत्तित्वं निरस्तं वेदितव्यं । ततो न शास्त्रीयायुतसिद्धिःसमवायिनोरस्ति या तु लौकिकी लोकप्रसिद्धैकभाजनवृत्तिः सा दुग्धांभसोरपि युतसिद्धयोरस्तीति तयापि नायुतसिद्धत्वं सत्या समवायिनोः साधीय इति प्रतिपत्तव्यं ।

पृथगाश्रयवृत्तित्वं युतसिद्धिर्नचानयोः ।
सास्तीशस्य विभुत्वेन परद्रव्याश्रितिच्युतेः ॥४४॥
ज्ञानस्यापीश्वरादन्यद्रव्यवृत्तित्वहानितः ।
इति येऽपि समादध्युस्तांश्च पर्यनुयुंज्महे ॥४५॥
विभुद्रव्यविशेषाणामन्याश्रयविवेकतः ।
युतसिद्धिः कथं तु स्यादेकद्रव्यगुणादिषु ॥४६॥

समवायः प्रसज्येतायुतसिद्धौ परस्परं ।
तेषां तद्द्वितयासत्वे स्याद्व्याघातो दुरुत्तरः ॥४७॥

ननु च पृथगाश्रयवृत्तित्वं युतसिद्धिः 'पृथगाश्रयाश्रयित्वं युतसिद्धिः' इति वचनात् । पृथगाश्रयसमवायोयुतसिद्धिरिति वदतां समवायस्य विवादाध्यासितत्वाल्लक्षणासिद्धिप्रसंगात् । लक्षणस्य कारकत्वेन ज्ञापकत्वेऽपि तेन सिद्धेन भवितव्यं । असिद्धस्य विवादाध्यासितस्य संदिग्धत्वात् तल्लक्षणत्वायोगात् । सिद्धं हि कस्याचिद्भेदकं लक्षणमुपपद्यते नान्यथेति लक्ष्यलक्षणभावविदो विभावयंति । तत्र युतसिद्धत्वमीश्वरज्ञानयोर्नास्त्येव महेश्वरस्य विभुत्वान्नित्यत्वाच्चान्यद्रव्यवृत्तित्वाभावान्महेश्वरादन्यत्र तद्विज्ञानत्वस्याप्रवृत्तेः पृथगाश्रयवृतित्वाभावात् । कुंडस्य हि कुंडावयवेषु वृत्तिर्दध्नश्च दध्यवयवेष्विति कुंडावयवदध्यवयवाख्यौ पृथग्भुतावाश्रयौ तयोश्च कुंडस्य दध्नश्च वृत्तिरिति पृथगाश्रयवृतित्वं तयोरभिधीयते । न चैवंविधं पृथगाश्रयाश्रयित्वं समवायिनोः संभवति तंतूनां स्वावयवेष्वंशुषु यथा वृत्तिः न तथा पटस्य तंतुव्यतिरिक्ते कचिदाश्रये नह्यत्र चत्वारोऽर्थाः प्रतीयंते । द्वावाश्रयौ पृथग्भूतौ द्वौ चाश्रयिणाविति तंतोरेव स्वावयवापेक्षयाश्रयित्वात्पटापेक्षया चाश्रयत्वान्नयाणामेवार्थानां प्रसिद्धेः पृथगाश्रयाश्रयित्वस्य युतसिद्धिलक्षणस्याभावादयुतसिद्धत्वं शास्त्रीयं समवायिनोः सिद्धमेव ततोऽयुतसिद्धत्वविशेषणं साध्वेवासिद्धत्वाभावात् । लौकिक्ययुतसिद्धत्वं तु प्रतीतिबाधितं नाभ्युपगम्यत एवं ततःसविशेषणाद्धेतोः समवायसिद्धिरिति येऽपि समादधते विदग्धवैशेषिकास्तांश्च पर्यनुयुंज्महे । विभुद्रव्यविशेषाणामात्माकाशादीनां कथं तु युतसिद्धिः परिकल्पते भवद्भिस्तेषामन्याश्रयविरहात् । पृथगाश्रयाश्रयित्वासंभवात् । नित्यानां च पृथग्गतिमत्वं युतसिद्धिरित्यपि न विभुद्रव्येषु संभवति तद्धि पृथग्गतिमत्वं द्विधाभिधीयते कैश्चित् । अन्यतरपृथग्गतिमत्वं उभयपृथग्गतिमत्वं चेति । तत्र परमाणाविभुद्रव्ययोरन्यतरपृथग्गतिमत्वं परमाणोरेव गतिमत्वात् । विभुद्रव्यस्य तु निःक्रियत्वेन गतिमत्वाभावात्, परभाणूनां तु परस्परमुभयपृथग्गतिमत्वमुभयोरपि परमाण्वोः पृथक् पृथग्गतिमत्वसंभवात् । नचैतद्द्वितयमपि परस्परं विभुद्रव्यविशेषाणां संभवति । तथैकद्रव्याश्रयाणां गुणकर्मसामान्यानां च परस्परं पृथगाश्रयवृत्तेरभावात् युतसिद्धिः कथं नु स्यादिति वितर्कयंतु भवंतः । तेषां युतसिध्यभावे च युतसिद्धौ सत्यां समवायोऽन्योन्यं प्रसज्येत स च नेष्टः तेषामाश्रयाश्रयिभावाभावात् । अत्र केचिद्विभुद्रव्यविशेषाणामन्योन्यं नित्यसंयोगमासंचक्षते तस्य कुतश्चिदजातत्वात् । नह्ययमन्यतरकर्मजो यथा स्थाणोः श्येनेन । विभूनां च मूर्तैः, नाप्युभयकर्मजो यथा मेषयोर्मल्लयोर्वा । न च संयोगजो यथा द्वितंतुकवीरणयोः शरीराराकाशयोर्वा । स्वावयवसंयोगपूर्वको ह्यवयविनः केनचित्संयोगः प्रसिद्धः । न चाकाशादीनामवयवाःसंति निरवयवत्वात् ततो न तत्संयोगपूर्वकः परस्परं संयोगो यतः संयोगजःस्यात् प्राप्तिस्तु तेषां सर्वदाऽस्तीति तल्लक्षणसंयोगः, अजएवाभ्युपगंतव्यः । तत्सिद्धेश्च युतसिद्धिस्तेषां प्रतिज्ञातव्या । युतसिद्धानामेव संयोगस्य निश्चयात् । नचैवं ये ये युतसिद्धास्तेषां सह्यहिमवदादीनामपि संयोगः प्रसज्यते तथाव्याप्तेरभावात् संयोगेन हि युतसिद्धत्वं व्याप्तं न युतसिद्धत्वेन संयोगः ततो यत्र यत्र संयोगस्तेषां तत्र तत्र युतसिद्धिरित्यनुमीयते कुंडबदरादिवत् । एवं चैकद्रव्याश्रयाणां गुणादीनां संयोगस्यासंभवान्न युतसिद्धिः तस्य गुणत्वेन द्रव्याश्रयत्वात् तदभावान्न युतसिद्धिः नाप्ययुतसिद्धिरस्तीति समवायः प्राप्नुयात् तस्येहेदं प्रत्ययलिंगत्वादाधार्याधारभूतपदार्थविषयत्वाच्च । नचैते परस्परमाधार्याधारभूताःस्वाश्रयेण द्रव्येण सहाधार्याधारभावात् । नचैहेदमिति प्रत्ययस्तत्राबाधितः संभवति यल्लिंगः संबंधः समवायो व्यवस्थाप्यते । न हीहरसे रूपं कर्मेतिचाबाधितः प्रत्ययोऽस्ति नापीह सामान्ये कर्म गुणोवेति न ततः समवायःस्यात् नहि यत्र यत्रायुतसिद्धिस्तत्रतत्र समवाय इति व्याप्तिरस्ति यत्र यत्र समवायस्तत्र तत्रायुतसिद्धिरितिव्याप्तेः संप्रत्ययादिति सर्वं निरवद्यं परोक्तदूषणानवकाशात् इति त एवं वदतः शंकरादयोऽपि पर्यनुयोज्याः कथं पृथगाश्रयाश्रयित्वं युतसिद्धिः नित्यानां च पृथग्गतिमत्वमिति

युतसिद्धेर्लक्षणद्वयमव्याप्ति न स्यात् तस्य विभुद्रव्येष्वजसंयोगेनानुमितायां युतसिद्धावभावात् । यदि पुनरेतल्लक्षणद्वयव्यतिक्रमेण संयोगहेतुर्युतसिद्धिरिति लक्षणांतरमुररीक्रियते तदा कुंडबदरादिषु परमाण्वाकाशादिषु परमाणुष्वात्ममनस्सु विभुद्रव्येषु च परस्परं युतसिद्धेर्भावाल्लक्षणस्याव्याप्त्यतिव्याप्त्यसंभवदोषपरिहारेऽपि कर्मापि युतसिद्धिं प्राप्नोति तस्यापि संयोगे हेतुत्वाददृष्टेश्वरकालादेरिवेति दुःशक्यातिव्याप्तिः परिहर्तुं । संयोगस्यैवहेतुरित्यवधारणाददोषोऽयमिति चेन्न । एवमपि हिमवद्विंध्यादीनां युतसिद्धेःसंयोगाहेतोरपि प्रसिद्धेर्लक्षणस्याव्याप्तिप्रसङ्गात् । हेतुरेव संयोगस्येत्यवधारणादयमपि न दोष इति चेन्न । एवमपि संयोगहेतोर्युतासिद्धेः प्रसंगात् ॥ संयोगस्यैव हेतुर्युतासिद्धिरित्यवधारणेऽपि विभागहेतुर्युतसिद्धिः कथमिव व्यवस्थाप्यते ॥ न च युतसिद्धानां संयोग एव विभागस्यापि भावात् संयोगोविभागहेतुरित्यपिवार्तं । तस्य तद्विरोधिगुणत्वात् तद्विनाशहेतुणत्वात्॥संयुक्तविषयत्वाद्विभागस्य संयोगोहेतुरिति चेन्न तर्हि विभक्तविषयत्वात्संयोगस्य विभागोहेतुरस्तु । कयोश्चित्विभक्तयोरप्युभयकर्मणोऽन्यतरकर्मणोऽवयवसंयोगस्य चापाये संयोगापायान्न विभागः संयोगहेतुरितिचेत् तर्हि संयुक्तयोरप्युभयकर्मणोऽन्यतरकर्मणोऽवयवविभागस्यचापाये विभागस्याभावात्संयोगो विभागस्यापि हेतुर्माभूत् । कथं च शश्वदविभक्तानां विभुद्रव्यविशेषाणामजः संयोगः सिध्यन्विभागहेतुकोव्यवस्थाप्यते । तत्र युतसिद्धिर्विभागहेतुरपि कथमवस्थाप्यते इति चेत् सर्वस्य हेतोः कार्योत्पादनानियमदिति ब्रूमः । समर्थो हि हेतुःस्वकार्यमुत्पादयति नासमर्थः सहकारिकारणानपेक्षोऽतिप्रसंगात् ॥ तेन यथा हिमवद्विंध्यादीनां युतसिद्धिर्विद्यमानापि न संयोगमुपजनयति सहकारिकारणस्य कर्मादेरभावात् तथा विभुद्रव्यविशेषाणां शाश्वतिका युतसिद्धिः सत्यपि न विभागं, सहकरिकारणस्याऽन्यतरकर्मादेरभावादिति संयोगहेतुं युतसिद्धिमभ्यनुजानंतो विभागहेतुमपि तामभ्यनुजानंतु सर्वथाविशेषाभावात् तथा च संयोगस्यैव हेतुर्युतसिद्धिरित्यपिलक्षणं न व्यवतिष्ठत एव लक्षणाभावे च न युतसिद्धिः नापि युतसिध्यभावलक्षणा स्यादयुतसिद्धिरिति युतसिध्ययुतसिद्धिद्वितयापाये व्याघातो दुरुत्तरः स्यात् सर्वत्र संयोगसमवाययोरभावात् संसर्गहानेः सकलार्थहानिःस्यादित्याभिप्रायः । संयोगापाये तावदात्मांतःकरणसंयोगाद् बुद्ध्यादिगुणोत्पत्तिर्न भवेत् तदभावे च आत्मनोव्यवस्थापनोपायापायादात्मतत्वहानिः ॥ एतेन भेरीदंडाद्याकाशसंयोगाभावाच्छब्दस्यानुत्पत्तेराकाशव्यवस्थापनोपायासत्वादाकाशहानिरुक्ता सर्वत्रावयवसंयोगाभावात्तद्विभागस्याप्यनुपपत्तेस्तन्निमित्तस्यापि शब्दस्याभावात् । एतेन परमाणुसंयोगाभावाद्व्यणुकादिप्रक्रमेणावयविनोऽनुत्पत्तेस्तत्र परापरादिप्रत्ययापायात् इदमतः पूर्वमेतस्मादिप्रत्ययापायाच्च न कालो दिक् च व्यवातिष्ठत इत्युक्तं । तथा समवायासत्वे सकलसमवायिनामभावान्न मनःपरमाणवोऽपि संभाव्यंत इति सकलद्रव्यपदार्थहानेस्तदाश्रयगुणकर्मसामान्यविशेषपदार्थहानिरपीति सकलपदार्थव्याघातात् दुरुत्तरोवैशेषिकमतस्य व्याघातःस्यात् तं परिजिहीर्षता युतसिद्धिः कुतश्चिद्व्यवस्थापनीया ॥ तत्र—

युतप्रत्ययहेतुत्वाद्युतसिद्धिरितीरणे
विभुद्रव्यगुणादीनां युतसिद्धिःसमागता ॥४८॥

यथैव हि कुंडबदरादिषु युतप्रत्ययउत्पद्यते कुंडादिभ्यो बदरादयोयुता इति तथा विभुद्रव्यविशेषु प्रकृतेषु गुणगुणिषु क्रियाक्रियावत्सु सामान्यतद्वत्सु विशेषतद्वत्सु चावयवावयविषु च युतप्रत्ययोभवत्येवेति युतसिद्धिः समागता सर्वत्रायुतप्रत्ययस्याभावात् । देशभेदाभावात्तत्र न युतप्रत्यय इति चेन्न । वाताऽऽतपादिषु युतप्रत्ययानुत्पत्तिप्रसंगात् ॥ तेषां स्वावयवेषु भिन्नेषु देशेषु वृत्तेस्तत्र युतप्रत्यय इति चेत् किमेवं तंतुपटादिषु पटरूपादिषु च युतप्रत्ययः प्रतिषिध्यते स्वाश्रयेषु भिन्नेषु वृत्तेरविशेषात् तथा च न तेषामयुतसिद्धिः । ततो न युतप्रत्ययहेतुत्वेन युतसिद्धिर्व्यवतिष्ठते । तदव्यवस्थानाच्च किंस्यादित्याह ॥

यतो नायुतसिद्धिः स्यादित्यसिद्धं विशेषणं ।
हेतोर्विपक्षतस्तावद्व्यवच्छेदं न साधयेत् ॥४९॥

सिद्धेऽपि समवायस्य समवायिषु दर्शनात् ।
इहेदमिति संवित्तेः साधनं व्यभिचारि तत् ५०॥

तदेवमयुतसिद्धेरसंभवे सत्यामयुतसिद्धाविति विशेषणं तावदसिद्धविपक्षादसमवायात्संयोगादेर्व्यवच्छेदं न साधयेत् संयोगादिना व्यभिचारस्याबाधितेहेदंप्रत्ययस्य हेतोर्दुःपरिहारत्वात् केवलमभ्युपगम्यायुतसिद्धत्वं विशेषणं हेतोरनैकांतिकत्वमुच्यते । सिद्धेऽपि विशेषणे साधनस्येहसमवायिषु समवायइत्ययुतसिद्धबाधितेहेदंप्रत्येन साधनमेतत् व्यभिचारि कथ्यते । नह्ययमयुतसिद्धबाधितेहेदं प्रत्ययः समवायहेतुक इति । नन्वबाधितत्वविशेषणमसिद्धमिति परमतमाशंक्याह ॥

समवायांन्तराद्वृत्तौ समवायस्य तत्वतः ।
समवायिषु तस्यापि परस्मादित्यनिष्ठितिः ५१॥
तद्बाधाऽस्तीत्यबाधत्वं नाम नेह विशेषणं ।
हेतोःसिद्धमनेकांतो यतोऽनेनेति ये विदुः ॥५२॥
तेषामिहेति विज्ञानाद्विशेषणविशेष्यता ।
समवायस्य तद्वत्सु तत एव न सिध्यति ॥५३॥
विशेषणविशेष्यत्वसंबंधोऽप्यन्यतो यदि ।
स्वसंबंधिषु वर्तेत तदा बाधाऽनवस्थितिः ॥ ५४ ॥

इह समवायिषु समवाय इति समवायसमवायिनोरयुतसिद्धत्वे समवायस्य पृथगाश्रयाभावात्स्वासिद्धे सतीहेदमिति संवित्तेरबाधितत्वविशेषणस्याभावात् न तया साधनं व्यभिचरेत् तत्रानवस्थाया बाधिकायाः सद्भावात् तथाहि समवायिषु समवयस्य वृत्तिः समवायांतराद्यदीष्यते तदा तस्यापि समवायांतरस्य समवायसमवायिषु स्वसंबंधिषु वृत्तिरपरापरसमवायरूपैषितव्या तथाचापरापरसमवायपरिकल्पनायामनिष्ठितिःस्यात् तथैक एव समवायस्तत्वं भावेन व्याख्यातमिति सिद्धांतस्य चानिष्ठितिः सैवेहेदमिति प्रत्ययस्य बाधा ततोनाबाधत्वं नाम विशेषणं हेतोर्येनाऽनेकांतःस्यादिति ये वंदति तेषां विशेषणविशेष्यत्वसंबंधोऽपि समवायिषु समवाय इति प्रत्ययान्न सिध्यदनवस्थायाः सद्भावात् विशेषणविशेष्यभावो हि समवायसमवयिनां परैरिष्टः समवायस्य विशेषणत्वात् समवायिनां विशेष्यत्वात् अन्यथा समवायप्रतिनियमानुपपत्तेः ॥ सच समवायसमवायिभ्योऽर्थांतरमेव न पुनरनर्थांतरं समवायस्यापि समवायिभ्योऽनर्थांतरापत्तेः सचार्थांतरभूतोविशेषणविशेष्यभावः संबंधः स्वसंबंधिषु परस्मादेव विशेषणविशेष्यभावात्प्रतिनियतःस्यात् नान्यथा तथाचापरापरविशेषणविशेष्यभावपरिकल्पनायामनवस्था बाधा तदवस्थैव ततस्तया सबाधादिहेदमिति प्रत्ययाद्विशेषणविशेष्यभावोऽपि न सिध्येदिति कुतःसमवायप्रतिनियमः क्वचिदेव समवयिषु परेषां स्यात् ॥

विशेषणविशेष्यत्वप्रत्यायादवगम्यते ।
विशेषणविशेष्यत्वमित्यप्येतेन दूषितं ॥५५॥

यथेह समवायिषु समवाय इतीहेदंप्रत्ययादनवस्थया बाध्यमानात् समवायवद्विशेषणविशेष्यभावो न सिध्येदिति तथा विशेषणविशेष्यत्वप्रत्ययादप्यनवस्थया बाध्यमानत्वाविशेषात् ततोऽनेनेहेदंप्रत्ययदूषणेन विशेषणविशेष्यत्वप्रत्ययोऽपि दूषित एव. तेनैव च तद्दूषणेन विशेषणविशेष्यत्वं सर्वत्र दूषितमवगम्यतां ॥ अत्रानवस्थापरिहारं परेषामाशंक्य निराचष्टे ॥

तस्यानंत्यात्प्रपतृणामाकाक्षाक्षयतोऽपि वा ।
न दोष इति चेदेवं समवायादिनापि किं ॥ ५६ ॥
गुणादिद्रव्ययोर्भिन्नद्रव्ययोश्च परस्परं ।
विशेषणविशेष्यत्वसंबंधोऽस्तु निरंकुशः ॥ ५७ ॥
संयोगः समवायो वा तद्विशेषोऽस्त्वनेकधा ।
स्वातंत्र्ये समवायस्य सर्वथैक्ये च दोषतः ॥ ५८ ॥

तस्य विशेषणविशेष्यभावस्यानंत्यात्समवायवदेकत्वानभ्युपगमात् नानवस्था दोषो यदि परैः कथ्यते प्रपतृणामाकांक्षाक्षयतोऽपि वा यत्र यस्य पतिपत्तुर्व्यवहारपरिसमाप्तेराकांक्षाक्षयः स्यात् तत्र परविशेषणविशेष्यभावानन्वेषणादनवस्थानुपपत्तेः तदा समवायादिनापि परिकल्पितेन न किंचित्फलमुपलभामहे समवायिनोरपि विशेषणविशेष्यभावस्यैवाभ्युपगमनीयत्वात् संयोगिनोरपि विशेषणविशेष्यभावानतिक्रमात् । गुणद्रव्ययोः क्रियाद्रव्ययोः द्रव्यत्वद्रव्ययोः गुणत्वगुणयोः कर्मत्वकर्मणोः गुणत्वद्रव्ययोः कर्मत्वद्रव्ययोः विशेषद्रव्ययोश्च द्रव्ययोरिव विशेषणविशेष्यत्वस्य साक्षात्परंपरया वा प्रतीयमानस्य बाधकाभावात् । यथैव हि गुणिद्रव्यं क्रियावद्द्रव्यं द्रव्यत्ववद्द्रव्यं विशेषवद्द्रव्यं गुणत्ववान्गुणः कर्मत्ववत्कर्मेत्यत्र साक्षाद्विशेषणविशेष्यभावः प्रतिभासते दंडिकुंडलिवत् तथा परंपरया गुणत्ववत्द्रव्यमित्यत्र गुणस्य द्रव्यविशेषणत्वात् गुणत्वस्य च गुणविशेषणत्वात् विशेषणविशेष्यभावोऽपि तथा कर्मत्ववद्द्रव्यमित्यत्रापि कर्मत्वस्य कर्मविशेषणत्वात् कर्मणो द्रव्यविशेषणत्वात् विशेषणविशेष्यभाव एव निरंकुशोऽस्तु ॥ ननु च दंडपुरुषादीनामवयवावयव्यादीनां च संयोगः समवायश्च विशेषणविशेष्यभावहेतुः संप्रतीयते तस्य तद्भाव एवभावादिति न मंतव्यं । तदभावेऽपि विशेषणविशेष्यभावस्य सद्भावात् धर्मधर्मिवत् भावाभाववद्वा । नहि धर्मधर्मिणोः संयोगः तस्य द्रव्यनिष्ठत्वात् । नापि समवायः परैरिष्यते । समवायतदस्तित्वयोः समवायांतरप्रसंगात् ॥ तथा न भावाभावयोः संयोगः समवायो वा परैरिष्टः सिद्धांतविरोधात् तयो र्विशेषणविशेष्यभावस्तु तैरिष्टो दुष्टश्चेति न संयोगसमवायाभ्यां विशेषणविशेष्यभावो व्याप्तः, तेन तयो र्व्याप्तत्वसिद्धेः न हि विशेषणविशेष्यभावस्य भावे कयाश्चित्संयोगः समवायो वा व्यवतिष्ठते ॥ क्वचिद्विशेषणविशेष्यभावाविवक्षायां तु संयोगसमवायव्यवहारो न विशेषणविशेष्यभावस्या व्यापकत्वं व्यवस्थापयितुमलं । सतोऽप्यनर्थित्वादविवक्षानुपपत्तेर्व्यापकत्वप्रसिद्धेः । ततःसंयोगः समवायोवा अन्योवाऽविनाभावादिः संबंधस्तस्यैव विशेषणविशेष्यभावस्य विशेषोस्तु ॥ ननु च समवायस्य स्वतंत्रत्वादेकत्वाच्च कथमसौ तद्विशेषः स्थाप्यत इतिचेन्न समवायस्य स्वतंत्रत्वे सर्वथैकत्वे च दोष सद्भावात् ॥ तथाहि--

स्वतंत्रस्य कथं तावदाश्रितत्वं स्वयं मतं ।
तस्याश्रितत्वे वचने स्वातंत्र्यं प्रतिहन्यते ॥ ५९ ॥
समवायिषु सत्स्वेव समवायस्य वेदनात् ।
आश्रितत्वे दिगादीनां मूर्तद्रव्याश्रितिर्न किं ॥ ६० ॥
कथं चानाश्रितः सिध्येत्संबंधः सर्वथा क्वचित् ।
स्वसंबंधिषु येनातः संभवेन्नियतस्थितिः ॥६१॥

एक एव च सर्वत्र समवायो यदीष्यते ।
तदा महेश्वरे ज्ञानं समवैति न खे कथं ॥६२॥
इहेति प्रत्ययोऽप्येष शंकरे न तु खादिषु ।
इति भेदःकथंसिध्येन्नियामकमपश्यतः ॥६३॥
न चाचेतनता तत्र संभाव्येत नियामिका ।
शैभावपि तदास्थानात् खादेस्तदविशेषतः ॥६४॥
नेशो ज्ञाता न चाज्ञाता स्वयं ज्ञानस्य केवलं ।
समवायात्सदा ज्ञाता यद्यात्मैव स किं स्वतः ॥६५॥
नायमात्मा न चानात्मा स्वात्मत्वसमवायतः ।
सदात्मैवेतिचेदेवं द्रव्यमेव स्वतोऽसिधत् ॥६६॥
नेशो द्रव्यं न चाद्रव्यं द्रव्यत्वसमवायतः ।
सर्वदा द्रव्यमेवेति यदि सन्नेव स स्वतः ॥६७॥
न स्वतः सन्नसन्नापि सत्वेन समवायतः ।
सन्नेव शश्वदित्युक्तौ व्याघातः केन वार्यते ॥६८॥
स्वरूपेणासतः सत्वसमवाये च खांबुजे ।
स स्यात् किं न विशेषस्याभावात्तस्य ततोऽजसा ॥६९॥
स्वरूपेण सतःसत्वसमवायेपि सर्वदा ।
सामान्यादौ भवेत्सत्वसमवायोऽविशेषतः ॥७०॥
स्वतः सतो यथा सत्त्वसमवायस्तथास्तु सः ।
द्रव्यत्वात्मत्वबोद्धृत्वसमवायोऽपि तत्त्वतः ॥ ७१ ॥
द्रव्यस्यैवात्मनो बोद्धुःस्वयं सिद्धस्य सर्वदा ।
नहि स्वतो तथाभूतस्तथात्वसमवायभाक् ॥ ७२ ॥
स्वयं ज्ञत्वे च सिद्धेऽस्य महेशस्य निरर्थकं ।
ज्ञानस्य समवायेन ज्ञत्वस्य परिकल्पनं ॥ ७३ ॥
तत्स्वार्थव्यवसायात्मज्ञानतादात्म्यमृच्छतः ।
कथं चिदीश्वरस्याऽस्ति जिनेशत्वमसंशयं ॥ ७४ ॥
स एव मोक्षमार्गस्य प्रणेता व्यवतिष्ठते ।
सदेहःसर्वविन्नष्टमोहो धर्मविशेषभाक् ॥ ७५ ॥

ज्ञानादन्यस्तु निर्देहः सदेहो वा न युज्यते ।
शिवःकर्तोपदेशस्य सोऽभेत्ता कर्मभूभृतां ॥ ७६ ॥

स्वतंत्रत्वे हि समवायस्य षण्णामाश्रितत्वम् "अन्यत्र नित्यद्रव्येभ्य" इति कथमाश्रितत्वं स्वयं वैशेषिकैरिष्टमिति तंत्रविरोधो दोषः । तस्याश्रितत्वप्रतिपादने स्वतंत्रत्वविरोधात् । पराश्रितत्वं हि पारतंत्र्यं तेन स्वातंत्र्यं कथं न प्रतिहन्यते । स्यान्मतं न परमार्थतः समवायस्याश्रितत्वं धर्मः कथ्यते यतस्तंत्रविरोधःस्यात् किंतूपचारात् निमित्तंतूपचारस्य समवायिषु सत्सु समवायज्ञानं समवायिशून्ये देशे समवायज्ञानासंभवात् परमार्थतस्तस्याश्रितत्वे स्वाश्रयनाशात् विनाशप्रसंगात् गुणादिवदिति । तदसत् । दिगादीनामप्येवमाश्रितत्वप्रसंगात् । मूर्तद्रव्येषु सत्सूपलब्धिलक्षणप्राप्तेषु दिग्लिंगस्येदमतः पूर्वेणेत्यादिप्रत्ययस्य कालालिंगस्य च परत्वापरत्वादिप्रत्ययस्य सद्भावात् मूर्तद्रव्याश्रितत्वोपचारप्रसंगात् । तथाचान्यत्र नित्यद्रव्येभ्य इति व्याघातः नित्यद्रव्यस्यापि दिगादेरुपचारादाश्रितत्वसिद्धेः । सामान्यस्यापि परमार्थतोऽनाश्रितत्वमनुषज्यते स्वाश्रयविनाशेऽपि विनाशाभावात् समवायवत्तदिदं स्वाभ्युपगमविरुद्धं वैशेषिकाणां, उपचारतोऽपि समवायस्याश्रितत्वं स्वातंत्र्यं वा । किंच समवायो न संबंधः सर्वथाऽनाश्रितत्वात् यो यः सर्वथाऽनाश्रितः स स न संबंधो यथा दिगादिः, सर्वथाऽनाश्रितश्च समवायः तस्मान्न संबंध इति इहेदं प्रत्ययलिंगो यः स समवायो न स्यात् अयुतसिद्धानामाधार्याधारभूतानामपि संबंधांतरेणाश्रितेन भवितव्यं संयोगादेरसंभवात् । समवायस्याप्यनाश्रितस्य संबंधत्वविरोधात् । स्यादाकूतं । समवायस्य धर्मिणोऽप्रतिपत्तौ हेतोराश्रयासिद्धत्वं । प्रतिपत्तौ धर्मिग्राहकप्रमाणबाधितःपक्षो हेतुश्च कालात्ययापदिष्टः प्रसज्येत । समवायो हि यतः प्रमाणात्प्रतिपन्नस्ततएवायुतसिद्धसंबंधत्वं प्रतिपन्नमयुतसिद्धानामेव संबंधस्य समवायव्यपदेशसिद्धेरिति । तदपि न साधीयः । समवायिग्राहिणा प्रमाणेनाश्रितस्यैव समवायस्याविष्वग्भावलक्षणस्य प्रतिपत्तेस्तस्यानाश्रितत्वाभ्युपगमे चासंबंधत्वस्य प्रसंगेन साधनात् । साध्यसाधनयोर्व्याप्यव्यापकभावसिद्धौ परस्य व्याप्याभ्युपगमे तन्नांतरीयकस्य व्यापकाभ्युपगमस्य प्रतिपादनात् । नह्यनाश्रितत्वमसंबंधत्वेन व्याप्तं दिगादिष्वसिद्धं । नाप्यनैकांतिकमनाश्रितस्य कस्यचित्संबंधत्वाप्रसिद्धेः विपक्षे वृत्त्यभावात् तत एव न विरुद्धं । नापि सत्प्रतिपक्षं तस्यानाश्रितस्यापि संबंधत्वव्यवस्थापकानुमानाभावादिति न परेषां समवायः संबंधोऽस्ति यतः प्रतिनियमः कस्यचित्कचित्समवायिनि व्यवस्थाप्यते । भवतु वा समवायः । किमेकोऽनेको वा । यदि सर्वत्रैकएव समवायोऽभ्युपगम्यते तदा महेश्वरे ज्ञानं समवैति न पुनरेवं दिगादौ वेति कथमवबुध्यते । इहेति प्रत्ययादिति चेन्न तस्येह शंकरे ज्ञानमिति प्रत्ययस्यैकसमवायहेतुकस्य खादिव्यवच्छेदेन शंकर एव ज्ञानसमवायसाधनासमर्थत्वात् । नियामकादर्शनाद्वेदस्य व्यवस्थापयितुमशक्तेः । ननु च विशेषणभेद एव नियामकः सत्तावत् सत्ता हि द्रव्यादिविशेषणभेदादेकापि भिद्यमाना दृष्टा प्रतिनियतद्रव्यादिसत्वव्यवस्थापिका द्रव्यंसत् गुणःसन् कर्म सदिति, द्रव्यादिविशेषणविशिष्टस्य सत्प्रत्ययस्य द्रव्यादिविशिष्टसत्ताव्यवस्थापकत्वात् तद्वत्समवायिविशेषणविशिष्टेहेदंप्रत्ययाद्विशिष्टसमवायिविशेषणस्य समवायस्य व्यवस्थितेः । समवायो हि यदुपलक्षितो विशिष्टप्रत्ययात्सिध्यते तत्प्रतिनियमहेतुरेवाभिधीयते यथेह तंतुषु पट इति तंतुपटविशिष्टेहेदं प्रत्ययात्तंतुष्वेव पटस्य समवायो नियम्यते न वीरणादिषु नचायं विशिष्टेहेदंप्रत्ययः सर्वस्य प्रतिपत्तुः प्रतिनियतविषयः समनुभूयमानः पर्यनुयोगार्हः किमितिभवन् तत्रैव प्रतिनियतोऽनुभूयते न पुनरन्यत्रेति । तथा तस्य पर्यनुयोग कस्यचित्स्वेष्टतत्त्वव्यवस्थानुपपत्तेः । तद्व्यवस्थापकप्रत्ययस्यापि पर्यनुयोग्यत्वानिवृत्तेः । सुदूरमपि गत्वा यदि कस्यचित्प्रत्ययविशेषस्यानुभूयमानस्य पर्यनुयोगाविषयत्वात् । ततस्तत्वव्यवस्थितिरभ्युपगम्यते तदेहशंकरे ज्ञानमिति विशिष्टेहेदंप्रत्ययात्प्रमाणोपपन्नात्तत्रैव ज्ञान समवायो व्यवतिष्ठते न खादिषु । विशेषणभेदात्समवायस्य भेदप्रसिद्धेरिति केचिद्व्युत्पन्नवैशेषिकाः

समनुमन्यंतोऽपि न यथार्थवादिनः । समवायस्य सर्वथैकत्वे नानासमवायिविशेषणत्वायोगात् सत्ताद्दष्टांतस्यापि साध्यत्वात् नहि सर्वथैका सत्ता कुतश्चित्प्रमाणात्सिद्धा । ननु सत्प्रत्ययाविशेषाद्विशेषलिंगाभावादेका सत्ता प्रसिद्धेवेति चेन्न । सर्वथा सत्प्रत्ययाविशेषस्यासिद्धत्वाद्विशिष्टलिंगाभावस्य च कथंचित्सत्प्रत्ययाविशेषस्तु कथंचिदेवैकत्वं सत्तायाः साधयेत् यथैव हि सत्सामान्यादेशात् सत्सदिति प्रत्ययस्याविशेषस्तथा सद्विशेषादेशात् सत्प्रत्ययविशषोऽपि घटः सन् पटः सन्नित्यादिः समनुभूयते । घटादिपदार्थ एव तत्र विशिष्टो न सत्तेति चेन्न । एवं घटादीनामपि सर्वथैकत्वप्रसंगात् । शक्यो हि वक्तुं घटप्रत्ययाविशेषादेकोघटः तद्धर्मा एव विशिष्टप्रत्ययहेतवो विशिष्टा इति । घटस्यैकत्वे क्वचिद्घटस्य विनाशे प्रादुर्भावे वा सर्वत्र विनाशः प्रादुर्भावो वा स्यात् । तथा च परस्परव्याघातः सकृद्घटविनाशप्रादुर्भावयोः प्रसज्यते इति चेन्न । सत्तायाः अपि सर्वथैकत्वे कस्यचित्प्रागसतः सत्तायाः संबंधे सर्वस्य सकृत्सत्तासंबंधप्रसंगात् । तदसंबंधे वा सर्वस्यासंबंध इति परस्परव्याघातः सत्तासंबंधासंबंधयोः सकृत्तदुःपरिहारःस्यात् । प्रागसतः कस्यचिदुत्पादककारणसन्निधानादुत्पद्यमानस्य संबंधः परस्य तदभावात् संबंधाभाव इति प्रागुक्तदोषाऽप्रसंगे घटस्यापि क्वचिदुत्पादककारणभावादुत्पादस्य धर्मस्य सद्भावे घटेन संबंधः कचित्तु विनाशहेतूपादानाद्विनाशस्य भावो घटस्य तेनासंबंध इति कुतः परोक्तदोषप्रसंगः । सर्वथैकत्वेऽपि घटस्य तद्धर्माणामुत्पादादीनां स्वकारणनियमादेशकालाकारनियमोपपत्तेः । नह्युत्पादादयो धर्मा घटादनर्थांतरभूता एव सत्ताधर्माणामपि तदनर्थांतरत्वप्रसंगात् । तेषां ततोऽर्थांतरत्वे घटादुत्पादादीनामर्थांतरत्वं प्रतिपत्तव्यं । तथाच त एव विशिष्टा न घट इति कथं न घटैकत्वमापद्यते । ननु घटस्य नित्यत्वे कथमुत्पादादयो धर्मा नित्यस्यानुत्पादाविनाशधर्मकत्वादितिचेत् तर्हि सत्ताया नित्यत्वे कथमुत्पद्यमानैरर्थैः संबंधः प्रभज्यमानैश्चेति चिंत्यतां । स्वकारणवशादुत्पद्यमाना भज्यमानाश्चार्थाः शश्वदवस्थितया सत्तया संबंध्यंते । न पुनः शश्वदवस्थितेन घटेन स्वकारणसामर्थ्यादुत्पादादयो धर्माः संबंध्यंत इति स्वदर्शनपक्षपातमात्रं । घटस्य सर्वगतत्वे पदार्थांतराणामभावापत्तेरुत्पादादिधर्मकारणानामप्यसंभवात् कथमुत्पादादयो धर्माः स्युरितिचेत् सत्तायाः सर्वगतत्वेऽपि प्रागभावादीनां क्वचिदनुपपत्तेः कथमुत्पाद्यमानैः प्रभज्यमानैश्चार्थैः संबंधः सिध्येत् । प्रागभावाभावे हि कथं प्रागसतः प्रादुर्भवतः सत्तया संबंधः प्रध्वंसाभावाभावे हि कथं विनश्यतः पश्चादसतः सत्तायाः संबंधाभाव इति सर्वं दुरवबोधं । स्यान्मतं सत्तायाः स्वाश्रयवृत्तित्वात्स्वाश्रयापेक्षया सर्वगतत्वं न सकलपदार्थापेक्षया सामान्यादिषु प्रागभावादिषु च तद्वृत्यभावात् तत्राबाधितस्य सत्प्रत्ययस्याभावाद्द्रव्यादिष्वेव तदनुभवादिति । तदपि स्वगृहमान्यं । घटस्याप्येवमबाधित घटप्रत्ययोत्पत्तिहेतुष्वेव स्वाश्रयेषु भावात् न सर्वपदार्थव्यापित्वं पदार्थांतरेषु घटप्रत्ययोत्पत्त्यहेतुषु तदभावादिति वक्तुं शक्यत्वात् । नन्वेको घटः कथमंतरालवर्तिपटाद्यर्थान् परिहृत्य नानाप्रदेशेषु दविष्टेषु भिन्नेषु वर्तते युगपदिति चेत् कथमेका सत्ता सामान्यविशेषसमवायान् प्रागभावादींश्च परिहृत्य द्रव्यादिपदार्थान् सकलान् सकृद्व्याप्नोतीति समानः पर्यनुयोगः तस्याः स्वयममूर्तत्वात्केनाचित्प्रतिघाताभावाददोष इति चेत् तर्हि घटस्याप्यनभिव्यक्तिमूर्तेः केनचित्प्रतिबंधाभावात्सर्वगतत्वे को दोषः सर्वत्र घटप्रत्ययप्रसंग इति चेत् सत्तायाः सर्वगतत्वे सर्वत्र सत्प्रत्ययः किं न स्यात् । प्रागभावादिषु तस्यास्तु तिरोधानान्न सत्प्रत्ययहेतुत्वमिति चेत् घटस्यापि पदार्थांतरेषु तत्तिरोधानाद्घटप्रत्ययहेतुत्वं माभूत् । न चैवं सर्वं सर्वत्र विद्यते इति वदतः सांख्यस्य किंचिद्विरुद्धं बाधकाभावात् तिरोधानाविर्भावाभ्यां स्वप्रत्ययाविधानस्य क्वचित्स्वप्रत्ययविधानस्याविरोधात् । किंच घटादिसामान्यस्य घटादिव्यक्तिष्वभिव्यक्तस्य तदंतराले चानभिव्यक्तस्य घटप्रत्ययहेतुत्वाहेतुत्वे स्वयमुररीकुर्वाणः कथं न घटस्य स्वव्यंजकदेशेऽभिव्यक्तस्यान्यत्र चानभिव्यक्तस्य घटप्रत्ययहेतुत्वाहेतुत्वे नाभ्युपगच्छतीति स्वेच्छाकारी । स्यान्मतं नानाघटः सकृद्भिन्नदेशतयोपलभ्यमानत्वात् पटकटमुकुटादिपदार्थांतरवदिति तर्हि नानासत्ता युगपद्बाधकाभावे सति भिन्नदेशद्रव्यादिषूपलभ्यमानत्वात् तद्वदिति दर्शनांतरमायातं न्यायस्य

समानत्वात् । नहि विभिन्नदेशेषु घटपटादिषु युगपत्सत्त्वोपलंभोऽसिद्धः संतोऽमी घटादय इति प्रतीतेरबाधितत्वात् । व्योम्नानैकांतिकोऽयं हेतुरितिचेन्न । तस्य प्रत्यक्षतोभिन्नदेशतयाऽतींद्रियस्य युगपदुपलंभाभावात् । परेषां युगपद्भिन्नदेशाकाशलिंगशब्दोपलंभासंभवाच्च नानुमानतोऽपि भिन्नदेशतया युगपदुपलंभोऽस्ति यतस्तेनानैकांतिकत्वं हेतोरभिधीयते । नानादेशाकाशलिंगशब्दानां नानादेशस्थपुरुषैः श्रवणादाकाशस्यानुमानात् युगपद्भिन्नदेशतयोपलंभस्य प्रसिद्धावपि न तेन व्यभिचारः साधनस्य तस्य प्रदेशभेदान्नानात्वसिद्धेः । निःप्रदेशस्य युगपद्भिन्नदेशकालसकलमूर्तिमद्द्रव्यसंयोगानामनुपपत्तेरेकपरमाणुवन्नचेयं सत्ता स्वतंत्रः पदार्थः सिद्धः पदार्थधर्मत्वेन प्रतीयमानत्वादसत्त्ववत् । यथैव हि घटस्यासत्त्वं पटस्यासत्त्वमिति पदार्थधर्मतया प्रतीयमानत्वान्नासत्त्वं स्वतंत्रः पदार्थः तथा घटस्य सत्त्वं पटस्य सत्त्वमिति पदार्थधर्मत्वेनोपलभ्यमानत्वात्सत्त्वमपि सर्वथाविशेषाभावात्सर्वत्र घटःसन् पटःसन् इति प्रत्ययस्याविशेषादेकं सत्त्वं पदार्थधर्मत्वेऽपीतिचेत् तर्हि सर्वत्रासदिति प्रत्ययस्याविशेषाद्भावपरतंत्रत्वेऽप्येकमसत्त्वमभ्युपगम्यतां प्रागसत्पश्चादसदितरत्रेतरदसदत्यंतमसदिति प्रत्ययविशेषात् प्रागसत्त्वपश्चादसत्त्वेतरेतरासत्त्वात्यंतासत्त्वभेदसिद्धेर्नैकमसत्त्वमिति चेत् । नन्वेवं विनाशात्पूर्वं सत्त्वं प्राक्सत्त्वं स्वरूपलाभादुत्तरं सत्त्वं पश्चात्सत्त्वं समानजातीययोः केनचिद्रूपेणेतरेतरत्र सत्त्वमितरेतरसत्त्वं कालत्रयेऽप्यनाद्यनंतस्य सत्त्वमत्यंतसत्त्वमिति सत्त्वभेदः किं नानुमन्यते सत्प्रत्ययस्यापि प्राक्कालादितया विशेषसिद्धेर्बाधकाभावात् यथाचासत्त्वस्य सर्वथैकत्वे क्वचित्कार्योत्पत्तौ प्रागभावविनाशे सर्वत्राभावविनाशप्रसंगात् । न किंचित्प्रागसदिति सर्वकार्यमनादि स्यात् । न किंचित्पश्चादसदिति तदनंतं स्यात् न क्वचित्किंचिदसदिति सर्वं सर्वात्मकं स्यान्न क्वचिदत्यंतमसदिति सर्वं सर्वत्र सर्वदा प्रसज्येतेति बाधकमपि तथा सत्त्वैकत्वे समानमुपलभामहे कस्यचित्प्रध्वंसे सत्त्वाभावे सर्वत्र सत्त्वाभावप्रसंगात् न किंचित्कुतश्चित्प्राक् सत् पश्चात्सद्वा नापीतरत्रेतरत्सत् स्यात् अत्यंतसद्वेति सर्वशून्यतापत्तिर्दुःशक्यापरिहर्तुं । तां परिजिहीर्षता सत्त्वस्य भेदोऽभ्युपगंतव्य इति नैका सत्ता सर्वथासिध्येदसत्तावत्तदनंतपर्यायतोपपत्तेः । स्यान्मतिरेषा ते कस्यचित्कार्यस्य प्रध्वंसऽपि न सत्तायाः प्रध्वंसस्तस्यानित्यत्वात् पदार्थांतरेषु सत्प्रत्ययहेतुत्वात् प्राक्कालादिविशेषणभेदेऽप्यभिन्नत्वात् सर्वथा शून्यतां परिहरतोऽपि सत्तानंतपर्यायतानुपपत्तिरिति सापि न साधीयसी कस्यचित्कार्यस्योत्पादेऽपि प्रागभावस्याभावानुपपत्तिप्रसंगात् तस्य नित्यत्वात् । पदार्थांतराणामुत्पत्तेः पूर्वं प्रागभावस्य स्वप्रत्ययहेतोः सद्भावसिद्धेः समुत्पन्नकार्यविशेषणतया विनाशव्यवहारेऽपि प्रागभावस्याविनाशिनो नानानुत्पन्नकार्यापेक्षया विशेषणभेदेऽपि भेदासंभवादेकत्वाविरोधात् । नह्युत्पत्तेः पूर्वं घटस्य प्रागभावः पटस्य प्रागभाव इत्यादि विशेषणभेदेऽप्यभावोभिद्यते घटस्य सत्ता पटस्य सत्तेत्यादिविशेषणभेदेऽपि सत्तावत् । ननु प्रागभावस्य नित्यत्वे कार्योत्पत्तिर्नस्यात्तस्य तत्प्रतिबंधकत्वात्तदप्रतिबंधकत्वे प्रागपि कार्योत्पत्तेः कार्यस्यानादित्वप्रसंग इतिचेत् तर्हि सत्ताया नित्यत्वे कार्यस्य प्रध्वंसो न स्यात् तस्यास्तत्प्रतिबंधकत्वात् तदप्रतिबंधकत्वे प्रध्वंसात् प्रागपि प्रध्वंसप्रसंगात् । कार्यस्य स्थितिरेव न स्यात् कार्यसत्ता हि प्रध्वंसात् प्राक् प्रध्वंसस्य प्रतिघातिकेति कार्यस्य स्थितिः सिध्येन्नान्यथा । यदि पुनर्बलवत्प्रध्वंसकारणसन्निपाते कार्यस्य सत्ता न प्रध्वंसं प्रतिबध्नाति ततः पूर्वं तु बलवद्विनाशकारणाभावात् प्रध्वंसं प्रतिबध्नात्येव ततो न प्रागपि प्रध्वंसप्रसंग इति मतं तदा बलवदुत्पादककारणोपधानात् कार्यस्योत्पादं प्रागभावः सन्नपि न विरुणद्धि कार्योत्पादनात्पूर्वं तदुत्पादकारणाभावात् तं विरुणद्धि ततो न प्रागपि कार्योत्पत्तिर्येन कार्यस्यानादित्वप्रसंग इति प्रागभावस्य सर्वदा सद्भावो मन्यतां सत्तावत् । तथाचैक एव सर्वत्र प्रागभावोव्यतिष्ठते । प्रध्वंसाभावश्च न प्रागभावादर्थांतरभूतः स्यात् कार्यविनाशविशिष्टस्य तस्यैव प्रध्वंसाभाव इत्यभिधानात् तस्यैवेतरेतरव्यावृत्तिविशिष्टस्येतरेतराभावाभिधानवत् ॥ ननु च कार्यस्य विनाश एव प्रध्वंसाभावो न पुनस्ततोऽन्यः । येन विनाशविशिष्टः प्रध्वंसाभाव इत्यभिधीयते । नापीतरेतरव्यावृत्तिरितरेतराभावादन्यायेन तथा विशिष्टस्येतरेतरएभावाभिधानमिति चेत् तर्हीदानीं कार्य-

स्योत्पादएव प्रागभावाभावस्ततोऽर्थांतरस्यासंभवात् कथं तेन कार्यस्यप्रतिबंधः सिध्येत् कार्योत्पादात्प्रागभावाभावस्यार्थांतरत्वे प्रागेव कार्योत्पादःस्यात् शश्वदभावाभावे शश्वत्सद्भाववत् । नह्यन्यदैवाभावस्याभावोऽन्यदैव भावस्य सद्भाव इति अभावाभावसद्भावयोः कालभेदो युक्तः सर्वत्राभावाभावस्यैव भावसद्भावप्रसिद्धेः भावाभावस्याभावप्रसिद्धिवत् तथा च कार्यसद्भाव एव तदभावाभावः कार्याभाव एव च तद्भावस्याभाव इत्यभावविनाशवद्भावविनाशप्रसिद्धेः न भावाभावौ परस्परमतिशयाते यतस्तयोरन्यतरस्यैवैकत्वनित्यत्वे नानात्वानित्यत्वे वा व्यवतिष्ठते ॥ तदनेनासत्त्वस्य नानात्वमनित्यत्वं च प्रतिजानता सत्त्वस्यापि तत्प्रतिज्ञातव्यमिति कथंचित्सत्तैका सदिति प्रत्ययाविशेषात् । कथंचिदनेकाँ प्राक्सदित्यादि सत्प्रत्ययभेदात् । कथंचिन्नित्या सैवयंसत्तेतिप्रत्यभिज्ञानात् कथंचिदनित्या कालभेदात् पूर्वसत्ता पश्चात्सत्तेति सत्प्रत्ययभेदात् सकलबाधकाभावादनुमंतव्या तत्प्रतिपक्षभूताऽसत्तावत् । ततः समवायिविशेषणविशिष्टेहेदं प्रत्ययहेतुत्वात् समवायः समवायेविशेषप्रतिनियमहेतुर्द्रव्यादिविशेषणविशिष्टसत्प्रत्ययहेतुत्वाद्द्रव्यादिविशेषप्रतिनियमहेतुः सत्तावदितिविषमउपन्यासः सत्ताया नानात्वसाधनात् तद्वत्समवायस्य नानात्वसिद्धेः सोऽपि हि कथंचिदेक एव इहेदंप्रप्रत्ययाविशेषात् । कथंचिदनेक एव नानासमवायिविशिष्टेहेदंप्रत्ययभेदात् । कथंचिन्नित्य एव प्रत्यभिज्ञायमानत्वात् । कथंचिदनित्य एव कालभेदेन प्रतीयमानत्वात् । नचैकत्राधिकरणे परस्परमेकत्वानेकत्वे नित्यत्वानित्यत्वे वा विरुद्धे सकलबाधकरहितत्वे सत्युपलभ्यमानत्वात् कथंचित्सत्वासत्ववत् । यदप्यभ्यधायि सत्त्वासत्त्वे नैकत्र वस्तुनि सकृत्संभवतस्तयोः विधिप्रतिषेधरूपत्वात् । ययोर्विधिप्रतिषेधरूपत्वं ते नैकत्र वस्तुनि सकृत्संभवतो यथा शीतत्वाशीतत्वे । विधिप्रतिषेधरूपे च सत्त्वासत्त्वे तस्मान्नैकत्र वस्तुनि सकृत्संभवत इति । तदप्यनुपपन्नं वस्तुन्येकत्राभिधेयत्वानभिधेयत्वाभ्यां सकृत्संभवस्याव्यभिचारात् कस्याचित्स्वाभिधायकाभिधानापेक्षया अभिधेयत्वमन्याभिधायकाभिधानापेक्षया चानभिधेयत्वं सकृदुपलभ्यमानमबाधितमेकत्राभिधेयत्वानाभिधेयत्वयोः सकृत्संभवं साधयतीत्यभ्यनुज्ञाने स्वरूपाद्यपेक्षया सत्त्वं पररूपाद्यपेक्षया चासत्वं निर्बाधमनुभूयमानमेकत्र वस्तुनि सत्वासत्वयोः सकृत्संभवं किं न साधयेत् विधिप्रतिषेधरूपत्वाविशेषात् । कथंचिदुपलभ्यमानयोर्विरोधानवकाशात् येनैव स्वरूपेण सत्वं तेनैवासत्वमिति सर्वथाऽर्पितयोरेव सत्वासत्वयो युगपदेकत्र विरोधसिद्धेः । कथंचित्सत्वासत्वयोरेकत्र वस्तुनि सकृत्प्रसिद्धौ च तद्वदेकत्वानेकत्वयोर्नित्यत्वानित्यत्वयोश्च सकृदेकत्र निर्णयान्न किंचिद्विप्रतिषिद्धं समवायस्यापि तथा प्रतीतेरबाधितत्वात् । सर्वथैकत्वे महेश्वर एव ज्ञानस्य समवायाद्वृत्तिर्न पुनराकाशादिस्थिति प्रतिनियमस्य नियामकमपश्यतो निश्चयासंभवात् । न चाकाशादीनामचेतनता नियामिका चेतनात्मगुणस्य ज्ञानस्य चेतनात्मन्येव महेश्वरे समवायोपपत्तेरचेतनद्रव्यगगनादौ तदयोगात् ज्ञानस्य तद्गुणत्वाभावादिति वक्तुं युक्तं । शंभोरपि स्वतोऽचेतनत्वप्रतिज्ञानात् खादिभ्यस्तस्य विशेषासिद्धेः । स्यादाकूतं नेश्वरः स्वतश्चेतनोऽचेतनो वा चेतनसमवायात्तु चेतयिता खादयस्तु न चेतनासमवायाच्चेतयितारः कदाचिदतोऽस्ति तेभ्यस्तस्य विशेष इति । तदप्यसत् । स्वतोमहेश्वरस्य स्वरूपानवधारणान्निःस्वरूपतापत्तेः । स्वयं तस्यात्मरूपत्वान्न स्वरूपहानिरितिचेन्न । आत्मनाऽप्यात्मत्वयोगादात्मत्वेन व्यवहारोपगमात् स्वतोऽनात्मत्वादात्मरूपस्याप्यसिद्धेः । यदि पुनः स्वयं नात्मामहेशो नाप्यनात्मा केवलमात्मत्वयोदात्मेति मतं । तदा स्वतः किमसौस्यात् ? द्रव्यमिति चेन्न । द्रव्यत्वयोगाद्द्रव्यव्यवहारवचनात् । सतो द्रव्यस्वरूपेणापि महेश्वरस्याव्यवस्थितेः । यदि तु न स्वतोऽसौ द्रव्यं नाप्यद्रव्यं द्रव्यत्वयोगाद्द्रव्यमिति प्रतिपाद्यते । तदा न स्वयं द्रव्यं स्वरूपस्याप्यभावात् किंस्वरूपः शंभुर्भवेदिति वक्तव्यं । सन्नेव स्वयमसाविति चेन्न । सत्वयोगात्सन्निति व्यवहारसाधनात् स्वतः सद्रूपस्याप्रसिद्धेः । अथ न स्वतः सन्नचासन् सत्वसमवायात्तु सन्नित्यभिधीयते तदा व्याघातो दुरुत्तरः स्यात् सत्वासत्वयोरन्योन्यव्यवच्छेदरूपयोरेकतरस्य प्रतिषेधेऽन्यतरस्य विधानप्रसंगात् उभयप्रतिषेधस्यासंभवात् । कथमेवं सर्वथा सत्वासत्वयाः स्याद्वादिभिः प्रतिषेधे तेषां व्यघातो न भवेदितिचेन्न

तैः कथंचित्सत्त्वासत्त्वयोर्विधानात् । सर्वथा सत्त्वासत्त्वे हि कथंचित्सत्त्वासत्त्वव्यवच्छेदेनाभ्युपगम्येते सर्वथा सत्त्वस्य कथंचित्सत्त्वस्य व्यवच्छेदेन व्यवस्थानात् । असत्त्वस्य च कथंचिदसत्त्वव्यवच्छेदेनेति सर्वथा सत्त्वस्य प्रतिषेधे कथंचित्सत्त्वस्य विधानात्। सर्वथा चासत्त्वस्य निषेधे कथंचित्सत्त्वस्य विधिरिति कथं सर्वथा सत्त्वासत्त्वप्रतिषेधे स्याद्वादिनां व्याघातो दुरुत्तरः स्यात् सर्वथैकांतवादिनामेव तस्य दुरुत्तरत्वात् ॥ एतेन द्रव्यत्वाद्रव्यत्वयोरात्मत्वानात्वयोश्चेतनत्वाचेतनत्वयोश्च परस्परव्यवच्छेदरूपयोर्युगपत्प्रतिषेधे व्याघातो दुरुत्तरः प्रतिपादितः । तदेकतरप्रतिषेधेऽन्यतरस्य विधेरवश्यंभावात् उभयप्रतिषेधस्यासंभवात् । कथंचित्सत्त्वासत्त्वयोर्वैशेषिकैरनभ्युपगमात् किं च स्वरूपेणासति महेश्वर सत्त्वसमवाये प्रतीज्ञायमाने खांबुजे सत्त्वसमवायः परमार्थतः किंन्न भवेत् स्वरूपेणासत्त्वाविशेषात् । खांबुजस्याभावान्न तत्र समवायः पारमार्थिक सद्भूर्गे द्रव्यगुणकर्मलक्षणे सत्त्वसमवायसिद्धेः । महेश्वर एवात्मद्रव्यविशेषसत्त्वसमवाय इति च स्वमनोरथमात्रं स्वरूपेणासतः कस्यचित्सद्भूर्गत्वासिद्धेः ॥ स्वरूपेण सति महेश्वरे सत्त्वसमवायोपगमे सामान्यादावपि सत्त्वसमवायप्रसंगः स्वरूपेणसत्त्वाविशेषात् । यथैव हि महेश्वरस्य स्वरूपत सत्त्वं वृद्धवैशेषिकैरिष्यते तदा पृथिव्यादिद्रव्याणां रूपादिगुणानामुत्क्षेपणादिकर्मणां सामान्यविशेषसमवायानां च प्रागभावादीनामपीष्यत एव तथापि क्वचिदेव सत्त्वसमवायसिद्धौ नियमहेतुर्वक्तव्यः सत्सादितिज्ञानमबाधितं नियमहेतुरितिचेन्न । तस्य सामान्यादिष्वपि भावात् । यथैव हि द्रव्यं सत् गुणःसन् कर्म सदिति ज्ञानमबाधितमुत्पद्यते तथा सामान्यमस्ति विशेषोऽस्ति समवायोऽस्ति प्रागभावादयः संतीति ज्ञानमप्यबाधितमेव । सामान्यादिप्रागभावादितत्त्वास्तित्वं । अन्यथा तद्वादिभिः कथमभ्युपगम्यते । तत्रास्तित्वधर्मसद्भावादस्तीति ज्ञानं न पुनः सत्तासंबंधादनवस्थाप्रसंगात् ॥ सामान्यकल्पनात् । विशेषेषु च सामान्योपगमे सामान्यज्ञानात् विशेषानुपलंभादुभयतद्विशेषस्मरणाच्च कस्यचिदवश्यं भाविनि संशये तद्व्यवच्छेदार्थं विशेषांतरकल्पनानुषंगः । पुनस्तत्रापि सामन्यकल्पनेऽवश्यंभावी सशंयः सति तस्मिंस्तद्व्यवच्छेदाय तद्विशेषांतरकल्पनायामनवस्थाप्रसंगात् । परापरविशेषसामान्यकल्पनस्यानिवृत्तेः सुदूरमपि गत्वा विशेषेषु सामान्यानभ्युपगमे सिद्धाः सामान्यरहिता विशेषाः समवाये च समान्यस्यासंभवः प्रसिद्ध एव तस्यकत्वात् संभवे चानवस्थानुषंगात् समवाये सामान्यस्य समवायांतरकल्पनादिति न सामान्यादिषु सदिति ज्ञानं सत्ता निबंधनं बाध्यमानत्वात् । तथा प्रागभावादिष्वपि सत्तासमवाये प्रागभावादित्वविरोधात् न सत्तानिबंधनमस्तीतिज्ञानं । ततोऽस्तित्वधर्मविशेषणसामर्थ्यादेव तत्रास्तीति ज्ञानमभ्युपगंतव्यं । अन्यथाऽस्तीति व्यवहारायोगादिति केचिद्वैशेषिकाः समभ्यमंसत तांश्च परे प्रतिक्षिपंति । सामान्यादिषूपचरितसत्त्वाभ्युपगमात् मुख्यसत्त्वे बाधकसद्भावान्न पारमार्थिकसत्त्वं, सत्तासबंधादि वाऽस्तित्वधर्मविशेषणबलादपि संभाव्यते, सत्ताव्यतिरेकेणास्तित्वधर्मग्राहकप्रमाणाभावात् । अन्यथास्तित्वं धर्मेष्वस्तीति प्रत्ययादस्तित्वांतरपरिकल्पनायामनवस्थानुषंगात् । तत्रोपचरितस्यास्तित्वस्यप्रतिज्ञाने सामान्यादिष्वपि तदुपचरितमस्तु मुख्ये बाधकसद्भावात् सर्वत्रोपचारस्य मुख्यबाधकसद्भावादेवोपपत्तेः । प्रागभावादिष्वपि मुख्यास्तित्वबाधकोपपत्तेरुपचारत एवास्तित्वव्यवहारसिद्धेरिति तेषां द्रव्यादिष्वपि सदितिज्ञानं सत्तानिबंधनं कुतः सिध्येत् तस्यापि बाधकसद्भावात् । तेषां स्वरूपतोऽसत्वे सत्वे वा सत्तासंबंधानुपपत्तेः । स्वरूपेणासत्सु द्रव्यादिषु सत्तासंबंधेतिप्रसंगस्य बाधकस्य प्रतिपादनात् । स्वरूपतः सत्सु सत्तासंबधे अनवस्था तस्य बाधकस्योपनिपात त् सत्ता संबंधनापि सत्सु सत्वं पुनः सत्तासंबन्धपरिकल्पनप्रसंगात् तस्य वैयर्थ्यात् अपरिकल्पने स्वरूपतः सत्त्वपि तत एव सत्तासंबंधपरिकल्पनं माभूत् स्वरूपतःसत्वासाधारणात् सत्सादित्यनुवृत्तिप्रत्ययस्यानुपपत्तेः । द्रव्यादिषु तन्निबंधनस्य साधारणसत्तासंबंधस्य परिकल्पनं न व्यर्थमिति चेन्न । स्वरूपसत्वादेव सदृशात्सदिति प्रत्ययस्योपपत्तेः । सदृशेतरे परिणामसामर्थ्यादेव द्रव्यादीनां साधारणासाधारणसत्वनिबंधनस्य सत्प्रत्ययस्यघटनात् । सवर्थाऽर्थांतरभूत सत्तासंबंधसामर्थ्यात्सदिति प्रत्ययस्य साधरणस्यायोगात् । सत्तावद्द्रव्यं सत्तावान्गुणः सत्तावत्कर्मेति

सत्तासंबंधस्य प्रत्ययस्य प्रसंगात् ॥ न पुनः सद्द्रव्यं सन् गुणः सत्कर्मेति प्रत्ययःस्यात् । नहि घंटा संबंधाद्गवि घंटेति ज्ञानमनुभूयते घंटावान्निति ज्ञानस्य तत्र प्रतीतेः । यष्टिसंबंधात्पुरुषोयष्टिरिति प्रत्यय-दर्शनात्तु सत्तासंबधाद्द्रव्यादिषु सत्तेतिप्रत्ययःस्यात् अभेदे भेदौपचारात् । न पुनः सदिदि प्रत्ययस्तथा-चोपचारात् द्रव्यादीनां सत्ताव्यपदेशो न पुनः परमार्थतः सिध्येत् । स्यान्मतं सत्तासामान्यवाचक-स्यासत्ताशब्दस्येव सच्छब्दस्यापि सद्भावात्संबंधात्संति द्रव्यगुणकर्माणीति व्यपदिश्यते भावस्य भाववदभिधायिनापि शब्देनाभिधानप्रसिद्धेः । विषाणी ककुद्मान् प्रांतेवालधिरिति गोत्वलिंगमित्यादि-वत् विषाण्यादिवाचिना शब्देन विषाणित्वादेर्भावस्याभिधानादिति । तदप्यनुपपन्नं । तथोपचारादेव सत्प्रत्ययप्रसंगात् ॥ पुरुषे यष्टिसंबंधाद्यष्टिरिति प्रत्ययवत् ॥ यदि पुनर्यष्टिपुरुषयोः संयोगात्पुरुषो यष्टिरिति ज्ञानमुपचरितं युक्तं । न पुनर्द्रव्यादौ सदिति ज्ञानं तत्र सत्त्वस्य समवायादिति मतं तदऽवय-वेष्ववयविनः समवायादवयविव्यपदेशःस्यात् न पुनरवयविव्यपदेशः । द्रव्ये च गुणस्य समवाया-द्गुणव्यपदेशोऽस्तु क्रियासमवायात्क्रियाव्यपदेशस्तथा च न कदाचिदवयविष्ववयवप्रत्ययः गुणिनि गुणि-प्रत्ययः क्रियावतिक्रियावत्प्रत्ययश्चोपपद्येतेति महान् व्याघातः पदार्थांतरभूतसत्तासमवायवादिनामनु-षज्येत तदेवं स्वतः सत एवेश्वरस्य स्वसमवायेऽभ्युपगंतव्यः कथंचित्सदात्मतया परिणतस्यैव सत्व-समवायस्योपपत्तेः । अन्यथा प्रमाणेन बाधनात् स्वयं सतः सत्त्वसमवायेऽस्य च प्रमाणप्रसिद्धेः । स्वयं द्रव्यात्मना परिणतस्य द्रव्यत्वसमवायः । स्वयं ज्ञानात्मना परिणतस्य महेश्वरस्य ज्ञानसमवाय इति युक्तमुत्पश्यामः स्वयं नीलात्मनीलसमवायवत् ॥ न हि काश्चिदतथापरिणतस्तथात्वसमवाय भागुपलभ्यतेऽतिप्रसंगात् । ततः प्रमाणबलान्महेश्वरस्य सत्वद्रव्यत्वात्मत्ववत् स्वयं ज्ञत्वप्रसिद्धे र्ज्ञानस्य समवायात् तस्य ज्ञत्वपरिकल्पनं न कंचिदर्थं पुष्णाति । ज्ञव्यवहारं पुष्णातीति चेन्न । ज्ञे प्रसिद्धे ज्ञव्यवहारस्यापि स्वतः प्रसिद्धेः । यस्य हि योऽर्थः प्रसिद्धः स तत्र तव्यवहारंप्रवर्तयन्नुप-लब्धो यथा प्रसिद्धाकाशात्मा । आकाशे तव्यवहारप्रसिद्धे ज्ञश्चः कश्चित्तस्मात् ज्ञे तव्यवहारं प्रवर्त-यति । यदि तु प्रसिद्धेऽपि ज्ञे ज्ञत्वसमवायपरिकल्पनमज्ञव्यवच्छेदार्थमिष्यते तदाप्रसिद्धेऽप्याका-शेऽनाकाशव्यवच्छेदार्थमाकाशत्वसमवायपरिकल्पनमिष्यतां तस्यैकत्वादाकाशत्वासंभवात्स्वरूपनिश्चया-देवाकाशव्यवहारप्रवृत्तौ ज्ञेऽपीश्वरे स्वरूपनिश्चयादेव ज्ञव्यवहारोऽस्तु किं तत्र ज्ञानसमवायपरिक-ल्पनया ज्ञान परिणामपरिणतो हि ज्ञः प्रतिपादयितुं शक्यो नार्थांतरभूतः ज्ञानसमवायेन ततो ज्ञान समवायवानेवेह सिध्येत् न पुनर्ज्ञाता । नह्यर्थांतरभूते ज्ञाने समुत्पन्ने ज्ञाता, स्मरणे स्मर्ता, भोगे च भोक्तेति तत्प्रतीतिकं दर्शनं तदात्मना परिणतस्यैव तथाव्यपदेशप्रसिद्धेः । प्रतीतिबलाद्धि तत्त्वं व्यवस्थापयंतो यद्यथा निर्बाधं प्रतीतियंति तथैव व्यवहरंतीति प्रेक्षापूर्वकारिणः स्युर्नान्यथा । ततो महे-श्वरोऽपि ज्ञाता व्यवहर्तव्यो ज्ञातृस्वरूपेण प्रमाणतः प्रतीयमानत्वात् । यद्येन स्वरूपेण प्रमाणतः प्रती-यमानं तत्तथा व्यवहर्तव्यं यथा सामान्यादिस्वरूपतया ज्ञातृस्वरूपेण प्रमाणतः प्रतीयमानश्च महेश्वर-स्ततोज्ञातेति व्यवहर्तव्य इति । तदर्थमर्थांतरभूतज्ञानसमवायपरिकल्पनमनर्थकमेव तदेवं प्रमाण बलात्स्वार्थव्यवसायात्मके ज्ञाने प्रसिद्धे महेश्वरस्य ततो भेदैकांतनिराकरणे च कथंचित्स्वार्थव्यव-सायात्मकज्ञानादभेदोऽभ्युपगंतव्यः कथंचित्तादात्म्यस्यैव समवायस्य व्यवस्थापनात् । तथाच नाग्नि विवादो नार्थे जिनेश्वरस्यैव महेश्वर इति नामकरणात्कथंचित्स्वार्थव्यवसायात्मज्ञानं तादात्म्यमृच्छतः पुरुषविशेषस्य जिनेश्वरत्वनिश्चयात् । तथा च स एव हि मोक्षमार्गस्य प्रणेता व्यवतिष्ठते सदेहत्वे धर्मविशेषत्वे च सति सर्वविन्नष्टमोहत्वात् यस्तु न मोक्षमार्गस्य मुख्यः प्रणेता स न सदेहो यथा मुक्ता-त्मा धर्मविशेषभाग्वा यथांऽतकृत्केवली । नापि सर्वविन्नष्टमोहो यथा रथ्यापुरुषः । सदेहत्वे धर्मवि-शेषत्वे च सति सर्वविन्नष्टमोहश्च जिनेश्वरस्तस्मान्मोक्षमार्गस्य प्रणेता व्यवतिष्ठत एव स्वार्थव्यवसाया-त्मकज्ञानात् । सर्वथाऽर्थांतरभूतस्तु शिवः सदेहो निर्देहो वा न मोक्षमार्गोपदेशस्य कर्ता युज्यते कर्मभूभृतामभेत्तृत्वात् । यो यः कर्मभूभृतामभेत्ता स स न सर्वविन्नष्टमोहो यथा ऽऽकाशादिरभव्यो-

वा संसारी चात्मा, कर्मभूभृतामभेत्ता च शिवः परैरुपेयते तस्मान्न सर्वविन्नष्टमोह इति साक्षान्मोक्षमार्गोपदेशस्य कर्ता न भवेत् निरस्तं च पूर्वं विस्तरतस्तस्यशश्वत्कर्माभिरस्पृष्टत्वं पुरुषविशेषस्येत्यलं विस्तरेण प्रागुक्तार्थस्यैवात्रोपसंहारात् । यथा चेश्वरस्य मोक्षमार्गोपदेशित्वं न प्रतिष्ठामियर्ति तथा कपिलस्यापीत्यतिदिश्यते ।

एतेनैव प्रतिव्यूढः कपिलोऽप्युपदेशकः ।
ज्ञानादर्थांतरत्वस्याऽविशेषात्सर्वथा स्वतः ॥ ७७ ॥
ज्ञानसंसर्गतो ज्ञत्वमज्ञस्यापि न तत्त्वतः ।
व्योमवच्चेतनस्यापि नोपपद्येत मुक्तवत् ॥ ७८ ॥

कपिल एव मोक्षमार्गस्योपदेशकः क्लेशकर्मविपाकाशयानां भेत्ता रजस्तमसोस्तिरस्करणात् । समस्ततत्त्वज्ञानवैराग्यसंपन्नो धर्मविशेषैश्वर्ययोगी च प्रकृष्टसत्त्वस्याविर्भावात् विशिष्टदेहत्वाच्च । न पुनरीश्वरः, तस्याकाशस्येवाऽशरीरस्य ज्ञानेच्छाक्रियाशक्त्यसंभवात् मुक्तात्मवत् । सदेहस्यापि सदा क्लेशकर्मविपाकाशयैरपरामृष्टत्वविरोधात् । धर्मविशेषसद्भावे च तस्य तत्साधनसमाधिविशेषस्याऽवश्यंभावात् तन्निमित्तस्यापि ध्यानधारणाप्रत्याहारप्राणायामासनयमनियमलक्षणस्य योगांगस्याभ्युपगमनीयत्वात् । अन्यथा समाधिविशेषासिद्धेर्धर्मविशेषानुत्पत्तेर्ज्ञानाद्यतिशयलक्षणैश्वर्याद्योगादनीश्वरत्वप्रसंगात् । सत्त्वप्रकर्षयोगित्वे च कस्यचित्सदामुक्तस्यानुपायसिद्धस्य साधकप्रमाणाभावादिति निरीश्वरसांख्यवादिनः प्रचक्षते । तेषां कपिलोऽपि तीर्थकरत्वेनाभिप्रेतः प्रकृतेनैवेश्वरस्य मोक्षमार्गोपदेशित्वनिराकरणेनैव प्रतिव्यूढः प्रतिपत्तव्यः स्वतस्तस्यापि ज्ञानादर्थांतरत्वाविशेषात्सर्वज्ञत्वायोगात् सर्वार्थज्ञानसंसर्गात्तस्यसर्वज्ञत्वपरिकल्पनमपि न युक्तमाकाशादेरपि सर्वज्ञत्वप्रसंगात् । तथाविध ज्ञानपरिणामाश्रयप्रधानसंसर्गस्याविशेषात् । तदविशेषेऽपि कपिल एव सर्वज्ञश्चेतनत्वान्न पुनराकाशादिरित्यपि न युज्यते । तेषां (कपिलानांमते) मुक्तात्मनश्चेतनत्वेऽपि ज्ञानसंसर्गतः सर्वज्ञत्वानभ्युपगमात् । सबीजसमाधिसंप्रज्ञातयोगकालेऽपि सर्वज्ञत्वविरोधात् । स्यान्मतं, न मुक्तस्य ज्ञानसंसर्गः संभवति तस्य संप्रज्ञातयोगकाले एव विनाशात् । "तदा द्रष्टुः (पुरुषस्य) स्वरूपेऽवस्थानमिति" वचनात् । मुक्तस्य तु संस्कारविशेषस्यापि विनाशात् । असंप्रज्ञातस्यैव संस्कारविशेषतावचनात् । चरितार्थेन ज्ञानादिपरिणामशून्येन प्रधानेन संसर्गमात्रेऽपि तन्मुक्तात्मानं प्रति तस्य नष्टत्वात् । संसार्यात्मानमेव प्रत्यनष्टत्ववचनात् न कपिलस्य चेतनस्य स्वरूपस्य ज्ञानसंसर्गात्सर्वज्ञत्वाभावसाधने मुक्तात्मोदाहरणं तत्र ज्ञानसंसर्गस्यासंभवादिति । तदप्यसारं । प्रधानस्य सर्वगतस्यानंतस्य संसर्गविशेषानुपपत्तेः । कपिलेन सह तस्य संसर्गे सर्वात्मना संसर्गप्रसंगात् । कस्यचिन्मुक्तिविरोधान्मुक्तात्मनो वा प्रधानेनासंसर्गे कपिलस्यापि तेनासंसर्गप्रसक्तेः । अन्यथा विरुद्धधर्माध्यासात्प्रधानभेदोपपत्तेः । ननु च प्रधानमेकं निरवयवं सर्वगतं न केनचिदात्मना संस्पृष्टमपरेणासंस्पृष्टमिति विरुद्धधर्माऽध्यासीष्यते येन तद्भेदोपपत्तेः । किं तर्हि ? सर्वदा सर्वात्मसंसर्गि केवलं मुक्तात्मानं प्रतिनष्टमपीतरात्मानं प्रत्यनष्टं निवृत्ताधिकारत्वात् प्रवृत्ताधिकारत्वाच्चेति चेन्न विरुद्धधर्माध्यासस्य तदवस्थत्वात् । प्रधानस्यभेदानिवृत्तेः नह्येकमेव निवृत्ताधिकारित्वप्रवृत्ताधिकारत्वयोर्युगपदधिकरणंयुक्तं नष्टत्वानष्टत्वयोरिव विरोधात् । विषयभेदान्न तयोर्विरोधः कश्चित्कचित् पितृत्वपुत्रत्वधर्मवत् तयोरेकविषययोरेव विरोधात् । निवृत्ताधिकारत्वं हि मुक्तपुरुषविषयं प्रवृत्ताधिकारत्वं पुनरमुक्तपुरुषविषयमिति । भिन्न पुरुषापेक्षया भिन्नविषयत्वं । नष्टत्वानष्टत्वधर्मयोरपि मुक्तात्मानमेव प्रति विरोधः स्यादमुक्तात्मानं प्रत्येव वा । न चैवं मुक्तात्मापेक्षया प्रधानस्य नष्टधर्मत्ववचनात् अमुक्तापेक्षया चानष्टत्वप्रतिज्ञानादिति कश्चित्सोऽपि न विरुद्धधर्माध्यासान्मुच्यते प्रधानस्यैकरूपत्वात् येनैव हि रूपेण प्रधानं मुक्तात्मानं प्रतिचरिताधिकारं नष्टं च

प्रतिज्ञायते तेनैवामवसिताधिकारमनष्टममुक्तात्मानं प्रतीति कथं न विरोधः प्रसिध्येत्। यदि पुनरूपांतरेण तथेष्यते तदा न प्रधानमेकरूपं स्यात् रूपद्वयस्य सिद्धेः। तथाचैकमनैकरूपं प्रधानं सिध्येत् सर्वमनेकांतात्मकं वस्तु साधयेत्। स्यादाकूतं न परमार्थतः प्रधानं विरुद्धयोर्धर्मयोरधिकरणं तयोः शब्दज्ञानानुपातिना वस्तुशून्येन विकल्पेनाध्यारोपितत्वात्पारमार्थिकत्वे धर्मयोरपि धर्मांतरपरिकल्पनायामनवस्थानात्। सुदूरमपि गत्वा कस्यचिदारोपितधर्माभ्युपगमे प्रधानस्याप्यारोपितावेव नष्टत्वानष्टत्वधर्मौ स्यातामवसितानवसिताधिकारत्वधर्मौ च तदपेक्षानिमित्तं स्वरूपद्वयं च ततोनेकमनेकरूपं प्रधानं सिध्येत्। यतः सर्वं वस्त्वेकानेकात्मकं साधयेदिति। तदपि न विचारसहं। मुक्तामुक्तत्वयोरपि पुंसामपारमार्थिकत्वप्रसंगात्। सत्यमेतत्। न तत्त्वतः पुरुषस्य मुक्तत्वं संसारित्वं वा धर्मोऽस्ति प्रधानस्यैव संसारित्वप्रसिद्धेः। तस्यैव च मुक्तिकारणतत्त्वज्ञानवैराग्यपरिणामान्मुक्तित्वोपपत्तेः। तदेवं मुक्तेः पूर्वं निःश्रेयसमार्गस्योपदेशकं प्रधानमिति परमतममूद्य दूषयन्नाह।

प्रधानं ज्ञत्वतो मोक्षमार्गस्याऽस्तूपदेशकं।
तस्यैव विश्ववेदित्वाद्वेतृत्वात्कर्मभूभृतां ॥ ७९ ॥
इत्यसंभाव्यमेवास्याऽचेतनत्वात्पटादिवत्।
तदसंभवतोनूनमन्यथानिष्फलः पुमान् ॥ ८० ॥
भोक्ताऽऽत्मा चेत्स एवास्तु कर्ता तदविरोधतः।
विरोधे तु तयोर्भोक्तुः स्याद्बुजौ कर्तृता कथं ॥ ८१ ॥
प्रधानं मोक्षमार्गस्य प्रणेतृ स्तूयते पुमान्।
मुमुक्षुभिरितिब्रूयात्कोऽन्योऽकिंचित्करात्मनः ॥ ८२ ॥

प्रधानमेवास्तु मोक्षमार्गस्योपदेशकं ज्ञत्वात्। यस्तु न मोक्षमार्गस्योपदेशकः स न ज्ञो दृष्टो यथा घटादिः मुक्तात्माच, ज्ञं च प्रधानं तस्मान्मोक्षमार्गस्योपदेशकं। न च कपिलादिपुरुषसंसर्गभाजः प्रधानस्य ज्ञत्वमसिद्धं विश्ववेदित्वात्। यस्तु न ज्ञः स न विश्ववेदी यथा घटादिः। विश्ववेदि च प्रधानं ततो ज्ञमेव च विश्ववेदि च तत्सिद्धं सकलकर्मभूभृद्भेतृत्वात्। तथा हि—कपिलात्मना संस्पृष्टं प्रधानं विश्ववेदि कर्मराशिविनाशित्वात्। यत्तु न विश्ववेदि तन्न कर्मराशिविनाशीष्टं दृष्टं वा यथा व्योमादि। कर्मराशिविनाशि च प्रधानं तस्माद्विश्ववेदि। न वाऽस्य कर्मराशिविनाशित्वमसिद्धं रजस्तमोविवर्ताशुद्धकर्मनिकरस्य संप्रज्ञातयोगबलात्प्रध्वंससिद्धेः सत्त्वप्रकर्षाच्च संप्रज्ञातयोगघटनात्। तत्र सर्वज्ञवादिनां विवादाभावात् इति सांख्यानां दर्शनं। तदप्यसंभाव्यमेव। स्वयमेव प्रधानस्याचेतनत्वाभ्युपगमात्। तथा हि न प्रधानं कर्मराशिविनाशि स्वयमचेतनत्वात्। यत्स्वयमचेतनं तन्न कर्मराशिविनाशि दृष्टं यथा वस्त्रादि। स्वयमचेतनं च प्रधानं तस्मान्न कर्मराशिविनाशि। चेतनसंसर्गात्प्रधानस्य चेतनत्वोपगमादसिद्धसाधनमिति चेन्न। स्वयमिति विशेषणात्। स्वयं हि प्रधानमचेतनमेव चेतनसंसर्गात्तूपचारादेव तच्चेतनमुच्यते स्वरूपतः पुरुषस्यैव चेतनत्वोपगमात् "चैतन्यं पुरुषस्य स्वरूपमिति" वचनात्। ततः सिद्धमेवेदं साधनं कर्मराशिविनाशित्वाभावं साधयति तस्माच्च विश्ववेदित्वाभावः कर्मराशिविनाशित्वाभावे कस्यचिद्विश्ववेदित्वविरोधात्। ततश्च न प्रधानस्य ज्ञत्वं स्वयमचेतनस्य ज्ञत्वानुपलब्धेः। नचाज्ञस्य मोक्षमार्गस्योपदेशकत्वं संभाव्यत इति। प्रधानस्य सर्वमसंभाव्यमेव स्वयमचेतनस्य संप्रज्ञातसमाधेरपि दुर्घटत्वात्। बुद्धिसत्त्वप्रकर्षस्यासंभवाद्रजस्तमोमलावरणविगमस्यापि दुरुपपादत्वात्। यदि पुनरचेतनस्यापि प्रधानस्य विपर्ययाद्बंधसिद्धेः संसारित्वं तत्त्व-

ज्ञानात्कर्ममलावरणविगमेसति समाधिविशेषाद्विवेकख्यातेः सर्वज्ञत्वं मोक्षमार्गोपदेशित्वं जीवन्मुक्तदशायां विवेकख्यातेरपि निरोधे निर्बीजसमाधेर्मुक्तत्वमिति कापिला मन्यंते तदाऽयं पुरुषः परिकल्प्यमानो निष्फल एव स्यात् प्रधानेनैवं संसारमोक्षतत्कारणपरिणामतापर्याप्तत्वात् । ननु च सिद्धेऽपि प्रधाने संसारादिपरिणामानां कर्तरि भोग्ये, भोक्ता पुरुषः कल्पनीय एव भोग्यस्य भोक्तारमंतरेणानुपपत्तेरिति न मंतव्यं । तस्यैव भोक्तुरात्मनः कर्तृत्वसिद्धेः प्रधानस्य कर्तुः परिकल्पनानर्थक्यात् । नहि कर्तृत्वभोक्तृत्वयोः कश्चिद्विरोधोऽस्ति भोक्तुर्भुजिक्रियायामपि कर्तृत्वविरोधानुषंगात् । तथाच कर्तरि भोक्तृत्वानुपपत्तेर्भोक्तेति न व्यपदिश्यते । स्यान्मतं भोक्तेति कर्तरि शब्दयोगात्पुरुषस्य न वास्तवं कर्तृत्वं शब्दज्ञानानुपातिनः कर्तृत्वविकल्पस्य वस्तुशून्यत्वादिति । तदप्यसंबद्धं । भोक्तृत्वादिधर्माणामपि पुरुषस्यावास्तवत्वापत्तेः । तथोपगमाच्चेतयत इति चेतनः पुरुषो न वस्तुतः सिद्ध्येत् । चेतन शब्दज्ञानानुपातिनो विकल्पस्य वस्तुशून्यत्वात् कर्तृत्वभोक्तृत्वादिशब्दज्ञानानुपातिविकल्पवत् । सकलशब्दविकल्पगोचरातिक्रांतत्वाच्चितिशक्तेः पुरुषस्यावक्तव्यत्वमिति चेन्न । तस्यावक्तव्यशब्देनापि वचनविरोधात् । तथाप्यवचने कथं परप्रत्यायनमिति संप्रधार्यं कायप्रज्ञप्तेरपि शब्दाविषयत्वेन प्रवृत्त्ययोगत् । स्वयं च तथाविधं पुरुषं सकलवाग्गोचरातीतमकिंचित्करं कुतः प्रतिपद्येत । स्वसंवेदनादिति चेन्न । तस्य ज्ञानशून्ये पुंस्यसंभवात् स्वरूपस्य च स्वयं संचेतनायां पुरुषेण प्रतिज्ञायमानायां बुद्ध्यवसितमर्थं पुरुषश्चेतयते इति व्याहन्यते स्वरूपस्य बुद्ध्यनवसितस्यापि तेन संवेदनात् । यथा च बुद्ध्यनवसितमात्मानमात्मा संचेतयते तथा बहिरर्थमपि संचेतयतां किमनया बुद्ध्या निष्कारणमुपकल्पितया । स्वार्थसंवेदकेन पुरुषेण तत्कृत्यस्य कृतत्वात् । यदि पुनरर्थसंवेदनस्य कादाचित्कत्वाद्बुद्ध्यवसायस्तत्राप्येष्यते तस्य स्वकारणबुद्धिकादाचित्कतया कादाचित्कस्यार्थसंवेदनस्य कादाचित्कताहेतुत्वसिद्धेः । बुद्ध्यध्यवसायानपेक्षायां पुंसोऽर्थसंवेदने शश्वदर्थसंवेदनप्रसंगादिति मन्यध्वं तदार्थसंवेदिनः पुरुषस्यापि संचेतना कादाचित्का किमपेक्षास्यात् अर्थसंवेदनापेक्षयेति चेत् किमिदानीमर्थसंवेदनं पुरुषादन्यदभिधीयते ? तथाभिधाने स्वरूपसंवेदनमपि पुंसोऽन्यत्प्राप्तं तस्य कादाचित्कतया शाश्वतिकत्वाभावात् तादृशस्वरूपसंवेदनादात्मनोऽनन्यत्वे ज्ञानादेवानन्यत्वमिष्यतां । ज्ञानस्यानित्यत्वात् ततोऽनन्यत्वे पुरुषस्यानित्यत्वप्रसंग इतिचेत् । स्वरूपसंवेदनादप्यनित्यत्वादात्मनोऽनन्यत्वे कथंचिदनित्यत्वप्रसंगो दुःपरिहार एव । स्वरूपसंवेदनस्य नित्यत्वेऽर्थसंवेदनस्यापि नित्यता स्यादेव परापेक्षातस्तस्यानित्यत्वे स्वरूपसंवेदनस्याप्यनित्यत्वमस्तु न चात्मनः कथंचिदनित्यत्वमयुक्तं । सर्वथा नित्यत्वे प्रमाणविरोधात् सोयं सांख्यः पुरुषं कादाचित्कार्थसंचेतनात्मकमपि निरातिशयं नित्यमाचक्षाणो ज्ञानात्कादाचित्कादनन्यत्वमनित्यत्वभयान्न प्रतिपद्यत इति किमपि महाद्भुतं । प्रधानस्य चानित्यत्वाद्व्यक्तादनर्थांतरभूतस्य नित्यतां प्रतीयन् पुरुषस्यापि ज्ञानादशाश्वतादनर्थांतरभूतस्य नित्यत्वमुपैतु सर्वथा विशेषाभावात् केवलं ज्ञानपरिणामाश्रयस्य प्रधानस्यादृष्टस्यापि परिकल्पनायां ज्ञानात्मकस्य च पुरुषस्य स्वार्थव्यवसायिनो दृष्टस्य हानिः पापीयसी स्यात् । दृष्टहानिरदृष्टपरिकल्पना च पापीयसीति सकलप्रेक्षावतामभ्युपगमनीयत्वात् । ततस्तां परिजिहीर्षता पुरुषएव ज्ञानदर्शनोपयोगलक्षणः कश्चित्प्रक्षीणकर्मा सकलतत्त्वसाक्षात्कारी मोक्षमार्गस्य प्रणेता पुण्यशरीरः पुण्याति शयोदये सति सन्निहितोक्तपरिग्राहकविनेयमुख्यः प्रतिपत्तव्यस्तस्यैव मुमुक्षुभिः प्रेक्षावद्भिः स्तुत्यतोपपत्तेः । प्रधानं तु मोक्षमार्गस्य प्रणेतृ ततोऽर्थांतरभूत एवात्मा मुमुक्षुभिः स्तूयते इत्यकिंचित्करात्मवाद्येव ब्रूयान्न ततोऽन्य इत्यलं प्रसंगेन । योऽप्याह माभूत्कपिलो निर्वाणस्य प्रणेता महेश्वरवत् तस्य विचार्यमाणस्य तथा व्यवस्थापयितुमशक्तेः सुगतस्तु निर्वाणमार्गोपदेशकोऽस्तु सकलबाधकप्रमाणाभावादिति तमपि निराकर्तुमुपक्रमते ॥

सुगतोऽपि न निर्वाणमार्गस्य प्रतिपादकः ।
विश्वतत्त्वज्ञतापायात्तत्त्वतः कपिलादिवत् ॥ ७४ ॥

योयस्तत्वतो विश्वतत्त्वज्ञताऽपेतः स स न निर्वाणमार्गस्य प्रतिपादको यथाकपिलादिस्तथा च सुगत इत्येवं नासिद्धं साधनं तत्त्वतो विश्वतत्त्वज्ञतापेतत्वस्य सुगते धर्मिणि सद्भावात् । स हि विश्वतत्त्वान्यतीतानागतवर्तमानानि साक्षात्कुर्वंस्तद्धेतुकोऽभ्युपगंतव्यः तेषां सुगतज्ञानहेतुत्वाभावे सुगतज्ञान विषयत्वविरोधात् । नाकारणं विषय इति स्वयमभिधानात् । तथाऽतीतानां तत्कारणत्वेऽपि न वर्तमानानामर्थानां सुगतज्ञानकारणत्वं समसमयभाविनां कार्यकारणभावाभावादन्वयव्यतिरेकानुविधानायोगात् । नह्यननुकृतान्वयव्यतिरेकोऽर्थः कस्यचित्कारणमिति युक्तं वक्तुं । नाननुकृतान्वयव्यतिरेकं कारणमिति प्रतीतेः । तथा भविष्यतां चार्थानां न सुगतज्ञानकरणता युक्ता यतस्तद्विषयं सुगतज्ञानं स्यादिति विश्वतत्त्वज्ञतापेतत्वं सुगतस्य सिद्धमेव तथा परमार्थतः स्वरूपमात्रावलंबित्वात् सर्वविज्ञानानां सुगतज्ञानस्यापि स्वरुपमात्रविषयत्वमेवोररीकर्तव्यं तस्य बहिरर्थविषयत्वे स्वार्थसंवेदकत्वात् सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षमिति वचनं विरोधमध्यासीत । बहिरर्थाकारतयोत्पद्यमानत्वात् सुगतज्ञानस्य बहिरर्थविषयत्वोपचारकल्पनायां न परमार्थतो बहिरर्थविषयं सुगतज्ञानमतस्तत्त्वत इति विशेषणमपि नासिद्धं साधनस्य । नापि विरुद्धं विपक्षएव वृत्तेरभावात् कपिलादौ सपक्षेऽपि सद्भावात् । ननु तत्त्वतोविश्वतत्त्वज्ञतापेतेन मोक्षमार्गस्य प्रतिपादकेन दिग्नागाचार्यादिना साधनस्य व्यभिचार इति चेन्न । तस्यापि पक्षीकृतत्वात् । सुगतग्रहणेन सुगतमतानुसारिणां सर्वेषां गृहीतत्वात् । तर्हि स्याद्वादिनाऽनुत्पन्नकेवलज्ञानेन तत्त्वतो विश्वतत्त्वज्ञतापेतेन सूत्रकारादिना निर्वाणमार्गस्योपदेशकेनानैकांतिकं साधनमिति चेन्न । तस्यापि सर्वज्ञप्रतिपादितनिर्वाणमार्गोपदेशित्वेन तदनुवादकत्वात् प्रतिपादकत्वसिद्धेः । साक्षात्तत्त्वतो विश्वतत्त्वज्ञ एव हि निर्वाणमार्गस्य प्रवक्ता, गणधरदेवादयस्तु सूत्रकारपर्यंतास्तदनुवक्तारएव गुरुपर्वक्रमाविच्छेदादिति स्याद्वादिनां दर्शनं ततो न तैरनेकांतिको हेतुर्यतः सुगतस्य निर्वाणमार्गस्योपदेशित्वाभावं न साधयेत् । स्यान्मतं न सुगतज्ञानं विश्वतत्त्वेभ्यः समुत्पन्नं तदाकारतां चापन्नं तदध्यवसायि च तत्सक्षात्कारि सौगतैरभिधीयते । " भिन्नकालं कथं ग्राह्यमितिचेद्ग्राह्यतां विदुः । हेतुत्वमेव युक्तिज्ञास्तदाकारार्पणक्षम " मित्यनेन तदुत्पत्तितादूप्ययोर्ग्राह्यत्वलक्षणत्वेन व्यवहारिणः प्रत्यभिधानात् "यत्रैव जनयेदेनां तत्रैवास्य प्रमाणते" त्यनेनच तदध्यवसायित्वस्य प्रत्यक्षलक्षणत्वेन वचनमपि न सुगतप्रत्यक्षापेक्षया व्यवहारजनापेक्षयैव तस्य व्याख्यानात् सुगतप्रत्यक्षे स्वसंवेदनप्रत्यक्ष इव तल्लक्षणस्यासंभवात् । यथैव हि स्वसंवेदनप्रत्यक्षं स्वस्मादनुत्पद्यमानमपि स्वाकारमननुकुर्वाणं स्वस्मिन् व्यवसायमजनयत् प्रत्यक्षमिष्यते कल्पनापोढाभ्रांतत्वलक्षणसद्भावात् तथा योगिप्रत्यक्षमपि वर्तमानातीतानागततत्त्वेभ्यः स्वयमनुत्पद्यमानं तदाकारमननुकुर्वत् तदव्यवसायमजनयत् प्रत्यक्षं तल्लक्षणयोगित्वात्प्रतिपद्यते । कथमन्यथा सकलार्थविषयं विधूतकल्पनाजालं च सुगतप्रत्यक्षं सिद्ध्येत् तस्य भावनाप्रकर्षपर्यंतजत्वाच्च । न समस्तार्थजत्वं युक्तं 'भावना प्रकर्षपर्यंतजं च योगिज्ञान' मिति वचनात् । भावना हि द्विविधा श्रुतमयी चिंतामयी च । तत्र श्रुतमयी श्रूयमाणेभ्यः परार्थानुमानवाक्येभ्यः समुत्पद्यमानेन श्रुतशब्दवाच्यतामास्कंदता निर्वृत्ता, परं प्रकर्षं प्रति पद्यमाना स्वार्थानुमानलक्षणया चिंतया निर्वृत्तां चिंतामयीं भावनामारभते सा च प्रकृष्यमाणा परं प्रकर्षपर्यंतं संप्राप्ता योगिप्रत्यक्षं जनयति ततस्तत्वतो विश्वतत्वज्ञतासिद्धेः सुगतस्य न तदपेतत्वं सिद्ध्यति यतो निर्वाणमार्गस्य प्रतिपादकः सुगतो न भवेदिति । तदपि न विचारक्षमं । भावनाया विकल्पात्मिकायाः श्रुतमय्याश्चिंतामय्याश्चावस्तुविषयाया वस्तुविषयस्य योगिज्ञानस्य जन्मविरोधात् कुतश्चिदतत्त्व

१ चिंतानां समूहः संततिरितियावत् । २ निर्विकल्पबुद्धिं ।

विषयादविकल्पज्ञानात्तत्त्वविषयस्य ज्ञानस्यानुपलब्धेः । कामशोकभयोन्मादचोरस्वप्नाद्युपप्लुतज्ञानेभ्यः कामिनीमृतेष्टजनशत्रुसंघातानियतार्थगोचराणां पुरतोऽवस्थितानामिव दर्शनस्याप्यभूतार्थविषयतया तत्त्वविषयत्वाभावात् । तथा चाभ्यधायि " कामशोकभयोन्मादचोरस्वप्नाद्युपप्लुताः । अभूतानपि पश्यंति पुरतोऽवस्थितानि वे" ति ॥ ननु च कामादिभावनाज्ञानादभूतानामपि कामिन्यादीनां पुरतोऽवस्थितनामिव स्पष्टं साक्षाद्दर्शनमुपलभ्यते किमंग पुनः श्रुतानुमानभावनाज्ञानात्परमप्रकर्षप्राप्ता-श्चतुरार्यसत्यानां परमार्थसतां दुःखसमुदयनिरोधमार्गाणां योगिनः साक्षाद्दर्शनं न भवतीत्ययमर्थोऽस्य श्लोकस्य सौगतैर्विवक्षितः । स्पष्टज्ञानस्य भावनाप्रकर्षोत्पत्तौ कामिन्यादिषु भावनाप्रकर्षस्य तद्विषय-स्पष्टज्ञानजनकस्य दृष्टांततया प्रतिपादनात् । न च श्रुतानुमानभावना ज्ञानमतत्त्वविषयं ततस्तत्त्वस्य प्राप्यत्वात् । श्रुतं हि परार्थानुमानं त्रिरूपलिंगप्रकाशकं वचनं चिंता च स्वार्थानुमानं साध्याविनाभावि त्रिरूपलिंगज्ञानं तस्य विषयो द्वेधा प्राप्यश्चालंबनीयश्च तत्रालंब्यमानस्य साध्यसामान्यस्य तद्विषयस्या-वस्तुत्वादतत्त्वविषयत्वेऽपि प्राप्यस्वलक्षणापेक्षया तत्त्वविषयत्वं व्यवस्थाप्यते वस्तुविषयं प्रामाण्यं द्वयोरऽपि प्रत्यक्षानुमानयोरिति वचनात् । यथैव हि प्रत्यक्षादर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां न विसंवाद्यत इत्यर्थक्रियाकारि स्वलक्षणवस्तुविषयं प्रत्यक्षं प्रतीयते तथा परार्थानुमानात्स्वार्थानुमाना-द्यार्थं परिच्छिद्य प्रवर्तमानोर्थक्रियायां न विसंवाद्यत इत्यर्थक्रियाकारि चतुरार्यसत्यवस्तुविषयमनुमान मास्थीयत इत्युभयोः प्राप्यवस्तुविषयं प्रमाण्यं सिद्धं प्रात्यक्षस्येवानुमानस्यार्थासंभवे संभवाभाव साधनात् । तदुक्तं । "अर्थस्यासंभवेऽभावात्प्रत्यक्षेऽपि प्रमाणता । प्रतिबद्धस्वभावस्य तद्धेतुत्वे समं द्वय" मिति ॥ तदेवं श्रुतानुमानभावनाज्ञानात्प्रकर्षपर्यंतप्राप्ताच्चतुरार्यसत्यज्ञानस्य स्पष्टतम-स्योत्पत्तेरविरोधात् । सुगतस्य विश्वतत्त्वज्ञता प्रसिद्धैव परमवैतृष्ण्यवत् । संपूर्णं गतः सुगत इति नि र्वचनात् सुकलशवत् । सुशब्दस्य संपूर्णवाचित्वात् संपूर्णं हि साक्षाच्चतुरार्यसत्यज्ञानं संप्राप्तः सुगत इष्यते । तथा शोभनं गतः सुगत इति सुशब्दस्य शोभनार्थत्वात् सुरूपकन्यावत् निरुच्यते । शोभनो ह्यविद्यातृष्णाशून्यो ज्ञानसंतानस्तस्याशोभनाभ्यामविद्यातृष्णाभ्यां व्यावृतत्वात्संप्राप्तः सुगत इति निराश्रवचित्तसंतानस्य सुगतत्ववर्णनात् । तथा सुष्ठु गतः सुगत इति पुनरनावृत्यागत इत्युच्यते । सुशब्दस्य पुनरनावृत्यर्थत्वात् सुनष्टज्वरवत् । पुनरविद्यातृष्णाक्रांतचित्तसंतानावृत्तेरभावात् निराश्रव चित्तसंतानसद्भावाच्च " तिष्ठंत्येव पराधीना येषां तु महती कृपेति " वचनात् ॥ कृपा हि त्रिविधा सत्त्वालंबना पुत्रकलत्रादिषु । धर्मालंबना संघादिषु । निरालंबना संपुटसंदष्टमंडूकोद्धरणादिषु । तत्र महती निरालंबना कृपा सुगतानां सत्त्वधर्मानपेक्षत्वादिति ते तिष्ठंत्येव न कदाचिन्निर्वांति धर्मदेशनया जगदुपकारनिरतत्वाज्जगतश्चानंतत्वात् 'बुद्धो भवेयं जगते हिताये' ति भावनया बुद्धत्व संवर्तकस्य धर्म-विशेषस्योत्पत्तेर्धर्मदेशनाविरोधाभावाद्विवक्षामंतरेणापि विधूतकल्पनाजालस्य बुद्धस्य मोक्षमार्गोपदेशिन्या वाचो धर्मविशेषादेव प्रवृत्तेः स एव निर्वाणमार्गस्य प्रतिपादकः समवतिष्ठते विश्वतत्त्वज्ञत्वात् कात्स्न्यतो वितृष्णत्वाच्चेति । केचिदाचक्षते सौत्रांतिकमतानुसारिणः सौगतास्तेषां तत्त्वव्यवस्थामेव न संभावयामः । किं पुनर्विश्वतत्त्वज्ञः सुगतः स च निर्वाणमार्गस्य प्रतिपादक इत्यसंभाव्यमानं प्रमाणविरुद्धं प्रतिपद्येमहि । तथाहि प्रतिक्षणविनश्वरा बहिरर्थाः परमाणव प्रत्यक्षतो नानुभूता नानुभूयंते स्थिरस्थूलसाधारणा-कारस्य प्रत्यक्षबुद्धौ घटादेरर्थस्य प्रतिभासनात् यदि पुनरस्यासन्नाऽसंस्पृष्टरूपां परमाणवः प्रत्यक्षबुद्धौ प्रतिभासंते प्रत्यक्षपृष्टभाविनी तु कल्पना संवृत्तिः स्थिरस्थूलसाधारणाकारमात्मन्यविद्यमानमारोपयतीति सावृतालंबनाः पंच विज्ञानकाया इति निगद्यंते । तदा निरंशानां क्षणिकपरमाणूनां का नामाऽत्या-सन्नतेति विचार्य । व्यवधानाभाव इति चेत् तर्हि सजातीयस्य विजातीयस्य च व्यवधायकस्याभावात्तेषां व्यवधानाभावः संसर्ग एवोक्तः स्यात् स च सर्वात्मना न संभवत्येवैकपरमाणुमात्रप्रचयप्रसंगात् ।

१ रूपं, वेदना, विज्ञान, संज्ञा संस्कार इति दुःखं दुखं, सुलक्षणं सुलक्षणम्, क्षणिकं क्षणिकम्, शून्यं शून्यम् । इति चतुरार्यसत्यानाम् ।

नाप्येकदेशेन दिग्भागभेदेन षड्भिः परमाणुभिरेकस्य परमाणोः संसृष्टमानस्य षडंशतापत्तेः ततएवा संसृष्टाः परमाणवः प्रत्यक्षेणालंब्यंत इति चेत् कथमत्यासन्नास्ते विरोधाद्विष्टदेशव्यवधानाभावाद-त्यासन्नास्त इति चेन्न। समीपदेशव्यवधानोपगमप्रसंगात्। तथा च समीपदेशव्यवधायकं वस्तु व्यवधी यमानपरमाणुभ्यां संसृष्टं व्यवहितं वा स्यात् गत्यंतराभावात्। न तावत्संसृष्टं तत्संसर्गस्य सर्वात्मनै कदेशेन वा विरोधात्। नापि व्यवहितं व्यवधायकांतरपरिकल्पनानुषंगात् व्यवधायकांतरमपि व्यवधीयमानाभ्यां संसृष्टं व्यवहितं चेति पुनः पर्यनुयोगेऽनवस्थानादिति कात्यासन्नाऽसंसृष्टरूपाः परमाणवो बहिः संभवेयुः। ये प्रत्यक्षविषयाः स्युस्तेषां प्रत्यक्षाविषयत्वे न कार्यलिंगं स्वभावलिंगं वा परमाण्वात्मकं प्रत्यक्षतः सिध्येत् परमाण्वात्मकसाध्यवत् क्वचित्तदसिद्धौ च न कार्यकारणयोर्व्याप्य-व्यापकयोर्वा तद्भावः सिध्येत् प्रत्यक्षानुपलंभव्यतिरेकेण तत्साधनासंभवात् तदसिद्धौ च न स्वार्थानुमान-मुदियात्। तस्य लिंगदर्शनसंबंधस्मरणाभ्यामेवोदयप्रसिद्धेः। तदभावे तदनुपपत्तेः। स्वार्थानुमानानुपपत्तौ च न परार्थानुमानरूपं श्रुतमिति क्व श्रुतमयी चिंतामयी च भावना स्यात् यतस्तत्प्रकर्षपर्यंतजं योगिप्रत्यक्ष मुररीक्रियते ततो न विश्वतत्त्वज्ञता सुगतस्य तत्त्वतोऽस्ति येन संपूर्ण गतः सुगतः शोभनं गतः सुगतः सुष्ठु गत इति सुशब्दस्य संपूर्णाद्यर्थत्रयमुदाहृत्य सुगतशब्दस्य निर्वचनत्रयमुपवर्ण्यते। सकलाविद्यातृष्णा प्रहाणाच्च सर्वार्थज्ञानवैतृष्ण्यसिद्धेः सुगतस्य जगद्धितैषिणः प्रमाणभूतस्य सर्वदावस्थितस्य विधूत कल्पनाजालस्यापि धर्मविशेषाद्विनेयजनसंमततत्त्वोपदेशप्रणयनं संभाव्यते सौत्रांतिकमते विचार्य माणस्य परमार्थतोऽर्थस्य व्यवस्थापनायोगादिति सूक्तं सुगतोऽपि निर्वाणमार्गस्य न प्रतिपादक स्तत्त्वतो विश्वतत्त्वज्ञतापायात्कपिलादिवदिति। येऽपि ज्ञानपरमाणव एव प्रतिक्षणविशरारवः परमार्थ संतो न बहिरर्थपरमाणवः प्रमाणाभावादवयव्यादिवदिति योगाचारमतानुसारिणः प्रतिपद्यंते तेषा-मपि न संवित्परमाणवः स्वसंवेदनप्रत्यक्षतः प्रसिद्धास्तत्र तेषामनवभासनादंतरात्मन एव सुख दुःखाद्यनेकविवर्तव्यापिनः प्रतिभासनात् तथा परप्रतिभासोऽनाद्यविद्यावासनाबलात्समुपजायमानो भ्रांतएवेति चेन्न। बाधकप्रमाणाभावात्। नन्वेकः पुरुषः क्रमभुवः सुखादिपर्यायान् सहभुवश्च गुणान् किमेकेन स्वभावेन व्याप्नोत्यनेकेन वा। न तावदेकेन तेषामेकरूपतापत्तेः। नाप्यनेकेन तस्याप्यनेक-स्वभावत्वात् भेदप्रसंगादेकत्वविरोधादित्यपि न बाधकं वेद्यवेदकाकारैकज्ञानेन तस्यापसारितत्वात् संवेदनं ह्येकं वेद्यवेदकाकारौ स्वसंवित्स्वभावेनैकेन व्याप्नोति न च तयोरेकरूपता, संविद्रूपेणैकरूपतै-वेति चेत् तर्ह्यात्मा सुखदुःखज्ञानादीन् स्वभावेनैकेनात्मत्वेन व्याप्नोति तेषामात्मरूपतयैकत्वाविरोधात् कथमेवं सुखादिभिन्नाकारः प्रतिभास इतिचेद्वेद्यादिभिन्नाकारः प्रतिभासः कथमेकत्र संवेदने स्यादिति समः पर्यनुयोगः। वेद्यादिवासनाभेदादितिचेत् सुखादिपर्यायपरिणामभेदादेकत्रात्मनि सुखादिभिन्ना-कारः प्रतिभासः किं न भवेत्। वेद्याद्याकारप्रतिभासभेदेऽप्येकं संवेदनमशक्यविवेचनत्वादिति वदन्न-पि सुखाद्यनेकाकारप्रतिभासेऽप्येक एवात्मा शश्वदशक्यविवेचनात्वादिति वदंतं कथं प्रत्याचक्षीत यथैव हि संवेदनस्यैकस्य वेद्याद्याकाराः संवेदनांतरं नेतुमशक्यत्वादशक्यविवेचनाः संवेदनमेकं तथा त्मनः सुखाद्याकाराः शश्वदात्मांतरं नेतुमशक्यत्वादशक्यविवेचनाः कथमेक एवात्मा न भवेत्। यद्यथा प्रतिभासते तत्तथैव व्यवहर्तव्यं यथा वेद्याद्याकारात्मकैकसंवेदनरूपतया प्रतिभाप्यमानं संवेदनं तथा च सुखज्ञानाद्यनेकाकारैकात्मरूपतया प्रतिभासमानश्चात्मा तस्मात्तथा व्यवहर्तव्य इति नातः सुखाद्यनेकाकारात्मा प्रतिभासमानो निराकर्तुं शक्यते। यदि तु वेद्यवेदकाकारयोर्भ्रांतत्वात्तद्विविक्त मेव संवदनमात्रं परमार्थसदिति निगद्यते तदा तत्प्रचयरूपमेकपरमाणुरूपं वा। न तावत्प्रचय रूपं बहिरर्थपरमाणूनामिव संवेदनपरमाणूनामपि प्रचयस्य विचार्यमाणस्यासंभवात्॥ नाप्येक परमाणुरूपं सकृदपि तस्य प्रतिभासाभावाद्बहिरर्थैकपरमाणुवत्। ततोऽपि न संवित्परमाणुरूपोऽपि सुगतः सकलसंतानसंवित्परमाणुरूपाणि चतुरार्यसत्यानि दुःखादीनि परमार्थतः संवेदयते वेद्य वेदकभावप्रसंगादिति न तत्त्वतो विश्वतत्त्वज्ञः स्यात्, येनासौ निर्वाणमार्गस्य प्रतिपादकः समनुम-

न्यते ॥ स्यान्मतं संवृत्त्या वेद्यवेदकभावस्य सद्भावात्सुगतो विश्वतत्त्वानां ज्ञाता श्रेयोमार्गस्य चोपदेष्टा स्तूयते तत्त्वतस्तदसंभवादिति तदप्यज्ञचेष्टितमिति निवेदयति—

"संवृत्त्या विश्वतत्त्वज्ञः श्रेयोमार्गोपदेश्यपि ।
बुद्धो वन्द्यो न तु स्वप्नस्तादृगित्यज्ञचेष्टितं" ॥ ७५ ॥

ननु च संवृतत्वाविशेषेऽपि सुगतस्वप्नसंवेदनयोः सुगतएव वंद्यस्तस्य भूतस्वभावत्वाद्विपर्ययैर बाध्यमानत्वादर्थक्रियाहेतुत्वाच्च । नतुस्वप्नसंवेदनं वंद्यं तस्य संवृत्त्यापि बाध्यमानत्वात् भूतार्थ त्वाभावादर्थक्रियाहेतुत्वाभावाच्चेति चेन्न भूतत्वसांवृतत्वयोर्विप्रतिषेधात् । भूतं हि सत्यं सांवृतमसत्यं तयोः कथमेकत्र सकृत्संभवः । संवृतिः सत्यं भूतमितिचेन्न । तस्य विपर्ययैरबाध्यमानत्वायोगात् स्वप्नसंवेदनादविशेषात् । ननु च संवृतिरपि द्वेधा सादिरनादिश्च । सादिः स्वप्नसंवेदनादिः । सा बाध्यते सुगतसंवेदनाऽनादिः सा न बाध्यते संवृतित्वाविशेषेऽपीति चेन्न । संसारस्याबाध्यत्वप्रस-ङ्गात् सद्यनादिरेवानाद्यविद्यावासनाहेतुत्वात् प्रबाध्यते मुक्तिकारणसामर्थ्यात् । अन्यथा कस्यचित् संसाराभावाप्रसिद्धेः । संवृत्या सुगतस्य बंद्यत्वे च परमार्थतः किंनाम वंद्यं स्यात् संवेदनाद्वैतमिति चेन्न तस्य स्वतोऽन्यतोवा प्रतिपत्त्यभावादित्याह—

यत्तु संवेदनाद्वैतं पुरुषाद्वैतवन्न तत् ।
सिद्ध्येत्स्वतोऽन्यतोवापि प्रमाणात्स्वेष्टहानितः ॥ ८६ ॥

तद्धि संवेदनाद्वैतं न तावत्स्वतः सिध्यति पुरुषाद्वैतवत् । स्वरूपस्य स्वतोगतेरभावात् । अन्य-था कस्यचित्तत्र विप्रतिपत्तेरयोगात् पुरुषाद्वैतस्यापि प्रसिद्धेरिष्टहानिप्रसंगाच्च । ननु च पुरुषाद्वैतं न स्वतोऽवसीयते तस्य नित्यस्य सकलकालकलापव्यापितया सर्वगतस्य च सकलदेशप्रतिष्ठित तया वाऽनुभवाभावादिति चेन्न । संवेदनाद्वैतस्यापि क्षणिकस्यैकक्षणस्थायितया निरंशस्यैकपर-माणुरूपतया सकृदप्यनुभवाभावाविशेषात् । यदि पुनरन्यतः प्रमाणात्संवेदनाद्वैतसिद्धिः स्यात् तदापि स्वेष्टहानिरवश्यंभाविनी साध्यसाधनयोरभ्युपगमे द्वैतसिद्धिप्रसंगात् । यथा चानुमाना त्संवेदनाद्वैतं साध्यते । यत्संवेद्यते तत्संवेदनमेव । यथा संवेदनस्वरूपं संवेद्यन्ते च नीलसुखादीनि । तथा पुरुषाद्वैतमपि वेदांतवादिभिः साध्यते । प्रतिभासएवेदं सर्वं प्रतिभासमानत्वात्, यद्यत्प्र-तिभासमानं तत्तत्प्रतिभासएव यथा प्रतिभासस्वरूपं प्रतिभासमानं चेदं जगत्तस्मात्प्रतिभास एवे त्यनुमानात् । नह्यत्र जगतः प्रतिभासमानत्वमसिद्धं साक्षादसाक्षाच्च तस्याऽप्रतिभासमानत्वे सकल शब्दविकल्पवाग्गोचरातिक्रांततया वक्तुमशक्तेः प्रतिभासश्च चिद्रूपएव अचिद्रूपस्य प्रतिभासत्व विरोधात् । चिन्मात्रं च पुरुषाद्वैतं तस्य च देशकालाकारतो विच्छेदानुपलक्षणत्वात् । नित्यत्वं सर्वगतत्वं निराकारत्वं च व्यवतिष्ठते । नहि स क्वश्चित्कालोऽस्ति यश्चिन्मात्रप्रतिभासशून्यः प्रतिभास-विशेषस्यैव विच्छेदान्नीलसुखादिप्रतिभासविशेषवत् । सह्येकदा प्रतिभासमानोऽन्यदा न प्रतिभासते प्रतिभासांतरेण विच्छेदात्प्रतिभासमात्रं तु सकलप्रतिभासविशेषकालेऽप्यस्तीति न कालतोविच्छिन्नं नापि देशतः क्वचिद्देशे प्रतिभासविशेषस्य देशांतरप्रतिभासविशेषेण विच्छेदेऽपि प्रतिभासमात्रस्या विच्छेदादिति न देशविच्छिन्नं प्रतिभासमात्रं नाप्याकारविच्छिन्नं केनचिदाकारेण प्रतिभासविशेषस्यै-वाकारांतरप्रतिभासविशेषेण विच्छेदोपलब्धेः प्रतिभासमात्रस्य सर्वाकारप्रतिभासविशेषेषु सद्भावादा-कारेणाप्यविच्छिन्नं तत्, प्रतिभासविशेषाश्च देशकालाकारैर्विच्छिद्यमानाः यदि न प्रतिभासंते तदा न तद्व्यवस्थाऽतिप्रसंगात् प्रतिभासन्ते चेत्प्रतिभासमात्रांतःप्रविष्टा एव प्रतिभासस्वरूपवत् । नहि प्रतिभासमानं किंचित्प्रतिभासमात्रांतःप्रविष्टं नोपलब्धं येनानैकांतिकं प्रतिभासमानत्वं स्यात् तथा देशकालाकारभेदाश्च परैरभ्युपगम्यमाना यदि न प्रतिभासंते कथमभ्युपगमार्हाः स्वयमप्रति-

भासमानस्यापि कस्यचिदभ्युपगमेऽतिप्रसंगानिवृत्तेः प्रतिभासमानास्तु तेऽपि प्रतिभासमात्रांतःप्रविष्टा एवेति कथं तैः प्रतिभासमात्रस्य विच्छेदः स्वरुपेणास्वरुपेण स्वस्य विच्छेदानुपपत्तेः सन्नपि देशकालाकारैर्विच्छेदः प्रतिभासमात्रस्य प्रतिभासते न वा ? प्रतिभासते चेत्प्रतिभासस्वरूपमेव तस्य च विच्छेद इति नामकरणे न किंचिदनिष्टं। न प्रतिभासतेचेत्कथमस्ति न प्रतिभासते चास्तिवेतिविप्रतिषेधात्। ननु च देशकालस्वभावविप्रकृष्टाः कथंचिदप्रतिभासमाना अपि संतः सद्भिर्बाधकाभावादिष्यंत एवेति चेन्न। तेषामपि शब्दज्ञानेनानुमानज्ञानेन वा प्रतिभासमानत्वात्। तत्राप्यप्रतिभासमानानां सर्वथाऽस्तित्वव्यवस्थानुपपत्तेः॥ नन्वेवं शब्दविकल्पज्ञाने प्रतिभासमानाः परस्परविरुद्धार्थप्रवादाः शशविषाणादयश्च नष्टानुत्पनाश्च रावणशंखचक्रवर्त्यादयः कथमपाक्रियंते तेषामनपाकरणे कथं पुरुषाद्वैतसिद्धिरिति चेन्न। तेषामपि प्रतिभासमात्रांतःप्रविष्टत्वसाधनात्। एतेन यदुच्यते कैश्चित् "अद्वैतैकांतपक्षेऽपि दृष्टोभेदो विरुध्यते। कारकाणां क्रियायाश्च नैकं स्वस्मात्प्रजायते। कर्मद्वैतं फलद्वैतं लोकद्वैतं च नो भवेत्। विद्याविद्याद्वयं न स्याद्बंधमोक्षद्वयं तथेति"। तदपि प्रत्याख्यातं क्रियाणां कारकाणां च दृष्टस्य भेदस्य प्रतिभासमानस्य पुण्यपापकर्मद्वैतस्य तत्फलद्वैतस्य च सुखदुःखलक्षणस्य लोकद्वैतस्येह परलोकविकल्पस्य विद्याविद्याद्वैतस्य च सत्येतरज्ञानभेदस्य बंधमोक्षद्वयस्य च पारतंत्र्यस्वभावस्य प्रतिभासमात्रांतःप्रविष्टत्वाद्विरोधकत्वासिद्धेः स्वयमप्रतिभासमानस्य च विरोधकत्वं दुरुपपादं स्वेष्टतत्त्वस्यापि सर्वेषामप्रतिभासमानेन विरोधकेन विरोधापत्तेर्न किंचित्तत्त्वमविरुद्धं स्यात्। यदप्यभ्यधायि "हेतोरद्वैतसिद्धिश्चेद्द्वैतं स्याद्धेतुसाध्ययोः। हेतुना चेद्विना सिद्धिर्द्वैतं वाङ्मात्रतो न किं" इति। तदपि न पुरुषाद्वैतवादिनः प्रतिक्षेपकं (प्रतिभासमानत्वस्य हेतोः सर्वस्य प्रतिभासमात्रांतःप्रविष्टत्वसाधनस्य स्वयं प्रतिभासप्रतिभासमात्रांतः प्रविष्टत्वसिद्धेर्द्वैतासिद्धिनिबंधनत्वाभावात्। हेतुना विना चोपनिषद्वाक्यमात्रात्पुरुषाद्वैतसिद्धौ न वाङ्मात्रादद्वैतसिद्धिः प्रसज्यते न चोपनिषद्वाक्यमपि परमपुरुषादन्यदेव तस्य प्रतिभासमानस्य परमपुरुषस्वभावत्वसिद्धेः) यदपि कैश्चिन्निगद्यते पुरुषाद्वैतस्यानुमानात्प्रसिद्धौ पक्षहेतुदृष्टांतानामवश्यंभावात् तैर्विनाऽनुमानस्यानुदयात्कुतः पुरुषाद्वैतं सिध्येत् ? पक्षादिभेदस्य सिद्धेरिति तदपि न युक्तिमत्। पक्षादीनामपि प्रतिभासमानानां प्रतिभासांतःप्रतिष्टानां प्रतिभासमात्राबाधकत्वादनुमानवत्। तेषामप्रतिभासमानानां तु सद्भावाप्रसिद्धेः कुतः पुरुषाद्वैतविरोधित्वं। यदप्युच्यते कैश्चित्पुरुषाद्वैतं तत्त्वं परेण प्रमाणेन प्रतीयमानं प्रमेयं तत्त्वं तत्परिच्छित्तिश्च प्रमितिः प्रमाता च यदि विद्यते तदा कथं पुरुषाद्वैतं प्रमाणप्रमेयप्रमातृप्रमितीनां तात्त्विकीनां सद्भावात्तत्त्वचतुष्टयप्रसिद्धिरिति। तदपि न विचारक्षमं। प्रमाणादिचतुष्टयस्यापि प्रतिभासमानस्य प्रतिभासमात्रात्मनः परमब्रह्मणो बहिर्भावाभावात्। तद्बहिर्भूतस्य द्वितीयत्वायोगात्। एतेन षोडशपदार्थप्रतीत्या प्रागभावादिप्रतीत्या च पुरुषाद्वैतं बाध्यत इति वदन्निवारितः। तैरपि प्रतिभासमानैर्द्रव्यादिपदार्थैरिव प्रतिभासमात्रादबहिर्भूतैः पुरुषाद्वैतस्य बाधनायोगात्। स्वयमप्रतिभासमानैस्तु सद्भावव्यवस्थामप्रतिपद्यमानैस्तस्य बाधने शशविषाणादिभिरपि स्वेष्टपदार्थनियमस्य बाधनप्रसंगात्॥ एतेन सांख्यादिपरिकल्पितैरपि प्रकृत्यादितत्त्वैः पुरुषाद्वैतं न बाध्यते इति निगदितं बोद्धव्यं। न चात्रं पुरुषाद्वैते यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टौ योगांगानि योगो वा संप्रज्ञातोऽसंप्रज्ञातश्च योगफलं च विभूतिकैवल्यलक्षणं विरुध्यते प्रतिभासमात्रात्तद्बहिर्भावाभावात् प्रतिभासमानत्वेन तथा भावप्रसिद्धेः। येऽप्याहुः प्रतिभासमानस्यापि वस्तुनः प्रतिभासाद्भेदप्रसिद्धेः न प्रतिभासांतःप्रविष्टत्वं प्रतिभासो हि ज्ञानं स्वयं न प्रतिभासते स्वात्मनि क्रियाविरोधात्तस्य ज्ञानांतरवेद्यत्वसिद्धेर्नापि तद्विषयभूतं वस्तु स्वयं प्रतिभासमानं तस्य ज्ञेयत्वात्। ज्ञानेनैव प्रतिभासत्वसिद्धेरिति स्वयं प्रतिभासमानत्वं साधनमसिद्धं न कस्यचित्प्रतिभासांतःप्रविष्टत्वं साधयेत्। परतः प्रतिभासमानत्वं तु विरुद्धं प्रतिभासबहिर्भावसाधनत्वादिति तेऽपि स्वदर्शनपक्षपातिन एव ज्ञानस्य स्वयमप्रतिभासने ज्ञानांत

रादपि प्रतिभासनविरोधात् प्रतिभासत इति प्रतिभासैकतया स्वातंत्र्येण प्रतीतिविरोधात् प्रतिभास्यत इत्येवं प्रत्ययप्रसंगात् ॥ तस्य परेण ज्ञानेन प्रतिभासमानत्वात् परस्य ज्ञानस्य च ज्ञानांतराप्रतिभासने प्रतिभासतइति संप्रत्ययो न स्यात् ॥ संवेदनांतरेण प्रतिभास्यत्वात् । तथा चानवस्थानान्न किंचित्संवेदनं व्यवतिष्ठते ॥ नच ज्ञानं प्रतिभासत इति प्रतीतिर्भ्रांता बाधकाभावात् । स्वात्मनि क्रिया विरोधो बाधक इति चेत्का पुनः स्वात्मनि क्रिया विरुध्यते ज्ञप्तिरुत्पत्तिर्वा ? न तावत्प्रथमकल्पना स्वात्मनि ज्ञप्तेर्विरोधाभावात् स्वयं प्रकाशनं हि ज्ञप्तिः । तच्च सूर्य्यालोकनादौ स्वात्मनि प्रतीयत एव, सूर्यालोकः प्रकाशते' 'प्रदीपः प्रकाशते' इति प्रतीतेः । द्वितीयकल्पना तु न बाधकारिणी, स्वात्मन्युत्पत्तिलक्षणायाः क्रियायाः परैरनभ्युपगमात् । न हि किंचित्स्वस्मादुत्पद्यते इति प्रेक्षावंतोऽनुमन्यंते । संवेदनं स्वस्मादुत्पद्यत इति तु दूरात्सारितमेव । ततः कथं स्वात्मनि क्रियाविरोधो बाधकः स्यात् ? न च सर्वा क्रिया वस्तुनः स्वात्मनि विरुध्यत इति प्रतीतिरस्ति तिष्ठत्यास्तेभवतीति धात्वर्थलक्षणायाः क्रियायाः स्वात्मन्येव प्रतीतेः । तिष्ठत्यादेर्धातोरकर्मकत्वात्कर्मणि क्रियानुपपत्तेः । स्वात्मन्येव कर्तरि स्थानादि क्रियेतिचेत्तार्हि भासते तद्धातोरकर्मकत्वात्कर्मणि क्रियाविरोधात् कर्तर्येव प्रतिभासनक्रियाऽस्तु ज्ञानं प्रतिभासत इति प्रतीतेः । सिद्धेच ज्ञानस्य स्वयं प्रतिभासमानत्वे सकलस्य वस्तुनः स्वतः प्रतिभासमानत्वं सिद्धमेव । सुखं प्रतिभासते रूपं प्रतिभासत इत्यंतर्बहिर्वस्तुनः स्वातंत्र्येण कर्तृतामनुभवतः प्रतिभासनक्रियाधिकरणस्य प्रतिभासमानस्य निराकर्तुमशक्तेः ॥ ततो नासिद्धं साधनं यतः पुरुषाद्वैतं न साधयेत् । नापि विरुद्धं परतः प्रतिभासमानत्वाप्रतीतेः, कस्यचित्प्रतिभासाद्बहिर्भावसाधनात् । एतेन परोक्षज्ञानवादिनः संवेदनस्य स्वय प्रतिभासमानत्वमसिद्धमाचक्षाणाः सकल ज्ञेयस्य ज्ञानस्य च ज्ञानात्प्रतिभासमानत्वात्साधनस्य विरुद्धतामभिदधानाः प्रतिध्वस्ताः ज्ञानं प्रकाशते बहिर्वस्तु प्रकाशत इति प्रतीत्या स्वयं प्रतिभासमानत्वस्य साधनस्य व्यवस्थापनात् । येत्वात्मा स्वयं प्रकाशत फलज्ञान चेत्यावेदयंति तेषामात्मनि फलज्ञाने वा स्वयं प्रतिभासमानत्वं सिद्धं सर्वस्य वस्तुनः प्रतिभासमानत्वं साधयत्येव । तथाहि विवादाध्यासितं वस्तु स्वयं प्रतिभासते प्रतिभासमानत्वात् । यद्यत्प्रतिभासमानं तत्तत्स्वयं प्रतिभासते यथा भट्टमतानुसारिणामात्मा प्रभाकरमतानुसारिणां वा फलज्ञानं । प्रतिभासमानं चांतर्बहिर्वस्तु ज्ञानज्ञेयरूपं विवादाध्यासितं तस्मात्स्वयं प्रतिभासते । न तावदत्र प्रतिभासमानत्वमसिद्धं सर्वस्य वस्तुनः सर्वथाऽप्यप्रतिभासमानस्य सद्भावविरोधात् । साक्षादसाक्षाच्च प्रतिभासमानस्य तु सिद्धं प्रतिभासमानत्वं ततो भवत्येव साध्यसिद्धिः । साध्याविनाभावनियमनिश्चयादिति निरवद्यं पुरुषाद्वैतसाधनं संवेदनाद्वैतवादिनोऽभीष्टहानये भवत्येव नहि कार्यकारणग्राह्यग्राहकवाच्यवाचकसाध्यसाधकबाध्यबाधकविशेषणविशेष्यभावनिराकरणात् संवेदनाद्वैतं व्यवस्थापयितुं शक्यं कार्यकारणभावादीनां प्रतिभासमानत्वात् । प्रतिभासमात्रांतःप्रविष्टानां निराकर्तुमशक्तेः स्वयमप्रतिभासमानानां तु संभवाभावात्संवृत्यापि व्यहारविरोधात् सकलविकल्पवाग्गोचरातिक्रांततापत्तेः । संवेदनमात्रंचैकक्षणस्थायि यदि किंचित्कार्यं न कुर्यात्तदा वस्त्वेव न स्यात् । वस्तुनोऽर्थक्रियाकारित्वलक्षणत्वात् । करोति चेत्कार्यकारणभावः सिध्येत् । तस्य हेतुमत्वेच स एवकार्यकारणभावः कारणरहितत्वे तु नित्यतापत्तिः । संवेदनस्य सतोऽकारणवतो नित्यत्वप्रसिद्धेरिति प्रतिभासमानात्मनः पुरुषतत्वस्यैव सिद्धिः स्यात् ॥ किंच क्षणिकसंवेदनमात्रस्य गाह्यग्राह्यकवैधुर्यं यदि केनाचित्प्रमाणेन गृह्यते । तदा ग्राह्यग्राहकभावः कथं निराक्रियेत । न गृह्यते चेत्कुतो ग्राह्यग्राहकवैधुर्यसिद्धिः ? स्वरूपसंवेदनादेवेति चेत्तार्हि संवेदनाद्वैतस्य स्वरूपसंवेदनं ग्राहकं ग्राह्यग्राहकवैधुर्यं तु ग्राह्यमिति स एव ग्राह्यग्राहकभावः ॥ स्यान्मतं " नान्योऽनुभाव्योबुध्याऽस्ति तस्यानानुभवोऽपरः ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशत " इति वचनान्न बुद्धेः किंचद्ग्राह्यमास्ति नापि बुद्धिः कस्यचिद्ग्राह्या स्वरूपेऽपि ग्राह्यग्राहकभावाभावात् ' स्वरूपस्य स्वतोगति' रित्येतस्यापि संवृत्याभिधानात् परमार्थतस्तु बुद्धिः स्वयं प्रकाशते चकास्ती

त्येवोच्यते न पुनः स्वरूपं गृह्णाति ग्राह्यग्राहकवैधुर्यं च स्वरूपादव्यतिरिक्तं गृह्णाति जानातीत्यभिधीयते । निरंशसंवेदनाद्वैते तथाभिधानविरोधादिति । तदपि न पुरुषाद्वैतवादिनः प्रतिकूलं स्वयं प्रकाशमानस्य संवेदनस्यैव परमपुरुषत्वात् ॥ नहि तत्संवेदनं पूर्वापरकालव्यवच्छिन्नं संतानांतरबहिरर्थव्यावृत्तं च प्रतिभासते यतः पूर्वापरक्षणसंतानांतरबाहिरर्थानामभावः सिध्येत् तेषां संवेदनेनाग्रहणादभाव इतिचेत् स्वसंवेदनस्यापि संवेदनांतरेणाग्रहणादभावोऽस्तु तस्य स्वयं प्रकाशनान्नाभाव इतिचेत् पूर्वोत्तरस्वसंवित्क्षणानां संतानांतरसंवेदनानांच बहिरर्थानामिव स्वयं प्रकाशमानानां कथमभावः साध्यते कथंतेषां स्वयं प्रकाशमानत्वं ज्ञायत इतिचेत् स्वयमप्रकाशमानत्वं तेषां कथं साध्यत इति समानः पर्यनुयोगः ॥ स्वसंदेनस्वरूपस्य प्रकाशमानत्वमेव तेषामप्रकाशमानत्वमितिचेत्तर्हि तेषां प्रकाशमानत्वमेव स्वसंवेदनस्यैवाप्रकाशमानत्वं किं न स्यात् ? स्वसंवेदनस्य स्वयमप्रकाशमानत्वे परैः प्रकाशमानत्वाभावः साधयितुमशक्यः प्रतिषेधस्य विधेर्विषयत्वात् सर्वत्र सर्वदा सर्वथाऽप्यसतः प्रतिषेधविरोधात् इतिचेत्तर्हि स्वसंवेदनात्परेषां प्रकाशमानत्वाभावे कथं तत्प्रतिषेधः साध्यत इति समानश्चर्चः । विकल्पप्रतिभाषिणां तेषां स्वसंवेदनावभासित्वं प्रतिषिध्यत इतिचेन्न विकल्पावभासित्वादेव स्वयं प्रकाशमानत्वासिद्धेः । तथाहि यद्यद्विकल्पप्रतिभासि तत्तत्स्वयं प्रकाशते यथा विकल्पस्वरूपं तथा च स्वसंवेदनपूर्वोत्तरक्षणाः संतानांतरसंवेदनानि वहिरर्थाश्चेति स्वयं प्रकाशमानत्वसिद्धिः शशविषाणादिभिर्विनष्टानुत्पन्नैश्च भावैर्विकल्पावभासिभिर्व्यभिचार इति चेन्न तेषामपि प्रतिभासमात्रांतर्भूतानां स्वयं प्रकाशमानत्वसिद्धेः अन्यथा विकल्पावभासित्वायोगात् । सोऽयं सौगतः सकलदेशकालविप्रकृष्टानप्यर्थान् विकल्पबुद्धौ प्रतिभासमानान् स्वयमभ्युपगमयन् स्वयंप्रकाशमानत्वं नाभ्युपैतीति किमपि महाद्भुतं ? तथाभ्युपगमे च सर्वस्य प्रतिभासमात्रांतः प्रविष्टत्वसिद्धेः पुरुषाद्वैतसिद्धिरेव स्यात् न पुनस्तद्वहिर्भूतसंवेदनाद्वैतसिद्धिः । माभून्निरंशसंवेदनाद्वैतं चित्राद्वैतं चित्राद्वैतस्य व्यवस्थापनात् । कालत्रयत्रिलोकवर्ति पदार्थाकारासंविच्चित्राप्येका शश्वदशक्यविवेचनत्वात् सर्वस्य वादिनस्तत एवक्वचिदेकत्वव्यवस्थापनात् अन्यथा कस्यचिदेकत्वेनाभिमतस्याप्येकत्वासिद्धिरितिचेन्न एवमपि परमब्रह्मण एव प्रसिद्धेः सकलदेशकालाकारव्यापिनः संविन्मात्रस्यैव परमब्रह्मत्ववचनत् । नचैकक्षणस्थायिनी चित्रासंवित् चित्राद्वैतमिति साधयितुं शक्यते तस्याः कार्यकारणभूताचित्रसंविन्नांतरीयत्वाच्चित्राद्वैतप्रसंगात्- तत्कार्यकारणचित्रसंविदो ऽनभ्युपगमे सदहेतुकत्वान्नित्यत्वसिद्धेः कथं न चित्राद्वैतमेव ब्रह्माद्वैतामिति न संवेदनाद्वैतवच्चित्राद्वैतमपि सौगतस्य व्यवतिष्ठते सर्वथा शून्यं तु तत्वमसंवेद्यमानं न व्यवतिष्ठते ॥ संवेद्यमानं तु सर्वत्र सर्वथा सर्वदा परमब्रह्मणो नातिरिच्यते तत्राक्षेपसमाधानानां परमब्रह्मसाधनानुकूलत्वात् । ततो न सुगतस्तत्वतः संवृत्या वा विश्वतत्वज्ञः संभवतीति न निर्वाणमार्गस्य प्रतिपादकः स्यात् ॥

परमपुरुष एव विश्वतत्वज्ञः श्रेयोमार्गस्य प्रणेता व्यवतिष्ठतां तस्योक्तन्यायेन साधनात् इत्यपरः सोऽपि न विचारसहः । पुरुषोत्तमस्यापि यथा प्रतिपादनं विचार्यमाणस्यायोगात् । प्रतिभासमात्रं चिद्रूपं परमब्रह्मोक्तं तच्च यथा परमार्थिकं देशकालाकाराणां भेदेऽपि व्यभिचाराभावात् तत्प्रतिभासविशेषाणामेव व्यभिचारादव्यभिचारित्वलक्षणत्वात्तस्येति तच्च विचार्यते । यदेतत्प्रतिभासमात्रं तत् सकलप्रतिभासविशेषरहितं तत्सहितं वा स्यात् ? प्रथमपक्षे तदसिद्धमेव सकलप्रतिभासविशेषरहितस्य प्रतिभासमात्रस्यानुभवाभावात् । केनचित्प्रतिभासविशेषेण सहितस्यैव तस्य प्रतिभासनात्कचित्प्रतिभासविशेषस्याभावेऽपि पुनरन्यत्र भावात्कदाचिदभावेऽपि चान्यदा सद्भावात्केनाचिदाकार विशेषेण तदसंभवेऽपि चाकारांतरेण संभवादेशकालाकारविशेषापेक्षत्वात् तत्प्रतिभासविशेषाणां तथा व्यभिचाराभावादव्यभिचारित्वसिद्धेः तत्वलक्षणानतिक्रमान्न तत्वबाहिर्भावो युक्तः । तथाहि यद्यथैवाव्यभिचारि तत्तथैव तत्वं यथा प्रतिभासमात्रं प्रतिभासमात्रतयैव व्यभिचारि तथैव तत्वं । अनियतदेशकालाकारतयैवाव्यभिचारी च प्रतिभासविशेष इति प्रतिभासमात्रवत्प्रतिभासविशेष-

स्यापि वस्तुत्वसिद्धेः । नहि यो यदेशतया प्रतिभासविशेषः स तदेशतां व्यभिचरति । अन्यथा भ्रांतत्वप्रसंगात् । शाखादेशतया चंद्रप्रतिभासवत् ॥ नापि यो यत्कालतया प्रतिभासविशेषः स तत्कालतां व्यभिचरति । तद्व्यभिचारिणोऽसत्यत्वव्यवस्थानान्निशि मध्यंदिनतया स्वप्नप्रतिभासविशेषवत् । नापि यो यदाकारतया प्रतिभासविशेषः स तदाकारतां विसंवदति तद्विसंवादिनो मिथ्याज्ञानत्वसिद्धेः । कामलाद्युपहतचक्षुषः शुक्ले शंखे पीताकारताप्रतिभासविशेषवत् ॥ न च वितथैर्देशकालाकारव्यभिचारिभिः प्रतिभासविशेषैः सदृशा एव देशकालाकाराव्यभिचारिणः प्रतिभासविशेषाः प्रतिलक्षयितुं युज्यंते यत इदं वेदांतवादिनां वचनं शोभेत "आदावंते च यन्नास्ति वर्तमानेऽपि तत्तथा। वितथैः सदृशाः संतोऽवितथा एव लक्षिताः" इति तेषामवितथानामादावंते चासत्वेऽपि वर्तमाने सत्त्वप्रसिद्धेर्बाधकप्रमाणाभावात् ॥ नहि यथा स्वप्नादिभ्रांतप्रतिभासविशेषेषु तत्कालेऽपि बाधकं प्रमाणमुदेति तथा जाग्रद्दशायामभ्रांतप्रतिभासविशेषेषु तत्र साधकप्रमाणस्यैव सद्भावात् । सम्यक्त्वमया तदा दृष्टोऽर्थोऽर्थक्रियाकारित्वात् तस्य मिथ्यात्वेऽर्थक्रियाकारित्वविरोधात् इंद्रजालादिपरिदृष्टार्थवदिति नच भ्रांतेतरव्यवस्थायां चांडालादयोऽपि विप्रतिपद्यंते तथा चोक्तमकलंकदेवैः "इंद्रजालादिषु भ्रांतमीर्यंते न चापरं । अपि चांडालगोपालबाललोलविलोचना" इति ॥ किंच तत्प्रतिभासमात्रं सामान्यरूपं द्रव्यरूपं वा ? प्रथमपक्षे सत्तामात्रमेव स्यात् तस्यैव परसामान्यरूपतया प्रतिष्ठानात् तस्य स्वयं प्रतिभासमानत्वे प्रतिभासमात्रमेव तत्त्वमन्यथा तदव्यवस्थितेरितिचेन्न सत्सदित्यन्वयज्ञानविषयत्वात् सत्तासामान्यस्य व्यवस्थितेः स्वयं प्रतिभासमानत्वासिद्धेः । सत्ता प्रतिभासत इति तु विषये विषयिधर्मस्योपचारात् प्रतिभासमानं हि विषयिणो ज्ञानस्य धर्मः स विषये सत्तासामान्येऽध्यारोप्यते तदध्यारोपनिमित्तं तु प्रतिभासमानं क्रियाधिकरणत्वं । यथैव हि संविन्प्रतिभासते इति कर्तृस्था प्रतिभासनक्रिया तथा तद्विषयस्थाप्युपचर्य्यते सकर्मकस्य धातोः कर्तृकर्मस्थक्रियार्थत्वात् यथौदनं पचतीति पचनक्रिया पाचकस्था पाच्यमानस्था च प्रतीयते तद्वदकर्मकस्य धातोः कर्तृस्थक्रियामात्रार्थत्वात् परमार्थतः कर्मस्थक्रियाऽसंभवात्कर्तृस्था क्रिया कर्मण्युपचर्य्यते ॥ ननु च सति मुख्ये स्वयं प्रतिभासमाने कस्यचित् प्रमाणतः सिद्धे परत्र तद्विषये तदुपचारकल्पना युक्ता यथाऽग्नौ दाहपाकाद्यर्थक्रियाकारिणि तद्धर्मदर्शनान्माणवके तदुपचारकल्पनाऽग्निर्माणवक इति । न च किंचित्संवेदनं स्वयं प्रतिभासनं सिद्धं संवेदनांतरसंवेद्यत्वात् । संवेदनस्य क्वचिदवस्थानाभावात् । सुदूरमपि गत्वा कस्यचित्संवेदनस्य स्वयं प्रतिभासमानस्यानभ्युपगमात् कथं तद्धर्मस्योपचारस्तद्विषये घटेतेति कश्चित् । सोऽपि ज्ञानांतरवेद्यज्ञानवादिनमुपालभतां परोक्षज्ञानवादिनं वा ॥ ननु च परोक्षज्ञानवादी भट्टस्तावन्नोपलंभार्हः स्वयंप्रतिभासनानभ्युपगमात् तद्धर्मस्य प्रतिभासमानस्य विषयेषूपचारघटनात् ॥ घटः प्रतिभासते, घटादयः प्रतिभांसत इति घटपटादिप्रतिभासनान्यथानुपपत्त्या च करणभूतस्य परोक्षस्यापि ज्ञानस्य प्रतिपत्तेरविरोधात् रूपप्रतिभासनाच्चक्षुःप्रतिपत्तिवत् ॥ तथा करणज्ञानमात्मानं चाप्रत्यक्षं वदन् प्राभाकरोऽपि नोपालंभमर्हति फलज्ञानस्य स्वयं प्रतिभासमानस्य तेन प्रतिज्ञानात् तद्धर्मस्य विषयेषूपचारस्य सिद्धेः । फलज्ञानं च कर्तृकरणाभ्यां विना नोपपद्यत इति । तदेव कर्तारं करणज्ञानं चाप्रत्यक्षमपि व्यवस्थापयति यथा रूपे प्रतिभासनक्रिया फलरूपा चक्षुष्मंतं चक्षुश्च प्रत्यापयतीति केचिन्मन्यंते तेषामपि भट्टमतानुसारिणामात्मनः स्वरूपपरिच्छेदेऽर्थपरिच्छेदस्यापि सिद्धेः । स्वार्थपरिच्छेदकपुरुषप्रसिद्धौ ततोऽन्यस्य परोक्षज्ञानस्य कल्पना न किंचिदर्थं पुष्णाति । प्रभाकरमतानुसारिणां फलज्ञानस्य स्वार्थपरिच्छित्तिरूपस्य प्रसिद्धौ करणज्ञानकल्पनावत्। कर्तुः करणमंतरेण क्रियायां व्यापारानुपपत्तेः परोक्षज्ञानस्य करणस्य कल्पनानानार्थकेति चेन्न मनसश्चक्षुरादेश्चांतर्बहिःपरिच्छित्तौ करणस्य सद्भावात् ततो बहिर्भूतस्य करणांतरस्य कल्पनायामनवस्थाप्रसंगात् ततःस्वार्थपरिच्छेदकस्य पुंसः फलज्ञानस्य वा स्वार्थपरिच्छित्तिस्वभावस्य प्रसिद्धौ स्याद्वादिदर्शनस्यैव प्रसिद्धेः । स्वयं प्रतिभासमानस्यात्मनो ज्ञानस्य वा धर्मः क्वचित्तद्विषये कथंचिदुपचर्य्यत इति सत्तासामान्यं प्रति-

भासते प्रतिभासविषयो भवतीत्युच्यते न चैवं प्रतिभासमात्रे तस्यानुप्रवेशः सिध्येत् परमार्थतः संवेदनस्यैव स्वयं प्रतिभासमानत्वात् ॥ स्यान्मतं न सत्तासामान्यं प्रतिभासमात्रं तस्य द्रव्यादिमात्रव्यापकत्वात् सामान्यादिषु प्रागभावादिषु चाभावात् किं तर्हि सकलभावाभावव्यापकं प्रतिभाससामान्यं प्रतिभासमात्रमभिधीयते इति । तदपि न सम्यक् प्रतिभाससामान्यस्य प्रतिभासविशेषनांतरीयकत्वात्प्रतिभासाद्वैतविरोधात् संतोऽपि प्रतिभासविशेषाः सत्यतां न प्रतिपद्यंते संवादकत्वाभावात्स्वप्नादिप्रतिभासविशेषवदिति चेन्न प्रतिभाससामान्यस्याप्यसत्यत्वप्रसंगात् शक्यं हि वक्तुं प्रतिभाससामान्यमसत्यं विसंवादकत्वात् स्वप्नादिप्रतिभाससामान्यवदिति ॥ न हि स्वप्नादिप्रतिभासविशेषाएव विसंवादिनो न पुनः प्रतिभाससामान्यं तद्व्यापकमिति वक्तुं युक्तं शशविषाणगगनकुसुमकूर्मरोमादीनामसत्वेऽपि तद्व्यापक सामान्यस्य सत्त्वप्रसंगात् । कथमसतां व्यापकं किंचित्सत्स्यादितिचेत्कथमसत्यानां प्रतिभासविशेषाणां व्यापकं प्रतिभाससामान्यं सत्यमिति समो वितर्कः । तस्य सर्वत्र सर्वदा सर्वथा वा विच्छेदात् सत्यं तादितिचेन्न एवं देशकालाकारविशिष्टस्यैव तस्य सत्यत्वसिद्धेः । सर्वदेशविशेषरहितस्य सर्वकाल विशेषरहितस्य च सर्वाकारविशेषरहितस्यैव सर्वत्र सर्वथा सर्वदेति विशेषयितुमशक्तेः । तथा च प्रातिभाससामान्यं सकलदेशकालाकारविशेषविशिष्टमभ्युपगच्छन्नेव वेदांतवादी स्वयमेकद्रव्यमनंतपर्यायं पारमार्थिकमितिप्रतिपत्तुमर्हति प्रमाणबलायातत्वात् तदेवास्तु परमपुरुषस्यैव बोधमयप्रकाशविशदस्य मोहान्धकारापहस्यांतर्यामिनः सुनिर्णीतत्वात् तत्र संशयानां प्रतिघातात्सकललोकोद्योतनसमर्थस्य तेजोनिधेरंशुमालिनोऽपि तस्मिन् सत्येव प्रतिभासनात्, असति चाप्रतिभासनादिति कश्चित् तदुक्तं " यो लोकान् ज्वलयत्यनल्पमहिमा सोऽप्येष तेजोनिधिर्यस्मिन्सत्यवभाति नासति पुनर्देवोंऽशुमाली स्वयं । तस्मिन्बोधमयप्रकाशाविशदे मोहांधकारापहे येंऽतर्यामिनि पूरुषे प्रतिहताः संशरते ते हताः " इति । तदपि न पुरुषाद्वैतव्यवस्थापनपरमाभासते तस्यांऽतर्यामिनः पुरुषस्य बोधमयप्रकाश विशदस्यैव बोध्यमयप्रकाश्यस्यासंभवानुपपत्तेः । यदि पुनः सर्वं बोध्यं बोधमयमेव प्रकाशमानत्वाद्बोधस्वात्मवदिति मन्यते तदा बोधस्यापि बोध्यमयत्वापत्तिरिति पुरुषाद्वैतमिच्छतो बोध्याद्वैतसिद्धिः । बोधाभावे कथं बोध्यसिद्धिरिति चेद्बोध्याभावेऽपि बोधसिद्धिः कथं ? बोध्यनांतरीयकत्वाद्बोधस्य । स्वप्नेंद्रजालादिषु बोध्याभावेऽपि बोधसिद्धेर्न बोध्यनांतरीयकोबोध इति चेन्न तत्रापि बोध्यसामान्यसद्भाव एव बोधोपपत्तेः । न हि संशयस्वप्नादिबोधोऽपि बोध्यसामन्यं व्यभिचरति बोध्यविशेषस्वेव तस्य व्यभिचाराद्भांतत्वसिद्धेः ॥ न च सर्वस्य बोध्यस्य स्वयंप्रकाशमात्रं सिद्धं स्वयं प्रकाशमानबोधविषयतया तस्य तथोपचारात्स्वयं प्रकाशमानांशुमालिप्रभाभारविषयभूतानां लोकानां प्रकाशमानोपचारवत् ततो यथा लोकानां प्रकाश्यानामभावे न तानंशुमाली ज्वलयितुमलं तथा बोध्यानां नीलसुखादीनामभावे न बोधमयप्रकाशविशदोंऽतर्यामी तान् प्रकाशयितुमीश इति प्रतिपत्तव्यं । तथाचांतः प्रकाशमानानंतपर्यायैकपुरुषद्रव्यवत्, बहिःप्रकाश्यानंतपर्यायैकाचेतनद्रव्यमपि प्रतिज्ञातव्यमिति चेतनाचेतनद्रव्यद्वैतासिद्धिः । न पुरुषाद्वैतसिद्धिः संवेदनाद्वैतसिद्धिवत् । चेतनद्रव्यस्य च सामान्यादेशादेकत्वेऽपि विशेषादेशादनेकत्वं संसारिमुक्तविकल्पात् । सर्वथैकत्वे सकृत्तद्विरोधात् । अचेतनद्रव्यस्य सर्वथैकत्वे मूर्तामूर्तद्रव्यविरोधवत् । मूर्तिमदचेतनद्रव्यं हि पुद्गलद्रव्यमनेकभेदं परमाणुस्कंधविकल्पात् पृथिव्यादिविकल्पाच्च धर्माधर्माकाशकालविकल्पममूर्तिमद्द्रव्यं चतुर्धा चतुर्विधकार्यविशेषानुमेयमिति द्रव्यस्य षड्विधस्य प्रमाणबलात्तत्वार्थालंकारैः समर्थनात् । तत्पर्यायाणां चातीतानागतवर्तमानानंतार्थव्यंजनविकल्पानां सामान्यतः सुनिश्चितासंभवद्बाधकप्रमाणात्परमागमात्प्रसिद्धेः । साक्षात्केवलज्ञानविषयत्वाच्च न द्रव्यैकांतसिद्धिः पर्यायैकांतसिद्धिर्वा । नचैतेषां सर्वद्रव्यपर्यायाणां केवलज्ञाने प्रतिभासमानानामपि प्रतिभासमात्रांतः प्रवेशः सिध्येत् विषयविषयिभेदाभावे सर्वाभावप्रसंगात् निर्विषयस्य प्रतिभासस्यासंभवान्निःप्रतिभासस्य विषयस्य वाऽव्यवस्थानात् । ततश्चाद्वैतैकांते कारकाणां कर्मादीनां क्रियाणां परिस्पंदलक्षणानां धात्वर्थलक्षणानां च दृष्टो भेदो विरुध्यत एव तस्य प्रतिभासमानस्यापि

प्रतिभासमात्रांतः प्रवेशाभावात् । स्वयं प्रतिभासमानज्ञानविषयतया प्रतिभासमानतोपचारात् स्वयं-प्रतिभास्यमानत्वेन व्यवस्थानात् । न च प्रतिभासमात्रमेव तद्भेदं प्रतिभासं जनयति तस्य तदंतः प्रविष्टस्य जन्यत्वविरोधात् । प्रतिभासमात्रस्य च जनकत्वायोगात् । नैकं स्वस्मात्प्रजायत इत्यपि सूक्तं । तथा कर्मद्वैतस्य फलद्वैतस्य लोकद्वैतस्य च विद्याविद्याद्वयबंधमोक्षद्वयवच्च प्रतिभासमान-प्रमाणविषयतया व्यवस्थितेः प्रतिभासमानस्यापि प्रमेयतया व्यवस्थितेः प्रतिभासमात्रांतः प्रवेशानुपपत्तेरभावापादनं वेदांतवादिनामनिष्टं । सूक्तमेव समंतभद्रस्वामिभिः तथा, हेतोरद्वैतसिद्धिः यदि प्रतिभासमात्रव्यतिरेकिणः प्रतिभासमानादपि यदीष्यते तदा हेतुसाध्ययोर्द्वैतं स्यादित्यपि सूक्तमेव पक्षहेतुदृष्टांतानां कुतश्चित्प्रतिभासमानानामपि प्रतिभासमात्रानुप्रवेशासंभवात् । एतेन हेतुना विनोपनिषद्वाक्यविशेषात्पुरुषाद्वैतासिद्धौ बाङ्मात्रात्कर्मकांडप्रतिपादकवाक्याद्वैतसिद्धिरपि किं न भवेत् । तस्योपनिषद्वाक्यस्य परमब्रह्मणोऽतःप्रवेशासिद्धेः । एतेन वैशेषिकादिभिः प्रतिज्ञातपदार्थभेदप्रतीत्या पुरुषाद्वैतं बाध्यत एव तद्भेदस्य प्रत्ययविशेषात्प्रतिभासमानस्यापि प्रतिभासमात्रात्मकत्वासिद्धेः । कुतः परमपुरुष एव विश्वतत्त्वानां ज्ञाता मोक्षमार्गस्य प्रणेता व्यवतिष्ठते । तदेवमीश्वरकपिलसुगतब्रह्मणां विश्वतत्वज्ञतापायान्निर्वाणमार्गप्रणयनानुपपत्तेर्यस्य विश्वतत्त्वज्ञता कर्मभूभृतां भेत्तृता मोक्षमार्गप्रणेतृता च प्रमाणबलात्सिद्धा ।

सोऽर्हन्नेव मुनींद्राणां वंद्यः समवतिष्ठते ।
तत्सद्भावे प्रमाणस्य निर्बाध्यस्य विनिश्चयात् ॥८७॥

किं पुनस्तत्प्रमाणमित्याह—

ततोंऽतरिततत्त्वानि प्रत्यक्षाण्यर्हतोंऽजसा ।
प्रमेयत्वाद्यथास्मादृक् प्रत्यक्षार्थाः सुनिश्चिताः ॥ ८८ ॥

कानि पुनरंतरिततत्त्वानि देशाद्यंतरिततत्त्वानां सत्त्वे प्रमाणाभावात् ॥ नह्यस्मदादिप्रत्यक्षं तत्र प्रमाणं देशकालस्वभावाव्यवहितवस्तुविषयत्वात् । सत्संप्रयोगे पुरुषस्येंद्रियाणां यद्बुद्धिजन्म तत्प्रत्यक्षमिति वचनात् ॥ नाप्यनुमानं तत्र प्रमाणं तदविनाभाविनो लिंगस्याभावात् ॥ नाप्यागमस्तदस्तित्वे प्रमाणं तस्यापौरुषेयस्य स्वरूपे प्रामाण्यसंभवात् । पौरुषेयस्यासर्वज्ञप्रणीतस्य प्रामाण्यासंभवात् । पौरुषेयस्य सर्वज्ञप्रणीतस्य तु सर्वज्ञसाधनात्पूर्वमसिद्धेः ॥ नाप्यर्थापत्तिः देशाद्यंतरिततत्त्वैर्विनाऽनुपपद्यमानस्य कस्यचिदर्थस्य प्रमाणषट्कप्रसिद्धस्यासंभवात् ॥ नचोपमानमंतरिततत्त्वास्तित्वे प्रमाणं तत्सदृशस्य कस्यचिदुपमानभूतस्यार्थस्यासिद्धेरुपमेयभूतांतरिततत्त्ववत् । तदुपलंभकप्रमाणपंचकाभावे च कुतोऽतरिततत्त्वानि सिध्येयुर्यतो धर्म्यसिद्धिर्न भवेत् ? धर्मिणश्चासिद्धौ हेतुराश्रयासिद्ध इति केचित् तेऽत्र न परीक्षकाः । केषांचित्स्फटिकाद्यंतरितार्थानामस्मदादिप्रत्यक्षतोऽस्तित्वसिद्धेः परेषां कुड्यादिदेशव्यवहितानामग्न्यादीनां तदविनाभाविनो धूमादिलिंगादनुमानात् कालांतरितानामपि भविष्यतां वृष्ट्यादीनां-विशिष्टमेघोन्नतिदर्शनादास्तित्वसिद्धेः । अतीतानां पावकादीनां भस्मादिविशेषदर्शनात्प्रसिद्धेः । स्वभावांतरितानां तु करणशक्त्यादीनामर्थापत्त्यास्तित्वसिद्धेः । धर्मिणामंतरिततत्त्वानां प्रसिद्धत्वाद्धेतोश्चाश्रयासिद्धत्वानुपपत्तेः ॥ नन्वेवं धर्मिसिद्धावपि हेतोश्चाश्रयासिद्धत्वाभावेऽपि पक्षोऽप्रसिद्धविशेषणः स्यात् ॥ अर्हत्प्रत्यक्षत्वस्य साध्यधर्मस्य क्वचिदप्रसिद्धेरिति न मंतव्यं पुरुषविशेषस्यार्हतः संबद्धवर्तमानार्थेषु प्रत्यक्षत्वप्रवृत्तेरविरोधादर्हत्प्रत्यक्षस्य विशेषणस्य सिद्धौ विरोधाभावात् । तद्विरोधे क्वचिज्जैमिन्यादिप्रत्यक्षविरोधापत्तेः ॥ ननु च संवृत्त्यांतरिततत्वान्यर्हतः प्रत्यक्षाणीति साधने सिद्धसाधनमेव निपुणप्रज्ञे तथोपचारप्रवृत्तेरनिवारणादित्यपि नाशंकनीयमंजसेति वचनात् । परमार्थतोऽंतरित-

तत्त्वानि प्रत्यक्षाण्यर्हतः साध्यंते न पुनरुपचारतो यतः सिद्धसाधनमनुमन्यते ॥ तथापि हतोर्विपक्षवृत्तेरनैकांतिकत्वमित्याशंकायामिदमाह —

हेतोर्नैव व्यभिचारोऽत्र दूरार्थैर्मंदरादिभिः ।
सूक्ष्मैर्वा परमाण्वाद्यैस्तेषां पक्षीकृतत्वतः ॥ ८९ ॥

नहि कानिचिद्देशांतरितानि कालांतरितानि वा तत्त्वानि पक्षबहिर्भूतानि संति यतस्तत्र वर्तमानः प्रमेयत्वादिति हेतुर्व्यभिचारी स्यात् तादृशां सर्वेषां पक्षीकरणात् । तथाहि—

तत्त्वान्यंतरितानीह देशकालस्वभावतः ।
धर्मादीनि हि साध्यंते प्रत्यक्षाणि जिनेशिनः ॥ ९० ॥

यथैवहि धर्माधर्मतत्त्वानि कानिचिद्देशांतरितानि देशांतरितपुरुषाश्रयत्वात् । कानिचित्कालांतरितानि कालांतरितप्राणिगणाधिकरणत्वात् । कानिचित्स्वभावांतरितानि देशकालाव्यवहितानामपि तेषां स्वभावतोऽतींद्रियत्वात् । तथा हिमवन्मंदरमकराकरादीन्यपि देशांतरितानि नष्टानुत्पन्नानंतपर्यायतत्त्वानि च कालांतरितानि, स्वभावांतरितानि च परमाण्वादीनि, जिनेश्वरस्य प्रत्यक्षाणि साध्यंते न च पक्षीकृतैरेव व्यभिचारोद्भावनं युक्तं सर्वस्यानुमानस्य व्यभिचारित्वप्रसंगात् ॥ ननु माभूद्व्यभिचारी हेतुः दृष्टांतस्तु साध्यविकल इत्याशंकामपहर्तुमाह —

न चास्मादृक्समक्षाणामेवमर्हत्समक्षता ।
न सिध्येदिति मंतव्यमविवादाद्द्वयोरपि ॥ ९१ ॥

येह्यस्मादृशां प्रत्यक्षाः संबद्धा वर्तमानाश्चार्थास्ते कथमर्हतः पुरुषविशेषस्य प्रत्यक्षाः न स्युस्तद्देशकालवर्तिनः पुरुषांतरस्यापि तदप्रत्यक्षत्वप्रसंगात ततो न स्याद्वादिन इव सर्वज्ञाभाववादिनोऽप्यत्रविवदंते । वादिप्रतिवादिनोरविवादाच्च साध्यसाधनधर्मयोर्दृष्टांतेन च न साध्यवैकल्यं साधनवैकल्यं वा यतोऽनन्वयहेतुःस्यात् ॥ नन्वतींद्रियप्रत्यक्षतोंऽतरिततत्त्वानि प्रत्यक्षाण्यर्हतः साध्यंते किंचेंद्रियप्रत्यक्षत इति संप्रधार्यं । प्रथमपक्षे साध्यविकलो दृष्टांतः स्यात् । अस्मादृक्प्रत्यक्षाणामर्थानामतींद्रियप्रत्यक्षतोऽर्हत्प्रत्यक्षत्वासिद्धेः । द्वितीयपक्षे प्रमाणबाधितः पक्षः, इंद्रियप्रत्यक्षतोधर्माधर्मादीनामंतरिततत्त्वानामर्हत्प्रत्यक्षत्वस्य प्रमाणबाधितत्वात् । तथाहि नार्हदिंद्रियप्रत्यक्षं धर्मादीन्यंतरिततत्त्वानि साक्षात्कर्तुं समर्थमिंद्रियप्रत्यक्षत्वादस्मदादींद्रियप्रत्यक्षवत् इत्यनुमानं पक्षस्य बाधकं न चात्र हेतोः सांजनचक्षुःप्रत्यक्षेणानैकांतिकत्वं । तस्यापि धर्माधर्मादिसाक्षात्कारित्वाभावात् नापीश्वरेंद्रियप्रत्यक्षेण तस्यासिद्धत्वात्स्याद्वादिनामिव मीमांसकानामपि तदप्रसिद्धेरितिच न चोद्यं । प्रत्यक्षसामान्यतोऽर्हत्प्रत्यक्षत्वसाधनात् । सिद्धेर्वांतरितत्वानां सामान्यतोर्हत्प्रत्यक्षत्वे धर्मादिसाक्षात्कारिणः प्रत्यक्षस्य सामर्थ्यादतींद्रियप्रत्यक्षत्वसिद्धेः । तथा दृष्टांतस्य साध्यवैकल्यदोषानवकाशात् कथमन्यथाभिप्रेतानुमानेऽप्ययं दोषो न भवेत् । तथाहि नित्यःशब्दःप्रत्यभिज्ञायमानत्वात्पुरुषवदिति । अत्र कूटस्थनित्यत्वं साध्यते कालांतरस्थायिनित्यत्वं वा ? प्रथमकल्पनायामप्रसिद्धविशेषणः पक्षः कूटस्थनित्यत्वस्य क्वचिदन्यत्राप्रसिद्धेस्तत्र प्रत्यभिज्ञानस्यैवासंभवात् पूर्वापरपरिणामशून्यत्वात्प्रत्यभिज्ञानस्य पूर्वोत्तरपरिणामव्यापिन्येकत्र वस्तुनि सद्भावात् । पुरुषे च कूटस्थनित्यत्वस्य साध्यस्याभावात्तस्य सातिशयत्वात् साध्यशून्योदृष्टांतः द्वितीयकल्पनायां तु स्वमतविरोधः । शब्दे कालांतरस्थायिनित्यत्वस्यानभ्युपगमात् । यदि पुनर्नित्यत्वसामान्यं साध्यते सातिशयेतरनित्यत्वविशेषस्य साधयितुमनुपक्रांतत्वादिति मतं तदंतरिततत्त्वानां प्रत्यक्षसामान्यतोऽर्हत्प्रत्यक्षतायां साध्यायां न किंचिद्दोषमुत्पश्यामः इति नाप्रसिद्धविशेषणः पक्षः साध्यशून्यो वा दृष्टांतः प्रसज्यते । सांप्रतं हेतोः स्वरूपासिद्धत्वं प्रतिषेधयन्नाह—

नचासिद्धं प्रमेयत्वं कात्स्न्र्यतो भागतोऽपि वा ।
सर्वथाप्यप्रमेयस्य पदार्थस्याव्यवस्थितेः ॥९२॥
यदि षड्भिः प्रमाणःस्यात्सर्वज्ञः केन वार्यते ।
इति ब्रुवन्नशेषार्थप्रमेयत्वमिहेच्छति ॥९३॥
चोदनातश्च निःशेषपदार्थज्ञानसंभवे ।
सिद्धमंतरितार्थानां प्रमेयत्वं समक्षवत् ॥९४॥

सोऽयं मीमांसकः प्रमाणबलात्सर्वस्यार्थस्य व्यवस्थामभ्युपयन् षड्भि प्रमाणैः समस्तार्थज्ञानं वा निवारयन् चोदनातो हि भूतं भवंतं भविष्यंतं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थमवगमयितुमलमिति स्वयं प्रतिपाद्यमानः सूक्ष्मांतरितदूरार्थानां प्रमेयत्वमस्मत्प्रत्यक्षार्थानामिव कथमपह्नुवीत यतः साकल्येन प्रमेयत्वं पक्षव्यापकमसिद्धं ब्रूयात् । ननु च प्रमातर्यात्मनि, करणे च ज्ञाने, फले च प्रमितिक्रियालक्षणे, प्रमेयत्वासंभवात् कर्मतामापन्नेष्वेवार्थेषु प्रमेयेषु भावाद्भागासिद्धं साधनं पक्षाव्यापकत्वादिति चेन्नैतदेव प्रमातुरात्मनः सर्वथाप्यप्रमेयत्वे प्रत्यक्षत इवानुमानादपि प्रमीयमाणत्वाभावप्रसंगात् प्रत्यक्षेण हि कर्मतयाऽऽत्मा न प्रतीयते इति प्रभाकरदर्शनं । न पुनः सर्वेणापि प्रमाणेन, तद्व्यवस्थापनविरोधात् । करणज्ञानं च प्रत्यक्षतः कर्मत्वेनाप्रतीयमानमपि घटाद्यर्थपरिच्छित्त्यन्यथानुपपत्यानुमीयमानं न सर्वथाप्यप्रमेयं ज्ञातेत्यनुमानादवगच्छति बुद्धिमिति भाष्यकारसंबरवचनविरोधात् फलज्ञानं च प्रमितिलक्षणं स्वसंवेदनप्रत्यक्षमिच्छतः कार्यानुमेयं च कथमप्रमेयं सिद्ध्येत् । एतेन करणज्ञानस्य फलज्ञानस्य च परोक्षत्वमिच्छतोऽपि भट्टस्यानुमेयत्वं सिद्धं बोद्धव्यं । घटाद्यर्थप्राकट्येनानुमीयमानस्य सर्वस्य ज्ञानस्य कथंचित्प्रमेयत्वसिद्धेः । ततो नांतरितत्त्वेषु धर्मिषु प्रमेयत्वं साधनमसिद्धं । वादिन इव प्रतिवादिनोऽपि कथंचित्तत्र प्रमेयत्वप्रसिद्धेः संदिग्धव्यतिरेकमप्येतन्न भवतीत्याह-

यन्नार्हतःसमक्षं तन्नप्रमेयं बहिर्गतः ।
मिथ्यैकांतो यथेत्येवं व्यतिरेकोऽपि निश्चितः ॥९५॥

मिथ्यैकांतज्ञानानि हि निःशेषाण्यपि परमागमानुमानाभ्यामस्मदादीनां प्रमेयाणि च प्रत्यक्षाणि चार्हत इति न विपक्षतां भजंते तद्विषयास्तु परैरभिमन्यमानाः सर्वथैकांता निरन्वयक्षणिकत्वादयो नार्हत्प्रत्यक्षा इति ते विपक्षा एव नच ते कुतश्चित्प्रमाणात्प्रमीयंत इति न प्रमेयास्तेषामसत्त्वात् । ततो ये नार्हतः प्रत्यक्षास्ते न प्रमेया यथा सर्वथैकांतज्ञानविषया इति साध्यव्यावृत्तौ साधनव्यावृत्तिनिश्चया न्निश्चितव्यतिरेकं प्रमेयत्वं साधनं निश्चितान्वयं च प्रमेयत्वं समर्थितं ततो भवत्येव साध्यसिद्धिरित्याह-

सुनिश्चितान्वयाद्धेतोः प्रसिद्धव्यतिरेकतः ।
ज्ञातार्हन् विश्वतत्त्वानामेवं सिध्येदबाधितः ॥९६॥

ननु च सूक्ष्मांतरितदूरार्थानां विश्वतत्त्वानां साक्षात्कर्ताऽर्हन्न सिद्ध्यत्येवास्मादनुमानात् पक्षस्य प्रमाणबाधितत्वाद्धेतोश्च बाधितविषयत्वात् । तथाहि देशकालस्वभावांतरितार्था धर्माधर्मादयोऽर्हतः प्रत्यक्षा इति पक्षः स चानुमानेन बाध्यते धर्मादयो न कस्यचित्प्रत्यक्षाः शश्वदत्यंतपरोक्षत्वात् ये तु कस्यचित्प्रत्यक्षास्ते नात्यंतपरोक्षाः यथा घटादयोऽर्थाः अत्यंतपरोक्षाश्च धर्मादयस्तस्मान्न कस्यचित्प्रत्यक्षा इति । न तावदत्यंतपरोक्षत्वं धर्मादीनामसिद्धं कदाचित्कचित्कथञ्चित्कस्यचित्प्रत्यक्षत्वासिद्धेः सर्वस्य प्रत्यक्षस्य तद्विषयत्वाभावात् । तथाहि विवादाध्यासितं प्रत्यक्षं न धर्माद्यर्थविषयं प्रत्यक्षशब्दवाक्य-

स्वाद्यदित्थं तदित्थं यथास्मदादिप्रत्यक्षं प्रत्यक्षशब्दवाच्यं च विवादाध्यासितं तत्प्रत्यक्षं तस्मान्न धर्माद्यर्थविषयं इत्यनुमानेन धर्माद्यर्थविषयस्य प्रत्यक्षस्य निराकरणात् न चेदमस्मदादिप्रत्यक्षागोचराविप्रकृष्टार्थग्राहि गृद्ध्रवराहपिपीलिकादिचक्षुःश्रोत्रघ्राणप्रत्यक्षव्यभिचारि साधनं तेषामपि धर्मादिसूक्ष्माद्यर्थाविषयत्वादस्मदादिप्रत्यक्षविषयसजातीयार्थग्रहणानतिक्रमात्स्वविषयस्यैवेंद्रियेण ग्रहणादिंद्रियांतरविषयस्यापरिच्छित्तेः । ननु च प्रज्ञामेधास्मृतिश्रुत्यूहापोहप्रबोधशक्तीनां प्रतिपुरुषमतिशयदर्शनात्कस्यचित्सातिशयं प्रत्यक्षं सिध्यत्परां काष्ठामापद्यमानं धर्मादिसूक्ष्माद्यर्थसाक्षात्कारि संभाव्यतएव । इत्यपि न मंतव्यं । प्रज्ञामेधादिभिः पुरुषाणां स्तोकस्तोकांतरत्वेन सातिशयत्वदर्शनात् । कस्यचिदतींद्रियार्थदर्शनानुपलब्धेः । तदुक्तं भट्टेन " येऽपि सातिशया दृष्टाः प्रज्ञामेधादिभिर्नराः । स्तोकस्तोकांतरत्वेन न त्वतींद्रियदर्शनादिति " । ननु च कश्चित्प्रज्ञावान्पुरुषः शास्त्रविषयान् सूक्ष्मानर्थानुपलब्धुं प्रभुरुपलभ्यते तद्वत्प्रत्यक्षसोऽपि धर्मादिसूक्ष्मानर्थान् साक्षात्कर्तुं क्षमः किमिति न संभाव्यते ? ज्ञानातिशयानां नियमयितुमशक्तेरित्यपि न चेतसि निधेयं । तस्य स्वजात्यनतिक्रमेणैव निरतिशयोपपत्तेः । नहि सातिशयं व्याकरणमति दूरमपि जानानो नक्षत्रग्रहचक्रातिचारादिनिर्णयेन ज्योतिःशास्त्रविदोऽतिशेते तद्बुद्धेः शब्दापशब्दयोरेव प्रकर्षोपपत्तेः । वैयाकरणांतरातिशायनस्यैव संभवात् । ज्योतिर्विदोऽपि चंद्रार्कग्रहणादिषु निर्णयेन प्रकर्षं प्रतिपद्यमानस्यापि न भवत्यादिशब्दसाधुत्वज्ञानातिशयेन वैयाकरणातिशायित्वमुत्प्रेक्षते तथा वेदेतिहासादिज्ञानातिशयवतोऽपि कस्यचिन्न स्वर्गदेवताधर्माधर्मसाक्षात्करणमुपपद्यते एतदभ्यधायि " एकशास्त्रपरिज्ञाने दृश्यतेऽतिशयो महान् । ननु शास्त्रांतरज्ञानं तन्मात्रेणैव लभ्यते । ज्ञात्वा व्याकरणं दूरं बुद्धिः शब्दापशब्दयोः । प्रकृष्यते न नक्षत्रतिथिग्रहणनिर्णये । ज्योर्तिविच्च प्रकृष्टोऽपि चंद्रार्कग्रहणादिषु । न भवत्यादिशब्दानां साधुत्वं ज्ञातुमर्हति । तथा वेदेतिहासादिज्ञानातिशयवानपि । न स्वर्गदेवताऽपूर्वप्रत्यक्षीकरणे क्षम " इति । एतेन यदुक्तं सर्वज्ञवादिना ज्ञानं क्वचित्परां काष्ठां प्रतिपद्यते प्रकृष्यमाणत्वात् यद्यत्प्रकृष्यमाणं तत्तत्कचित्परांकाष्ठां प्रतिपद्यमानं दृष्टं यथा परिमाणमापरमाणोः प्रकृष्यमाणं नभसि, प्रकृष्यमाणं च ज्ञानं तस्मात्कचित्परां काष्ठां प्रतिपद्यत इति । तदपि प्रत्याख्यातं ज्ञानं हि धर्मित्वेनोपादीयमानं प्रत्यक्षज्ञानं, शास्त्रार्थज्ञानमनुमानादिज्ञानं, वा भवेद्गत्यंतराभावात् तत्रेंद्रियप्रत्यक्षं प्रतिप्राणिविशेषं प्रकृष्यमाणमपि स्वविषयानतिक्रमेणैव परां काष्ठा प्रतिपद्यते गृद्ध्रवराहादींद्रियप्रत्यक्षज्ञानवत् । न पुनरतींद्रियार्थविषयत्वेनेति प्रतिपादनात् । शास्त्रार्थज्ञानमपि व्याकरणादिविषयं प्रकृष्यमाणं परां काष्ठामुपव्रजन्न शास्त्रांतरविषयतया धर्मादिसाक्षात्कारितया वा तामास्कंदेत् तथाऽनुमानादिज्ञानमपि प्रकृष्यमाणमनुमेयादिविषयतया परांकाष्ठामास्कंदेत् । न पुनस्तद्विषयसक्षात्कारितया । एतेन ज्ञानसामान्यं धर्मि क्वचित्परमप्रकर्षमियर्ति प्रकृष्यमाणत्वात् परमाणुवदिति वदन्नपि निरस्तः । प्रत्यक्षादिज्ञानव्यक्तिष्वन्यतमज्ञानव्यक्तेरेव परमप्रकर्षगमनसिद्धेस्तद्व्यतिरेकेण ज्ञानसामान्यस्य प्रकर्षगमनानुपपत्तेस्तस्य निरतिशयत्वात् । यद्यपि केनचिदभिधीयते श्रुतज्ञानमनुमानज्ञानं वाऽभ्यस्यमानमभ्यासस्यात्मीभावे तदर्थसाक्षात्कारितया परां दशामासदयति तदपि स्वकीयमनोरथमात्रं क्वचिदभ्याससहस्रेणापि ज्ञानस्य स्वविषयपरिच्छित्तौ विषयांतरपरिच्छित्तेरनुपपत्तेर्नहि गगनतलोत्प्लवनमभ्यस्यतोऽपि कस्यचित्पुरुषस्य योजनशतसहस्रोत्प्लवनं लोकांतोत्प्लवनं वा संभाव्यते तस्य दशहस्तांतरोत्प्लवनमात्रदर्शनात्तदप्युक्तं " दशहस्तांतरं व्योम्नि योनामोल्लुत्य गच्छति न योजनमसौ गन्तुं शक्तोऽभ्यासशतैरपि " इत्यत्राभिधीयते यत्तावदुक्तं विवादाध्यासितं च प्रत्यक्षं न धर्मादिसूक्ष्माद्यर्थविषयं प्रत्यक्षशब्दवाच्यत्वादस्मदादिप्रत्यक्षवदिति तत्र किमिदं प्रत्यक्षं, सत्संप्रयोगे पुरुषस्येंद्रियाणां बुद्धिजन्मप्रत्यक्षमिति चेत्तर्हि विवादाध्यासितस्य प्रत्यक्षस्यैतत्प्रत्यक्षविलक्षणत्वात् प्रत्यक्षशब्दवाच्यत्वेऽपि न धर्मादिसूक्ष्माद्यर्थविषयत्वाभावःसिध्यति यादृशं हींद्रियप्रत्यक्षं प्रत्यक्षशब्दवाच्यं धर्माद्यर्थासाक्षात्कारि दृष्टं तादृशमेव देशांतरे कालांतरे च विवादाध्यासितं प्रत्यक्षं तथा साधयितुं युक्तं तथाविधप्रत्यक्षस्यैव धर्माद्यविषयत्वस्य साधने प्रत्यक्षशब्दवाच्यस्य हेतोर्गमकत्वोपपत्तेः । तस्य

तेनाविनाभावनियमनिश्चयात् न पुनस्तद्विलक्षणस्यार्हत्प्रत्यक्षस्य धर्मादिसूक्ष्माद्यर्थविषयत्वाभावः साधयितुं शक्यस्तस्य तदगमकत्वादविनाभावनियमनिश्चयानुपपत्तेः शब्दसाम्येऽप्यर्थभेदात्, कथमन्यथा विषाणिनी वाग् गोशब्दवाच्यत्वात्पशुवादित्यनुमानं गमकं न स्यात् । यदि पुनर्गोशब्दवाच्यत्वस्याविशेषेऽपि पशोरेव विषाणित्वं ततः सिध्यति तत्रैव तत्साधने तस्य गमकत्वान्न पुनर्वागादौ तस्य तद्विलक्षणत्वादितिमतं तदा प्रत्यक्षशब्दवाच्यत्वाविशेषेऽपि नार्हत्प्रत्यक्षस्य सूक्ष्माद्यर्थविषयत्वासिद्धिरर्थभेदात् । अक्ष्णोति व्याप्नोति जानातीत्यक्षः आत्मा तमेव प्रतिगतं प्रत्यक्षमिति हि भिन्नार्थमेवेंद्रियप्रत्यक्षात् तस्याशेषार्थगोचरत्वात् मुख्यप्रत्यक्षत्वसिद्धेः । तथाहि विवादाध्यासितमर्हत्प्रत्यक्षं मुख्यं निःशेषद्रव्यपर्यायविषयत्वात् यत्तु न मुख्यं तन्न तथा यथाऽस्मदादिप्रत्यक्षं, सर्वद्रव्यपर्यायविषयं चार्हत्प्रत्यक्षं तस्मान्मुख्यं । नचेदमसिद्धं साधनं । तथाहि सर्वद्रव्यपर्यायविषयमर्हत्प्रत्यक्षं क्रमातिक्रांतत्वात् क्रमातिक्रांतं तन्मनोक्षानपेक्षत्वान्मनोक्षानपेक्षं तत्सकलकलंकविकलत्वात् सकलाप्रशमाज्ञानादर्शनावीर्यलक्षणकलंकविकलं तत्, प्रक्षीणकारणमोहज्ञानदर्शनावरणवीर्यांतरायत्वात् । यन्नेत्थं तन्नैवं यथाऽस्मदादिप्रत्यक्षं । इत्थं च तत्तस्मादेवमिति हेतुसिद्धिः । ननु च प्रक्षीणमोहादिचतुष्टयत्वं कुतोऽर्हतः सिद्धं ? तत्कारणप्रतिपक्षप्रकर्षदर्शनात् । तथाहि मोहादिचतुष्टयं क्वचिदत्यंतं प्रक्षीयते तत्कारणप्रतिपक्षप्रकर्षसद्भावात् । यत्र यत्कारणप्रतिपक्षप्रकर्षसद्भावस्तत्र तदत्यंतं प्रक्षीयमाणं दृष्टं यथा चक्षुषि तिमिरं तथाच केवलिनि मोहादिचतुष्टयस्य कारणप्रतिपक्षप्रकर्षसद्भावः तस्मादत्यंतं प्रक्षीयते । किं पुनः कारणं मोहादिचतुष्टयस्येति चेदुच्यते । मिथ्यादर्शनमिथ्याज्ञानमिथ्याचारित्रत्रयं तस्य तद्भाव एव भावात् यस्य यद्भाव एव भावस्तस्य तत्कारणं यथा श्लेष्मविशेषस्तिमिरस्य, मिथ्यादर्शनादित्रयसद्भाव एव भावश्च मोहादिचतुष्टयस्य तस्मात्तत्कारणं । कः पुनस्तस्य प्रतिपक्ष इति चेत् सम्यग्दर्शनादित्रयं तत्प्रकर्षे तदपकर्षदर्शनात् । यस्य प्रकर्षे यदपकर्षस्तस्य स प्रतिपक्षो यथा शीतस्याग्निः । सम्यग्दर्शनादित्रयप्रकर्षेऽपकर्षश्च मिथ्यादर्शनादित्रयस्य तस्मात्तस्य प्रतिपक्षः । कुतः पुनस्तत्प्रतिपक्षस्य सम्यग्दर्शनादित्रयस्य प्रकर्षपर्यंतगमनं प्रकृष्यमाणत्वात् यत्प्रकृष्यमाणं तत्कचित्प्रकर्षपर्यंतं गच्छति यथा परिमाणमापरमाणोः प्रकृष्यमाणं नभसि, प्रकृष्यमाणं च सम्मग्दर्शनादित्रयं तस्मात्कचित्प्रकर्षपर्यंतं गच्छति यत्र यत्प्रकर्षगमनं तत्र तत्प्रतिपक्षमिथ्यादर्शनादित्रयमत्यंतं प्रक्षीयते यत्र यत्प्रक्षयः, तत्र तत्कार्यस्य मोहादिकर्मचतुष्टयात्यंतिकः क्षय इति तत् कार्याप्रशमादिकलंकचतुष्टयवैकल्यात्सिद्धं सकलकलंकविकलत्वमर्हत्प्रत्यक्षस्य मनोक्षनिरपेक्षत्वं साधयति । तच्चाक्रमत्वं तदपि सर्वद्रव्यपर्यायविषयत्वं ततोमुख्यं तत्प्रत्यक्षं प्रसिद्धं । सांव्यवहारिकं तु मनोक्षापेक्षं वैशद्यस्य देशतः सद्भावात् इति न प्रत्यक्षशब्दवाच्यत्वसाधर्म्यमात्रात् धर्मादिसूक्ष्माद्यर्थाविषयत्वं विवादाध्यासितस्य प्रत्यक्षस्य सिध्यति यतः पक्षस्यानुमानबाधितत्वात्कालात्ययापदिष्टो हेतुः स्यात् तदेवं निरवद्याद्धेतोर्विश्वतत्त्वानां ज्ञाताऽर्हन्नेवावतिष्ठते सकलबाधकप्रमाणरहितत्वाच्च तथाहि ।

प्रत्यक्षमपरिच्छिंदत्त्रिकालं भुवनत्रयं ।
रहितं विश्वतत्त्वज्ञैर्नहि तद्बाधकं भवेत् ॥ ९७ ॥
नानुमानोपमानार्थापत्त्यागमबलादपि ।
विश्वज्ञाभावसंसिद्धिस्तेषां सद्विषयत्वतः ॥ ९८ ॥
नार्हन्निःशेषतत्वज्ञोवक्तृत्वपुरुषत्वतः ।
ब्रह्मादिवदिति प्रोक्तमनुमानं न बाधकं ॥ ९९ ॥

हेतोरस्य विपक्षेण विरोधाभावनिश्चयात् ।
वक्तृत्वादेःप्रकर्षेऽपि ज्ञानानिर्हाससिद्धितः ॥ १०० ॥
नोपमानमशेषाणां नृणामनुपलंभतः ।
उपमानोपमेयानां तद्बाधकमसंभवात् ॥ १०१ ॥
नार्थापत्तिरसर्वज्ञं जगत्साधयितुं क्षमा ।
क्षीणत्वादन्यथाभावाभावात्तत्तदबाधिका ॥ १०२ ॥
नागमोऽपौरुषेयोऽस्ति सर्वज्ञाभावसाधनः ।
तस्य कार्ये प्रमाणत्वादन्यथाऽनिष्टसिद्धितः ॥ १०३ ॥
पौरुषेयोऽप्यसर्वज्ञप्रणीतो नास्य बाधकः ।
तत्र तस्याप्रमाणत्वाद्धर्मादाविव तत्त्वतः ॥ १०४ ॥
अभावोऽपि प्रमाणं ते निषेध्याधारवेदने ।
निषेध्यस्मरणे च स्यान्नास्तिता ज्ञानमंजसा ॥ १०५ ॥
नचाशेषजगज्ज्ञानं कुतश्चिदुपपद्यते ।
नापि सर्वज्ञसंवित्तिः पूर्वं तत्स्मरणं कुतः ॥ १०६ ॥
येनाशेषजगत्यस्य सर्वज्ञस्य निषेधनं ।
परोपगमतस्तस्य निषेधे स्वेष्टबाधनं ॥ १०७ ॥
मिथ्यैकांतनिषेधस्तु युक्तोऽनेकांतसिद्धितः ।
नासर्वज्ञजगत्सिद्धेः सर्वज्ञप्रतिषेधनं ॥ १०८ ॥
एवं सिद्धः सुनिर्णेतासंभवद्बाधकत्वतः ।
सुखवद्विश्वतत्त्वज्ञः सोऽर्हन्नेव भवानिह ॥ १०९ ॥
स कर्मभूभृतां भेत्ता तद्विपक्षप्रकर्षतः ।
यथा शीतस्य भेत्तेहकश्चिदुष्णप्रकर्षतः ॥ ११० ॥

यस्य धर्मादिसूक्ष्माद्यर्थाः प्रत्यक्षा भगवतोऽर्हतः सर्वज्ञस्यानुमानसामर्थ्यात्तस्य बाधकं प्रमाणं प्रत्यक्षादीनामन्यतमं भवेत् गत्यंतराभावात् तत्र न तावदस्मदादिभिःप्रत्यक्षं सर्वत्र सर्वदा सर्वज्ञस्य बाधकं तेन त्रिकालभुवनत्रयस्य सर्वज्ञरहितस्यापरिच्छेदात् तत्परिच्छेदे तस्यास्मदादिप्रत्यक्षत्वविरोधात् नापि योगिप्रत्यक्षं तद्बाधकं तस्य तत्साधकत्वात्सर्वज्ञाभाववादिनां तदनभ्युपगमाच्च । नाप्यनुमानोपमानार्थापत्त्यागमानां सामर्थ्यात्सर्वज्ञस्याभावसिद्धिः तेषां सद्विषयत्वात् प्रत्यक्षवत् । स्यान्मतं नार्हन्निःशेषतत्त्ववेदी वक्तृत्वात्पुरुषत्वात् ब्रह्मादिवदित्याद्यनुमानात्सर्वज्ञत्वनिराकृतिः सिध्यत्येव सर्वज्ञविरुद्धस्यासर्वज्ञस्य कार्यं वचनं हि तदभ्युपगम्यमानं स्वकारणं किंचिज्ज्ञत्वं साधयति तच्च सिध्यत्स्वविरुद्धं निःशेषज्ञानं निवर्तयतीति विरुद्धकार्योपलब्धिः शीताभावे साध्ये धूमवद्विरुद्धव्याप्तोपलब्धिर्वा सर्व-

ज्ञत्वेन हि विरुद्धमसर्वज्ञत्वं तेन च व्याप्तं वक्तृत्वमिति । एतेन पुरुषत्वोपलब्धिर्विरुद्धव्याप्तोपलब्धिरुक्ता सर्वज्ञत्वेन हि विरुद्धमसर्वज्ञत्वं तेन च व्याप्तं पुरुषत्वमिति । तथाच सर्वज्ञो यदि वक्ताऽभ्युपगम्यते यदि वा पुरुषस्तथापि वक्तृत्वपुरुषत्वाभ्यां तदभावः सिध्यतीति केचिदाचक्षते ? तदेतदप्यनुमानद्वितयं त्रितयं वा परैः प्रोक्तं न सर्वज्ञस्य बाधकमविनाभावनियमनिश्चयस्यासंभवात् । हेतोर्विपक्षेबाधकप्रमाणाभावादसर्वज्ञे हि साध्ये तद्विपक्षःसर्वज्ञ एव तत्र च प्रकृतस्य हेतोर्न बाधकमस्ति । विरोधो बाधक इति चेन्न सर्वज्ञस्य वक्तृत्वेन विरोधासिद्धेः । तस्य तेन विरोधो हि सामान्यतो विशेषतो वा स्यात् । न तावत्सामान्यतो वक्तृत्वेन सर्वज्ञत्वं विरुध्यते, ज्ञानप्रकर्षे वक्तृत्वस्यापकर्षप्रसंगात् । यद्धि येन विरुद्धं तत्प्रकर्षे तस्यापकर्षो दृष्टो यथा पावकस्य प्रकर्षे तद्विरोधिनो हिमस्य । नच ज्ञानप्रकर्षे वक्तृत्वस्यापकर्षो दृष्टस्तस्मान्न तत्तद्विरुद्धं वक्ता च स्यात्सर्वज्ञश्च स्यादिति संदिग्धविपक्षव्यावृत्तिको हेतुर्न सर्वज्ञाभावं साधयेत् । यदि पुनर्वक्तृत्वविशेषेण सर्वज्ञस्य विरोधोऽभिधीयते, तदा हेतुरसिद्धएव नहि परमात्मनो युक्तिशास्त्राविरुद्धो वक्तृत्वविशेषः संभवति यः सर्वज्ञविरोधी तस्य युक्तिशास्त्राविरुद्धार्थवक्तृत्वनिश्चयात् । नच युक्तिशास्त्राविरोधि वक्तृत्वं ज्ञानातिशयमंतरेण दृष्टं ततः सकलार्थविषयं वक्तृत्वं युक्तिशास्त्राविरोधि सिद्ध्यत्सकलार्थवेदित्वमेव साधयेत् इति वक्तृत्वविशेषो विरुद्धो हेतुः साध्यविपरीतसाधनात् । तथा पुरुषत्वमपि सामान्यतः सर्वज्ञाभावसाधनायोपादीयमानं संदिग्धविपक्षव्यावृत्तिकमेव साध्यं न साधयेत् विपक्षेण विरोधासिद्धेः पुरुषश्च स्यात्कश्चित्सर्वज्ञश्चेति । नहि ज्ञानातिशयेन तत्पुरुषत्वं विरुध्यते कस्यचित्सातिशयज्ञानस्य महापुरुषत्वसिद्धेः । पुरुषत्वविशेषो हेतुश्चेत् स यद्यज्ञानादिदोषदूषितपुरुषत्वमुच्यते तदा हेतुरसिद्धः परमेष्ठिनि तथाविधपुरुषत्वासंभवात् । अथ निर्दोषपुरुषत्वविशेषो हेतुस्तदा विरुद्धः साध्यविपर्ययसाधनात् सकलाज्ञानादिदोषविकलपुरुषत्वं हि परमात्मनि सिध्यत् सकलज्ञानादिगुणप्रकर्षपर्यंतगमनमेव साधयेत् तस्य तेन व्याप्तत्वादिति नानुमानं सर्वज्ञस्य बाधकं बुध्यामहे । नाप्युपमानं तस्योपमानोपमेयग्रहणपूर्वकत्वात् प्रसिद्धे हि गोगवययोरुपमानोपमेयभूतयोः सादृश्ये दृश्यमानाद्गोर्गवये विज्ञानमुपमानं सादृश्योपाध्युपमेयविषयत्वात् । तथोक्तम् । " दृश्यमानाद्यदन्यत्र विज्ञानमुपजायते । सादृश्योपाधितः कैश्चिदुपमानमिति स्मृतं " । न चोपमानभूतानामस्मदादीनामुपमेयभूतानां चासर्वज्ञत्वेन साध्यानां पुरुषविशेषाणां साक्षात्करणं संभवति । नच तेष्वसाक्षात्करणेषु तत्सादृश्यं प्रसिध्यति । न चाप्रसिद्धतत्सादृश्यः सर्वज्ञाभाववादी सर्वेऽप्यसर्वज्ञाः पुरुषाः कालांतरदेशांतरवर्तिनो यथास्मदादय इत्युपमानं कर्तुमुत्सहते जात्यंध इव दुग्धस्य बकोपमानं तत्साक्षात्करणे वा स एव सर्वज्ञ इति । कथमुपमानं तदभावसाधनायालं । तथार्थापत्तिरपि न सर्वज्ञरहितं जगत्सर्वदा साधयितुं क्षमा क्षीणत्वात्तस्याः साध्याविनाभावनियमाभावात् सर्वज्ञेन रहितं जगत्तत्कृतधर्माद्युपदेशासंभवान्यथानुपपत्तेरित्यर्थापत्तिरपि न साधीयसी सर्वज्ञकृतधर्माद्युपदेशासंभवस्यार्थापत्त्युत्थापकस्यार्थस्य प्रत्यक्षाद्यन्यतमप्रमाणेन विज्ञातुमशक्तेः । नन्वपौरुषाद्वेदादेव धर्माद्युपदेशसिद्धेः । धर्मे चोदनैव प्रमाणमिति वचनान्न धर्मादिसाक्षात्करी कश्चित्पुरुषः संभवति यतोऽसौ धर्माद्युपदेशकारी स्यात् । ततः सिद्ध एव सर्वज्ञकृतधर्माद्युपदेशासंभव इति चेन्न । वेदादपौरुषेयाद्धर्माद्युपदेशनिश्चययोगात् सहि वेदः केनचिद्व्याख्यातो धर्मस्य प्रतिपादकः स्यादव्याख्यातो वा ? प्रथमपक्षे तद्व्याख्याता रागादिमान् विरागो वा ? रागादिमांश्चेन्न तद्व्याख्यानाद्वेदार्थनिश्चयस्तदसत्यत्वस्य संभवात् । व्याख्याता हि रागाद्द्वेषादज्ञानाद्वा वितथार्थमपि व्याचक्षाणो दृष्ट इति वेदार्थं वितथमपि व्याचक्षीत, अवितथमपि व्याचक्षीत नियामकाभावात् । गुरुपर्वक्रमायात वेदार्थवेदी महाजनो नियामक इति चेन्न तस्यापि रागादिमत्वे यथार्थवेदित्वानिर्णयानुपपत्तेः गुरुपर्वक्रमायातस्य वितथार्थस्यापि वेदे संभाव्यमानत्वादुपनिषद्वाक्यार्थवदीश्वराद्यर्थवद्वा नहि स गुरुपर्वक्रमायातो न भवति वेदार्थो वा न चावितथः प्रतिपद्यते मीमांसकैस्तद्वदग्निष्टोमेन यजेत स्वर्गकाम इत्यादि वेदवाक्यस्यार्थः कथं वितथः पुरुषव्याख्यानान्न शक्येत वक्तुं । यदि पुनर्वीतरागद्वेषमोहो वेदस्य व्या-

ख्याता प्रतिज्ञायते तदा स एव पुरुषविशेषः सर्वज्ञः किमिति न क्षम्यते वेदार्थानुष्ठानपरायण एव वीतरागद्वेषः पुरुषोऽभ्युपगम्यते वेदार्थव्याख्यानविषय एव रागद्वेषाभावात् न पुनर्वीतसकलविषय रागद्वेषःकश्चित् कस्यचित्कचिद्विषयवीतरागद्वेषस्यापि विषयांतरे रागद्वेषदर्शनात्तथावेदार्थविषय एव वीतमोहपुरुषस्तद्व्याख्याताऽभ्यनुज्ञायते न सकलविषये कस्यचित्कचित्सातिशयज्ञानसद्भावेऽपि विषयांतरेषु अज्ञानदर्शनात् न च सकलविषयरागद्वेषप्रक्षयो ज्ञानप्रकर्षो वा वेदार्थ व्याचक्षाणस्योपयोगी यो हि यद्व्याचष्टे तस्य तद्विषयरागद्वेषाज्ञानाभावः प्रेक्षावद्भिरन्विष्यते रागादिमतोऽविप्रलंभसंभवात् न पुनः सर्वविषये कस्यच्छिास्त्रांतरे यथार्थव्याख्यानानिर्णयविरोधात् तथापि तदन्वेषणे च सर्वज्ञवीतराग एव सर्वस्य शास्त्रस्य व्याख्याताभ्युपगंतव्य इत्यसर्वज्ञशास्त्रव्याख्यानव्यवहारो निखिलजनप्रसिद्धोऽपि न भवेत् । नचैवं युगीनशास्त्रव्याख्याता कश्चित्प्रक्षीणाशेषरागद्वेषः सर्वज्ञः प्रतीयते इति नियतविषय शास्त्रार्थपरिज्ञानं तद्विषयरागद्वेषरहितत्वं च यथार्थव्याख्यानिबंधनं तद्व्याख्यातुरभ्युपगंतव्यं तच्च वेदार्थव्याचक्षाणस्यापि ब्रह्मप्रजापतिमनुप्रमुखजैमिन्यादेर्विद्यते एव तस्य वेदार्थविषयाज्ञानरागद्वेषविकलत्वादन्यथा तद्व्याख्यानस्य शिष्टपरम्परया परिग्रहविरोधात्ततोवेदस्य व्याख्याता तदर्थज्ञ एव न पुनः सर्वज्ञः तद्विषयरागद्वेषरहित एव न पुनः सकलविषयरागद्वेषशून्यो यतः सर्वज्ञो वीतरागश्च पुरुषविशेषः क्षम्यते इति केचित्तेऽपि न मीमांसका, सकलसमयव्याख्यानस्य यथार्थभावानुषंगात् । स्यान्मतं समयांतराणां व्याख्यानं न यथार्थं बाधकप्रमाणसद्भावात् प्रसिद्धमिथ्योपदेशव्याख्यानवत् इति तदपि न विचारक्षमं वेदव्याख्यानस्यापि बाधकसद्भावात् यथैव हि सुगतकपिलादिसमयांतराणां परस्परविरुद्धार्थाभिधायित्वं बाधकं तथा भावनानियोगविधिधात्वर्थादिवेदवाक्यार्थव्याख्यानानामपि तत्प्रसिद्धमेव । न चैतेषां मध्ये भावनामात्रस्य नियोगमात्रस्य वा वेदवाक्यार्थस्यान्ययोगव्यवच्छेदेन निर्णयः कर्तुं शक्यते सर्वथा विशेषाभावात् तत्राक्षेपसमाधानानां समानत्वादिति देवागमालंकृतौ तृत्त्वार्थालंकारे विद्यानन्दमहोदये च विस्तरतो निर्णीतं प्रतिपत्तव्यं ततो न केनचित्पुरुषेण व्याख्याताद्वेदाद्धर्माद्युपदेशः समवतिष्ठते, नाप्यव्याख्यातात्, तस्य स्वयं स्वार्थप्रतिपादकत्वेन तदर्थविप्रतिपत्त्यभावप्रसंगात् । दृश्यते च तदर्थविप्रतिपत्तिर्वेदवादिनामिति न वेदाद्धर्माद्युपदेशस्य संभवः । पुरुषविशेषादेव सर्वज्ञवीतरागात्तस्य संभवात्ततो न धर्माद्युपदेशासंभवः पुरुषविशेषस्य सिद्धेः यः सर्वज्ञरहितं जगत्साधयेदिति कुतोऽर्थापत्तिः सर्वज्ञस्य बाधिका । यदि पुनरागमः सर्वज्ञस्य बाधकः तदाप्यसावपौरुषेयः पौरुषेयो वा, न तावदपौरुषेयस्तस्य कार्यादर्थादन्यत्र परैः प्रमाण्यानिष्टेरन्यथानिष्टसिद्धिप्रसंगात्, नापि पौरुषेयस्तस्यासर्वज्ञपुरुषप्रणीतस्य प्रमाण्यानुपपत्तेः सर्वज्ञप्रणीतस्य तु परेषामसिद्धेरन्यथा सर्वज्ञसिद्धेः ततस्तदभावायोगादिति न प्रभाकरमतानुसारिणां प्रत्यक्षादिप्रमाणानामन्यतममपि प्रमाणं सर्वज्ञाभावासाधनायालं यतः सर्वज्ञबाधकमभिधीयते । भट्टमतानुसारिणामपि सर्वज्ञस्याभावसाधनमभावप्रमाणं नोपपद्यत एव तद्धि सदुपलंभप्रमाणपंचकनिवृत्तिरूपं साच सर्वज्ञविषयसदुपलंभकप्रमाणपंचकनिवृत्तिरात्मनः परिणामो वा विज्ञानं वान्यवस्तुनि स्याद्गत्यंतराभावात् । न तावत्सर्वज्ञविषयप्रत्यक्षादिप्रमाणरूपेणात्मनः परिणामः सर्वज्ञस्याभावसाधकः सत्यपि सर्वज्ञे तत्संभवात् तद्विषयस्य ज्ञानस्यासंभवात्तस्यातींद्रियत्वात्परचेतोवृत्तिविशेषवत् । नापि निषेध्यात्सर्वज्ञादन्यवस्तुनि विज्ञानं, तदेकज्ञानसंसर्गिणः कस्यचिद्वस्तुनोऽभावात् घटैकज्ञानसंसर्गिभूतलवत् न हि यथा घटभूतलयोश्चाक्षुषैकज्ञानसंसर्गात् केवलभूतले प्रतिषेध्याद् घटादन्यत्र वस्तुनि विज्ञानं घटाभावव्यवहारं साधयति तथा प्रतिषेध्यात्सर्वज्ञादन्यत्र वस्तुनि विज्ञानं न तदभावसाधनसमर्थं संभवति सर्वज्ञस्यातींद्रियत्वात्तद्विषयज्ञानस्यासंभवात्तदेकज्ञानसंसर्गिणोऽस्मदादिप्रत्यक्षस्यकस्यचिद्वस्तुनोऽनभ्युपगमादनुमानाद्येकज्ञानेन सर्वज्ञतदन्यवस्तुनोः संसर्गात्सर्वज्ञैकज्ञानसंसर्गिणि क्वचिदनुमेयेऽर्थेऽनु-

---

१ भाट्टाः । २ प्राभाकराः । ३ वेदान्तिनः ।

मानज्ञानं संभवत्येवेति चेन्न तथा क्वचित्सर्वज्ञस्य सिद्धिप्रसंगात् सर्वत्र सर्वदा सर्वस्य सर्वज्ञस्याभावे कस्यचिद्वस्तुनस्तेनैकज्ञानसंसर्गायोगात्तदन्यवस्तुविज्ञानलक्षणादभावप्रमाणात्सर्वज्ञाभावसाधनविरोधात्। किंच गृहीत्वा निषेध्याधारवस्तुसद्भावं स्मृत्वा च तत्प्रतियोगिनं निषेध्यमर्थं नास्तीति ज्ञानं मानसमक्षानपेक्षं जायत इति येषां दर्शनं तेषां निषेध्यसर्वज्ञाधारभूतं त्रिकालं भुवनत्रयं च कुतश्चित्प्रमाणाद्ग्राह्यं तत्प्रतियोगी च प्रतिषेध्यः सर्वज्ञः स्मर्त्तव्य एवान्यथा तत्र नास्तितज्ञानस्य मानसस्यानुपपत्तेर्न च निषेध्याधारत्रिकालजगत्त्रयसद्भावग्रहणं कुतश्चित्प्रमाणान्मीमांसकस्यास्ति नापि प्रतिषेध्यसर्वज्ञस्य स्मरणं तस्य प्रागननुभूतत्वात्पूर्वं तदनुभवे वा क्वचित्सर्वत्र सर्वदा सर्वज्ञाभावसाधनविरोधात्, ननु च पराभ्युपगमात्सर्वज्ञः सिद्धस्तदाधारभूतं च त्रिकालं भुवनत्रयं सिद्धं, तत्र श्रुतसर्वज्ञस्मरणनिमित्तं तदाधारवस्तुग्रहणनिमित्तं च सर्वज्ञे नास्तिताज्ञानं मानसमक्षानपेक्षं युक्तमेवेतिचेन्न। स्वेष्टबाधनप्रसंगात् पराभ्युपगमस्य हि प्रमाणसिद्धत्वे तेन सिद्धं सर्वज्ञं प्रतिषेधतोऽभावप्रमाणस्य तद्बाधनप्रसंगात् तस्याप्रमाणत्वे न ततोनिषेध्याधारवस्तुग्रहणं निषेध्यसर्वज्ञस्मरणं वा तथ्यं स्यात्तदभावे तत्र सर्वज्ञेऽभावप्रमाणं न प्रादुर्भवेदिति तदेव स्वेष्टबाधनं दुर्वारमायातं। नन्वेवं मिथ्यैकांतस्य प्रतिषेधः स्याद्वादिभिः कथं विधीयते तस्य क्वचित्कथंचित्कदाचिदनुभवाभावे स्मरणासंभवात् तस्यानुस्मर्यमाणस्य प्रतिषेधायोगात्क्वचित्कदाचित्तदनुभवे वा सर्वथा तत्प्रतिषेधविरोधात् पराभ्युपगमात्प्रसिद्धस्य मिथ्यैकांतस्य स्मर्यमाणस्य प्रतिषेधेऽपि स पराभ्युपगमः प्रमाणमप्रमाणं वा, यदि प्रमाणं तदा तेनैव मिथ्यैकांतस्याभावसाधनाय प्रवर्तमानं प्रमाणं बाध्यते इति स्याद्वादिनामपि स्वेष्टबाधनं, यदि पुनरप्रमाणं पराभ्युपगमस्तदापि ततः सिद्धस्य मिथ्यैकांतस्य स्मर्यमाणस्य नास्तीतिज्ञानं प्रजायमानं मिथ्यैव स्यादिति तदेवस्वेष्टबाधनं परेषामिवेति न मंतव्यं स्याद्वादिनामनेकांतसिद्धेरेव मिथ्यैकांतनिषेधनस्य व्यवस्थानात् प्रमाणतः प्रसिद्धे हि बहिरंतर्वा वस्तुन्यनेकांतात्मनि तत्राध्यारोप्यमाणस्य मिथ्यैकांतस्य दर्शनमोहोदयाकुलितचेतसां बुद्धौ विपरीताभिनिवेशस्य प्रतिभासमानस्य प्रतिषेधः क्रियते प्रतिषेध्यव्यवहारो वा प्रवर्त्तते विप्रतिपन्नप्रत्यायनाय सन्नयोपन्यासात्। न चैवमसर्वज्ञजगत्सिद्धेरेव सर्वज्ञप्रतिषेधो युज्यते तस्याः कुतश्चित्प्रमाणादसंभवस्य समर्थनात्तदेवमभावप्रमाणस्यापि सर्वज्ञबाधकस्य सदुपलंभकप्रमाणपंचकवदसंभवाद्देशांतरकालांतरपुरुषांतरापेक्षयाऽपि तद्बाधकशंकानवकाशात्सिद्धः सुनिर्णितासंभवद्बाधकप्रमाणः सर्वज्ञः स्वसुखादिवत्सर्वत्र वस्तुसिद्धौ सुनिर्णितासंभवद्बाधकप्रमाणत्वमंतरेणाश्वासनिबंधनस्य कस्यचिदभावात्। स च विश्वतत्वानां ज्ञातार्हन्नेव परमेश्वरादेर्विश्वतत्वज्ञतानिराकरणादेवावसीयते। स एव कर्मभूभृतां भेत्ता निश्चीयतेऽन्यथा तस्य विश्वतत्वज्ञतानुपपत्तेः। स्यादाकूतं कर्मणां कार्यकारणसंतानेन प्रवर्तमानानामनादित्वाद्विनाशहेतोरभावात्कथं कर्मभूभृतां भेत्ता विश्वतत्त्वज्ञोऽपि कश्चिद्व्यवस्थाप्यते इति तदप्यसत् विपक्षप्रकर्षपर्यंतगमनात्कर्मणां संतानरूपतयानादित्वेऽपि प्रक्षयप्रसिद्धेः नह्यनादिसंततिरपि शीतस्पर्शः क्वचिद्विपक्षस्योष्णस्पर्शस्य प्रकर्षपर्यंतगमनान्निर्मूलं प्रलयमुपव्रजन्नोपलब्धो नापि कार्यकारणरूपतया बीजांकुरसंतानो वानादिरपि प्रतिपक्षभूतदहनान्निर्दग्धबीजो निर्दग्धांकुरो वा न प्रतीयत इति वक्तुं शक्यं, यतः कर्मभूभृतां संतानोनादिरपि क्वचित्प्रतिपक्षसात्मीभावान्न प्रक्षीयते ततो यथा शीतस्योष्णस्पर्शप्रकर्षविशेषेण काश्चिद्भेत्ता तथा कर्मभूभृतां तद्विपक्षप्रकर्षविशेषेण भेत्ता भगवान् विश्वतत्वज्ञ इति सुनिश्चितं नश्चेतः कः पुनः कर्मभूभृतां विपक्ष इति चेदुच्यते।

तेषामागामिनां तावद्विपक्षः संवरोमतः
तपसा संचितानां तु निर्जरा कर्मभूभृतां ॥ १११ ॥

द्विविधा हि कर्मभूभृतः केचिदागामिनः परे पूर्वभवसंतानसंचितास्तत्रागामिनां कर्मभूभृतां विपक्षस्तावत्संवरस्तस्मिन्सति तेषामनुत्पत्तेः संवरो हि कर्मणामाश्रवनिरोधः सचाश्रवो मिथ्यादर्शनाविरति-

प्रमादकषायवोगविकल्पात्पंचविधस्तस्मिन् सति कर्मणामास्रवात् कर्मागमनहेतोरास्रव इति व्यपदेशात् कर्माण्यस्रवंत्यागच्छंति यस्मादात्मनि स आस्रव इति निर्वचनात्सएव हि बंधहेतुर्विनिश्चितः प्राग्विशेषेण । मिथ्याज्ञानस्य मिथ्यादर्शनेऽतर्भावात् तन्निरोधः पुनः कात्स्न्यतो देशतो वा तत्र कात्स्न्यतो गुप्तिभिः सम्यग्योगनिग्रहलक्षणाभिर्विधीयते । समितिधर्मानुप्रेक्षापरीषहजयचारित्रैस्तु देशतस्तन्निरोधः सिद्धः सम्यग्योगानिग्रहस्तु साक्षादयोगकेवलिनश्चरमक्षणप्राप्तस्य प्रोच्यते तस्यैव सकलकर्मभूभृन्निरोधनिबंधनत्वसिद्धेः सम्यग्दर्शनादित्रयस्य चरमक्षणपरिप्राप्तस्य साक्षान्मोक्षहेतोस्तथाभिधानात् पूर्वत्र गुणस्थाने तदभावाद्योगसद्भावात्सयोगकेवलिक्षीणकषायोपशांतकषायगुणस्थाने ततोपि पूर्वत्र सूक्ष्मसांपरायानिवृत्तिबादरसांपराये चापूर्वकरणे चाप्रमत्ते च कषाययोगविशिष्टसद्भावात् ततोपि पूर्वत्र प्रमत्तगुणस्थाने प्रमादकषाययोगानिर्णीते संयतासंयतसम्यग्दृष्टीगुणस्थाने प्रमादकषायविशिष्ट योगानां ततोपि पूर्वास्मिन् गुणस्थानत्रये कषायप्रमादाविरतमिथ्यादर्शनविशिष्टयोगसद्भावनिश्चयात् । योगोहि त्रिविधः कायादिभेदात् 'कायवाङ्मनःकर्म योगः, इति सूत्रकारवचनात् कायवर्गणालंबनोद्यात्मप्रदेशपरिस्पंदः काययोगो वाग्वर्गणालंबनो वाग्योगो मनोवर्गणालंबनो मनोयोगः 'स आस्रव, इति वचनात् मिथ्यादर्शनाविरतिप्रमादकषायाणामास्रवत्वं न स्यादिति न मंतव्यं योगस्य सकलाश्रव व्यापकत्वात्तद्ग्रहणादेव तेषां परिग्रहात्तन्निग्रहे तेषान्निग्रहप्रसिद्धेः योगनिग्रहे मिथ्यादर्शनादीनां निग्रहः सिद्ध एवायोगकेवलिनि, तदभावात्कषायनिग्रहे तत्पूर्वास्रवनिरोधवत्क्षीणकषाये, प्रमादनिग्रहे पूर्वास्रवनिरोधवदप्रमत्तादौ । सर्वाविरतिनिरोधे तत्पूर्वास्रवमिथ्यादर्शननिरोधवच्च, प्रमत्ते संयतासंयते च । मिथ्यादर्शननिरोधे तत्पूर्वास्रवनिरोधवच्च सासादनादौ । पूर्वपूर्वास्रवनिरोधे ह्युत्तरास्रवनिरोधः साध्यएव न पुनरुत्तरास्रवनिरोधे पूर्वास्रवनिरोधस्तत्र तस्य सिद्धत्वात्कायादियोगनिरोधेऽप्येवं वक्तव्यं तत्राप्युत्तरयोगनिरोधे पूर्वयोगनिरोधस्यावश्यंभावात् काययोगनिरोधे हि तत्पूर्ववाङ्मानस निरोधः सिद्ध एव वाग्योगनिरोधे च मनोयोगनिरोधः पूर्वयोगनिरोधे तूत्तरयोगनिरोधो भाज्यत इति सकलयोगनिरोधलक्षणया परमगुप्त्या सकलास्रवनिरोधः परमसंवरःसिद्धः । समित्यादिभिः पुनरपरः संवरो देशतएवास्रवनिरोधसद्भावात्तत्र हि यो यदास्रवप्रतिपक्षः स तस्य संवर इति यथायोगमागमाविरोधेनाभिधानीयं कर्मागमनकारणस्यास्रवस्य निरोधे कर्मभूभृतामागामिनामनुत्पत्तिसिद्धेरन्यथा तेषामहेतुकत्वापत्तेः सर्वस्य संसारिणः सर्वकर्मागमनप्रसक्तेश्च ततः संवरो विपक्षः कर्मभूभृतामागामिनामिति स्थितं संचितानांतु निर्जरा विपक्षः सा च द्विविधानुपक्रमोपक्रमिकी च तत्र पूर्वा यथाकालं संसारिणः स्यात् उपक्रमकी तु तपसा द्वादशविधेन साध्यते संवरवत्, यथैवहि तपसा संचितानां कर्मभूभृतां निर्जरा विधीयते यथाऽऽगामिनां संवरोपीति संचितानां कर्मणां निर्जरा विपक्षः प्रतिपाद्यते । अथैतस्य कर्मणां विपक्षस्य परमप्रकर्षः कुतः प्रसिद्धो यतस्तेषामात्यंतिकः क्षयः स्यादित्याह

"तत्प्रकर्षः पुनः सिद्धः परमः परमात्मनि ।
तारतम्यविशेषस्य सिद्धेरुष्णप्रकर्षवत् ॥ ११२ ॥

यस्य तारतम्यप्रकर्षस्तस्य क्वचित्परमः प्रकर्षः सिद्ध्यति यथोष्णस्य, तारतम्यप्रकर्षश्च कर्मणां विपक्षस्य संवरनिर्जरालक्षणस्यासंयतसम्यग्दृष्ट्यादिगुणस्थानविशेषेषु प्रमाणतो निश्चीयते तस्मात्परमात्मनि तस्य परमः प्रकर्षः सिद्ध्यतीत्यवगम्यते । दुःखादिप्रकर्षेण व्यभिचार इति चेन्न दुःखस्य सप्तमनरकभूमौ नरकाणां परमप्रकर्षसिद्धेः सर्वार्थसिद्धौ देवानां सांसारिकसुखपरमप्रकर्षवत् । एतेन क्रोधमानमायालोभानां तारतम्येन व्यभिचारशंका निरस्ता तेषामभव्येषु मिथ्यादृष्टिषु च परमप्रकर्षसिद्धेस्तत्प्रकर्षोहि परमोऽनंतानुबंधित्वलक्षणस्स च तत्र प्रसिद्धः क्रोधादीनामनंतानुबंधिनां तत्र सद्भावात् । ज्ञानहानिप्रकर्षेण व्यभिचार इति चेन्न तस्यापि क्षायोपशमिकस्य हीयमानतया प्रकृष्यमाण-

स्य प्रसिद्धस्य केवलिनि परमप्रकर्षसिद्धेः क्षायिकस्य तु हानेरेवानुपलब्धेः कुतस्तत्प्रकर्षो येन व्यभिचारः शक्यते । के पुनः कर्मभूभृतो एषां विपक्षः परमप्रकर्षभाक् साध्यत इत्यारेकायामिदमाह

कर्माणि द्विविधान्यत्र द्रव्यभावविकल्पतः ।
द्रव्यकर्माणि जीवस्य पुद्गलात्मान्यनेकधा ॥ ११३ ॥
भावकर्माणि चैतन्यविवर्त्तात्मानि भांति नुः ।
क्रोधादीनि स्ववेद्यानि कथंचिच्चिदभेदतः ॥ ११४ ॥
तत्स्कंधराशयः प्रोक्ता भूभृतोऽत्र समाधितः ।
जीवाद्विश्लेषणं भेदः संतानात्यंतसंक्षयः ॥ ११५ ॥

जीवं परतंत्रीकुर्वंति स परतंत्रीक्रियते वा यैस्तानिकर्माणि, जीवेन वा मिथ्यादर्शनादिपरिणामैः क्रियंत इति कर्माणि तानि द्विप्रकाराणि द्रव्यकर्माणि भावकर्माणि च तत्र द्रव्यकर्माणि ज्ञानावरणादीन्यष्टौ मूलप्रकृतिभेदात्तथाऽष्टचत्वारिंशदुत्तरशतमुत्तरप्रकृतिविकल्पात्तथोत्तरोत्तरप्रकृतिभेदादनेकप्रकाराणि तानि च पुद्गलपरिणामात्मकानि जीवस्य पारतंत्र्यनिमित्तत्वान्निगडादिवत्, क्रोधादिभिर्व्यभिचार इति चेन्न तेषां जीवपरिणामानां पारतंत्र्यस्वरूपात्, पारतंत्र्यं हि जीवस्य क्रोधादिपरिणामो न पुनः पारतंत्र्यनिमित्तं । ननु च ज्ञानावरणदर्शनावरणमोहनीयांतरायाणामेवानंतज्ञानदर्शनसुखवीर्य्यलक्षणजीवस्वरूपघातित्वात्पारतंत्र्यनिमित्तत्वं पुनर्नामगोत्रसद्वेद्यायुषां तेषामात्मस्वरूपाघातित्वात्पारतंत्र्यनिमित्तत्वासिद्धेरिति पक्षाव्यापकोहेतुर्वनस्पतिचैतन्ये स्वापवदिति चेन्न तेषामपि जीवस्वरूपसिद्धत्वप्रतिबंधित्वात्पारतंत्र्यनिमित्तत्वोपपत्तेः कथमेवं तेषामघातिकर्मत्वमितिचेज्जीवन्मुक्तिलक्षणपरमार्हंत्यलक्ष्मीघातिकत्वाभावादिति ब्रूमहे ततो न पक्षाव्यापकोहेतुः, नाप्यन्यथानुपपत्तिनियमनिश्चयविकलः पुद्गलपरिणामात्मकसाध्यमंतरेण पारतंत्र्यतिमित्तत्वस्य साधनस्यानुपपत्तिनियमनिर्णयात्तानि च स्वकार्येण यथानाम प्रतीयमानेनानुमीयंते दृष्टकारणव्यभिचाराददृष्टकारणासिद्धेः । भावकर्माणि पुनश्चैतन्यपरिणामात्मकानि क्रोधाद्यात्मपरिणामानां क्रोधादिकर्मोदयनिमित्तानामौदयिकत्वेऽपि कथंचिदात्मनोऽनर्थांतरत्वाच्चिद्रूपत्वाविरोधात् ज्ञानरूपत्वं तु तेषां विप्रतिषिद्धं ज्ञानस्यौदयिकत्वाभावाद्धर्माधर्मयोः कर्मरूपयोरात्मगुणत्वान्नौदयिकत्वं नापि पुद्गलपरिणामात्मकत्वमिति केचित्तेपि न युक्तिवादिनः कर्मणामात्मगुणत्वे तत्पारतंत्र्यनिमित्तत्वायोगात्सर्वदाऽऽत्मनो बंधानुपपत्तेर्मुक्तिप्रसंगात् । न हि यो यस्य गुणः स तस्य पारतंत्र्यनिमित्तं यथा पृथिव्यादेः रूपादिः, आत्मगुणश्च धर्माधर्मसंज्ञकं कर्म परैरभ्युपगम्यत इति न तदात्मनः पारतंत्र्यनिमित्तं स्यात् तत एव च 'प्रधानविवर्त्तः शुक्लं कृष्णं च कर्म, इत्यपि मिथ्या तस्यात्मपारतंत्र्यनिमित्तत्वाभावे कर्मत्वायोगादन्यथातिप्रसंगात् । प्रधानपारतंत्र्यनिमित्तत्वात्तस्य कर्मत्वमिति चेन्न प्रधानस्य तेन बंधोपगमे मोक्षोपगमे च पुरुषकल्पनावैयर्थ्यात् । बंधमोक्षफलानुभवनस्य पुरुषे प्रतिष्ठानान्न पुरुषकल्पनावैयर्थ्यमितिचेत्तदेतदसंबद्धाभिधानं प्रधानस्य बंधमोक्षौ, पुरुषस्तत्फलमनुभवतीति कृतनाशाकृताभ्यागमप्रसंगात्, प्रधानेन हि कृतौ बंधमोक्षौ न च तस्य तत्फलानुभवनमिति कृतनाशः पुरुषेण तु तौ न कृतौ तत्फलानुभवनं च तस्येत्यकृताभ्यागमः कथं परिहर्तुं शक्यः । पुरुषस्य चेतनत्वात्फलानुभवनं, न प्रधानस्याचेतनत्वादितिचेन्न मुक्तात्मनोऽपि प्रधानकृतकर्मफलानुभवनानुषंगात् । मुक्तस्य प्रधानसंसर्गाभावान्न तत्फलानुभवनमितिचेत्तर्हि संसारिणः प्रधानसंसर्गाद्बंधफलानुभवनं सिद्धं तथा च पुरुषस्यैव बंधः सिद्धः प्रधानेन संसर्गस्य बंधफलानुभवननिमित्तस्य बंधरूपत्वाद्बंधस्यैव संसर्ग इति नामकरणात् स चात्मनः प्रधानसंसर्गकारणमंतरेण न संभवतीति पुरुषस्य मिथ्यादर्शनादिपरिणामस्तत्कारणमिति प्रत्येतव्यं । प्रधानपरिणामस्यैव तत्संसर्गकारण-

त्वे मुक्तात्मनोपि तत्सैसर्गकारणत्वप्रसक्तेरिति मिथ्यादर्शनादीनि भावकर्माणि पुरुषपरिणामात्मकान्येव पुरुषस्य परिणामित्वोपपत्तेस्तस्यापरिणामित्वे वस्तुत्वविरोधान्निरन्वयविनश्वरक्षणिकचित्तवत्। द्रव्यकर्माणि तु पुद्गलपरिणामात्मकान्येव प्रधानस्य पुद्गलपर्यायत्वात्पुद्गलस्यैव प्रधानमिति नाम करणात्,नच प्रधानस्य पुद्गलपरिणामात्मकत्वमसिद्धं पृथिव्यादिपरिणामात्मकत्वात्पुरुषस्यापुद्गलद्रव्यस्य-तदनुपलब्धिर्बुद्ध्यहंकारादिपरिणामात्मकत्वात् नहि प्रधाने बुद्ध्यादिपरिणामो घटते, तथाहि न प्रधानं बुद्ध्यादिपरिणामात्मकं पृथिव्यादिपरिणामात्मकत्वाद्यत्तु बुद्ध्यादिपरिणामात्मकं तन्न पृथिव्यादि परिणामात्मकं दृष्टं यथा पुरुषद्रव्यं तथा च प्रधानं तस्मान्न बुद्ध्यादिपरिणामात्मकं । पुरुषस्य बुद्ध्यादिपरिणामात्मकत्वासिद्धेर्न वैधर्म्यदृष्टांतेति चेन्न तस्य तत्साधनात्तथाहि बुद्ध्यादिपरिणामात्मकः पुरुषश्चेतनत्वाद्यस्तु न बुद्ध्यादिपरिणामात्मकः स न चेतनोदृष्टो यथा घटादिश्चेतनश्च पुरुषस्तस्माद्बुद्ध्यादिपरिणामात्मक इति सम्यगनुमानात्, तथाकाशपरिणामात्मकत्वमपि प्रधानस्य न घटते मूर्तिमत्पृथिव्यादिपरिणामात्मकस्यामूर्ताकाशपरिणामात्मकत्वविरोधाद्घटादिवत् । शब्दादि तन्मात्राणां तु पुद्गलद्रव्यपरिणामात्मकत्वमेव कर्मेंद्रियद्रव्यमनोवत् भावमनोबुद्धींद्रियाणां तु पुरुषपरिणामात्मकत्वसाधनान्न जीवपुद्गलद्रव्यव्यतिरिक्तं द्रव्यांतरमन्यत्र धर्माधर्माकाशकालद्रव्येभ्य इति न प्रधानं नाम तत्त्वांतरमस्ति सत्त्वरजस्तमसामपि द्रव्यभावरूपाणां पुद्गलद्रव्यपुरुषद्रव्यपरिणामत्वोपपत्तेरन्यथा तदघटनादिति द्रव्यकर्माणि पुद्गलात्मकान्येव सिद्धानि भावकर्मणां जीवपरिणामत्वासिद्धेस्तानि च द्रव्यकर्माणि पुद्गलस्कंधरूपाणि परमाणूनां कर्मत्वानुपपत्तेस्तेषां जीवस्वरूपप्रतिबंधकत्वाभावादिति कर्मस्कंधसिद्धिस्ते च कर्मस्कंधा बहव इति कर्मस्कंधराशयः सिद्धास्ते च भूभृत इव भूभृत इति व्यपदिश्यंते समाधिवचनात्तेषां कर्मभूभृतां भेदो विश्लेषणमेव न पुनरत्यंतसंक्षयः सतो द्रव्यस्यांत्यंत विनाशानुपपत्तेः प्रसिद्धत्वात्तत एव कर्मभूभृतां भेत्ता भगवान् प्रोक्तो न पुनर्विनाशयितेति निरवद्यमिदं भेत्तारं कर्मभूभृतां ज्ञातारं विश्वतत्त्वानामिति विशेषणद्वितयं मोक्षमार्गस्य नेतारमितिविशेषणवत् ॥ कःपुनर्मोक्ष इत्याह ।

स्वात्मलाभस्ततोमोक्षः कृत्स्नकर्मक्षयात्मतः
निर्जरासंवराभ्यां तु सर्वसद्वादिनामिह ॥ ११६ ॥

यत एवं ततः स्वात्मलाभो जीवस्य मोक्षः कृत्स्नानां कर्मणामागामिनां संचितानां च संवरनिर्जराभ्यां क्षयाद्विश्लेषात्सर्वसद्वादिनां मत इति सर्वेषामास्तिकानां मोक्षस्वरूपे विवादाभावं दर्शयति तेषामात्मस्वरूपे कर्मस्वरूपे च विवादात्स च प्रागेव निरस्तोनंतज्ञानादिचतुष्टयस्य सिद्धत्वस्य चात्मनः स्वरूपस्य प्रमाणप्रसिद्धत्वान्नह्यचेतनत्वमात्मनः स्वरूपं तस्य ज्ञानसमवायित्वविरोधादाकाशादितत्कारणादृष्टविशेषासंभवाच्च तद्वत्तस्यांतःकरणसंयोगस्यापि दुर्घटत्वात् प्रतीयते च ज्ञानमात्मनि ततस्तस्य नाचैतन्यं स्वरूपं । ज्ञानस्य चैतन्यस्यानित्यत्वात्कथमात्मनो नित्यस्य तत्स्वरूपमितिचेन्नानंतस्य ज्ञानस्यानादेश्चानित्यत्वैकांताभावात्। ज्ञानस्य नित्यत्वे न कदाचिदज्ञानमात्मनः स्यादितिचेन्न तदावरणोदये तदविरोधात् एतेन समस्तवस्तुविषयज्ञानप्रसंगोऽपि विनिवारितस्तद्घातिकर्मोदये सति संसारिणस्तदसंभवात्तत्क्षये तु केवलिनः सर्वद्रव्यपर्यायविषयस्य ज्ञानस्य प्रमाणतः प्रसिद्धेः सर्वज्ञत्वस्य साधनात् । चैतन्यमात्रमेवात्मनः स्वरूपमित्यनेन निरस्तं ज्ञानस्वभावरहितस्य चेतनत्वविरोधाद्गगनादिवत्। प्रभास्वरमिदं चित्तमिति स्वसंवेदनमात्रं चित्तस्य स्वरूपं वदन्नपि सकलार्थविषयज्ञानसाधनान्निरस्तः स्वसंविन्मात्रेण वेदनेन सर्वार्थसाक्षात्करणविरोधात् । तदेवं प्रतिवादिपरिकल्पितात्मस्वरूपस्य प्रमाणबाधितत्वात्स्याद्वादिनिगदितमेवानंतज्ञानादिस्वरूपमात्मनो व्यवतिष्ठते ततस्तस्यैव लाभो मोक्षः सिद्ध्येन्न पुनः स्वात्मप्रहाणमितिप्रतिपद्येमहि प्रमाणसिद्धत्वात्तथा कर्मस्वरूपे च विप्रतिपत्तिः कर्मवादिनां कल्पनाभेदात्साच पूर्वनिरस्तेत्यलं विवादेन । ननु च संवरनिर्जरामोक्षाणां भेदाभावः कर्माभावस्वरूपत्वाविशेषादितिचेन्न संवर-

स्यागामिकर्मानुत्पत्तिलक्षणत्वादास्रवनिरोधः संवर इति वचनात् निर्जरायास्तु संचितकर्मविप्रमोक्षलक्षणत्वादेशतः कर्मविप्रमोक्षान्निर्जरेति प्रतिपादनात्कृत्स्नकर्मविप्रमोक्षस्यैव मोक्षत्ववचनात्ततः संचितानागतद्रव्यभावकर्मणां विप्रमोक्षस्य संवरनिर्जरयोरभावात्ताभ्यां मोक्षस्य भेदः सिद्धः । ननु च नास्तिकान्प्रति मोक्षस्वरूपेऽपि विवाद इति चेन्न तेषामत्रानधिकारात्तदेवाह ।

नास्तिकानां च नैवास्ति प्रमाणं तन्निराकृतौ ।
प्रलापमात्रकं तेषां नावधेयं महात्मनां ॥ ११७ ॥

येषां प्रत्यक्षमेव प्रमाणं नास्तिकानां ते कथं मोक्षनिराकरणाय प्रमाणांतरं वदेयुः स्वेष्टहानिप्रसंगात् पराभ्युपगतेन प्रमाणेन मोक्षाभावमाचक्षाणां मोक्षसद्भावमेव किन्नाचक्षते न चेद्विक्षिप्तमनसः परपर्यनुयोगपरतया प्रलापमात्रं तु महात्मनां नावधेयं तेषामुपेक्षार्हत्वात्ततोनिर्विवाद एव मोक्षः प्रतिपत्तव्यः । क स्तर्हि मोक्षमार्ग इत्याह ।

मार्गो मोक्षस्य वै सम्यग्दर्शनादित्रयात्मकः ।
विशेषेण प्रपत्तव्यो नान्यथा तद्विरोधतः ॥ ११८ ॥

मोक्षस्य हि मार्गः साक्षात्प्रप्त्युपायोविशेषेणप्रत्यायनीयोऽसाधारणकारणस्य तथाभावोपपत्तेर्न पुनः सामान्यतः साधारणकारणस्य द्रव्यक्षेत्रकालभवभावविशेषस्य सद्भावात्स च त्रयात्मक एव प्रतिपत्तव्यः तथाहि सम्यग्दर्शनादित्रयात्मको मोक्षमार्गः साक्षान्मोक्षमार्गत्वाद्यस्तु न सम्यग्दर्शनादित्रयात्मकः स न साक्षान्मोक्षमार्गो यथा ज्ञानमात्रादि साक्षान्मोक्षमार्गश्च विवादाध्यासितस्तस्मात्सम्यग्दर्शनादित्रयात्मक इत्यत्र नाप्रसिद्धो धर्मी मोक्षमार्गमात्रस्य सकलमोक्षवादिनामविवादस्य धर्म्मित्वात्तत एव नाप्रसिद्धविशेष्यः पक्षो नाप्यप्रसिद्धविशेषणः सम्यग्दर्शनादित्रयात्मकत्वस्य व्याधिविमोक्षमार्गरसायनादौ प्रसिद्धत्वात् । नहि रसायनश्रद्धानमात्रं सम्यग्ज्ञानाचरणरहितं सकलामयविनाशनायालं नापि रसायनज्ञानमात्रं श्रद्धानाचरणरहितं न च रसायनाचरणमात्रं श्रद्धानज्ञानशून्यं तेषामन्यतमापाये सकलव्याधिविप्रमोक्षलक्षणस्य रसायनफलस्यासंभवात्तद्वत्सकलकर्म्ममहाव्याधिविप्रमोक्षोऽपि तत्वश्रद्धानज्ञानाचरणत्रयात्मकादेवोपायादनपायमुपपद्यते तदन्यतमापाये तदनुपपत्तेः । ननु चायं प्रतिज्ञार्थैकदेशासिद्धो हेतुः शब्दानित्यत्वे शब्दत्ववदिति न मंतव्यं प्रतिज्ञार्थैकदेशत्वेन हेतोरसिद्धत्वायोगात् प्रतिज्ञा हि धार्म्मधर्मसमुदायलक्षणा तदेकदेशस्तु धर्मी धर्मो वा तत्र न धर्मी तावदप्रसिद्धः प्रसिद्धोधर्म्मीतिवचनात् न चायं धर्मित्वविवक्षायामप्रसिद्ध इति वक्तुं युक्तं प्रमाणतस्तत्संप्रत्ययस्याविशेषात् ननु मोक्षमार्गो धर्मी मोक्षमार्गत्वं हेतुस्तच्च न, धर्मिसामान्यरूपत्वात्साधनधर्मत्वेन प्रतिपादनादित्यपरः सोप्यनुकूलमाचरति साधनधर्मस्य धर्मिरुपत्वाभावे प्रतिज्ञार्थैकदेशत्वनिराकरणात् विशेषं धर्मिणं कृत्वा सामान्यं हेतुं ब्रुवतो न दोषं इति परैः स्वयमभिधानात्, प्रयत्नानंतरीयकः क्षणिकः शब्दः अयत्नानंतरीयकत्वादित्यादिवत क: पुनरत्र विशेषो धर्मी मोक्षमार्ग इति ब्रूमः कुतोऽस्यविशेषः स्वास्थ्यमार्गात् नह्यत्र मार्गसामान्यं धर्म्मि किं तर्हि मोक्षविशेषणो मार्गविशेषः कथमेवं मोक्षमार्गत्वं सामान्यं मोक्षमार्गाणामनेकव्यक्तिनिष्ठत्वात्कचिन्मानसशारीरव्याधिविशेषाणां मोक्षमार्गः क्वचिद्द्रव्यभावसकलकर्माणामिति मोक्षमार्गत्वं सामान्यं शब्दत्ववत् शब्दत्वं हि यथा शब्दविशेषे वर्णपदवाक्यात्मके विवादास्पदे तथा ततवितघनसुषिरशब्देऽपि श्रावणज्ञानजननसमर्थतया (शब्दव्यपदेशं नातिक्रामति) इति शब्दविशेषं धर्म्मिणं कृत्वा शब्दत्वं सामान्यं हेतुं ब्रुवाणो न कंचिद्दोषमास्तिघ्नुते तथानन्वयदोषस्याप्यभावात् तद्वन्मोक्षमार्गविशेषं धर्म्मिणमभिधाय मोक्षमार्गत्वं समान्यं साधनमभिदधानो नोपलब्धव्यः । तथा साध्यधर्मोऽपि प्रतिज्ञार्थैकदेशो हेतुत्वेनोपादीयमानो न प्रतिज्ञार्थैकदेशत्वेनासिद्धस्तस्य धर्मिणा व्यभिचारात्प्रतिज्ञार्थैकदेशस्यापि धर्मिणोऽसिद्धत्वानुपपत्तेः किं तर्हि साध्यत्वे-

नासिद्ध इति न प्रतिज्ञार्थैकदेशो नामासिद्धो हेतुरस्ति विपक्षे बाधकप्रमाणाभावात् । अन्यथानुपपन्नत्वनियमानिश्चयादगमकोऽयं हेतुरितिचेन्न ज्ञानमात्रादौ विपक्षे मोक्षमार्गत्वस्य हेतोः प्रमाणबाधितत्वात्। सम्यग्दर्शनादित्रयात्मकत्वे हि मोक्षमार्गस्य साध्ये ज्ञानमात्रादिर्विपक्षस्तत्र च न मोक्षमार्गत्वं सिद्धं बाधकसद्भावात्तथाहि ज्ञानमात्रं न कर्म महाव्याधिमोक्षमार्गः श्रद्धानाचरणशून्यत्वात् शारीरमानसव्याधिविमोक्षकारणरसायनज्ञानमात्रवत् नाप्याचरणमात्रं तत्कारणं श्रद्धानज्ञानशून्यत्वात् रसायनाचरणमात्रवत् नापि ज्ञानवैराग्ये तदुपायस्तत्वश्रद्धानविधुरत्वाद्रसायनज्ञानवैराग्यमात्रवदिति सिद्धोऽन्यथानुपपत्तिनियमः साधनस्य ततो मोक्षमार्गस्य सम्यग्दर्शनादित्रयात्मकत्वसिद्धिः । परंपरया मोक्षमार्गस्य सम्यग्दर्शनमात्रात्मकत्वसिद्धेर्व्यभिचारी हेतुरितिचेन्न साक्षादितिविशेषणात्साक्षान्मोक्षमार्गत्वं सम्यग्दर्शनादित्रयात्मकत्वं न व्यभिचरति क्षीणकषायचरमक्षणवर्त्तिपरमार्हंत्यलक्षणजीवन्मोक्षमार्ग इवेति सुप्रतीतं तथैवायोगकेवलिचरमक्षणवर्त्तिकृत्स्नकर्मक्षयलक्षणमोक्षमार्गः साक्षान्मोक्षमार्गत्वं सम्यग्दर्शनादित्रयात्मकत्वं न व्यभिचरति तपोविशेषस्य परमशुक्लध्यानलक्षणस्य सम्यक्चारित्रेऽतर्भावादितिविस्तरतस्त्वार्थालंकारेयुक्त्यागमविरोधेन परीक्षितमवबोद्धव्यं तदेवं विधस्य मोक्षमार्गस्य प्रणेता विश्वतत्त्वज्ञः साक्षात्परंपरया वेति शंकायामिदमाह ।

प्रणेता मोक्षमार्गस्याबाध्यमानस्य सर्वथा ।
साक्षाद्यएव स ज्ञेयो विश्वतत्त्वज्ञताश्रयः ॥११९॥

न हि परंपरया मोक्षमार्गस्य प्रणेता गुरुपर्वक्रमाविच्छेदादधिगततत्त्वार्थशास्त्रार्थोऽप्यस्मदादिभिः साक्षाद्विश्वतत्त्वज्ञतायाः समाश्रयः साध्यते प्रतीतिविरोधात्किं तर्हि साक्षान्मोक्षमार्गस्य सकलबाधकप्रमाणरहितस्य यःप्रणेता स एव विश्वतत्त्वज्ञताश्रयस्तत्वार्थसूत्रकारैरुमास्वामिप्रभृतिभिः प्रतिपाद्यते भगवद्भिः साक्षात्सर्वतत्वज्ञतामन्तरेण साक्षादबाधितमोक्षमार्गस्य प्रणयनानुपपत्तेरिति वंदे तद्गुणलब्धय इत्येतद्व्याख्यातुमनाः प्राह

वीतनिःशेषदोषोऽतः प्रवंद्योऽर्हन् गुणांबुधिः ।
तद्गुणप्राप्तये सद्भिरिति संक्षेपतोऽन्वयः ॥१२०॥

यतश्च यः साक्षान्मोक्षमार्गस्याबाधितस्य प्रणेता स एव विश्वतत्त्वानां ज्ञाता कर्मभूभृतां भेत्ताऽतएवार्हन् प्रवंद्यो मुनींद्रैस्तस्य वीतनिःशेषाज्ञानादिदोषत्वात्तस्यानंतज्ञानादिगुणांबुधित्वाच्च योहि गुणांबुधिः स एव तद्गुणलब्धये सद्भिराचार्यैर्वंदनीयः स्यान्नान्य इति मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृतां ज्ञातारं विश्वतत्त्वानां भगवंतमर्हंतमेवान्ययोगव्यवच्छेदेन निर्णीतमहं वंदे तद्गुणलब्ध्यर्थमिति संक्षेपतः शास्त्रादौ परमेष्ठिगुणस्तोत्रस्य मुनिपुंगवैर्विधीयमानस्यान्वयः संप्रदायाव्यवच्छेदलक्षणः पदार्थघटनालक्षणो वा लक्षणीयः प्रपंचतस्तदन्वयस्याक्षेपसमाधानलक्षणस्य श्रीमत्स्वामिसमंतभद्रैर्देवागमाख्याप्तमीमांसायां प्रकाशनात्तत्त्वार्थविद्यानंमहोदयालंकारेषु च तदन्वयस्य व्यवस्थापनादलं प्रसंगपरंपरया अत्र समासतस्तद्विनिश्चयात्कस्मात्पुनरेवंविधोभगवान् सकलपरीक्षालक्षितमोहक्षयः साक्षीकृतविश्वतत्त्वार्थो वंद्यते सद्भिरित्यावेद्यते ।

मोहाक्रांतान्न भवतिगुरोर्मोक्षमार्ग प्रणीति ।
नर्तेतस्याःसकलकलुषध्वंसजा स्वात्मलब्धिः ॥
तस्यैवंद्यःपरगुरुरिहक्षीण मोहस्त्वमर्हन् ।
साक्षात्कुर्वन्नमलकमिवाशेषतत्त्वानि नाथ ॥१२१॥

मोहस्तावदज्ञानं रागादिप्रपंचस्तेनाक्रांताद् गुरोर्मोक्षमार्गस्य यथोक्तस्य प्रणीतिर्नोपपद्यते यस्माद्रागद्वेषाज्ञानपरवशीकृतमानसस्य सम्यग्गुरुत्वेनाभिमन्यमानस्यापि यथार्थोपदेशित्वनिश्चयासभवात् तस्य वितथार्थाभिधानशंकानतिक्रमात् दूरे मोक्षमार्गप्रणीतिर्यतश्च तस्या मोक्षमार्गप्रणीतेर्विना मोक्षमार्गी भावनाप्रकर्षपर्यंतगमनेन सकलकर्मलक्षणकलुषप्रध्वंसजन्यानंतज्ञानादिलक्षणा स्वात्मलब्धिः परमनिर्वृत्तिः कस्यचिन्न घटते तस्मात्तस्यै स्वात्मात्मब्धये त्वमेवार्हन् परमगुरुरिह शास्त्रादौ वंद्यः क्षीणमोहत्वात्करतलनिहितस्फटिकमणिवत्साक्षात्कृताशेषतत्त्वार्थत्वाच्च न ह्यक्षीणमोहः साक्षादशेषतत्त्वानि द्रष्टुं समर्थः कपिलादिवन्नापि साक्षादपरिज्ञाताशेषतत्त्वार्थो मोक्षमार्गप्रणीतये समर्थो न च तदसमर्थः परमगुरुरभिधातुं शक्यस्तद्वेदेवेति न मोहाक्रांतः परमनिःश्रेयसार्थिभिरभिवंदनीयः । कथमेवमाचार्य्यादयः प्रवंदनीयाः स्युरिति चेत् परमगुरुवचनानुसारितया तेषां प्रवर्त्तमानत्वादेशतो मोहरहितत्वाच्च तेषां वंदनीयत्वमिति प्रतिपद्यामहे तत एव परापरगुरुगुणस्तोत्रं शास्त्रादौ मुनींद्रैर्विहितमिति व्याख्यानमनुवर्तनीयं, पंचानामपि परमेष्ठिनां गुरुत्वोपपत्तेः कात्स्न्यतो देशतश्च क्षीणमोहत्वसिद्धेरशेषतत्त्वार्थज्ञानप्रसिद्धेश्च यथार्थाभिधायित्वनिश्चयाद्वितथार्थाभिधानशंकापायान्मोक्षमार्गप्रणीतौ गुरुत्वोपपत्तेस्तत्प्रसादादभ्युदयनिश्रेयससंप्राप्तेरवश्यंभावात्तदेवमाप्तपरीक्षैषा विहिता हितपरीक्षादक्षैर्विचक्षणैः पुनः पुनश्चेतसि परिमलनीयेत्याचक्ष्महे ।

न्यक्षेणाप्तपरीक्षाप्रतिपक्षं क्षपयितुं क्षमा साक्षात् ।
प्रेक्षावतामभीक्ष्णं विमोक्षलक्ष्मीक्षणाय संलक्ष्या ॥ १२२ ॥
श्रीमत्तत्वार्थशास्त्राद्भुतसलिलनिधेरिद्धरत्नोद्भवस्य
प्रोत्थानारंभकाले सकलमलभिदे शास्त्रकारैः कृतं यत् ।
स्तोत्रं तीर्थोपमानं प्रथितपृथुपथं स्वामिमीमांसितं तत् ।
विद्यानंदैः स्वशक्त्या कथमपि कथितं सत्यवाक्यार्थसिद्ध्यै ॥१२३॥
इति तत्त्वार्थशास्त्रादौ मुनींद्रस्तोत्रगोचरा ।
प्रणीताप्तपरीक्षेयं कुविवादनिवृत्तये ॥१२४॥

विद्यानंदहिमाचलमुखपद्मविनिर्गता सुगंभीरा
आप्तपरीक्षाटीका गंगावच्चिरतरं जयतु ॥ १ ॥
भास्वद्भासिरदोषा कुमतिमतध्वांतभेदने पट्वी ।
आप्तपरीक्षालंकृतिराचंद्रार्कं चिरंजयतु ॥ २ ॥
स जयतु विद्यानंदो रत्नत्रयभूरिभूषणस्सबलं ।
तत्त्वार्थार्णवतरणे सदुपायः प्रकटितो येन ॥ ३ ॥

इत्याप्तपरीक्षा समाप्ता ।



श्रीपरमात्मने नमः ।

सनातनजैनग्रंथमाला ।

२

स्याद्वादविद्यापतिश्रीविद्यानंदस्वामिविरचिता

पत्रपरीक्षा

श्रीवर्द्धमानमानुत्य स्याद्वादन्यायनायकं ।
प्रबुद्धाशेषतत्त्वार्थं पत्रवाक्यं विचार्यते ॥ १ ॥

कस्मात्पुनः श्रीवर्द्धमानमर्हंतं भगवं तं स्याद्वादन्यायनायकं प्रकर्षेण साक्षादबुद्धाशेषद्रव्यपर्यायात्मजीवादिपदार्थमेवानुत्य पत्रवाक्यमाचार्यपरंपरया विचरत् विचार्यते । नन्वक्षपादाद्येकांतवादिनामन्यतममित्यत्रोच्यते ।

नैकांतवादिनां पत्रवाक्यं संभवदर्थकं । तत्त्वाधिगमोपायप्रकाशरहितत्वतः ॥ १ ॥
यत्तु संभवदर्थात्मा न तत्तादक्षमीक्षितं । यथा स्याद्वादभद्रार्क्यं तदेकेदं न तत्तथा ॥ २ ॥

नन्वक्षपादादीनां पत्रवाक्यं तावन्नेत्ययुक्तं तस्य प्रसिद्धावयवत्वेन प्रसिद्धत्वात् देवदत्तादिवाक्यवत् नापि तदसंभवदर्थकं स्वेष्टस्यार्थस्य साधकत्वात् । न चाऽसाधुगूढपदप्रायमपि पत्रमासज्यते साधुगूढपदप्रायस्यैव निराकुलस्य तस्य तैरावेदितत्वात् । तदुच्यते—

प्रसिद्धावयवं वाक्यं स्वेष्टस्यार्थस्य साधकं । साधुगूढपदप्रायं पत्रमाहुरनाकुलं ॥ १ ॥

कथं पुनः प्रसिद्धावयवत्वादिविशेषणविशिष्टं वाक्यं पत्रं नाम तस्य श्रुतिपथसमधिगम्यपदसमुदायविशेषरूपत्वात् पत्रस्य तद्विपरीताकारत्वात् न च यद्यतोऽन्यत्तत्तेन व्यपदिश्यतेऽतिप्रसंगात् नीलादयोपि हि कंबलादिभ्योऽन्ये न ते नीलादिव्यपदेशहेतवः तेषां तद्व्यपदेशहेतुतया प्रतीयमानत्वात् किरीटादीनां पुरुषे तद्व्यपदेशहेतुत्ववत् तद्योगात्तत्र मत्वर्थीयविधानात् । नीलादयः संति येषां ते नीलादयः कंबलादय इति गुणवचनेभ्यो मत्वर्थीयस्याभावप्रसिद्धेरितिचेत् उपचरितोपचारादिति क्रमः । श्रोत्रपथप्रस्थायिनो हि शब्दात्मकस्य पदसमुदायविशेषरूपस्य लिप्यामुपचारः तत्र तस्य जनैरारोप्यमाणत्वात् लिप्युपचरितवाक्यस्यापि पत्रे समुपचर्यमाणत्वात् तत्र लिखितस्य पत्रस्थत्वात् तदुपचरितोपचारात् पत्रव्यपदेशसिद्धेः न च यद्यतोऽन्यत्तत्तेनोपचारादुपचारोपचारात् वा व्यपदेष्टुमशक्यं शक्रादन्यत्र व्यवहर्तृजने शक्राभिप्राये स्फुटमुपचारदर्शनात् ततोऽन्यत्रापि कोष्टादावुपचारोपचारात् शक्रव्यपदेशसिद्धेः तदुक्तं—

---

१ स्वाभाविकमेव । २ आगच्छत् । ३ तेषां । ४ जीवादितत्त्व- । ५ स्वार्थनिश्चयस्य । ६ प्रमाणनयप्रदर्शकवाक्यं । ७ तस्मात् । ८ संभवदर्थात्मैव । ९ आदिशब्देन गामानय शुक्लां दंडेनेत्यादिग्रहणं । १० दोषै रहितं । ११ कर्ण । १२ नीलः कंबल इत्यत्र कंबलोत्यनेन नीलेन व्यपदिश्यते इत्यत आह । १३ तेषु कंबलादिषु नीलादिव्यपदेशहेतवो न भवंतीत्यर्थः । १४ लिपिरेव वाक्यमिति । १५ वाक्यस्य । १६ भिन्ने । १७ पंडितादौ । १८ आदिशब्देन पाषाणादिग्रहणं ।

मुख्यं शब्दात्मकं वाक्यं लिप्यामारोप्यते जनैः । पत्रस्थत्वात्तु तत्पत्रमुपचारोपचारतः ॥ १ ॥

अथवा प्रकृतवाक्यस्य मुख्यत एव पत्रव्यपदेश इति निगदामः पदानि त्रायंते गोप्यंते रक्ष्यंते परेभ्यः प्रतिवादिभ्यः स्वयं विजिगीषुणा यस्मिन् वाक्ये तत्पत्रमिति पत्रशब्दस्य निर्वचनसिद्धेः । तथा लोके व्यवहर्त्तरि शास्त्रे च गुरुपर्वक्रमायाते प्रतीतेः न च पदानि विनिश्चितपदस्वरूपतदभिधेयतत्त्वेभ्यः परेभ्यस्त्रातुमशक्यान्येव कुतश्चिद्वर्णविपर्यासनादेः प्रकृतिप्रत्ययादिगोपनाद्वा तत्राणसंभवात् पदगूढादिकाव्यवत्तदुक्तं—

त्रायंते वा पदान्यस्मिन्परेभ्यो विजिगीषुणा । कुतश्चिदिति पत्रं स्याल्लोके शास्त्रे च रूढितः॥२॥

न चैवमसाधुपदास्पदमपि वाक्यं पत्रमासज्यते सुस्पष्टपदमेव वा साधुगूढपदप्रायमिति वचनात्तदुक्तं—

नचासाधुपदं वाक्यं प्रस्पष्टपदमेव वा । साधुगूढपदप्रायमिति तस्य विशेषणात् ॥ ३ ॥

पदपादादिगूढकाव्यमेवं पत्रं प्राप्नोति इति चेन्न प्रसिद्धावयवत्वेन विशिष्टस्य पत्रत्ववचनात् न हि पदगूढादिकाव्यं प्रमाणसिद्धप्रतिज्ञाद्यवयवविशेषणतया किंचित्प्रसिद्धं तस्य तथा प्रसिद्धौ पत्रव्यपदेशसिद्धेरबाधितत्वात्तदुक्तं—

पदगूढादिकाव्यं च नैवं पत्रं प्रसज्यते । प्रसिद्धावयवत्वेन विशिष्टस्याभिधानतः ॥

स्वयमिष्टस्यार्थस्यासाधकमपि तादृग्वाक्यं पत्रमेवमासक्तमिति चेन्न स्वेष्टार्थसाधनस्यैवेह पत्रविचारे पत्रत्ववचनात् तदर्थमभिहितं—

स्वेष्टार्थासाधनस्यापि नैवं पत्रत्वमापतेत् । स्वेष्टार्थसाधनस्यैव पत्रत्ववचनादिह ॥

ततो नाक्षपादादीनामेकांतवादिनां पत्रवाक्यमसंभवदर्थकं इति केचित्तदसत् यथोक्तलक्षणस्य पत्रवाक्यस्य तेषां विचार्यमाणस्याव्यवस्थितेः तथाहि—नाक्षपादस्य तावद्यथोक्तलक्षणं पत्रवाक्यं संभवति प्रसिद्धावयवत्वस्य विरहात्सुगतादीनामिव । तदवयवाहि प्रतिज्ञादयः पंचाक्षपादेनाभिधीयंते प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा इति सूत्रप्रणयनात् । तत्रागमः प्रतिज्ञा विश्वतश्चक्षुरिति विश्वतो मुखो विश्वतो बाहुरिति विश्वतः पात् संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देवएक इति यथा आगमार्थो वा प्रतिज्ञा विवादाध्यासितमुपलब्धिमत्कारणकमिति । यथा हेतुरनुमानं तेन प्रतिज्ञातार्थस्यानुमीयमानत्वात् कार्यत्वादिति । यथा उदाहरणं प्रत्यक्षं वादिप्रतिवादिनोर्यत्र बुद्धिसाम्यं तदुदाहरणमिति वचनात् वस्त्रादिवदिति यथा उपनयमुपमानं दृष्टांतः धर्मिसाध्यधर्मिणोः सादृश्यात्, "प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमिति" वचनात् यत्कार्यं तदुपलब्धिमत्कारणकं दृष्टं यथा वस्त्रादि तथा च विवादाध्यासितमिति । यथा सर्वेषामेकविषयत्वप्रदर्शनफलं निगमनं तस्मादुपलब्धिमत्कारणकमिति यथा आगमानुमानप्रत्यक्षोपमानवत् फलसमुदायरूपत्वात्पंचानामवयवानामिति व्याख्यानात् । न चैते पंचावयवाः प्रमाणतो विचार्यमाणा विपश्चिच्चेतसि सुनिश्चिताश्चकासति, पत्रवाक्याभासेऽपि संभवात् तेषां पक्षधर्मत्वसपक्षेसत्वविपक्षासत्वमात्राणामिव त्रयाणामवयवानां सुगतसंमतानां वीतादीनामिव कपिलविकल्पितानां तदभावेऽपि पत्रवाक्यस्य स्वार्थसाधनस्य दर्शनात् साध्याविनाभावनियमनिश्चयलक्षणादेव हेतोः साध्यप्रसिद्धेः तदुक्तं—

न चैवं लक्षणं पत्रमक्षपादस्य युज्यते । प्रसिद्धावयवत्वस्य विरहात्सुगतादिवत् ॥ १ ॥
पत्रस्यावयवाः पंच प्रतिज्ञादय इत्यसत् । पत्राभासेऽपि सद्भावात्तेषां त्रैरूपमात्रवत् ॥ २ ॥
तदभावेऽपि पत्रस्य स्वार्थसाधनतेक्षणात् । हेतोः साध्याविनाभावनियमात्मकतो यथा ॥३॥
सत्सत्सदितिसंक्षेपात्साध्यसाधनदर्शनं । व्याप्त्याः सामर्थ्यतः सर्वनामाभावेऽपि निश्चितं ॥४॥

ननु च यत्कृतकं तदनित्यं दृष्टं यथा घट इत्यादौ सति सर्वनामप्रयोगे व्याप्त्या साध्यसाधनवचनः

---

१ पदसमुदायात्मकं । २ वयं जैनाः । ३ परंपरा । ४ वाक्यस्य । ५ पत्रत्वाभिधानात् । ६ वादिप्रतिवादिभ्यां । ७ प्रसिद्धावयवं साधुगूढपदप्रायं च । ८ अभ्यधायि । ९ न प्राप्नोति । १० तदेव विवृणोति । ११ धर्मधर्मिसमुदायः प्रतिज्ञा । १२ सर्वदर्शित्वात् । १३ सकलशास्त्रप्रणेतृत्वात् । १४ सर्वकर्तृत्वात् । १५ सर्वगतत्वात् । १६ पुण्यपापाभ्यां । १७ परमाणुभिः । १८ क्षित्यादिकं । १९ बुद्धिमत्कारणकं । २० प्रतिज्ञाद्यवयवानां । २१ कार्यत्वात् । २२ पूर्वोक्तसूत्रव्याख्यानात् ।

मुपलब्धं न पुनरसति यतः सत्सदित्यत्र सर्वनामप्रयोगाभावेऽपि संक्षेपतस्तत्सिद्ध्येत् धर्मिणश्चावचनमिहायुक्तं अग्निरत्रधूमादित्यादिषु धर्मिवचनदर्शनादिति कश्चित् सोऽप्यनालोचितवचनपथः सामर्थ्याद्गम्यमानस्य सर्वनाम्नो प्रयोगे विरोधाद्वैधुर्यात् पंचावयववादिनः साधर्म्यावयवव्याख्यानादर्थतोगम्यमानानां वैधर्म्यावयवानामिव क्वचिदवश्यं तत्प्रयोगे पंचावयववचने न्यूनतानुषंगात् अवयववादिनां बौद्धानां त्र्यंशस्य हेतोर्भाषणात् सामर्थ्यतो गम्यमानानां प्रतिज्ञादीनामिव तत्प्रयोगे स्वयमसाधनांगवचनस्य निग्रहाधिकरणस्य तैरभिधानात् तत एव धर्मिणोऽप्यवचनमिति संक्षिप्तपत्रवाक्येन विरुद्ध्यते तस्य परीक्षादक्षैरक्षूणतयोपलक्षितत्वात् तदुक्तं—

वैधर्म्यावयवा यद्वत्पंचावयववादिनः । साधर्म्यावयवाख्यानाद्गम्यंतेऽर्थादभाषिताः ॥ १ ॥
प्रतिज्ञायाश्च केषांचिद्धेतोस्त्र्यंशस्य भाषणात् । सामर्थ्याद्गम्यमानत्वान्न प्रयोज्या यथैव तु ॥२॥
तथा सामर्थ्यगम्यत्वात्सर्वनाम्नोप्यभाषणं । क्वचिदिष्टं परीक्षायां दक्षैर्द्धर्मिण एव च ॥ ३ ॥

नन्वेवं क्वचिदपि प्रतिज्ञादिप्रयोगे न स्याद्वादिनां युक्तरूपोभवेत् तस्य सामर्थ्याद्गम्यमानत्वात्सर्वनामवदिति न मनीषिभिर्मनसि निधेयं तेषां प्रतिपाद्यानुरोधेन प्रयोगोपगमात् यथैव हि कस्यचित्प्रतिबोध्यस्यानुरोधेन साधनवाक्ये संधाभिधीयते दृष्टांतादिकमपि न चैवं साधनस्यैकलक्षणत्वं स्वयं परीक्षितमपक्षिप्यते ततोऽन्यांशानां सतामपि तल्लक्षणत्वापायात्साधनाभासेपि तत्संभवादसाधारणताविरहात् तथैव हि कुमारनंदिभट्टारकैरपि स्ववादन्याये निगदितत्वात्तदाह—

प्रतिपाद्यानुरोधेन प्रयोगेषु पुनर्यथा । प्रतिज्ञा प्रोच्यते तज्ज्ञैस्तथोदाहरणादिकं ॥ १ ॥
न चैवं साधनस्यैकलक्षणत्वं विरुध्यते । हेतुलक्षणतापायादन्यांशस्य तथोदितं ॥ २ ॥
अन्यथानुपपत्त्येकलक्षणं लिंगमिंग्यते । प्रयोगपरिपाटी तु प्रतिपाद्यानुरोधतः ॥ ३ ॥

ननु चातिसंक्षिप्तपत्रवाक्ये हेतुरेव प्रयोक्तव्यः तावन्मात्रात्साध्यमवबोद्धुं समर्थान् नरान्प्रति साध्याभिधानस्य निरर्थकत्वात् प्रपंचतारतम्यात् साध्यं निश्चेतुमीशान् प्रति द्वौ चावयवौ प्रयोक्तव्यौ पक्षो हेतुश्चेति त्रयश्चावयवाः कांश्चन प्रतिपक्षो हेतुर्दृष्टांतश्चेति । चत्वारो वा तएवावयवाः सोपनयाः परानुग्रहप्रवणैः सद्भिः प्रयोक्तव्याः । पंच वा प्रतिज्ञाहेतूदाहरणोपनयनिगमनभेदात् । अन्यथा तत्प्रतिपत्तेरयोगादित्यन्ये प्राहुः तदाह—

हेतुरेव प्रयोक्तव्यस्तावन्मात्रात्प्रवेदितुं । समर्थान्प्रतिबोध्यान् नून् साध्यं संक्षेपतो ननु ॥ १ ॥
द्वौ च त्रयश्च चत्वारः पंच चावयवाः परे । प्रयोक्तव्याः प्रपंचेन सद्भिरित्यपरे विदुः ॥२॥

तेऽप्येवं पृष्टव्याः हेतुस्तावत्केवलः प्रयुज्यमानः कथं प्रयुज्यत इति यदि प्रथमांतः सत्सदित्येव तदास्य कुतः साध्यत्वव्यवच्छेदः साध्यलक्षणवैकल्यात् सत्सत्त्वस्य प्रसिद्धत्वात् साध्यस्याप्रसिद्धलक्षणत्वात् किं पुनः सत्सदित्युच्यते यतस्तत्सकलजनप्रसिद्धं साध्यव्यवच्छेदेन साधनत्वेनैव बुद्ध्यामहे न पुनः साध्यनिर्देशत्वेन शंकामहे सत्सदिति चेत् ईमे ब्रूमहे सदनं सदिति प्रमा यतोऽत्राभिप्रेता सर्वैर्गत्यर्थत्वात् गत्यर्थस्य च

---

१ सर्वमनेकांतात्मकमुत्पादव्ययध्रौव्ययुक्तं सत्सत्सत्वादित्यर्थः । २ अप्रतिपादनं । ३ पर्वतादौ नाम्नः । ४ विरोधविरोधात् । ५ साधर्म्यावयवपंचकस्यैव वचेन । ६ हीनं अन्यतमेन न्यूनमिति निग्रहस्थानानुषंगात् । ७ यत्र पंचावयवप्रयोगे । ८ परिपूर्णतया । ९ पक्षधर्मत्वसपक्षेसत्वविपक्षाद्व्यावृत्तिरूपस्य । १० प्रतिज्ञा संधा प्रतिज्ञाः, मर्यादेत्यमरः । ११ उपनयनिगमनयोर्ग्रहणं । १२ इति पराशंकां मनसि कृत्वा निराकृतवान् जैनः । १३ अन्यथानुपपत्तिः । १४ प्रतिज्ञादीनां विशेषरूपत्वरहितत्वात् । १५ तदेव विवृणोति । १६ प्रवक्ष्यमाणं वर्त्तते । १७ अंगीक्रियते । १८ जैनान्प्रति । १९ सांख्यान् प्रति । २० मीमांसकान्प्रति । २१ योगान्प्रति । २२ उक्तविपर्यये एवं न प्रयुज्यते चेत् । २३ सौगताः । २४ प्रपंचेन साध्यं प्रवेदितुं समर्थान् नून् प्रति । २५ अहो । २६ प्रमेयांतः । २७ केन प्रकारेण । २८ व्यावृत्तिः । २९सत्सदितिलिंगं ३० प्रतिपादनत्वेन । ३१ सत्सदिति तद्धेतुरित्यर्थः । ३२ बौद्धाः । ३३ युट् प्रत्ययोऽत्र ज्ञातव्यः । ३४ कारणात् । ३५ अनुमाने ।

ज्ञानार्थत्वात्सर्वे गत्यर्था ज्ञानार्थे वर्त्तंते इति वचनात्सती विद्यमाना सा यस्मिन्[1] तत्सत्सद्विद्यमानप्रमं प्रमेयमिति यावन्न कस्यचित्प्रमाणवादिनः प्रमेयमप्रसिद्धं। संवितमात्रप्रमाणवादिनः तदप्रसिद्धमिति न मंतव्यं तस्यापि संवित्स्वरूपे प्रमेयत्वप्रसिद्धेः स्वरूपस्य स्वतो गतिरिति स्वयमभिधानात्संवृत्या तदभिधाने परमार्थतः स्वरूपादिगतिविरोधात्संविदद्वैतासिद्धेरयोगात्[2]। यदि पुनरुत्पादादिस्वभावत्वं सत्वं[3] तदा तत्सत्सत्साध्यमिति युक्तं विद्यमानोत्पादादिस्वभावत्वस्य[4] सत्सत्त्वस्य केषांचिदप्रसिद्धत्वात् साध्यलक्षणसंप्रतिपत्तेरित्येवं ये ब्रुवंते तेषां सत्सदित्युक्ते सत्सत्वस्य प्रसिद्धतया साध्यव्यवच्छेदसिद्धावपि साधनस्य धर्मिणो व्यवच्छेदः सिद्ध्येत्[5] तस्यापि प्रसिद्धत्वेन संमतत्वात् प्रसिद्धोधर्मीति वचनात् यदि पुनर्विदुषां साध्यसिद्ध्यर्थं धर्मिणो प्रयोज्यत्वात्तस्य साध्याविनाभावाभावादेव व्यवच्छेदसिद्धिरिति मतं तदा हेतुः केवलः कथं तेषां प्रयोज्यः स्यात् स्वेष्टसिद्ध्यर्थं साध्यस्यानभिधाने[6] तेन तस्याविनाभावाप्रसिद्धेः। प्रस्तावाद्गम्यमानेन साध्येनानुक्तेनापि हेतोरविनाभावस्तावद्विद्विरवधार्यते इति चेत् न चैतत्परीक्षाक्षमं प्रस्तावस्येष्टानिष्टयोरर्थयोरविशेषात्कतरस्मिन्नर्थे हेतुः प्रयुक्तोयमिति ज्ञातुमशक्तेः किमनित्यः शब्दो नित्यो वेत्युभयांशावलंबिनि शंसये सति हेतुप्रयोगस्येष्टत्वात् "संदिग्धेऽर्थे हेतुवचनादिति" कैश्चित्स्वयमभिधानात्[7]। अथ यदैकमुखएव प्रस्तावस्त्र्यात्मकं[8] जगत् कथमेतदिति कस्यचित्प्रश्ने तदा हेतुस्तत्रैवायमिति ज्ञातुं शक्यत्वात्[9] प्रस्तावाद्गम्यमानेन साध्येन हेतोरविनाभावः सिद्ध्यत्येवेत्यपि न संगतं[10] पृष्टविपरीतार्थे हेतोर्वचनसद्भावदर्शनात् अत्र्यात्मकमिदं सर्वमिति स्वयमभीप्सतां तत्रैव हेतुप्रयोगोपपत्तेः[11] यदि पुनस्तत्र प्रयुक्तस्य हेतोर्विरुद्धत्वनिश्चयात् तथा च त्र्यात्मकस्यैव सिद्धेरत्र्यात्मकत्वस्य[12] साध्यत्वायोगात् न तेन हेतोरविनाभावसिद्धिरिति मतं तदा त्र्यात्मकत्वस्यापि कुतः साध्यत्वं, प्रसिद्धस्य साध्यत्वविरोधात्साधनवत्। कस्यचिद्धेतोरत्र्यात्मकत्वे साध्ये विरुद्धतामबुद्ध्यमानस्य सामर्थ्यात् त्र्यात्मकत्वे साध्ये सम्यग्धेतुत्वनिर्णयघटनात्[13] तत्त्र्यात्मकप्रसिद्धत्वोपपत्तेः[14] यो ह्यग्नौ साध्ये धूमवत्त्वस्य हेतोर्विरुद्धतामबुध्यते स तस्याग्नौ साध्ये सम्यग्धेतुत्वमपि बुध्यत एव। न चैवं बुध्यमानस्य प्रतिपाद्यता[15] घटते प्रतिपादकवत् ततो न तं प्रति हेतुः केवलः प्रयोक्तव्यः स्यात्। अथ यत्पृष्टं प्रतिपाद्येन[16] तत्र हेतुर्यदाचार्येण प्रयुज्यते तदा तस्य तेनाविनाभावावगतिर्भवत्येवेति मतं तदपि न समीचीनं साध्यनिर्देशस्यैव समागतेः प्रतिपाद्यकृतप्रश्नविशेषस्यान्यथा[17] तत्रानुपपत्तेः उत्पादाद्यात्मकं सर्वं कुत एतदिति प्रश्ने प्रमेयत्वादिति हेतोर्वचनेऽपि संबंधात्साध्यनिर्देशप्रसिद्धेः एकनिर्देष्टुरिव भिन्ननिर्देष्टुरपि तस्य तेन संबंधाविशेषात् यथैव ह्येकस्य वक्तुः साध्यनिर्देशानंतरं[18] साधनस्य निर्देशे तस्य तेनाविनाभावसंबंधसाध्यसिद्धेः साध्यव्याप्तसाधनोपदर्शनं स्फुटमवसीयते[19] तथा प्रतिपाद्येन साध्यप्रश्नवचने कृते प्रतिपादकेन साधनाभिधानेऽपि भिन्नवक्तृनिर्दिष्टयोरपि साध्यसाधनयोरविनाभावाविरोधात् कथमन्यथैकवाक्यस्य[20] नानावक्तृभिरुदीर्यमाणस्य संबधता सिद्ध्येत् ततः सर्वेषां वादिनां अविगानेन[21] सिद्धं संक्षेपतः साध्यसाधननिर्देशमात्रं न पुनः केवलं हेतुवचनं विदुषामपि तदयोगात् किंवत् सर्वेषां वादिनां अविगानेन संक्षेपतः साध्यसाधनदर्शनं प्रसिद्धमिति चेदुच्यते श्रीमदकलंकदेवस्य, प्रत्यक्षं विशदं ज्ञानं प्रमाणमित्यादिवत्[22]। धर्मकीर्तेः[23] प्रत्यक्षं कल्पनापोढमभ्रांतमित्यादिवत्। योगस्य सदकारणवन्नित्यमित्यादिवत्। सांख्यस्य चैतन्यं पुरुषस्य स्वरूपमित्यादिवत् सत्सत्सदिति पत्रवाक्यमनाकुलमेव संभावयामः स्वसाध्यार्थाविनाभावि साधनस्याभिधानात्[24] यथैव हि विशदज्ञानात्मकत्वमंतरेण प्रत्यक्षमनुपपन्नं ज्ञानात्मकत्वेन च विना प्रमाणत्वं केषांचित्परेषां कल्पनापोढाभ्रांताभ्यां विना प्रत्यक्षत्वं अन्येषां नित्यत्वादृते सदकारणवत्वमितरेषां पुरुषस्वरूपाभावे चैतन्यं तथोत्पादादित्रया-

---

१ पदार्थरूपे। २ अपरमार्थतः। ३ आदिशब्देन व्ययध्रौव्ययोर्ग्रहणं। ४ क्षणिके प्रवर्त्तमान। ५ सौगताः। ६ व्यावृत्तिसिद्धौ सत्यां। ७ वादिप्रतिवादिनोः। ८ चेद्बौद्ध तवेति मतं वर्त्तते। ९ व्याप्तेरभावात्। १० अप्रतिपादने। ११ प्रतिपादन। १२ उत्पादव्ययध्रौव्यस्वरूपं। १३ वचो युक्तिमत्र। १४ चेद्बौद्ध तवेति मतं। १५ जगतः। १६ हेतोः १७ शिष्यता। १८ शिष्येण। १९ उक्तविपर्ययं। २० प्रतिपादनानंतरं। २१ ज्ञायते निश्चीयते वा। २२ गामायनशुक्लां दंडेनेत्यादिकस्य। २३ सामर्थ्येन अविवादेन। २४ तद्भावहेतुभावौ हि दृष्टांते तदवेदिनः। ख्यान्त्येते विदुषां वाच्यो हेतुरेव हि केवलः॥ २५ बौद्धाचार्यस्य। २६ तदेव विवृणोति। २७ जैनानां।

त्मकत्वलक्षणसत्वमंतरेण सत्सत्वाख्या प्रमेयतापि नोपपद्यत एव प्रमाणबलतः प्रसिद्धायास्तस्याः अन्यत्र क्वचित्सद्भिर्निश्चयात् । आत्मादिद्रव्यमुत्पादव्ययनिर्मुक्तं प्रमेयं सिद्धं पर्यायश्च ध्रौव्यनिर्मुक्तः प्रमेयोऽस्तीति चायुक्तं द्रव्यपर्याययोर्भेदाभेदैकांतेऽनवस्थानात् तथा चैतत्सकलमभ्यधायि ।

ते[3]ऽपि प्रयुंजते हेतुं सत्सत्वं यदि केवलं । सत्सदित्येव साध्यत्वव्यवच्छेदोऽस्य तत्कृतः ॥१॥
साध्यलक्षणवैकल्यात्सत्यत्वस्य प्रसिद्धितः । सदनं सत्प्रमा ह्यत्र सैंती सा यैंत्र तन्मतं ॥२॥
सत्सत्प्रमेयमेतच्च प्रसिद्धं मानवादिनः । संविन्मात्रेऽपि मैंानस्य स्वैंरूपेस्ति प्रमेयता ॥ ३ ॥
उत्पार्दादिस्वभावत्वं सत्त्वं साध्यं तु युज्यते । तस्याप्रसिद्धितः साध्यलक्षणं प्रतिपत्तितः ॥४॥
एवमाचक्षते येऽपि तेषां स्याद्धर्मिणः कुतः । साधनस्य व्यवच्छेदः प्रसिद्धत्वेन संमतात् ॥५॥
विदुषामप्रयोज्यत्वाद्धर्मिणः साध्यसिद्धये । तस्य साध्याविनाभावाभैावादेवेति तैंन्मतं ॥ ६ ॥
हेतुः कथं प्रयोज्यः स्यात्केवलः स्वेष्टसिद्धये । साध्यस्याव्यचने तेनाविनाभावैंप्रसिद्धितः ॥७॥
प्रस्तावाद्गम्यैंमानेन हेतोः साध्येन बुद्ध्यते । विद्वद्भिरविनाभावोऽनुक्तेनापीति चेन्न वै ॥८॥
प्रस्तावस्यार्थयोरिष्टानिष्टयोरविशेषतः । क्वार्थे हेतुः प्रयुक्तोऽयमिति ज्ञातुमशक्तितः ॥ ९ ॥
यद्येकमुखएव स्यात् प्रस्तावस्त्र्यात्मकं जगत् । कथमेतदिति प्रश्ने तदा हेतुः सैं तत्र चेत्॥१०॥
न पृष्टविपरीतार्थे हेतोर्वचनसंभवात् । अत्र्यात्मकमिदं विश्वमिति स्वयमभीप्सैंतां ॥ ११ ॥
तत्र हेतोर्विरुद्धत्वनिश्चयात्साध्यता न चेत् । तथा त्र्यात्मकं सिद्धेस्तस्य स्यात्साध्यता कुतः॥१२॥
यो ह्यग्नौ विरुद्धत्वं धूमवत्त्वस्य बुध्यते । सोऽग्नौ साध्ये कथं तस्य न विद्यात्सत्यहेतुतां ॥१३॥
न चैवं बुध्यमानस्य घटते प्रतिपाद्यता । प्रतिपादकवैंद्येन हेतुस्तं प्रति केवलः ॥ १४ ॥
यत्पृष्टं प्रतिपाद्येन तत्र हेतुः प्रयुज्यते । यदाचार्येण तेनास्याविनाभावगतिस्तथा ॥ १५ ॥
भवत्येवेति चेत्साध्ये निर्देशोप्येवैंमागतः । प्रतिपादकृतः प्रश्नविशेषः कैंन्यथास्यैं स ॥१६॥
उत्पादाद्यात्मकं विश्वं कुत एतद्धि निश्चितं । इति प्रश्ने प्रमेयत्वादिति हेतोर्वचस्यपि ॥१७॥
प्रसिद्धः साध्यनिर्देशः संबंधादुपवर्णितः । ऐंतैनैवैकनिर्देष्टुरिव [20]भिन्नादपि स्फुटं ॥ १८ ॥
ततः संक्षेपतःसिद्धः सैंर्वेषामैंविगानतः । साध्यसाधननिर्देशमात्रकं न तु हेतुवाक् ॥१९॥
प्रत्यक्षं विशदं ज्ञानं प्रमाणं ज्ञानमित्यपि । अकलंकवचोयद्वत्साध्यसाधनसूचकं ॥ २० ॥
प्रत्यक्षं कल्पनापोढमभ्रांतमिति कीर्तिवौंक् । सदकारणवन्नित्यमिति योगवचोऽपि च ॥२१॥
चैतन्यं पुरुषस्य स्यात्स्वरूपमिति सांख्यवाक् । एवमादिपरैरिष्टं स्वेष्टसिद्धिनिबंधनं ॥२२॥
सत्सत्सदिति तद्वत्स्यात्पत्रवाक्यमनाकुलं । स्वसाध्यर्थाविनाभावसाधनस्याभिधानतः ॥२३॥
उत्पादादित्रयात्मत्वमंतरेण प्रमेयता । न हि क्वचित्प्रसिद्धास्ति प्रमाणवलतः सतां ॥२४॥
नोत्पादव्ययनिर्मुक्तमात्मादिद्रव्यमस्ति नैंः । प्रमेयं नापि पर्यायो ध्रौव्यमुक्तोऽस्ति कश्चन ॥२५॥
द्रव्यपर्याययोर्भेदाभेदैकांतेऽनवस्थितेः । श्रीमत्समंतभद्रार्यैंयुक्तिविद्भिस्तथोक्तितः ॥ २६ ॥
द्रव्यपर्याययोरैक्यैं तयोरैंन्यतिरेकतः । परिणामविशेषाच्च शैंक्तिमच्छक्तिभैंावतः ॥ २७ ॥
संज्ञासंख्याविशेषाच्च स्वलक्षणविशेषतः । प्रयोजनादिभेदाच्च तैंन्नानात्वं न सर्वथा ॥ २८ ॥

तत्र द्रव्यं तावदन्वैंयि तदेवेदमित्यवाधितप्रत्यभिज्ञासमधिगम्यं पर्यायो व्यावृताकारस्वभावः स भेद-

---

१ सर्वथा भेदाभेदनियमैंगीक्रियमाणे । २ पूर्वोक्तं सर्वं । ३ बौद्धाः । ४ विद्यमाना । ५ वस्तुनिः । ६ प्रमाणस्य । ७ स्वसंवेदने । ८ आदिशब्देन व्याप्यध्रौव्ययोर्ग्रहणं । ९ व्याप्तेरभावात् । १० तेषां बौद्धानां मतं । ११ अकथनेन । १२ अनुमानेन । १३ प्रमेयत्वादिलक्षणः । १४ बौद्धानां । १५ कुतो न कुतोपीतिभावः । १६ प्रतिपाद्यमाने । १७ उक्तविपर्यये । १८ साध्यस्य । १९ प्रतिपादनेन । २० गामानय शुक्लां दंडेनेति नानावक्तृभिः कथ्यमानेऽपि साध्यसाधननिर्देशः स्यादिति भावः । २१ वादिनां । २२ अविवादात् । २३ धर्मकीर्तेर्वचः । २४ अस्माकं जैनानां । २५ कथंचिद् प्राप्तं । २६ अपृथक्करणभावात् । २७ द्रव्यं । २८ पर्यायः । २९ तयोर्द्रव्यपर्याययोः । ३० पर्यायः ।

प्रत्ययसमधिगम्यः कथंचित्तयोरैक्यमव्यतिरेकात् ययोस्तु नैक्यं न तयोरव्यतिरेकः यथा हिमवद्विंध्ययोरव्यतिरेकश्च द्रव्यपर्याययोस्तस्मात्तयोरैक्यमिति केवलव्यतिरेकी हेतुः ननु चैक्यमव्यतिरेक एव स एव हेतुः कथमुपपन्नः स्यात्साध्यसमत्वादिति न मंतव्यं कथंचित्तादात्म्यस्यैक्यस्य साध्यत्वात् परस्परमशक्यविवेचनत्वस्याव्यतिरेकस्य साधनत्वात् तस्य साध्यसमत्वाभावात् परस्परंव्यतिरेचनं व्यतिरेकः, तदभावस्त्वव्यतिरेकः सच शक्यविवेचनमेवेति कथं साध्यसमत्वं नचैवमसिद्धो हेतुः कस्यचिज्जीवादिद्रव्यस्य स्वपर्यायेभ्यो ज्ञानादिभ्यः परद्रव्यपर्यायांतराणि स्वपर्यायाणांच ज्ञानादीनां द्रव्यांतरं नेतुमशक्यत्वस्य परस्परमशक्यविवेचनत्वस्य द्रव्यपर्याययोः सुप्रसिद्धत्वात् अन्यथा ज्ञानादिपर्यायाणां जीवपर्यायत्वायोगात् जीवादिद्रव्यत्वस्य च तद्द्रव्यत्वविरोधात् नन्वु सत्यपि द्रव्ये तत्पर्यायाणामुत्पादात् उत्पन्नानां च विनाशात् कथमशक्यविवेचनत्वं सिद्धमिति तु न शंकनीयं पर्यायाणामुत्पादविनाशाभावे पर्यायत्वायोगात् तेषामुत्पादव्ययलक्षणत्वात् द्रव्यस्य ध्रौव्यलक्षणत्ववत्॥

समुदेति विलयमृच्छति भावो नियमेन पर्ययनयस्य नोदेति नो विनश्यति भावनयालिंगितो नित्यं ॥

इति वचनात्। न च कालाभेदोऽशक्यविवेचनत्वं एककालवर्तिनां नानार्थानामतिप्रसंगात् ततः कालाभेदे सत्यपि द्रव्यपर्यायोर्नाशक्यविवेचनत्वं यथोक्तलक्षणं विरुद्ध्यते। देशाभेदोऽशक्यविवेचनमित्यपि वार्तं वातातपादीनामपि तत्प्रसंगात् शौल्कीयो देशाभेदोऽशक्यविवेचनत्वमिति चेत्तर्हि द्रव्यपर्याययोस्तत्कथमसिद्धं ॥ ननु पर्यायाणां रूपादीनां घटादिद्रव्यदेशत्वात् घटादिद्रव्यस्य तु स्वारंभकावयवदेशत्वात् तत्पदार्थान्तरत्वसिद्धिरिति चेन्न प्रमाणाभावात् गुणगुणिनौ क्रियाक्रियावंतौ जातितद्वंतौ विशेषतद्वंतौ अवयवावायविनौ च परस्परतः पदार्थांतरभूतौ भिन्नप्रतिभासत्वात् यौ यौ भिन्नप्रतिभासौ तौ तौ परस्परतः पदार्थांतरभूतौ यथा घटपटौ भिन्नप्रतिभासौ तौ इत्यनुमानसद्भावान्न प्रमाणाभाव इति चेन्न अस्यानुमानस्य विरुद्धत्वात् इष्टविरुद्धस्य कथंचिदार्थांतरस्य साधनात् कथंचिद्भिन्नप्रतिभासत्वस्य कथंचिदार्थांतरेण व्याप्तत्वात् सर्वथा भिन्नप्रतिभासत्वस्य हेतुत्वे पुनरसिद्धो हेतुः दृष्टांतश्च साध्यसाधनविकलः प्रतीयते घटपटयोः सर्वथार्थांतरत्वस्य साध्यस्य सर्वथाभिन्नप्रतिभासत्वस्य च साधनधर्मस्याप्रातीतिकत्वात्। सद्द्रव्याद्यात्मना तयोरभिन्नत्वादभिन्नप्रतिभासमानत्वाच्च। ननु च सद्द्रव्याद्यात्मनोऽपि घटपटाभ्यां भिन्नत्वात् कथं तेन तयोरभेदः स्यात्। अभिन्नप्रतिभासत्वं वा, सत्वं हि परसामान्यं सत्स्वभावः द्रव्यत्वं चापरसामान्यं द्रव्यस्वभावः तथा पार्थिवस्वभावोपि इति कथमसौ ततोनार्थांतरभूतः स्यादिति कश्चित् सोऽपि न युक्तवादी सत्वादर्थांतरत्वे तयोरसत्वप्रसंगात् द्रव्यादिस्वभावाच्चात्यंतभेदे तयोरद्रव्यादिप्रसक्तेः। सत्तासंबधात् तयोः सत्वं द्रव्यत्वसंबंधात् द्रव्यत्वोपपत्तेः पार्थिवत्वादिसंबंधात्पार्थिवत्वादिव्यवस्थानान्नदोष इति चेत् कथमसतः स्वयमद्रव्यस्यापार्थिवादेश्च। तदत्यंतभिन्नसत्वादिसंबंधादपि सदादिरूपता युक्ता स्वरविषाणादेरपि तत्प्रसंगात्। प्रागसदादेः सत्तादिसंबंधात् सदादिरूपत्वे प्रध्वंसाभावस्य स्वकारणव्यापारात्प्रागभूतस्य तदनंतरं भवतः सत्तादिप्रसंगः। तस्य तदापि सत्तादिसंबंधसंभवात् न तत्प्रसंग इतिचेत्तदिदं जाड्यविजृंभितं, आक्षेपस्यैव परिहारतया व्यवहारात् प्रागसतः सत्तासंबंधात्सत्वेऽपि प्रध्वंसाभावस्य सत्तासंबंधः कस्मान्न भवति, ततः सत्वं चेत्याक्षेपः तस्य सत्तासंबंधासंभवात् इति स एव परिहारः कथमजडैरभिधीयते साध्यमेव च साधनं कुतस्तस्य सत्तासंबंधाभावः सत्तासंबंधाभावादिति कुतः सत्तासंबंधलक्षणसत्वाभावः सत्तासंबंधाभावादिति वा यदिः पुनः प्रागसत्वादविशेषेऽपि घटपटयोरेव सत्तासंबंधः तन्निमित्तं च सत्त्वं तथा

१ द्रव्यपर्याययोः। २ परस्परमशक्यविवेचनत्वात्। ३ बौद्धः। ४ अनयोः कश्चिद्भेदो नार्थेन दृश्यते यतः। ५ जैनः। ६ पृथक्करणं। ७ बौद्धः। ८ ध्रौव्यरूपे। ९ घटपटादीनां। १०युक्तिमन्न। ११शास्त्रे भवः शास्त्रीयो न तु लौकिकः १२ जैनः। १३ परः। १४ तत्रस्थितत्वादित्यर्थः। १५ तयोर्द्रव्यपर्याययोर्भिन्नत्वसिद्धिः। १६ बाधितस्य। १७ अंगीक्रियामाणे। १८ इदं सदिदंसदिति द्रव्यं स्वरूपेण। १९ भिन्नत्वेसति। २० नास्तित्वं स्यादित्यर्थः। २१ अंगीक्रियमाणे। २२ अविद्यमानस्य। २३ स्वरूपेण। २४ सद्द्रव्यपार्थिवेभ्यः। २५ सत्वद्रव्यत्वपार्थिवत्व। २६ आदि शब्देन द्रव्यपार्थिवयोर्ग्रहणं। २७ अस्मत्कृतप्रतिषेधस्यैव। २८ प्रतिपादनादित्यपि पाठः व्यवहरणात् प्रतिपादनात्। २९ चेत् हे यौग इतिमतं वर्तते। ३० पुनरसत्वाद्यविशेषेऽपि पाठः।

प्रतीतेः न पुनः प्रध्वंसाभावस्य तदभावादिति मतं तदा कथंचित्सत्तादितादात्म्यात् सत्तादिव्यवहारो घट-पटयोरिति नैकांतेन सत्वादि ततो भिन्नं येन सद्द्रव्यात्मना घटपटयोरभेदः कथंचिदभिन्नप्रतिभासत्वं वा न स्यात् साध्यसाधनवैकल्यं वा दृष्टांतस्य ततो न द्रव्यपर्यायोर्भेदैकांतसाधनं निरवद्यमस्ति यतस्तयोः पदार्थांतरत्वसिद्धौ शास्त्रीयदेशभेदलक्षणशक्यविवेचनत्वोपपत्तेः अशक्यविवेचनत्वमव्यतिरेको हेतुरसिद्धः शक्येत नचायमनैकांतिको विरुद्धो वा सर्वदा विपक्षे वृत्त्यभावात् इति सिद्धत्येवातो हेतोः कथंचिद्द्रव्यपर्याययोरैक्यं तथा "द्रव्यपर्याययोरैक्यं परिणामविशेषात् ययोस्तु नैक्यं न तयोः परिणामविशेषः, यथा सह्यविंध्ययोः परिणामविशेषश्च द्रव्यपर्याययोः तस्मादैक्यमित्यपि व्यतिरेकीहेतुः नन्वु च कोयं परिणामविशेषोनाम यदि पूर्वविनाशादुत्तरोत्पादस्तदा वाद्यसिद्धः निरन्वयविनाशात्यंतापूर्वोत्पादयोः स्याद्वादिनामनिष्टत्वात् । अथ पूर्वस्य तिरोभावादुत्तरस्याविर्भावस्तदापि वाद्यसिद्धः सर्वथासतस्तिरोभावाविर्भावमात्रानभ्युपगमात् एतेन स्वाश्रयाद्भिन्नस्वभावः समवायात्तत्र वर्तमानः परिणामविशेष इति वाद्यसिद्धः प्रतिपादितः तेषां तथाप्यनभ्युपगमात् अथ पूर्वापरस्वभावत्यागोपादानान्वितस्थितिलक्षणस्तदा प्रतिवाद्यसिद्धः सौगतसांख्ययौगानां तथाभूतपरिणामविशेषासिद्धेः इति कश्चित्सोपि न युक्तवादी पूर्वापरस्वभावत्यागोपादानान्वितस्थितिलक्षणस्य परिणामविशेषस्य प्रमाणतः सिद्धत्वात् । तथा हि सर्वं वस्तु यथोक्तपरिणामविशेषभाक् सत्वात् सर्वथाप्यपरिणामिनि सौगतादीष्टपरिणामेन परिणामिनि च सत्वविरोधात् तद्विरोधश्च अर्थक्रियाव्याघातात् तद्व्याघातश्च क्रमयौगपद्यासम्भवात् तदसंभवश्च निरन्वयविनश्वरानिरंशैकांते देशकालकृतक्रमस्य नानाकार्यकरणशक्तिनानात्वनिबंधनयौगपद्यस्य च विरोधात् सर्वथा सदात्मककूटस्थवत् परस्परतोऽत्यंतभिन्नधर्मधर्मिमात्रवच्च नह्यत्र देशकृतः क्रमः पिपीलिकादिवत् नापि कालकृतो वा बीजांकुरादिवत् संभवत्येकस्यानेकदेशकालवार्तिनोरभ्युपगमात् यो यत्रैव स तत्रैव यो यदैव तदैव सः "न देशकालयोर्व्याप्तिर्भावानामिह विद्यते" इतिवचनात् ननु च क्षणिकैकस्वलक्षणापेक्षया देशकालव्याप्त्यभावात् भावानां माभूत् देशकालकृतः क्रमः सकृदेकस्यानेकस्वभावापेक्षया यौगपद्यवत् संतानापेक्षया तु स्यात् तस्यानेकसहकारिकालापापेक्षया अनेककार्यकरणयौगपद्यवत् इति चेन्न संतानसमुदाययोरेव क्रमयौगपद्याभ्यामर्थक्रियाकारित्वात् वस्तुत्वसिद्धिप्रसंगात् स्वलक्षणस्यावस्तुतापत्तेः । स्यादाकूतं यदन्वयव्यतिरेकानुविधानात्क्रमशः कार्योत्पत्तिस्तत्स्वलक्षणं क्रमशः कार्यकारि यथा कस्यचिज्जाग्रद्विज्ञानं क्रमशः स्वप्नज्ञानप्रबोधज्ञानादिकारणं किंचितु युगपत्कार्यकारि यदन्वयव्यतिरेकाभ्यां यौगपद्येन कार्योत्पत्तिः यथा प्रदीपस्वलक्षणं तैलशोषणांधकारापनयंकारणं । न चैवमेकस्यानेकस्वभावापत्तिस्तस्य तादृशैकस्वभावत्वात् इति तदसत् कूटस्थस्याप्येवं क्रमाक्रमकार्यकारित्वोपपत्तेः शक्यं हि वक्तुं शाश्वतिको भावः स्वान्वयव्यतिरेकाभ्यां क्रमेणाक्रमेण वानेकं कार्यं प्रादुर्भावयन् तथा तान्निमित्तं । नचानेकस्वभावत्वं तस्य तथाविधैकस्वभावत्वात् ॥ नित्यस्य कथं व्यतिरेक इति चेत् क्षणिकस्य कथं । सकलकालकलाव्याप्तेरिति चेत् नित्यस्यापि सकलदेशाव्याप्तेर्व्यतिरेकोऽस्तु । ननु नित्याद्भिन्नकार्यस्योत्पत्तौ

---

१ आदिशब्देन द्रव्यत्वपार्थिवत्वयोर्ग्रहणं । २ कुतो न स्यात् स्यादेव । ३ सर्वथा भेदनियमे साधनं सर्वथा न घटते इति भावः । ४ स्वरूपेण । ५ घटपटयोर्द्रव्यपर्यायोर्वा । ६ विवेचनस्य तदुपपत्तौ । ७कुतः शक्येत न कुतोऽपि । ८उत्पाद व्ययध्रौव्यात्मकत्वात् । ९ बौद्धः । १० चेत् । ११ (वादिनां) जैनानामसम्मतः । १२ जैनानामभिमतः । १३ न्यायेन १४ घटपटादेः । १५ सौगतसांख्ययौगोक्तप्रकारेण परिणामस्यानंगीकारात् । १६ परिणामविशेषश्चेत् । १७ जैनोक्तलक्षणपरिणामविशेषस्यासिद्धेरित्यर्थः । १८ पूर्वापरस्वभावयोर्यथासंख्यं ग्राह्यं । १९ उत्पादव्ययध्रौव्यरहिते । २० आदि शब्देन सांख्ययौगयोर्ग्रहणं । २१ खरविषाणादौ । २२ निरन्वयविनाशात्यंतापूर्वोत्पादः पूर्वस्य तिरोभावादुत्तरस्याविर्भावः स्वाश्रयाद्भिन्नस्वभावः समवायात्तत्र वर्तमानः परिणामविशेष इति लक्षणे निरंशः क्षणिकः । २३सद्रूपैकरूपतया कालव्यापि कूटस्थतत्त्वं सांख्यापेक्षया ग्राह्यं । २४ सौगतादीष्टतत्त्वस्य । २५ कारणसमुदायापेक्षया । २६ शुद्धवस्तुनः । २७ बौद्धः । २८ स्वलक्षणं । २९ भवतीत्यध्याहारः । ३० स्वलक्षणस्य । ३१ क्रमयौगपद्याभ्यामर्थक्रियाकारित्वलक्षणः । ३२नित्यस्य ३३ क्षणिकाक्षणिकवादिनोः परस्परं वदतोः ३४ स्वलक्षणं यथा । ३५ बौद्धः । ३६ असत्सत्तासद्भावोव्यतिरेकः । ३७ व्यतिरेक इत्याध्याहारः । ३८ जैनः । ३९ बौद्धः ।

देशव्यतिरेकस्यापि न संभवः तदनुत्पत्तौ तु तेदेशस्यैव कार्यस्य सर्वदोत्पत्तेः प्रतीतिविरोध इति चेत् तर्हि क्षणिकाद्भिन्नकालस्य कार्योत्पादे व्यतिरेकाभावस्तदभावएव तद्भावात्, तदभिन्नकालस्योत्पादे कार्यत्वविरोधः समसमयवर्तित्वात्स्वात्मवत्। क्षणिकलक्षणे स्वकाले सति भवतः कालांतरेऽपि कार्यस्यान्वयवत् तदा तस्मिन्नसत्यभवतो व्यतिरेकः सिद्ध्यतीति चेत् तर्हि नित्येऽपि स्वदेशे सति देशांतरेऽपि भवतः कार्यस्यान्वयवत् तत्राप्यसति तस्याभवतो व्यतिरेकः सिद्ध्येत्। नचैवमनभिमतदेशस्यापि कार्यस्य जन्म प्रसज्यते नित्यवादिनः क्षणिकवादिनोऽपि तदनभिमतकालस्य जन्मप्रसंगात्। ततः स्वयोग्यभिन्नकालस्योत्पत्तौ नित्यादपि स्वयोग्यभिन्नदेशस्योत्पत्तेरलं प्रबंधेन सर्वथा क्षणिकेतरवादिनोः परस्परमनतिशयात् क्षणिकैकांतस्य तस्यान्यत्र प्रपंचतो निराकरणाच्च न पूर्वापरस्वभावविनाशोत्पादमात्रेण परिणामेन परिणामि सर्वं वस्तु नाप्याविनाभावमात्रेण नित्यैकान्ते तदनुपपत्तेः कूटस्थस्यास्याविर्भावतिरोभावोत्पत्तौ तदवस्थाविरोधात् अनित्यतानुषंगात् तदवस्थयोस्तदुपपत्तौ ततस्तयोर्भेदकल्पानतिक्रमात् भेदे नित्यस्यावस्थेति व्यपदेशसिद्धिः संबंधाभावात्। अवस्थावस्थावद्भावएव संबंधइतिचेत् न तस्य भेदैकांते सह्यविंध्यवदघटनात्। एतेन द्रव्यस्य भिन्नेन गुणादिना परिणामेन परिणामित्वं प्रत्याख्यातं गुणादिद्रव्ययोः समवायस्यापि भेदैकांते तद्वदनुपपत्तेरविशेषात्। देशाभेदात्तयोः संबंध इति चेन्न वातातपयोरात्माकाशयोर्वा तत्प्रसंगात् कालभेदादुभयाभेदाच्च स तयोरित्यस्याप्यनेनापास्तं। तयोरविश्वग्भावादुपपन्नः संबंधः इति चेत् स यदि देशकालाभेद एव तदा सएव दोषः ततोन्यश्चेत् स्वभावाभेदः, प्रतिभासाभेदो, व्यपदेशाभेदो, वा न तावत्स्वभावाभेदः संभवति द्रव्यस्य गुणादेश्च भिन्नस्वभावत्वोपगमात्। प्रतिभासव्यपदेशाभेदोऽपि न युक्तः, तस्यासिद्धत्वात्। कथंचिदेकद्रव्यतादात्म्यमविश्वग्भाव इति चेत् स्याद्वादमतसिद्धिः सैवास्तु गत्यंतराभावात् इति यथोक्तपरिणामेनैव परिणामित्वं सत्त्वस्य व्यापकं सिद्धं ततस्तस्यैव साधनमिति सिद्धः परिणामविशेषो हेतुः द्रव्यपर्याययोः कथंचिदैक्यं साधयति। यथैव हि द्रव्यस्य द्रव्यरूपतया स्थितिः, पूर्वापरपर्यायरूपतया तु नाशोत्पादौ परिणामविशेषस्तथा पर्यायस्यापि स्वरूपेणात्मलाभो विनाशश्च द्रव्यरूपतया तु स्थितिरिति तल्लक्षणः परिणामविशेषोऽस्त्येव। तथा द्रव्यपर्याययोः कथंचिदैक्यं शक्तिमच्छक्तिभावात् ययोस्तु नैक्यं न तयोः शक्तिमच्छक्तिभावः यथा सह्यविन्ध्ययोः शक्तिमच्छक्तिभावश्च द्रव्यपर्याययोरिति व्यतिरेकी हेतुरन्यथानुपपत्तिलक्षणः साध्यं साधयति। शक्तिमद्धि द्रव्यं शक्तयः पर्यायाः प्रतीतापएव तद्भावः शक्तिमच्छक्तिभावः सिद्धोन्यथानुपपत्त्यात्मको हेतुः। न चान्यथानुपपत्तिरसिद्धा कथंचिदैक्यमंतरेण द्रव्यपर्याययोर्भेदैकांते तदभेदैकांते च शक्तिमच्छक्तिभावस्यासंभवात्। अशक्यविवेचनलक्षणपरिणामविशेषवत्। तथा द्रव्यपर्याययोः कथंचिन्नानात्वं संज्ञासंख्यालक्षणप्रयोजनप्रतिभासभेदात्कुटपटवत् शक्रपुरंदरादिसंज्ञाभेदेन कलत्रं दारा इत्यादिसंख्याभेदेन ज्ञानादिस्वलक्षणभेदेन तापोद्योतादिप्रयोजनभेदेन स्पष्टास्पष्टादिप्रतिभासभेदेन च व्यभिचारी हेतुरितिचेन्न तस्यापि कथंचिद्भेदमंतरेणानुपपद्यमानत्वात् सर्वस्यैकानेकस्वभावताविनिश्चयात् संज्ञेयसंख्येयस्वलक्ष्यप्रयोज्यप्रतिभास्य स्वभावभेदार्पणायामेव संज्ञादिभेदव्यवहारसिद्धेरन्यथातिप्रसंगात् ततोऽनवद्यं द्रव्यपर्याययोः कथंचिद्भेदसाधनं कथंचिदैक्यसाधनवत् नचैवं विरोधवैयधिकरण्यादिदूषणं, प्रमाणसिद्धयोः कथंचिद्भेदाभेदयोस्तदगोचरत्वात् क्वचित्सर्वथा भेदाभेदयोरेव विरोधादिविषयतयावसायात्। ननु च द्रव्यपर्याययोर्यमात्मानमाश्रित्य भेदो यंचाश्रित्याभेदस्तौ यदि ततो भिन्नौ तदा भेदएव न हि भिन्नादभिन्नमभिन्नंनाम नानाभाजनस्थक्षीरादभिन्नक्षीरांतरवत् अथाभिन्नौ तथापि न भेदः तदुक्तं—

यावात्मानौ समाश्रित्य भेदाभेदौ द्वयोस्तयोः। तावभिन्नौ ततः स्यातां यदि भेदस्तदा न किम् ॥१॥
किं भिन्नौ यदि तौ भेदः सर्वथा केन वार्यते। भिन्नादभिन्नयोर्भेदा भिन्नार्थादभेदवत् ॥२॥

---

१ नित्यस्थितस्यैव। २ भिन्नः कालो यस्य। ३ कारणाभावएव। ४ कार्यसद्भावात्। ५ कारणाभिन्नकालस्य। ६ कार्यकारणयोः। ७ क्षणिकस्वरूपवत्। ८ अनुत्पद्यमानस्य। ९ उत्पद्यमानस्य। १० भिन्नो देशो यस्य कार्यस्य तस्य। ११ विस्तरेण। १२ अतिशयरहितत्वात्। १३ देवागमालंकारादौ। १४ एकरूपतया तु यः कालव्यापी स कूटस्थः। १५ व्याप्तावङ्गीक्रियमाणायां। १६ कूटस्थादाविर्भावतिरोभावौ भिन्नवभिन्नौ वा।

इति स एवमप्युपालंभो वस्तुनि न भवत्येव स्वमिथ्याविकल्पयोरेव तत्संभवात् वस्तुनो द्रव्यपर्यायात्मनोर्जात्यंतरस्य तदंशयोर्द्रव्यपर्याययोः कथंचिद्भेदाभेदात्मनोः प्रतीतिसिद्धत्वात् नच तथा प्रतीतिः मिथ्या, बाधकस्य तद्विपरीतग्राहिणः प्रमाणस्य कस्यचिदप्यसंभवात् तत्रानवस्थादेरनवतारात् तथा हि द्रव्यपर्याययोर्यमात्मानं द्रव्यस्वभावमाश्रित्याभेदः स्याद्वादिनां संमतः स एवाभेदो न पुनरन्योत्रायं पर्यायमात्मानमाश्रित्य तयोर्भेदो व्यवह्रियते सएव पर्यायात्मा भेदः ततोनापर इत्याहुरनेकांतवादिनः ततो नैवाभेदैकांतः प्रसज्यते भेदैकांतो वा तथाभ्यधायि इत्येवमप्युपालंभो न संभवति वस्तुनि तथा प्रतीतिसिद्धत्वाद्बाधकस्याप्यसंभवात् ।

द्रव्यपर्यायोश्चात्र भेदः स्याद्वादिनां मतः । द्रव्यात्मानं यमाश्रित्य स एवाभेद इत्यपि ॥१॥

पर्यायात्मानमाश्रित्य पंचभेदः प्रकीर्त्यते । स एव भेद इत्याहुस्तत्तदेकांतता कुतः ॥२॥

इति तत एव च प्रतीतिसिद्धत्वाद्बाधकाभावादपि शीतोष्णस्पर्शवत् द्रव्यपर्यायोर्विरोधो ध्वस्तः स्यात् तद्वद्वैयधिकरण्यं च ध्वस्तं स्यात् तत एवानवस्था ध्वस्ता स्यात् द्रव्यरूपेणाभेदस्यैव पर्यायरूपेण भेदस्यैवोभयस्वभावे वस्तुनि व्यवस्थितत्वात् सुनयार्पितैकांतावधारणस्यापि अनेकांताप्रतिघातत्वात् । ननु च प्रमाणार्पणादनेकांतएव नयार्पणाच्चैकांतएवेत्यप्येकांतएव प्रसक्त इति चेन्न तस्याप्यपरनयप्रमाणविषयतायामेकांतात्मकत्वात् अव्यवस्थितानेकांतोपगमात् आकांक्षाक्षयादेव व्यवस्थानसिद्धेरनवस्थादोषाभावात् । संकरश्च ध्वस्तः स्यात् तयोर्युगपत्प्राप्त्यभावात् । व्यतिरेकश्च परस्परविषयगमनाभावात् । प्रतिनियतस्वरूपत्वात्संशीतिरपि ध्वस्ता । तथानयोर्नयप्रमाणाभ्यां सुनिश्चितत्वात् तथैवाप्रतिपत्तिरभावश्च ध्वस्तः स्यात् यौगाभिमतसामान्यविशेषवत् चित्राद्वैतवादिनश्चित्रवेदनवत्, सांख्यस्य सत्वरजस्तमोमयैकप्रधानवत् चित्रपटवच्चापरेषां नैकस्यानेकत्वं विरोधं भजते नापि वैयधिकरण्यादिदोषमिति प्रतिपत्तव्यं । तदुक्तं—

तत एव विरोधोऽत्र विभिन्नाश्रयतापि वा । अनवस्थाद्यपि ध्वस्तं स्यात्सामान्यविरोधवत् ॥१॥

चित्रवेदनवच्चापि सत्वाद्यात्मप्रधानवत् । चित्रवस्त्रवदेकस्यानेकत्वं न विरोधभाक् ॥ २ इति

एवं च न सत्सत्त्वलक्षणं प्रमेयत्वं नित्यैकांतादिषु क्वचिदपि सर्वथैकांते संभवति प्रमाणेनेव नयैरपि जात्यंतरस्यानेकांतात्मनो वस्तुनः प्रवेदनात् । नित्यत्वाद्येकांतप्रवेदने तत्प्रतिपक्षाऽनित्यत्वादिधर्माणामनिराकरणात् तत्र तेषामपि गुणीभूतानां सद्भावात् एतावतैव विपक्षे व्यावृत्तिनिश्चयेन हेतोः प्रकृतस्यान्यथानुपपन्नताप्रधानलक्षणभूता सिद्धा । ततो युक्तं साध्यसाधनवचनं संक्षेपतः पत्रवाक्ये केवलस्य हेतोरसति संक्षेपतो प्रयोगाप्रयोगात्, सर्वथाविचारासहत्वात्, साध्यनिर्देशसहितस्यैव हेतोः प्रयोगार्हत्वसमर्थनात्, तदुक्तं-

तथा च न प्रमेयत्वं ध्रौव्यैकांतादिषु क्वचित् । नयैरपि गुणीभूतानेकांतस्य प्रवेदनात् ॥

सिद्धा चैतावता हेतोरन्यथानुपपन्नता । प्रधानलक्षणं युक्ता साध्यसाधनवाक् ततः ॥ इति

विशेषाश्रयणात्कस्य कस्यावयवस्य वचनं पत्रे प्रयोगयोग्यमिति उदाह्रियते ।

साध्यधर्मविशिष्टस्य धर्मिणः साधनस्य च । वचः प्रयुज्यते पत्रे विशेषाश्रयतो यथा ॥

स्वांतभासितभूत्याद्यत्र्यंतात्मतदुभांतभाक् । परांतद्योतितोद्दीप्तमितीतः स्वात्मकत्वतः ॥ इति

अंत एव ह्यांतः स्वार्थिकेऽणि भवति वानप्रस्थादिवत् प्रादिपाठायेक्षया सोरांतः स्वांतः—उत् तेन भासिता द्योतिता भूतिरुद्भूतिरित्यर्थः सा आद्या येषां ते स्वांतभासितभूत्याद्यास्तेच ते अंताश्च ते उद्भूतिविनाशध्रौव्यधर्मा इत्यर्थः, त एवात्मानः तान् तनोति इति स्वांतभासितभूत्याद्यत्र्यंतात्मतदिति साध्यधर्मः उभांता वाक् यस्य तदुभांतभाक् विश्वमिति धर्मो तस्य साध्यधर्मविशिष्टस्य निर्देशः उत्पादादित्रिस्वभावव्यापि सर्वमिति यावत् । परांतो यस्येति परांतः प्रःसएव द्योतितं द्योतनमुपसर्ग इत्यर्थः तेनोद्दीप्ता सा चासौ मितिश्च तामितः स्वात्मा यस्य तत्परांताद्योतितोद्दीप्तमितीः तत्स्वात्मकं प्रमितिः प्राप्तस्वरूपमिति यावत् तस्य भावस्तत्त्वं प्रमेयत्वं तस्मात्ततः प्रमेयत्वात् इत्यर्थः प्रमाणविषयस्य प्रमेयत्वादिति एतस्य साधनस्य चान्यथानुपपन्नत्वनियमनिश्चयलक्षणस्योक्तन्यायेन समर्पितस्य वचनं यत्रेति विशेषाश्रयेण प्रयुज्यते, दृष्टांतोपदर्शनाभावेऽपि हेतोर्गमकत्वसमर्थनात् । तथा त्रयश्चत्वारः पंच षडादयो वा पत्रवाक्येऽवयवाःस्युः नियमस्याव्यवस्थानादित्येतदभिधीयते ।

चित्राद्यदंतराणीयमारेकांतात्मकत्वतः । यदित्थं न तदित्थं न यथा किंचिदिति त्रयः ॥१॥
तथाचेदमिति प्रोक्ताश्चत्वारोऽवयवा मताः । तस्मात्तथेति निर्देशे पंच पत्रस्य कस्यचित् ॥२॥
षडादयोऽपि चैवं स्युर्नियमस्याव्यवस्थितेः । साधर्म्येतरदृष्टांताभिधाने च यथा क्वचित् ॥३॥

चित्रमेकानेकरूपं तदततीतिचित्रात् एकानेकरूपव्याप्यनेकात्मकमित्यर्थः सर्वविश्वयदित्यादि सर्वनामपाठापेक्षया यदंतो विश्वशब्दः । यदंतोस्येति यदंत इतिवृत्तेः, यदंतेन राणीयं शब्दनीयं विश्वमित्यर्थः तदनेनानेकांतात्मकं विश्वमिति पक्षनिर्देशः कृतः, आरेका संशयः सांतोस्येत्यारेकांतः प्रमेयः प्रमाणप्रमेयसंशयेत्यादिपाठापेक्षया स आत्मा स्वभावो यस्य तदारेकांतात्मकं तस्य भावस्तत्त्वं तस्मादिति साधनधर्मनिर्देशः यदित्थं न भवति यच्चित्रान्न भवति तदित्थं न भवति आरेकांतात्मकं न भवति यथा किंचिन्न किंचित् यथाचाकिंचित् सर्वथैकांतात्मकं तत्त्वं पराभ्युपगतमिति त्रयोऽवयवाः पत्रे प्रयुज्यंते तथा चेदं प्रमेयात्मकं चेदं विश्वमिति पक्षधर्मोपसंहारवचने चत्वरोवयवाः प्रयोगेऽमी दृष्टाः तस्मात्तथानेकांतव्यापीति निर्देशे पंचावयवाः । पत्रवाक्यस्य कस्यचित् षडादयोपि चैवं प्रतिपाद्याः प्रतिपाद्याशयवशात् स्युः तेषामियत्तया चावधारणस्याभावात् तन्न साधर्म्यदृष्टांतस्य वैधर्म्यदृष्टांतस्य च गम्यमानस्यापि वचने षडवयवाः स्युः । यथानित्यः शब्दः कृतकत्वात् यत्कृतकं तदनित्यं दृष्टं यथा घटः यत्पुनर्नित्यं तदकृतकं दृष्टं यथाकाशं कृतकश्च शब्दः तस्मादनित्य इति अत्रैव साधर्म्योपनये वैधर्म्योपनये च कृतकः शब्दः, अकृतकस्तु न भवतीति प्रयुज्यमाने सप्तावयवाः स्युः तस्मादनित्यो नित्यस्तु न भवति इति निगमनवचनेऽष्टौ, अनित्यः शब्दो न तु नित्यः, इति प्रतिज्ञाद्वयवचने नवावयवाः स्युः कृतकत्वादकृतकत्वाभावादिति हेतुप्रयोगे दशापि श्रूयंते गम्यमानावयवप्रयोगे पुनरुक्तदोषाभावात् , प्रतिज्ञाद्यवयवप्रयोगवत् पक्षधर्मोपसंहारवद्वा दुराशंकाव्यवच्छेदस्य फलस्य सद्भावाविशेषात्, सर्वत्र निष्फलत्वायोगात्, तथाविधप्रतिपाद्याशयाविशेषसंभवाच्च, यतश्चैवं तस्मात्साध्याविनाभूतस्य साधनस्योपदर्शनं प्रमाणसिद्धं तदभावे साध्यप्रसिद्धेः, पंचावयवाद्युपदर्शनं तु परेषां न प्रमाणसिद्धं बोध्यानुरोधमात्रादेतदुपदर्शनात् एवं च नैकांतवादिनां प्रसिद्धावयवं वाक्यं संभवति यत् पत्राख्यां लभेत तदुक्तं—

ततः साध्याविनाभूतसाधनस्योपदर्शनं । प्रमाणासिद्धमेतस्याभावे साध्याप्रसिद्धितः ॥ १ ॥
बोध्यानुरोधमात्रात्तु शेषावयवदर्शनात् । परेषां न प्रमाणेन प्रसिद्धावयवं वच्च इति ॥ २ ॥

किंच यन्मते वर्णा अपि न व्यवतिष्ठंते पदान्यपि च तस्य वाक्यं कुतः प्रमाणात् सिद्ध्येत् यत् पत्रलक्षणेन यथोक्तेन समन्वितं स्यात् । ननु यौगानां वर्णादयो व्यवतिष्ठंत एव आकाशगुणत्वेन शब्दानामभ्युपगमात् तद्बाधकाभावादिति न संभाव्यं तथा बाधकसद्भावात् किं तावद्बाधक इति चेदुच्यते नाकाशगुणः शब्दः बाह्येंद्रियज्ञानज्ञानविषयत्वात् य एवं सएवं यथा स्पर्श तथा च शब्दस्तस्मान्नाकाशगुणः शब्दः इति नान्यथानुपपत्तिशून्यं साधनं । गगनगुणत्वे शब्दस्य तदनुपपत्तेः परममहत्त्वादिवत् । घटाकाशसंयोगादिना व्यभिचारीदं साधनमिति चेन्न बाह्येंद्रियज्ञानविषयत्वासिद्धेः अतींद्रिययोरिवातींद्रियेंद्रियकयोरपि संयोगस्य विभागादेश्च वा तदघटनात्, अन्यथातिप्रसंगात् तदुक्तं—

वर्णा न व्यवतिष्ठंते पदान्यपि च यन्मते । तस्य वाक्यं कुतः सिद्ध्येत् यत्पत्रं लक्षणान्वितं॥१॥
न शब्दः खगुणो बाह्यकरणज्ञानगत्वतः । स्पर्शवत् खगुणस्यैवं प्रमाणव्याहतत्वतः ॥२॥ इति

न च मीमांसकस्यापि सर्वगतामूर्तद्रव्यनित्यैकात्मको वर्णो युज्यते तस्य बाह्येन्द्रियग्राह्यस्वभावत्वात् घटादिवत् । नाकाशेन हेतोर्व्यभिचारः तस्य बाह्येंद्रियाग्राह्यस्वभावत्वात् कालादिवत् शुषिरस्याप्याकाशस्यानुमेयत्वात् तत्र मूर्तद्रव्यस्याभावे कस्यचिदमूर्तद्रव्यस्य सिद्धेः तुच्छस्याभावस्याघटनात्, निराश्रयस्य गुणादेरनुपपत्तेः परिशेषादाकाशस्य साधनात् । शुभ्रमाकाशं श्यामलं चेदमिति प्रत्ययाच्चक्षुर्ग्राह्यमाकाशमिति चेन्न आलोकांधकारयोराकाशत्वोपचारात् तथा प्रत्ययस्य भावात् तत्र घनद्रव्याभावेऽस्य तदुपचारहेतुत्वात् तयोरेवाकाशद्रव्यत्वोपगमे स्वमतविरोधात् न चान्यत्किंचित्सर्वगतामूर्तनित्यैकात्मकं द्रव्यं बाह्येंद्रियग्राह्यस्वभावं दृष्टं येन व्यभिचारीदं साधनं स्यात् ततः पटवन्न तथा शब्दः । तदुक्तं—

न च सर्वगतामूर्तनित्यैकात्मात्र युज्यते । वर्णो बाह्येंद्रियग्राह्यस्वभावत्वाद् घटादिवत् ॥१॥ इति

वर्णव्यतिरिक्तं पदं वाक्यं वा स्फोटाख्यमित्यपि न संभवति ग्राहकाभावात् अर्थप्रतिपत्त्यन्यथानुपपत्तिग्राहिकेति चेन्न तस्यास्तत्त्वतः कथंचिद्वर्णात्मकपदवाक्यहेतुत्वोपपत्तेः परोपगतस्फोटस्यानभिव्यक्तस्यार्थप्रतिपत्तिहेतुत्वविरोधात्, वर्णैस्तदभिव्यक्तेरपि प्रत्येकमयोगात्, वर्णांतरोच्चारणवैयर्थ्यात्, पौनःपुन्येन वाक्यार्थबोधनानुषंगात् समुदितैरपि तदभिव्यक्तेरसंभवात्, वर्णानां समुदायाघटनात्, पूर्ववर्णश्रवणाहितसंस्कारस्य प्रतिपत्तुरंत्यवर्णश्रवणानंतरं तदभिव्यक्तौ तथार्थप्रतिपत्तेरेव सिद्धेः स्फोटपरिकल्पना वैयर्थ्यात्, प्रतीत्यतिलंघनाच्च क्रमविशिष्टवर्णविशेषेभ्य एवार्थप्रतीतिसद्भावात् तेषामेव पदवाक्यरूपत्वोपपत्तेः । न चागममात्रात् पदवाक्यस्फोटप्रतिपत्तिस्तस्य प्रामाण्यसिद्धेः । न चान्यद्ग्राहकमस्ति यतस्तद्व्यवस्था तत्वतः स्यात् तदुक्तं—

नर्ते वर्णात्पदं नाम नच वाक्यं पदादृते । स्फोटाख्यं ग्राहकाभावात् परेष्टस्यास्य तत्त्वतः ॥१॥

यस्य पुनः स्याद्वादिनः शब्दात्मकं बाह्यं वाक्यं पुद्गलरूपं चिदात्मकं चांतरंगमात्मस्वभावं प्रमाणात्सिद्धयति तस्य वाक्यं पत्रं भवेत् प्रोक्तलक्षणेनान्वितं, सिद्धे धर्मीणि वाक्ये तद्धर्मस्योदितलक्षणस्य परीक्षाविषयत्वघटनात् । ननु चानेकांतवादिनोऽपि वाक्यस्य ग्राहकं किं प्रमाणं यतस्तत्सिद्धिरिति चेत् चिदात्मनोऽतरंगस्य स्वसंवेदनप्रत्यक्षं तदात्मरूपत्वात् वर्णपदवाक्यज्ञानपरिणतो ह्यात्मा भावतो वर्णः पदं वाक्यं च गीयते ततएवार्थप्रतिपत्तिघटनात् लिंगज्ञानात्मकभावलिंगाल्लिंगिप्रतिपत्तिवत्, चक्षुरादिज्ञानाद्रूपादिप्रतिपत्तिवच्च, सर्वस्याचेतनस्यार्थप्रतिपात्तिहेतुविरोधात् अन्यत्रोपचारात् तत्कारणत्वात् तत्कार्यत्वाच्च तदुपचारसिद्धेः । तथा बाह्यस्येंद्रियप्रत्यक्षं ग्राहकं तत एव तत्पुद्गलात्मकं तदनात्मकस्येंद्रियप्रत्यक्षग्राह्यत्वानुपपत्तेरिति विचारितमन्यत्र प्रपंचेन । तदुक्तं—

बाह्यं शब्दात्मकं वाक्यमंतरंगं चिदात्मकं । पुद्गलात्मस्वरूपं तु प्रमाणाद्यस्य सिद्ध्यति ॥ १ ॥
तत्र वाक्यं भवेत् पत्रं तत्त्वतो लक्षणान्वितं । सिद्धे धर्मिणि धर्मस्य परीक्षाविषयत्वतः ॥२॥ इति

स्वाभ्युपगममात्रात् सर्वथैकांतवादिनां विद्यमानमपि वाक्यं धर्मिणः स्वेष्टार्थसाधनत्वधर्माधिकरणं स्वसाध्यार्थाविनाभाविलिंगस्य कस्यचिदपि अनुपपत्तेः तदभिधानात् सर्वस्य हेतोरसिद्धत्वाच्च । तदुच्यते–

वाक्यं सदपि नैकांतपक्षे स्वेष्टार्थसाधनं । स्वासाध्यार्थाविनाभावि लिंगस्यानुपपत्तितः ॥१॥
असिद्धत्वाच्च सर्वस्य हेतोस्तदभिधानतः । कार्थसिद्धिस्तथाचोक्तं तत्त्वार्थश्लोकवार्तिके ॥२॥
तत्र स्वरूपतोऽसिद्धो वादिनः शून्यसाधने । सर्वो हेतुर्यथा ब्रह्मतत्त्वोपप्लवसाधने ॥ ३ ॥
सत्त्वादिः सर्वथा साध्ये शब्दभंगुरतादिके । स्याद्वादिनः कथंचित्तु सर्वथैकांतवादिनः ॥४॥
शब्दाविनश्वरत्वे तु साध्ये कृतकतादयः । हेतवोऽसिद्धतां यांति बौद्धादेः प्रतिवादिनः ॥५॥
जैनस्य सर्वथैकांते धूमवत्त्वादयोऽग्निषु । साध्येषु हेतवोऽसिद्धाः पर्वतादौ तथा मितः ॥ ६ ॥
शब्दादौ चाक्षुषत्वादिरुभयासिद्ध इष्यते । निश्शेषोऽपि तथाशून्यब्रह्माद्वैतप्रवादिनोः ॥७॥
वाद्यसिद्धोभयासिद्धौ तत्र साध्याप्रसाधनौ । समर्थनविहीनः स्यादसिद्धः प्रतिवादिनः ॥ ८ ॥
हेतुर्यस्याश्रयो न स्यादाश्रयासिद्ध एव सः । स्वसाध्येन विनाभावाभावादगमको मतः ॥९॥
प्रत्यक्षादेः प्रमाणत्वे संवादित्वादयो यथा । शून्योपप्लवशब्दाद्यद्वैतवादावलंबिनां ॥ १० ॥
संदेहविषयः सर्वः संदिग्धासिद्ध उच्यते । यथागमप्रमाणत्वे रुद्रोक्तत्वादिरास्थितः ॥११॥
सन्नप्यज्ञायमानोऽत्राज्ञातासिद्धो विभाव्यते । सौगतादेर्यथा सर्वः सत्त्वादिः स्वेष्टसाधने ॥१२॥
न निर्विकल्पकाध्यक्षादस्ति हेतोर्विनिश्चयः । तत्पृष्ठजाद्विकल्पाच्चावस्तुगोचरतः क्वचित् ॥१३॥
अनुमानांतराद्धेतुनिश्चये वानवस्थितिः । परापरानुमानानां पूर्वपूर्वत्र वृत्तितः ॥ १४ ॥
ज्ञानं ज्ञानांतराध्यक्षं वेदतानेनदर्शितः । सर्वो हेतुरविज्ञातोऽनवस्थानाविशेषतः ॥ १५ ॥
अर्थापत्तिपरिच्छेद्यं परोक्षज्ञानमादृताः । सर्वे ये तेष्यनेनोक्ता स्वाज्ञातासिद्धिहेतवः ॥१६॥
प्रत्यक्षं तु फलज्ञानमात्मानं वा स्वसंविदं । प्राहुर्ये करणज्ञानं व्यर्थं तेषां निवेदितं ॥१७॥

प्रधानपरिणामित्वादचेतनमितीरितं । ज्ञानं यैस्ते कथं न स्युरज्ञातासिद्धहेतवः ॥ १८ ॥
प्रतिज्ञार्थैकदेशस्तु स्वरूपासिद्ध एव नः । शब्दो नाशी विनाशित्वादित्यादिः साध्यसंनिभः ॥१९॥
यः साध्यविपरीतार्थाव्यभिचारी सुनिश्चितः । स विरुद्धोवबोद्धव्यस्तथैवेष्टविघातकृत् ॥२०॥
सत्वादिः क्षणिकत्वादौ यथा स्याद्वादिविद्विषां । अनेकांतात्मकत्वस्य नियमात्तेन साधनात् ॥२१॥
पारार्थ्यं चक्षुरादीनां संघातत्वं प्रसाधयेत् । तेषां द्रव्यविवर्तत्वमेवमिष्टविघातकृत् ॥ २२ ॥
विरुद्धान्न च भिन्नोसौ स्वयमिष्टाद्विपर्यये । सामर्थ्यस्याविशेषेण भेदे वातिप्रसंगतः ॥ २३ ॥
विवादाध्यासितं धीमद्धेतुकं कृतकत्वतः । यथा शकटमित्यादिविरुद्धोऽनेन दर्शितः ॥२४॥
यथा हि बुद्धिमत्पूर्वं जगदेतत्प्रसाधयेत् तथा बुद्धिमतो हेतोरनेकत्वं शरीरितां ॥ २५ ॥
स्वशरीरस्य कर्तात्मा नाशरीरोऽस्ति सर्वथा । कार्मणेन शरीरेणानादिसंबंधसिद्धितः ॥२६॥
यतः साध्ये शरीरित्वे धीमतो व्यभिचारितां । जगत्कर्तुः प्रपद्येत तेन हेतुः कुतार्किकः इति ॥२७॥

यतश्चैवमक्षपादादेः सर्वथैकांतवादिनः साध्यार्थाविनाभाविलिंगं सर्वथा न संभवत्यसिद्धतादिदोषदूषितत्वात् तस्मान्न तस्य पत्रं संभवदर्थके प्रतिष्ठापयितुं शक्यं कदाचिज्जैनान् प्रति तदुक्तं—

ततो नैवाक्षपादादेः पत्रं संभवदर्थकं । प्रतिष्ठापयितुं शक्यं जातु स्याद्वादिनः प्रति ॥ १ ॥

कुत इति चेत्

तत्तत्वाधिगमोपायप्रकाशरहितत्वतः । इत्येतस्य प्रसिद्धत्वाद्धेतोरव्यभिचारतः ॥ १ ॥

कः पुनरसौ तत्त्वस्याधिगमो नामेति स्वार्थाकारविनिश्चयः सुनिर्बाध इति ब्रूमः निर्विकल्पकदर्शनस्य विनिश्चयस्य संशयस्येव तत्त्वाधिगमत्वानुपपत्तेः क्षणक्षयप्रदर्शनवत् स्वाकारमात्रविनिश्चयस्यापि तद्भावायोगात् वेद्याकारविनिश्चयविरहे स्वाकारविनिश्चयस्यानुभवात् स्वसंवेदनस्यापि वेद्यवेदकाकारात्मनः प्रतीतेः तथार्थाकारमात्रविनिश्चयस्यापि तत्त्वाधिगमत्त्वाघटनात् स्वाकारविनिश्चयमंतरेणार्थाकारविनिश्चयविरोधात् । स्वार्थाकारविनिश्चयस्यापि कालांतरादौ सबाधस्य तद्विरोधात् मरीचिकाविनिश्चये तोयविनिश्चयवत्, देशकालांतरापेक्षयापि सुष्ठु निर्बाधस्य तथाभावसिद्धेरिति प्रपंचितत्वादन्यत्र । तदुक्तं—

तत्त्वस्याधिगमस्तावत्स्वार्थाकारविनिश्चयः । सुनिर्बाधोन्यथा तस्य व्यवस्थानुपपत्तितः ॥१॥

तर्हि कस्तस्योपाय इति चेत् कथ्यते साकल्येन प्रमाणं देशतो नयः प्रतिपत्तुस्तत्त्वाधिगमोपायः प्रतीयत एव तस्य शास्त्रे विस्तरतः समर्थितत्वात् नचासौ सर्वथैकांतवादिनामक्षपादादीनामुपपत्तिमास्कंदति तेषां स्वेष्टस्य दृष्टेष्टबाधितत्वात् इतिचिंतितप्रायं प्रपंचतोऽन्यत्र परीक्षादक्षबुद्धिभिर्लक्षणीयं, त एव हि संक्षेपेणाप्युक्तं लक्षयितुं क्षमंते तदुक्तं—

तस्योपाय पुनः कार्त्स्न्येनैकदेशेन वा मतः । प्रतिपत्तुः प्रमाणं वा सन्नयो वा प्रतीयते ॥ १ ॥
न चासौ सर्वथैकांतवादिनामुपपद्यते । दृष्टेष्टबाधनात्तेषां स्वेष्टस्येत्यपि चिंतितं ॥ २ ॥
लक्ष्यं प्रपंचतोन्यत्र परीक्षादक्षबुद्धिभिः । संक्षेपतोप्युपक्षिप्तं ते हि लक्षयितुं क्षमाः ॥ ३ ॥

कः पुनस्तत्त्वाधिगमोपायस्य प्रकाश इति चेत् प्रतिपाद्यं प्रति साधुशब्दैस्तस्य स्फुटं प्रदर्शनं प्रकाशः । न चाक्षपादादीनां सर्वथा तद्व्यवस्थास्ति प्रमाणवाक्यासंभवात् । तदप्यभाणि—

प्रकाशस्तस्य सद्वाचा प्रतिपाद्यं प्रति स्फुटं । दर्शनं न चैतेषां तद्व्यवस्थास्ति सर्वथा ॥ १ ॥

तदनेनैकांतवादिनां पत्रवाक्यं, न संभवदर्थकं, तत्तत्त्वाधिगमोपायप्रकाशरहितत्वात् इत्यनुमानं समर्थितं प्रतिपत्तव्यं तथा पत्रवाक्यं गूढमन्यच्चार्थगूढादि वादिना त्रिभिरभिहितं सप्तकृत्वो वा तथैकविंशति वा परिषत्प्रतिवादिभ्यामविज्ञातार्थं यदा तदा तदेवाविज्ञातार्थं नाम निग्रहस्थानमायातं तल्लक्षणस्यान्वयात् तत एव चाप्रतिपत्तिनिग्रहस्थानं तत्त्वतो भवेदेतस्य यदा स्वपत्रवाक्यस्यार्थं व्याचष्टे वादिप्रतिवादिपरिषत्प्रत्यायनाय तदापि वक्तुर्विप्रतिपत्तिर्नाम निग्रहस्थानं तेन मिथ्यार्थप्रतिपादनात् तत्प्रतिपादितार्थस्य विसंवादित्वसिद्धेरनेकांतेन बाधनात् स्याद्वादिभिः पश्चात्पत्रवाक्यस्यानेकांतार्थस्य साधने मिथ्यात्वप्रतीतिर्विप्रति-

पत्तिरिति लक्षणस्य भावात् वाक्छलं वा संभवदर्थपरित्यागेनासंभवतोऽर्थस्य परिकल्पनात् न हि प्रमाणबलान्नैयायिकादिपरिकल्पितः पत्रवाक्ये संभवन्नर्थः सिद्धः प्रत्यक्षादिबलादनेकांतस्यैव प्रसिद्धेः प्रत्यक्षं हि तावत् बहिरंतश्च तत्त्वं भावाभावात्मकं व्यवस्यति सर्वथा विरोधाभावात् बाधकरहितं जातुचित् एकांतस्यासाक्षात्करणात् तथाभूतानेकधर्माधिष्ठानं भावः विशेषणविशेष्यादिव्यवहारान्यथानुपपत्तेरित्यनुमानाच्च सर्वं भावाभावात्मकं सिद्धं । आगमाच्च सुनिर्बाधकप्रमाणादिति प्रपंचतोन्यत्र तत्त्वार्थालंकारे देवागमे च प्रोक्तमिह पत्रपरीक्षायां सद्भिरवगतंव्यमित्यलं प्रपंचेन तदप्युक्तं ।

तथा त्रिःसप्तकृत्वोऽपि पत्रवाक्यमुदीरितं । वादिना गूढमन्यच्चाविज्ञातार्थमुपागतं ॥ १ ॥
परिषत्प्रतिवादिभ्यामविज्ञातत्वसद्धितः । ततश्चाप्रतिपत्तिः स्यान्निग्रहस्थानमंजसा ॥ २ ॥
वक्तुर्विप्रतिपत्तिर्वा मिथ्यार्थप्रतिपादनात् । विसंवादकतायोगात् तदुक्तार्थस्य तत्त्वतः ॥ ३ ॥
स्याद्वादिभिः पुनः पत्रस्यानेकांतसाधने । भवेद्विप्रतिपत्तिर्वाक्छलं वा लक्षणान्वयात् ॥४॥
तद्धि संभवतोऽर्थस्य परित्यागेन कल्पनं । यदसंभवतोर्थस्य प्रमाणबलतश्छलं ॥ ५ ॥
न चेह संभवन्नर्थो यौगादिपरिकल्पितः । प्रत्यक्षादिबलात्सिद्धस्ततोनेकांतसिद्धितः ॥ ६ ॥
भावाभावात्मकं वस्तु बहिरंतश्च तत्वतः । प्रत्यक्षं निश्चिनोत्येव सर्वथा बाधवर्जितं ॥ ७ ॥
वास्तवानेकधर्माधिष्ठानं भावो विशेषतः । विशेषणविशेष्यादिव्यवहारप्रसिद्धितः ॥ ८ ॥
सिद्धमित्यनुमानाच्चानंतधर्मसमाश्रितं । समस्तं वस्तु निर्बाधादागमाच्च प्रमाणतः ॥ ९ ॥
इति प्रपंचतः प्रोक्तमन्यत्रेहावगम्यतां । सर्वं पत्रपरीक्षायां सद्भिरित्युपरम्यते ॥ १० ॥

तदेवं पत्रविचारप्रकरणपरिसमाप्तौ विजिगीषोः स्याद्वादिनो वचनं चतुरंगं निराकृताशेषमिथ्याप्रवादप्रसरं श्रिया सम्यग्दर्शनादिलक्षणयोपायभूतयोपमेयानंतज्ञानादिलक्षणलक्ष्मीपर्यततया सदा जयत्विति जयवादेनासंशयति——

जीयान्निरस्तनिश्शेषसर्वथैकांतशासनं ।
सदा श्रीवर्द्धमानस्य विद्यानंदस्य शासनं ॥ १ ॥
सूक्ताभासो भवति भवतस्तावदुत्तारहेतुः
स्वस्यान्येषां गुरुतमतमश्छिच्च माध्यस्थभाजां ।
तन्मत्वैवं विपुलमतिभिस्तत्र यत्नो विधेयो
नानंदायाखिलखलधियां तं हि कः कर्तुमीशः ॥ २ ॥

इति श्रीस्याद्वादपतिविद्यानंदस्वामिविरचिता
पत्रपरीक्षा समाप्ता ।





श्रीपरमात्मने नमः ।

सनातनजैनग्रंथमालायाः

दशमांकः ।

आचार्यवर्य श्रीसमंतभद्रस्वामिविरचिता

७

आप्तमीमांसा

स्याद्वादविद्यापतिश्रीविद्यानंदस्वामिविरचिता

८

प्रमाणपरीक्षा च ।

न्यायशास्त्रिणा श्रीयुत-पंडितगजाधरलालजैनेन संपादिते ।

ते च

उस्मानाबादनिवासि-स्वर्गीयश्रेष्ठिवर्यगांधीकस्तूरचंद्रस्यात्मजबालचंद्रस्य स्मरणार्थं

काशीस्थ-भारतीयजैनसिद्धांतप्रकाशिनीसंस्थायाः व्यवस्थापकेन

श्रीपन्नालालजैनेन

काशीस्थ-कृष्णयंत्रालये चंद्रप्रभानाम्नि यंत्रालये च प्रकाशिते ।

श्रीवीरनिर्वाणसंवत्सरः २४४० खिष्टाब्दः १९१४

प्रथमसंस्करणं ।

अस्यांकस्य मूल्यमेको रूप्यकः ।

PUBLISHED BY PANDIT PANNALAL JAIN BAKALIWAL
SECRETARY BHARATIY JAIN SIDDHANT PRAKASHINI SANSTHA *Benares City.*

PRINTED BY BABU GAURI SHANKER LAL MANAGER
CHANDRAPRABHA PRESS Benares City

प्रस्तावना

आप्तमीमांसा

विद्वन्महोदयाः !—

प्रत्यपत्सत नाम वैफल्यं पुरा स्वपरहितापादनाकुंचितशेमुषीनामार्हतमतप्रवर्तकमानिनामार्हतानां पुरस्तात् सविनयमपि कृताभ्यर्थनाः श्रीमतामममलतत्त्वस्वरूपावबुभुत्सूनामवदाततया। परंतु नाद्यत्वे ते जैनाः। प्रतियंति कतिपयास्तेष्वार्हततत्त्वप्रवर्तनफलं। समाविरभावि तैस्तत्स्वरूपप्रकाशनाय **सनातनजैन-ग्रंथमाला**भिधोऽनुपमप्रभाकरः। रसयंतु रसिकाः तत्स्वरूपसुधां निर्व्यूहतया सांप्रतमिति समभ्यर्थना।

समुपानीयते ग्रंथरत्नद्वयमिदमस्माभिरद्य श्रीमतां पुरस्तात्। आदिमं—**आप्तमीमांसा** वृत्त्यष्टशतीति विशदटीकाद्वितयविभूषिता। अपरं—अमलप्रमाणस्वरूपावबोधिका **प्रमाणपरीक्षा**। आदिमस्य प्रणेता किल ग्रंथरत्नस्य समजनि श्रीमत्स्वामि**समंतभद्रः** समंतभद्रः। सर्वथा परहितप्रणिहितात्मायं महात्मा कदा भारतभूमिममूं विभूषयामासात्मवैदुष्येणेति नास्ति किमपि निर्णायकं गमकं।

सांप्रतिकेतिवृत्तवेत्तृणां मतमिदमस्य पावनात्मानो विषये यदजनिष्टायं षष्ठायां स्त्रीष्टशताब्दौ। नंदि-संघपट्टावलीतश्च व्यज्ञायीदं समपद्यतायं सपादप्रथमायां शताब्दौ। कामयांचकार च **मैसूर**प्रांतस्थ**कांची-पुर**मवदातयात्मनीनवासेन। परं नोभयत्रापि समयनिर्णये प्रत्यायकं किमपि सुनिर्णेयं प्रमाणं। किंतु नात्र संशीतिः प्रवादिमहीधराशानिनानेन मुनिना भवितव्यं नियतं प्रखरविदुषा चिरंतनतमेन च। जतश्रुति-रप्येतद्विषयिणीयं—

आसीत्किल विविधमतिमन्निकरपरिपालितनिदेशः शेमुषीमंथनमथितानैकागमोदधिसमवाप्तानवद्यसुधा-परिपूरितस्वांतः श्रीसमंतभद्रो भगवान् मुनिराट्। स चैकदा पुरा समुपार्जितनैकाशुभकर्मसंपातात् समुपात्त-प्रखरभस्मव्याधिः कठिनतमं मुनिव्रतं परिपालयितुमशक्नुवन् व्याधिपरिहरणाधिया विमुच्य मुनिलिंगं समियाय वाराणस्यां। तदात्वे च वाराणस्यां कश्चित् स्वप्रतापपराभूतविबुधपतिः शिवकोटिमहीपतिरासीत् स च परमशैवत्वात् विनिर्माय कमपि शिवालयं समादिशत् बहुलसुरसमोदकादिसामग्न्या शिवमर्चयितुं। यदा च समंतभद्रः समश्रौषीत् बहुलया सामग्न्या शिवस्य पूजां तदाधिकं मनसि तुतोष। समेत्य च नरपतिशिव-कोटिपरिषदि, उपदर्श्य कमपि लोकेतरातिशयं, अपेदे शिवपूजकपदं राजानुमत्या। भक्षंश्च सुरसपदार्थ-जातं शमयामास च स्वोदरव्याधिं सानंदं। कियता कालेन व्याधिस्तस्योपशशाम। व्याध्युपशमे च कदाचि-त्पुनः शिवकोटिपरिषदि समागत्य, आविर्भाव्य च विचित्रातिशयं स्वमंत्रवचनव्याहूताष्टमजिनचंद्रप्रभं, चकार शिवकोटिमहीपतिं दिगंबरदीक्षादीक्षितं। भगवत्समंतभद्रः स्वव्याध्युपशमनकामनया वाराणसी-प्राप्तितः पूर्वमपि बहुत्र बभ्राम। अतो यदा शिवकोटिमहीपतिः स्वामिपरिचिकीषया तदीयवृत्तमप्राक्षीत् तदा परिचायितः स पद्येनामुना स्वामिना।

कांच्यां नग्नाटकोऽहं मलमलिनतनुर्लांबशे पांडुपिंडः
पुंड्रेंड्र शक्यभिक्षुर्दशपुरनगरे मिष्टभोजी परिव्राट्।
वाराणस्यामभूवं शशधरधवलः पाण्डुरांगस्तपस्वी
राजन् यस्यास्ति शक्तिः स वदतु पुरतो जैननिर्ग्रंथवादी ॥१॥

नेमिचंद्र वर्णिरचिताराधनासारस्थं पद्यमिदं

मल्लिषेणप्रशस्तौ च समुल्लेखोऽयं स्वामिविषयकः—

वंद्यो भस्मकभस्मसात्कृतिपटुः पद्मावतीदेवता—
दत्तोदात्तपदः स्वमंत्रवचनव्याहूतचंद्रप्रभः।

आचार्यः स समंतभद्रगणभृद्येनेह काले कलौ
जैनं वर्त्म समंतभद्रमभवद्भद्रं समंतान्मुहुः ॥ १ ॥

शिवकोटिनरपतिपुरस्तादात्मनीनपरिचयः—

पूर्वं पाटलिपुत्रमध्यनगरे भेरी मया ताडिता
पश्चान्मालवसिंधुढक्कविषये कांचीपुरे वैदिशे ।
प्राप्तोऽहं करहाटकं बहुभटं विद्योत्कटं संकटं
वादार्थी विचराम्यहं नरपते शार्दूलविक्रीडितं ॥ १ ॥

अवट्टुतटमटति झटिति स्फुटचटुवाचाटधूर्जटेर्जिह्वा
वादिनि समंतभद्रे स्थितवति सति का कथान्येषां ॥ २ ॥

यद्यपि परात्मनः किलैतस्य स्वामिनः न क्वापि दृष्टिपथमवतरति नियतसमयादिसमुल्लेखस्तथापि तत्कृतिव्यामुग्धप्रतिभैः प्राशास्त्यमनेकैर्गरीयोभिराचार्यैः—

नमः समंतभद्राय महते कविवेधसे यद्वचोवज्रपातेन निर्भिन्नाः कुमताद्रयः ॥ ४३ ॥
कवीनां गमकानां च वादिनां वाग्मिनामपि यशःसामंतभद्रीयं मूर्ध्नि चूडामणीयते ॥ ४४ ॥

अमोघवर्षनृपः, महापुराणकर्ता भगवज्जिनसेनाचार्यः

सरस्वतीस्वैरविहारभूमयः समंतभद्रप्रमुखा मुनीश्वराः ।
जयंति वाग्वज्रनिपातपाटितप्रतीपराद्धांतमहीध्रकोटयः ॥

महाकविश्रीवादीभसिंहः

लक्ष्मीभृत्परमं निरुक्तिनिरतं निर्वाणसौख्यप्रदं
कुज्ञानातपवारणाय विधृतं छत्रं यथा भासुरं ।
सज्ज्ञानैर्नययुक्तिमौक्तिकरसैः संशोभमानं परं
वंदे तद्व्रतकालदोषममलं सामंतभद्रं मतं ॥

श्रीवसुनंदिसैद्धांतिकचक्रवर्ती

समंतभद्रादिकवींद्रभास्वतां स्फुरंति यत्रामलसूक्तिरश्मयः
व्रजंति खद्योतवदेव हास्यतां न तत्र किं ज्ञानलवोद्धता जनाः ।

श्रीज्ञानार्णवकर्ता श्रीशुभचंद्राचार्यः

गुणान्विता निर्मलवृत्तिमौक्तिका नरोत्तमैः कंठविभूषणीकृता
न हारयष्टिः परमेव दुर्लभाः समंतभद्रादिभवा च भारती ।

महाकविश्रीवीरनंदी

शिवकोटेर्जैनत्वनिर्णायको वरीवर्ति सांप्रतमपि तन्निर्मितः प्राकृतभाषायां-**भगवत्याराधनासाराभिधः** परमग्रंथः । विद्यते च तत्र मुनिधर्मसमुपवर्णना । शिवकोटिमहीपतिः कदा शशास भारतीविभूषितां वाराणसीमिति निश्चितौ तु नियतं स्वामिसमंतभद्रसमयो निर्णीतःस्यात् ।

समंतभद्राभिधयाऽपरोऽप्याचार्यः प्रतिश्रुतो वर्तते यस्य चिंतामणिव्याकरणस्य टिप्पणी, अष्टसहस्री विषमपदव्याख्येतिग्रंथद्वयमुपलभ्यते । यद्ययमपरः समंतभद्रः षष्ठतमायां शताब्दौ भवेद्विनिर्णीतस्तदा न कापि क्षतिः ।

स्वामिसमंतभद्रनिर्मितग्रंथाः ।

गंधहस्तिमहाभाष्यं १ देवागमस्तोत्रं २ जिनसत्तालंकारः ३ विजयधवलटीका ४ तत्त्वानुशासनं ५ युक्त्यनुशासनं ६ वृहत्स्वयंभूस्तोत्रं ७ जिनशतकमित्यादयः ।

देवागमस्तोत्रस्यैवापरामिधा—आप्तमीमांसा—नायं स्वायत्ततया विरचितो ग्रंथः किंतु गंधहस्तिमहाभाष्यस्य मंगलाचरणं । भाष्यस्य चतुरशीतिसहस्रपरिमिता ८४००० श्लोकसंख्या । श्रीमदुमास्वामिशयकुशेशयखचिततत्त्वार्थाधिगमसूत्रस्यो (मोक्षशास्त्रस्य) परिष्टात्तद्भाष्यं । दुर्भागधेयमेतदास्माकीनं यन्नो दृष्टिपथमायाति तत्सांप्रतं ।

एतस्याः किलाप्तमीमांसाया उपरि कृता सैद्धांतिकचक्रवर्तिना श्रीमद्वसुनंदिना पदवृत्तिः । विरचिता च श्रीमदकलंकदेवस्वामिना भाष्यभूताष्टशती स्वातंत्र्येण कारिकाणामुपरि । विरचयामास चाष्टशत्युपरि-अष्टशतीनाम्नीं विवृतिं श्रीमद्विद्यानंदिप्रभुः । भूमंमलं कदा मंडयायासास्मपाण्डित्येन श्रीमदकलंकदेवस्वामीति तु समाविर्भावयामोवयं श्रीमत्तत्त्वार्थराजवार्तिकप्रस्तावनोल्लेखसमये । प्रभोर्विद्यानंदिनस्तु व्यलेख्याप्तपरीक्षाप्रस्तावनायामवदाततयास्माभिरितिवृत्तं ।

प्रमाणपरीक्षा ।

अत्रांकेऽपरः प्रमाणपरीक्षाभिधोग्रंथः । रचयिता किलैतद्ग्रंथरत्नस्य समजनि श्रीमद्विद्यानंदिप्रभुः महच्चित्रमेतद्विरचयंतोऽप्यतलस्पर्शगभीरग्रंथमिमं श्रीमद्विद्यानंदाः न प्रकटयांचक्रिरे स्वनामविवृतिं क्वापि यशोलिप्सया तथापि—

जयंति निर्जिताशेषसर्वथैकांतनीतयः ।
सत्यवाक्याधिपाः शश्वद्विद्यानंदा जिनेश्वराः ॥ १ ॥

इत्यत्र जिनेश्वरविशेषणीभूतेन विद्यानंदपदेन—

७७ तमेपृष्ठे–तस्यानादेरेकस्येश्वरस्याप्तपरीक्षायाश्चोपक्षिप्तत्वादिति वाक्ये आप्तपरीक्षापदोल्लेखेन–आप्तपरीक्षापत्रपरीक्षेतिग्रंथद्वयस्य समानकर्तृकत्वप्रतिभासकत्वात्—अत्यमंगले च विद्यापददानान्नियतं विज्ञायतेऽस्माभिरयमेव श्रीविद्यानंदप्रभुः प्रमाणपरीक्षायाः कर्ता ।

ग्रंथसंपादनसमये अष्टशत्याः पुस्तकद्वयं मया मोहमयीतः समुपलब्धं तत्र क. पुस्तकस्य शुद्धतरत्वेपि ख. पुस्तकमतीवाशुद्धमासीत् । ततोऽन्वभूवं वहलं कष्टं कठिनतमाप्तमीमांसाग्रंथसंपादनकाले ।

प्रमाणपरीक्षायाः क. पुस्तकं जैनहितैषिसंपादकश्रीमत्पंडितनाथूरामजीमहानुभावैः—

ख. पुस्तकं च स्याद्वादमहाविद्यालयप्रधानाध्यापकैः श्रीमत्पंडित-उमरावसिंहजीमहोदयैः प्रहितमिति विहितानुग्रहोऽस्म्युक्तविदुषोः । यदपि पंडितंमन्याधुनिकलेखकतदनुयायिमहोदयानुकंपया प्रमाणपरीक्षायाः पुस्तकद्वयमप्यतीवाशुद्धं तदपि–एकतः संजातशंकाया अपरतः समाधानात् समपादि महता प्रयासेनेयं प्रमाणपरीक्षा । तथापि प्रमत्तयोगादजनिष्ट क्वापि स्खलनं मामकीनं क्षमयंतु तदशक्यपरिमार्जनस्खलनं साक्षरवरा इति सनतिमभ्यर्थना । लेखकादिमहानुभावकरकमलखचितग्रंथमाहात्म्यात्—असामयिक वैकल्यतश्च विनिचाय्य कुतोऽपि मामकीनं स्खलनं कठिनतमसंपादनकृत्यानुभवबहिर्भूतत्वात् वेधयंति केचित्स्वरतरकुवचनसायकैः संपादकं । शिक्षयितृत्वे तेषामनुगृहीतोऽस्मि ।

प्रियमित्रवर देवराज ! पठिष्यामीति तावकाग्रहवशंवदतया महतायासेन संपादितापीयं प्रमाण परीक्षा—असामयिकभवन्निधनतो दुनोति मामकीनं मनो बहलतया ।

अवदातहृदय ! न तावकीनोपकारविनिमये किमपि मत्पार्श्वे समीचीनं वस्तु येन विगतोपकारभारः स्यां—ततस्त्वद्गुणस्मृतिसमीहया समर्पयामि तव **करकमलयोः** श्रीप्रमाणपरीक्षामिमां सविनयं—एहि परमनिश्रेयसं त्वमिति मे कामना ।

विद्वत्कृपाभिलाषी
गजाधरलालः

	पृ.सं.	गा.सं.
स्तुतिविषयसाध्यकदेवागमादिहेतोर्व्यभिचारित्वोपाख्यानं	१	१
पूरणादिश्वसंभवद्बहिरंतरंगमहोदयहेतुरपि व्यभिचारीति प्रतिपादनं	२	२
तीर्थकरत्वहेतोरनैकांतिकत्वस्य सर्वासर्वज्ञत्वस्य च समुल्लेखः	२	३
स्तुतिविषयत्वसाध्यतायां सुपुष्कल हेतूपादानं	३	४
सर्वज्ञत्वसाधने प्रमाणोपन्यासः	४	५
जिनपतिरेव सर्वज्ञो नान्योयुक्तिशास्त्राविरोधिवाक्त्वादिति विवरणं	५	६
स्वेष्टस्य प्रत्यक्षेण बाधितत्वान्न परे सर्वज्ञा इति विवृतिः	६	७
स्वेष्टस्य स्वेष्टेन बाधां प्रदर्श्य परसर्वज्ञत्वाभावोपादानं ...	७	८
सर्वथा भावैकांताभ्युपगमे दूषणोपन्यासः ...	८	९
केऽभावाः ? कियंतोवा ? कान्यनाद्यनंतानि ! कस्मादभावात्किं स्यादिति प्रतिपादनं— ...	८	१०
अन्योन्याद्यंताभावस्वरूपस्तत्स्वीकारफलं च	९	११
अभावैकांतेऽपि कुशलाकुशलादिकर्मानुपपत्तिरिति विवरणं—	१०	१२
भावाभावोभयैकांतवादिनामपि न कापि निष्पत्तिरिति विवेचनं—	११	१३
एकांतेन यदि सर्वथा सदसदुभयावक्तव्यरूपं तत्त्वं नास्ति कुतस्तादिति सदादीनां वास्तविकस्वरूपाख्यानं	१२	१४
अनेकांतेनाभ्युपगततत्स्वरूपादीनां विशेष विवरणं-अनवस्थादूषणपरिहरणं च-	१३	१५
स्यादस्ति चावक्तव्यत्वाद्युत्तरभंगस्वरूपनिरूपणं	१३	१६
अस्तित्वादिधर्माणामेकस्मिन्नधिकरणेऽविरोधेनोल्लेखः	१४-१५	१७-१८-१९
अंत्यत्रिधर्माणामविरोधैनैकत्रावस्थानप्रदर्शनं	१६	२०
एकांततत्त्वनिराकरणं	१६	२१
स्यादस्त्येवेत्यनेनैव स्याच्छब्देन सर्वभंगानांग्रहणे किमर्थं शेषभंगोपादानमिति समाहितिः	१७	२२
स्यादेकत्वानेकत्वसप्तभंगीद्योतनं	१७	२३
द्वितीयः परिच्छेदः		
अद्वैतैकांतनिराकरणं	१८	२४-२५
प्रमाणाद्वैतनिराकरणं ...	१८	२६
अद्वैतं द्वैताविनाभावीति विवरणं	१८	२७
सर्वथा द्वैतैकांताभ्युपगमे दोषोद्भावनं	१९	२८
द्वैतैकांतविशेषमायासु क्षणिकैकांतकदर्थनं	१९	२९
भंग्यंतरेण पुनर्द्वैतैकांतखंडनं	२०	३०
गौणतया सामान्यमभ्युपगच्छतां पुरस्तात्सामान्यसंसिद्धिः	२०	३१
द्वैताद्वैतोभयैकांतनिराकरणं	२१	३२
सामान्यविशेषयोः सापेक्षत्वेऽर्थक्रियासमर्थनं ...	२१	३३
भेदाभेदयोः संघटनव्यवस्था	२१	३४
केषांचिद्विद्यमानस्याविवक्षाऽविद्यमानस्यैव विवक्षा, अन्येषां वैयाकरणानां विद्यमानस्यैव विवक्षा नाविद्यमानस्येति । अपरेषां विवक्षैव नास्तीति खंडनपुरस्सरं तात्त्विकाविवक्षाख्यापनं	२२	३५
संवृतिकल्पितभेदाभेदजनितदुर्वासनां निहत्य		

	पृ.सं.	गा.सं.
तात्त्विकभेदाभेदव्यवस्थोपादानं	२२	३६
तृतीयः परिच्छेदः		
नित्यत्वैकांतनिराकरणं ...	२२	३७
नित्यत्वैकांतपक्षाभ्युपगमायाभिमत व्यंग्यव्यंजकभावे दूषणोद्भावनं	२२	३८
नित्यत्वैकांतपक्षे परिणामदौर्घव्योपदेशः	२३	३९
सांख्यमते बंधमोक्षाभावप्रतिपादनपुरस्सर मार्हतसिद्धांते तयोः सत्त्वप्रतिपादनं	२३	४०
क्षणिकैकांतपक्षे दूषणोद्भावनं....	२३	४१
असत्कार्यवादप्रतिषेधः	२४	४२
क्षणिकैकांतपक्षे हेतुफलादिनामसंभवप्रतिपादनं	२५	४३
संतानकल्पनेन तस्य संवृतित्वे दोषोद्भावनं ...	२५	४४
संतानतद्वतोरवाच्यत्वाभ्युपगमे दोषोपन्यासः	२६	४५-४६
अवाच्यत्वाभ्युपगमे प्रतिषेधस्यापि दौर्घ्यं	२६	४७-४८
सर्वथावक्तव्यवादिनं प्रत्युपालंभः	२७	४९-५०
क्षणिकैकांते हिंसा बंधमोक्षादयश्च न संघटंते इति विवरणं	२७	५१
क्षणिकैकांतवादिवचनविरोधोल्लेखः	२८	५२
विभागार्थं निमित्ताभ्युपगमेऽपि दूषणोल्लेखः ...	२८	५३
क्षणिकैकांतपक्षे-उत्पादादीनामसंभवोपदेशः	२८	५४
नित्यत्वानित्यत्वोभयैकांतपक्षे दूषणं	२९	५५
अनेकांतसमर्थनं	२९-३०	५६-५७
एकत्रोत्पादव्ययध्रौव्यविरोधव्यवस्था	३०	५८
लौकिकदृष्टांतेन, उत्पादव्ययध्रौव्य परिणामविरोधप्रदर्शनं	३०	५९-६०
चतुर्थः परिच्छेदः		
गुणिगुणकार्यकारणादीनां भेदाभ्युपगमे दोषोपन्यासः	३१	६१-६२-६३
समवायादिसंबंधाभ्युपगमे दूषणप्रतिपादनं	३२	६४ ६५-६६
परमाणूनामेकांतेनान्यत्वाभ्युपगमे दोषोपन्यासः	३२-३३	६७-६८-६९
सर्वावयवावयविव्यतिरेकाव्यतिरेकपक्षे दूषणं ...	३३	७०
द्रव्यपर्याययोरभेदप्रकारः	३३	७१
द्रव्यपर्यायोर्भेदप्रकारः	३४	७२
पंचमः परिच्छेदः		
अपेक्षानपेक्षयोः पार्थक्येनैकांताभ्युपगमे दोषोल्लेखः ...	३४	७३
अपेक्षानपेक्षयोरुभयैकांतपक्षे दूषणं	३५	७४
तयोरनेकांतत्वसमर्थनं	३५	७५
षष्ठः परिच्छेदः		
सर्वथा सर्वेषां वस्तूनां हेतोरागमाच्च सिद्धौ दोषोपन्यासः	३५	७६
सर्वथोभयैकांते दूषणं	३५	७७
उभयोरनेकांतनिरूपणं	३६	७८
सप्तमः परिच्छेदः		
अंतस्तत्त्वस्यैव तत्त्वत्वे दूषणप्रतिपादनं	३६	७९
ज्ञानाद्वैतवादिनं प्रति दोषाविर्भावः	३७	८०
सर्वथा बहिरंगतत्त्वाभ्युपगमे दोषोपन्यासः	३७	८१
बहिरंतोभयैकांते दूषणं	३८	८२
भाव एव तत्त्वं नाभाव इति मतस्य निराकरणं	३८	८३
अनुमानप्रणाल्या बाह्यार्थसिद्धिः	३८	८४
सिद्धसाधनतापरिहारपुरस्सरं बाह्यार्थप्रकटीकणं	३९	८५
पुनरपि बाह्यार्थप्रतिपादनं	३९	८६
बाह्यार्थे सत्येव प्रमाणाप्रमाणव्यवस्थेति प्रतिपादनं ...	४०	८९
अष्टमः परिच्छेदः		
दैवादेवार्थसिद्धिस्वीकारे दोषाख्यानं	४०	८९
पौरुषादेवार्थसिद्ध्यभ्युपगमे दूषण— प्रतिपादनं	४०	८९
सर्वथा दैवपौरुषोभयैकांताभ्युपगमे दूषणं	४१	९०

	पृ.सं.	गा.सं.
अर्थसिद्धेर्वास्तविककारणोपादनं	४१	९१
नवमः परिच्छेदः		
परदुःखे कृते पापं तत्सुखे पुण्यं स्वदुःखात्पुण्यं परदुःखात्पापमिति मतनिराकरणं	४१-४२	९२-९३
उभयैकांताभ्युपगमे दूषणं	४३	९४
सुखासुखसत्त्वप्रकारः ...	४३	९५
दशम परिच्छेदः		
सर्वमज्ञानाद्बंधस्वे स्तोकज्ञानान्मोक्षस्वे दोषोपन्यासः ...	४२	९६
उभयैकांते दूषणं	४३	९७
वास्तविकी बंधमोक्षव्यवस्था	४३	९८
ईश्वरप्रेरणान्मोक्ष इति निराकरणं, कामादीनां कर्मणां च वैचित्र्यमनादीति द्योतनं वा	४३	९९
शुद्धयशुद्धिस्वरूपप्रतिपादनं	४४	१००
प्रमाणतत्त्वनिरूपणं	४४	१०१
प्रमाणफलोपदर्शनं	४५	१०२
स्याद्वादाख्यपदार्थसाधनसमर्थनं	४१	१०३-१०४
स्याद्वादकेवलज्ञानयोः कथंचित्सामान्यनिदर्शनं	४६	१०५
नयस्वरूपाख्यानं	४७	१०६
नयविषयद्रव्यस्वरूपाख्यानं	४७	१०७
नयानां सापेक्षत्वनिरपेक्षत्वे साफल्यवैफल्यप्रदर्शनं	४७-४८	१०८-१०९
वाक् अस्तित्वनास्तित्वरूपद्विविषया न भवतीति सिद्धांतनिराकरणं	४८	११०
वचोलक्षणाख्यानं	४८	१११
सामान्यमेव वाचोऽर्थः इति मतस्य कदर्थनप्ररूपणं	४९	११२
स्याद्वादस्वरूपाख्यानं ...	४९	११३
शास्त्रोपसंहारकारिका ...	४९	११४
अंत्यमंगलं	२०	११५

इत्याप्तमीमांसा समाप्ता

अथ प्रमाणपरीक्षा ।

विषयानुक्रमणिका

	पृ.सं.	गा.सं.
सन्निकर्षादिप्रमाणत्वनिवृत्तिपूर्वकं सम्यग्ज्ञानस्य निर्दोषतया प्रमाणत्वनिर्वाचनं	५१	४
सम्यग्ज्ञानस्य स्वार्थव्यवसायात्मकत्वसमर्थनं	५३	६
स्वार्थव्यवसायात्मकत्वसाध्यसाधनसम्यग्ज्ञानत्वहेतोरप्रयोजकत्वनिराकृतिः	५६	३५
बाह्यपदार्थसमर्थनं—	५७	१५
सम्यग्ज्ञानमर्थव्यवसायात्मकमेव न स्वव्यवसायात्मकमिति मतनिराकरणं	५८	३२
अर्थज्ञानस्य ज्ञानांतरवेद्यत्वमभ्युपगम्य स्वार्थव्यवसायात्मकत्वप्रतीतेर्बाधोपपत्तौ निराकरणं	६०	७
परोक्षत्वहेतुना स्वार्थव्यवसायात्मकत्वप्रतीतौ बाधोपन्यासे समाहितिः	६०	३१
अचेतनत्वहेतुना ज्ञानस्य स्वव्यवसायात्मकत्वबाधने दोषोपन्यासः	६१	३१
प्रमाणतत्त्वस्य सर्वथा निषेधकत्वे दोषोपन्यासोयं	६२	१३
प्रमाणभेदप्ररूपणं	६३	३७
एकांतेनाभ्युपगतैकद्वित्रिचतुःपंचषट्प्रमाणवादिनां प्रमाणसंख्याविघटनं	६४	१
तर्काख्यप्रमाणस्य सिद्धिः ...	६६	३८
प्रत्यक्षस्य विशदज्ञानत्वसमर्थनं	६७	२८
इंद्रियानींद्रियातींद्रियभेदात्प्रत्यक्षस्य त्रैविध्यं	६८	८
स्वसंवेदनाख्यचतुर्थप्रत्यक्षस्य निषेधः	६८	१८
इंद्रियप्रत्यक्षविवरणं	६६	२५
स्मृत्यादिपरोक्षप्रमाणनिरूपणं	६९	१०
स्मृतिप्रमाणनिरूपणं ...	६९	२६
प्रत्यभिज्ञानस्वरूपवर्णनं ...	६९	३०
अनुमानस्वरूपाख्यानं	७०	३४
श्रुतज्ञानस्वरूपाख्यानं ...	७६	१०
शब्दस्य पौरुषेयत्वापौरुषेयत्वविचारः	७६	३७
विषयविप्रतिपत्तिनिराकरणं ...	७९	१९
फलविप्रतिपत्तिनिराकरणं	७९	२९



नमः सिद्धेभ्यः ।

७

श्रीमद्भगवत्समंतभद्रस्वामिविरचिता

आप्तमीमांसा ।

देवागमनभोयानचामरादिविभूतयः ।
मायाविष्वपि दृश्यंते नातस्त्वमसि नो महान् ॥ १ ॥

वृत्तिः-सार्वश्रीकुलभूषणं क्षतरिपुं सर्वार्थसंसाधनं सन्नीतेरकलंकभावविधृतेः संस्कारकं सत्पथं ।
निष्णातं नयसागरे यतिपतिं ज्ञानांशुसद्भास्करं भेत्तारं वसुपालभावतमसो वंदामहे बुद्धये ॥ १ ॥
लक्ष्मीभृत्परमं निरुक्तिनिरतं निर्वाणसौख्यप्रदं कुज्ञानातपवारणाय विधृतं छत्रं यथा भासुरं ।
सज्ज्ञानैर्नययुक्तिमौक्तिकफलैः संशोभमानं परं वंदे तद्भतकालदोषममलं सामंतभद्रं मतं ॥ २ ॥

समीचीनासमीचीनोपदेशविशेषप्रतिपत्तये सकलदोषातीतानंतचतुष्टयसमेतप्रकटिताशेषद्रव्यपर्यायसामान्यविशेषपरमात्मपरीक्षाभिधायकं, असंख्यातगुणश्रेणिकर्मनिर्जरणोपायं निराकृतसामान्यापोहशब्दार्थगृहीतविद्वन्मनःसंतोषकरं परमार्थभूतवाच्यवाचकसंबंधमनेकसूक्ष्मार्थप्रतिपादनचटुलं नि.श्रेयसाभ्युदयसुखफलं स्वभक्तिसंभारप्रेक्षापूर्वकारित्वलक्षणप्रयोजनवद् गुणस्तवं कर्तुकामः श्रीमत्समंतभद्राचार्यः सर्वज्ञं प्रत्यक्षीकृत्यैवमाचष्टे—हे भट्टारक ! संस्तवो नाम माहात्म्यस्याधिक्यकथनं, त्वदीयं च माहात्म्यमतींद्रियं मम प्रत्यक्षागोचरं—अतः कथं मया स्तूयसे ?। अत आह भगवान् 'ननु भो वत्स ! यथाऽन्ये देवागमादिहेतोर्मम माहात्म्यमवबुध्य स्तवं कुर्वन्ति तथा त्वं किमिति न कुरुषे ? । अत आह,—अस्माद्धेतोर्न महान् भवान् मां प्रति ' व्यभिचारित्वादस्य हेतोः । इति व्यभिचारं दर्शयति—

देवास्त्रिदशास्तेषां स्वर्गावतरण-जन्म-निष्क्रमण-केवलज्ञानोत्पत्ति-मुक्तिगमनस्थानेषु आगमनं–आगमः अवतारः-देवागमः । नभसि गमने हेममयाम्भोजोपरि यानं नभोयानम् । चामराणि वातायनानि तानि आदिर्यासां विभूतीनां संपदां ताश्च ता विभूतयश्च चामरादिविभूतयः । आदिशब्देन अशोकवृक्षसुरदुंदुभि सिंहासनादीनि परिगृह्यंते, एतेषां द्वंद्वः । विभूतयः । मायाविष्वपि इन्द्रजालेष्वपि दृश्यंते । न अतः--न अस्मात् । त्वमसि--त्वं भवसि । नः--अस्माकं महान्--गुरुः । किमुक्तं भवति । देवागमादिहेतोर्नास्माकं भवान्गुरुर्भवति । यतो देवागमादयः, पूरणादिष्वपि दृश्यंते । अतोऽनैकांतिको हेतुः ॥ १ ॥

अथ मतम् । अयं तर्हि हेतुर्बहिरंतरंगलक्षणो महोदयः पूरणादिष्वसंभवी इत्ययमपि व्यभिचारी, तथैव प्रतिपादयति—

अष्टशती-उद्दीपीकृतधर्मतीर्थमचलज्योतिर्ज्वलत्केवलालोकालोकितलोकलोकमीखलैरिंद्रादिभिर्वंदितं ॥

वंदित्वा परमार्हतां समुदयं गां सप्तभंगीविधिं स्याद्वादामृतगर्भिणीं प्रतिहतैकांतांधकारोदयां ॥ १ ॥
तीर्थं सर्वपदार्थतत्त्वविषयस्याद्वादपुण्योदधेर्भव्यानामकलंकभावकृतये प्राभावि काले कलौ ॥
येनाचार्यसमंतभद्रयतिना तस्मै नमः संततं कृत्वा विव्रियते स्तवो भगवतां देवागमस्तत्कृतिः ॥२॥

देवागमेत्यादिमंगलपुरस्सरस्तवविषयपरमात्मगुणातिशयपरीक्षामुपक्षिपतैव स्वयं श्रद्धागुणज्ञतालक्षणं प्रयोजनमाक्षिप्तं लक्ष्यते तदन्यतरापाये[2]ऽर्थस्यानुपपत्तेः। शास्त्रन्यायानुसारितया तथैवोपन्यासात्—।

आज्ञाप्रधाना हि त्रिदशागमादिकं परमेष्ठिनः परमात्मचिह्नं प्रतिपद्येरन् नास्मदादयः तादृशो मायाविष्वपि भावात्, इत्यागमाश्रयः ॥ १ ॥

अध्यात्मं बहिरप्येष विग्रहादिमहोदयः ।
दिव्यः सत्यो दिवौकस्स्वप्यस्ति रागादिमत्सु सः ॥ २ ॥

वृत्तिः—आत्मनि अधि अध्यात्मं। सः अंतः। क्षुत्पिपासाजरारुजापमृत्व्याद्यभाव इत्यर्थः। बहिरपि बाह्योऽपि। एषः प्रत्यक्षनिर्देशः। विग्रहो दिव्यशरीरमादिर्येषां, निस्वेदत्व–निर्मलत्व–अच्छायत्वादीनां तानि विग्रहादीनि तेषां तान्येव वा महोदयः, विभूतेः पूर्वावस्थाया अतिरेकोऽतिशयो वा विग्रहादिमहोदयः, अमानुषातिशय इत्यर्थः। दिवि भवो दिव्यः। सत्यः अवितथः, मायास्वरूपो न भवति। दिवि द्यौ दिवि ओकः अवस्थानं येषां ते दिवौकसः नाकसदनाः, तेष्वपि दिवौकस्स्वपि। अथवा दिवाशब्दोयं तेनेष्टव्यः। रागो लोभमायेत्यादिर्येषां द्वेषादीनां ते रागादयः ते संति येषां ते रागादिमंतः, तेषु रागादिमत्सु अक्षीणकषायेष्वित्यर्थः। स महोदय इति। अयं महोदयो यद्यपि समासेऽतर्भूतस्तथापि अध्यात्ममहोदय इति संबंधः कर्त्तव्यः अंत्यस्य श्रुतत्वात्। अथवा बहिर्विग्रहादिमहोदयः अध्यात्मं च। किमुक्तं भवति। योऽपि विग्रहादिमहोदयो मायाविष्वसंभवी हेतुत्वेनोपन्यस्तः सोऽपि व्यभिचारी। स्वर्गिषु संभवात् ॥ २ ॥

द्वयोर्हेत्वोरनैकांतिकत्वं प्रदर्श्य अन्यैर्यस्तीर्थकरत्वेनोपन्यस्तस्तस्य हेतोरसाधकत्वं सर्वासर्वज्ञत्वं प्रदर्शयन्नाह—

अष्टशती—बहिरंतः शरीरादिमहोदयोऽपि पूरणादिष्वसंभवी व्यभिचारी, स्वर्गिषु भावादक्षीणकषायेषु। ततोऽपि न भवान् परमात्मेति स्तूयते ॥ २ ॥

तीर्थकृत्समयानां च परस्परविरोधतः ।
सर्वेषामाप्तता नास्ति कश्चिदेव भवेद्गुरुः ॥ ३ ॥

वृत्तिः—तीर्थं संसारनिस्तरणोपायं करोतीति तीर्थकृत्। यतस्तीर्थकृत् भवान् अतः सर्वज्ञः। इत्ययमपि हेतुरनैकांतिकः सुगतादिषु दर्शनात् इत्यनुक्तोऽपि द्रष्टव्यः। अस्मिन्नवसरे वैनयिकः प्राह—इष्टमस्माकं सर्वेषां सर्वज्ञत्वम्। अत आह—समयानां च परस्परविरोधतः अन्योऽन्यविसंवादात्, सर्वेषामाप्तता नास्ति–विश्वेषां सर्वज्ञत्वं न भवति। अथवा तीर्थकरत्वात्सर्वज्ञो न भवति, सुगतादिषु दर्शनात्। अतः सर्वे सर्वज्ञाः संतु इत्येतत्सर्वमुक्त्वा पश्चादिदं वक्तव्यं सर्वेषामाप्तता नास्ति। कुतः? यतस्तीर्थकृतां तत्समयानां च परस्परविरोधात् स्वरूपपदार्थविवाददर्शनात्। अत्रावसरे सर्वज्ञाभाववादी प्राह—सत्यं युक्तमेव न कश्चित् सर्वदर्शी इति?। अत आह—कश्चिदेव–कोऽप्येव तेषां मध्ये भवेत्, स्यात् गुरुः–महान् स्वामी।

---

१ प्रतिज्ञातं स्वीकृतं २ देवागमस्तवस्य ३ अनुपपत्तिः कुत इत्यत आह ४ परीक्षाप्रधानाः ५ देवगमादिचिह्नस्य। ६। इति हेतोः। देवागमादिविभूतिखेनः महान् इत्ययं।

किमुक्तं स्यात् । न सर्वेषामाप्तता परस्परविरोधात्समयानामागमानां । एकोऽपि न भवति प्रमाणाभावात् । अतः केन चिदेव भवितव्यं । एवमत्यन्ताभावाभावः कुतः । यदि परस्परविरोधात्सर्वज्ञत्वभावो न भवति तर्हि येषां सर्वज्ञविच्छेदकः संप्रदायस्तेषामाप्तता स्यात् ? अत आह—तीर्थकृदित्यादि । तीर्थं सर्वज्ञं कृंतंति छिंदंति इति तीर्थकृतः समया आम्नायाः सम्प्रदाया येषां ते तीर्थकृत्समयास्तेषां अन्योऽन्यविरोधात् । सर्वं निरवशेषं अवगतं अगम्यावगमनं वा इच्छंति अभ्युपगच्छंति इति सर्वेषः तेषां सर्वेषां आप्तता परमार्थवादित्वं नास्ति न विद्यते । अतः कः आत्मजीवः चिच्चेतनोऽचेतनो भवत्येव । एवकारः अवधारणार्थः ॥ भवं संसारं यांति गच्छंति इति भवेतः तेषां भवेतां शक्रचक्रधरादीनामित्यर्थः । गुरुर्नाथः । भवेद्गुरुः भवेतां गुरुः । न च लब्धात्मस्वरूपाणां । किमुक्तं भवति—तीर्थकृच्छेदकाम्नायानामपि सर्वमेकेन प्रमाणेन षड्भिरभ्युपगच्छतां आप्तता नास्ति परस्परविरोधात् । अतो यतिप्रतिरेव स्यान्नान्यः ॥ ३ ॥

पूर्वकारिकोपात्तमर्थं समर्थयन्सुपुष्कलहेतुमाह—

अष्टशती-न हि तीर्थकरत्वमाप्ततां साधयति शक्रादिष्वसंभवि, सुगतादिषु दर्शनात् । न च सर्वे सर्वदर्शिनः परस्परविरुद्धसमयाभिधायिनः । ततोऽनैकांतिको हेतुः । अत एव न कश्चित् सर्वज्ञः—इत्ययुक्तं श्रुतेरविशेषादप्रमाणकोपपत्तेः । तथेष्टत्वाददोष इत्येकेषामप्रामाणिकैवेष्टिः, न खलु प्रत्यक्षं सर्वज्ञप्रमाणांतराभावविषयं अतिप्रसंगात् । नानुमानमसिद्धेः । प्रमाणतः सिद्धं नानात्मसिद्धं नाम—अन्यथा परस्यापि न सिद्धयेत् । तदिमे स्वयमेकेन प्रमाणेन सर्वं सर्वज्ञरहितं पुरुषसमूहं संविदंतः एवात्मानं निरस्यंतीति व्याहतेमतत् । तीर्थच्छेदसंप्रदायानां तथा सर्वमवगतमिच्छतामाप्तता नास्ति परस्परविरुद्धाभिधानात् । एकानेकप्रमाणवादिनां स्वप्रमाव्यावृत्तेरन्यथानैकांतिकत्वात् । सर्वप्रमाणविनिवृत्तेरितरथासंप्रतिपत्तेः । वागक्षबुद्धीच्छापुरुषत्वादिकं क्वचिदनाविलज्ञानं निराकरोति न पुनस्तत्प्रतिषेधवादिषु तथेति परमगहनमेतत् । तदित्थं सिद्धं सुनिश्चितासंभवद्बाधकप्रमाणत्वं । तेन कः परमात्मा? चिदेव लब्ध्युपयोगसंस्काराणामावरणनिबंधनानामत्यये भवभृतां प्रभुः, न हि सर्वज्ञस्य निराकृतेः प्राक् सुनिश्चितासंभवसाधकप्रमाणत्वं सिद्धं येन परः प्रत्यवतिष्ठेत । नापि बाधकासंभवात्, परं प्रत्यक्षादेरपि विश्वासनिबंधनमस्ति तत्प्रकृतेऽपि सिद्धं, यदि तत्सत्तां न साधयेत् सर्वत्राप्यविशेषात् । तदभावे दर्शनं नादर्शनमतिशेतेऽनाश्वासाद्विभ्रमवत् । साधकबाधकप्रमाणयोर्निर्णयाद्भावाभावयोरविप्रतिपत्तिरनिर्णयादारेका स्यात् । न खलु ज्ञस्वभावस्य कश्चिदगोचरोऽस्ति यन्न क्रमेत तत्स्वभावांतरप्रतिषेधात् । चेतनस्य सतः संबध्यतरं मोहोदयकारणकं मदिरादिवत्, तदभावे साकल्येन विरतमोहः सर्वं पश्यति प्रत्यासत्तिविप्रकर्षयोरकिंचित्करत्वात् अत एवाक्षानपेक्षा । अजनादिसंस्कृतचक्षुषो यथालोकानपेक्षा ॥३॥

दोषावरणयोर्हानिर्निःशेषाऽस्त्यतिशायनात् ।
क्वचिद्यथा स्वहेतुभ्यो बहिरंतर्मलक्षयः ॥ ४ ॥

वृत्तिः—दोषः अज्ञानादि, कार्यरूपं । आवरणं कारणभूतं कर्म । अथवा मोहांतराया दोषाः । ज्ञानदर्शनावरणे आवरणं । तयोर्हानिर्विनाशो विश्लेषो दोषावरणयोर्हानिः । सिद्धसाधनतानिराकरणार्थं निःशेषा समस्ता समूलतलप्रहाणिः इत्युक्तं । अस्ति भवति । अतिशायनात् प्रकृष्यमाणज्ञानहानेः पूर्वावस्थातिरेकात् । क्वचित् कस्मिंश्चित्पुरुषविशेषे । यथा शब्दो दृष्टान्तप्रदर्शनफलः । स्वस्य आत्मनो हेतवः कारणानि ते तथाभूतास्तेभ्यः स्वहेतुभ्यः । बहिः किट्टकादिकं, अभ्यंतरं कालिमादि तच्च तन्मलं च तस्य

---

१ भवितव्यमेवात्यंताभावाभावः कुतः पाठोऽयं लिखितपुस्तके । २ लिखित पुस्तके नचालब्धात्मस्वरूपाणामिति पाठः । ३ चार्वाकानां । ४ जैनस्यापि । ५ वैनयिकानां । ६ अर्थग्रहणशक्तिर्लब्धिः अर्थग्रहणव्यापार उपयोगः । ७ मीमांसकः । ८ सिद्धसाध्यतेति लिखितपुस्तके पाठः ।

क्षयो विगमः विश्लेषः बहिरंतर्मलक्षयः । एतदुक्तं भवति । कस्मिंश्चिदतिशायनाद्दोषावरणयोर्हानिरस्ति । यथा धातुपाषाणस्य अंतर्मलक्षयः । स काश्चिद्व्यक्त्येव गुरुरिति संबंधः । एकत्र स्वहेतवः सम्यग्दर्शनादयः । अन्यत्र पिण्डीबन्धनप्रयोगादयः । तथा एकत्र बहिर्मलः शरीरेन्द्रियादिकं । अन्तर्मलः कर्म । अन्यत्र बहिर्मलः किट्टकादिकं । अन्तर्मलः कालिमादि ॥ ४ ॥

ननु विध्वस्तदोषोऽध्यात्मा कथं विप्रकर्षिणमर्थं[1] प्रत्यक्षीकुर्यात् ? । (इति शङ्कायां) साधनान्तरस्य बाधकाभावस्य भावनिरूपणमाह—

अष्टशती-वचनसामर्थ्यादज्ञानादिर्दोषः स्वपरपरिणामहेतुः, अत एव लोष्टादौ निःशेषदोषावरणनिवृत्तेः सिद्धसाध्यतेत्यसमीक्षिताभिधानं साध्यापरिज्ञानात् । दोषावरणयोर्हानिरतिशायनात् । निश्शेषतायां साध्यायां बुद्धेरपि किं न परिक्षयः स्याद्विशेषाभावात् । अतोनैऽकांतिको हेतुरित्यशिक्षितलक्षितं चेतनगुणव्यावृत्तेः सर्वात्मना पृथिव्यादेरभिमतत्वात् । अदृश्यानुपलंभादभावासिद्धिरित्ययुक्तं परचैतन्यनिवृत्तावारेकापत्तेः संस्कर्तृणां पातकित्वप्रसंगात् । बहुलमप्रत्यक्षस्यापि रोगादेर्विनिवृत्तिर्निर्णयात् । व्यापारव्याहाराकारविशेषव्यावृत्तिसमयवशात्तादृशं लोको विवेचयति । व्यापारव्याहाराकारविशेषव्यावृत्तेरिति . समयवशात्तत्सिद्धांतविद्लोको विवेचयति । यदि पुनरयं निर्बंधः सर्वत्र विप्रकर्षिणामभावासिद्धेः, तदा कृतकत्वधूमादेर्विनाशानलाभ्यां व्याप्तेरसिद्धेर न कश्चिद्धेतुः । ततः शौद्धोदनिशिष्यकाणामनात्मनीनमेतत्, अनुमानोच्छेदप्रसंगात् । तथाहि, यस्य हानिरतिशयवती तस्य कुतश्चित्सर्वात्मना व्यावृत्तिर्यथा बुद्ध्यादिगुणस्यात्मनः । तथा च दोषादेर्हानिरतिशयवती कुतश्चिन्निवर्तयितुमर्हति, सकलं कलंकमिति कथमकलंकसिद्धिर्न भवेत् । मणेर्मलादेर्व्यावृत्तिः क्षयः सतोत्यंतविनाशानुपपत्तेः, तादृगात्मनोऽपि कर्मणां निवृत्तौ परिशुद्धिः, । कर्मणोऽपि वैकल्यमात्मैकैवल्यमस्त्येव ततो नातिप्रसज्यते । प्रतिपक्ष एवात्मनामागुंतुको मलः परिक्षयी स्वनिर्हासनिमित्तविवर्द्धनवशात् ॥ ४ ॥

ननु निरस्तोपद्रवः सन् आत्मा कथमकलंकोऽपि विप्रकार्षिणमर्थं प्रत्यक्षीकुर्यात् ?—

सूक्ष्मान्तरितदूरार्थाः प्रत्यक्षाः कस्य चिद्यथा ।
अनुमेयत्वतोऽग्न्यादिरिति सर्वज्ञसंस्थितिः ॥ ५ ॥

वृत्तिः—सूक्ष्माः स्वभावविप्रकृष्टाः । अंतरिताः कालविप्रकृष्टाः । दूराः देशविप्रकृष्टाः । ते च ते अर्थाश्च सूक्ष्मान्तरितदूरार्थाः । तथा च स्वभावविप्रकृष्टा मन्त्रौषधिशक्तिचित्तादयः । कालविप्रकृष्टा लाभालाभसुखदुःखप्रहोपरोगादयः । देशविप्रकृष्टा मुष्टिस्थादिद्रव्यम् । दूरा हिमवन्मंदरमकराकरादयः । प्रत्यक्षाः अव्यक्षाः प्रत्यक्षज्ञानगोचराः कस्यचित् । सामान्यकथनमेतत् । अनिर्दिष्टनामधेयस्य—यथा दृष्टांतप्रदर्शकः अनुमेयाः अनुमानगम्याः । अथवा अनुगतं मेयं मानं येषां ते अनुमेयाः प्रमेया इत्यर्थः । तेषां भावस्तस्मादनुमेयत्वतः । अग्निः पावकः आदिर्यस्यासावग्नादिः । इत्येवमनेन प्रकारेण सर्वज्ञस्य विश्वदर्शिनः संस्थितिर्व्यवस्था सर्वज्ञसंस्थितिः सर्वज्ञास्तित्वमित्यर्थः । भागासिद्धानैकांतिकविरुद्धहेत्वाभासाभावात् । ये ये प्रमेयास्ते ते प्रत्यक्षाः । यथा अग्न्यादयः । प्रमेयाश्च स्वभावकालदेशविप्रकृष्टा अर्थाः कस्य चित्पुरुषविशेषस्य तस्मात्तेऽपि प्रत्यक्षाः । अथवा ये अनुमानगम्यास्ते प्रत्यक्षाः कस्य चित् । यथा अग्न्यादयः । अनुमानगम्याश्च सूक्ष्मान्तरितदूरार्थास्तस्मात्तेऽपि प्रत्यक्षाः । सुनिश्चितासंभवद्बाधकप्रमाणस्य समर्थनमेतत् ।

विगतकर्मकलङ्कोऽपि विप्रकृष्टार्थदर्शी सामान्येन यः प्ररूपितः स कः ? इति विशेषं दर्शयन्नाह—

अष्टशती-स्वभावकालदेशविप्रकर्षिणां अनुमेयत्वमसिद्धमिति—अनुमानमुत्सारयति । यावान् कश्चिद्भावः स सर्वैः क्षणिकः—इत्यादिव्याप्तेरसिद्धौ प्रकृतोपसंहाराऽयोगात् । अविप्रकर्षिणामनुमतेरानर्थक्यात् । सत्त्वादेरनित्यत्वादिव्याप्तिमिच्छतां सिद्धमनुमेयत्वमनवद्येनेति न किंचिद्व्याहतं पश्यामः । तेऽनुमेयाः—न कस्य चि-

१ विप्रकर्षेण लि. पु. पाठः । २ आग्रहः ।

अप्यक्षश्च स्युः किं व्याहन्यते इति समानमन्यादीनां तथा चानुमानोच्छेदः स्यात् । तदभ्युपगमे-[1]अस्वसंवेद्यविज्ञानव्यक्तिभिरध्यक्षं किं लक्षयेत् प्रमाणतया परमप्रमाणतयेति न किंचिदेतत्तया नैतत्तया वा यमभ्युपगंतुमर्हति । तदेवं प्रमेयत्वसत्त्वादिर्हेतुलक्षणं पुष्णाति तं कथं चेतनः प्रतिषेद्धुमर्हति, संशयितुं वा । धर्मिण्यसिद्धसत्ताके भावाभावोभयधर्माणामसिद्धविरुद्धानैकांतिकत्वात् कथं सकलविदि सत्त्वसिद्धिः ? इति ब्रुवन्नपि देवानांप्रियः-तद्धर्मिस्वभावं न लक्षयति । शब्दानित्यत्वसाधनेऽपि कृतकत्वादावयं विकल्पः किं न स्यात् ? । विमत्यधिकरणभावापन्नविनाशधर्मिधर्मत्वे कार्यत्वादेरसंभवद्बाधकत्वादेरपि संदिग्धसद्भावधर्मिधर्मत्वं सिद्धं बोद्धव्यं । यदि विप्रकृष्टार्थप्रत्यक्षत्वमर्हतः साध्येत पक्षदोषः-अप्रसिद्धविशेषणत्वं तत एव व्याप्तिर्न सिद्धयेत् । अनर्हतश्चेत्-अनिष्टानुषंगोऽपि कः पुनः सामान्यात्मा तदुभयव्यतिरेकेण, यस्य विवक्षितार्थप्रत्यक्षत्वं ?, इत्येतद्विकल्पजालं शब्दनित्यत्वेऽपि समानं न केवलं सूक्ष्मादिसाक्षात्करणस्य प्रतिषेधने संशीतौ वा, तदयमनुमानमुद्रां भिनत्ति । वर्णानां नित्यत्वमकृतकत्वादिना सर्वगतानां यदि साधयति ? । स्यादप्रसिद्धविशेषणः पक्षः । इतरथाऽनिष्टानुषंगः । कीदृक् पुनः सामान्यं नाम यदुभयदोषपरिहाराय प्रकल्प्येत, सर्वगतसाधनेऽपि समानं अविवक्षितविशेषस्य पक्षीकरणे समः समाधिः, इत्यलमप्रतिष्ठितमिथ्याविकल्पोपाधेः ॥ ५ ॥

स त्वमेवासि निर्दोषो युक्तिशास्त्राविरोधिवाक् ।
अविरोधो यदिष्टं ते प्रसिद्धेन न बाध्यते ॥ ६ ॥

वृत्तिः-स ([2]पूर्वप्रकान्तः तच्छब्दः) पूर्वप्रक्रान्तपरामर्शी त्वमेव-भवानेव नान्यः । अन्ययोगव्यवच्छेदफल एवकारः । असि-भवसि । निर्दोषः-अविद्यारागादिविरहितः क्षुधादिविरहितो वा अनंतज्ञानादिसंबंधेन इत्यर्थः ? कुत एतत् । युक्तिशास्त्राविरोधिवाक् यतः । युक्तिः-अनुमानं न्यायः [3]तत्सहचरितं मध्यक्षमपि । शास्त्रं आगमः स्याद्वादः ताभ्यां अविरोधिनी अविसंवादिनी वाक् वाणी वचनं यस्यासौ युक्तिशास्त्राविरोधिवाक् । बहिर्व्याप्तिमंतरेणांतर्व्याप्त्या सिद्धं । यतः इयमेवान्यत्रापि प्रधाना । ननु वचनस्याऽविरोधः कुतः यावता यत्र वचनं तत्र विरोधो दृश्यते ? अत आह अविरोधः अविसंवादः । यत्-यस्मात् । इष्टं-मतं प्रवचनं । कुतो वीतरागस्य इच्छा ? उपचारेण, सयोगिध्यानवत् । इष्टशब्दस्यापि जहत्स्वार्थे वृत्तित्वात् कुशलशब्दवत् । ते-तव । प्रसिद्धेन परमतापेक्षं विशेषणमेतत् (परमतेन) अनेकांतवस्तुत्वेन । अथवा व्यवहिताव्यवहितप्रसिद्धलक्षणवता प्रमाणेन । न बाध्यते अन्यथा न क्रियते, तेनैव स्वरूपेण दृश्यत इत्यर्थः । किमुक्तं भवति-यो निर्दोषो विप्रकृष्टदर्शी स च त्वमेव भवसि । न्यायागमाविसंवादिवचनं । यतः अविरोधोऽपि, तव मतं न बाध्यते प्रसिद्धेन यस्मात् ।

ननु भो वत्स मदीयं मतं न बाध्यते अन्येषां किं बाध्यते ? अत आह—

विप्रकृष्टेऽपि भिन्नलक्षणसंबंधित्वादिना कस्य चित्प्रत्यक्षं । सोऽत्र भवान्नर्हन्नेव—अन्येषां न्यायागम विरुद्धभाषित्वात् । विचित्रा[4]भिसंधितया व्यापार[5]व्याहारादिसांकर्येण क्वचिदतिशयानिर्णये कैमर्थक्याद्विशेषेष्टेः ? ज्ञानवतोऽपि विसंवादात् क्व पुनराश्वासं लभेमहि ? । नचैवं वादिनः किंचिदनुमानं नाम निरभिसंधीनामपि बहुलं कार्यस्वभावाऽनियमोपलंभात् । सति काष्ठादिसामिग्रीविशेषे क्वचिद्[6]धूमस्य तदभावे प्रायशोऽ[7]नुपलब्धस्य मण्यादिकारणकलापेऽपि संभवात् । यज्जातीयो यतः संप्रेक्षितस्तज्जातीयात्तादृगिति दुर्लभनियमितायां धूमधूमकेत्वादीनामपि व्याप्यव्यापकभावः कथमिव निर्णीयेत ? । वृक्षः शिंशपात्वात् इति

---

२ विज्ञानं मस्वसंवेद्यं भूतपरिणामित्वा पित्तादिवत् ।
२ मुद्रितपुस्तकेऽयमधिकः पाठः । ३सहोच्चरितमित्यपि पाठः । ४ अभिप्रायतया । ५ वचनादि ।
६ अग्नेः । ७ अग्नेः । ८ सूर्यकांतमण्यादेः ।

लताचूतादेरपि क्वचिदेव दर्शनात् प्रेक्षावतां किमिव निश्शंकं चेतः स्यात् ? । तदेतद्दृष्टसंशयैकांतवादिनां विदग्धमर्कटकानामिव स्वलांगूलभक्षणं। यत्नतः परीक्षितं कार्यं कारणं नातिवर्तते ? इति चेत् स्तुतं[1] प्रस्तुतं[2]। ततोऽयं प्रतिपत्तेरपराधो नानुमानस्येति अनुकूलमाचरति । तदेवं तत्सुनिश्चितासंभवद्बाधकप्रमाणत्वमर्हत्येव सकलज्ञत्वं साधयति नान्यत्र, इत्यविरोध इत्यादिना स्पष्टयति । तत्रेष्टं मतं शासनमित्युवर्चर्यते निराकृतवाचोऽपि क्वचिदप्रतिषेधात् । नियमाभ्युपगमे सुषुप्त्यादावपि निरभिप्रायप्रवृत्तिर्न स्यात् । प्रतिसंविदिताकारेच्छा तदा संभवंती पुनः स्मर्येत वांछांतरवत् । ततश्चैतन्यकरणपाटवयोः साधकतमत्वं सहकारिकारणांतरं न वै नियतमपेक्षणीयं नक्तंचरादेः सस्कृतचक्षुषो वा नापेक्षिताऽलोकसन्निधेरूपोपलंभात् । नचैवं संवित्करणपाटवयोरप्यभावविवक्षामात्रात्कस्यचिद्वचनप्रवृत्तिः प्रसज्यते संवित्करणवैकल्ये यथाविवक्षं वाग्वृत्तेरभावात् । नच दोषजातिस्तद्धेतुर्यतस्तां वाणीं नातिवर्तेत तत्प्रकर्षाप्रकर्षानुविधानाभावात् । बुद्ध्यादिवत्प्रमाणतः सिद्धं प्रसिद्धं तदेव कस्यचिद्बाधनं युक्तं विशेषणमेतत्परमतापेक्षं । प्रसिद्धेनाप्यनित्यत्वाद्येकांतधर्मेण बाधाकल्पनात् । नर्ते प्रमाणात्प्रतिबंधसिद्धेरभ्युपगमात्[3] । नच परेषां प्रत्यक्षं—अग्निधूमयोः क्षणभंगसद्भावयोर्वा साकल्येन व्याप्तिं प्रति समर्थं—अविचारकत्वात्[4] सन्निहितविषयत्वाच्च । नचानुमानं—अनवस्थानुषंगात् । परोक्षांतर्भावेन नस्तर्केण संबंधो व्यवतिष्ठेत । तदप्रमाणत्वे न लैंगिकं समारोपव्यच्छेदाविशेषात् । अधिगमोऽपि व्यवसायात्मैव तदनुपपत्तौ सतोऽपि दर्शनस्य साधनांतरापेक्षया संनिधानाभेदात्, सुषुप्तचैतन्यवत् ॥ ६ ॥

त्वन्मतामृतबाह्यानां सर्वथैकांतवादिनां
आप्ताभिमानदग्धानां स्वेष्टं दृष्टेन बाध्यते ॥ ७ ॥

वृत्तिः—त्वद्—युष्मन्मतमेव आगम एव अमृतं सर्वात्मप्रदेशसुखकारणं दुःखनिवृत्तिलक्षणस्य परमानंदमुक्तिसुखस्य निमित्तं वा मतं अमृतं तस्माद्बाह्या बहिर्भूता मिथ्यादृष्टयः त्वन्मतामृतबाह्याः तेषां त्वन्मतामृतबाह्यानां—युष्मदागमद्विषतां । सर्वथा सर्वप्रकारैः स्वरूपपररूपविधिप्रतिषेधात्मकैः एकान्तं एकं धर्मं नित्यत्वादिकमेव वदितुं शीलं येषां ते सर्वथैकांतवादिनः तेषां सर्वथैकांतवादिनां एकस्वभावाभ्युपगच्छताम् । आप्ताः सर्वज्ञाः इति अभिमानः गर्वः अहंकारः तेन दग्धाः भस्मसात्कृताः प्रलयं नीताः, तेषां आप्ताभिमानदग्धानाम् । स्वस्य आत्मनः इष्टं मतं स्वेष्टं आत्माभ्युपगतप्रमाणप्रमाणफलं सर्ववस्तु । दृष्टेन प्रत्यक्षेण प्रत्यक्षप्रमितेन अनेकान्तात्मवस्तुना वा, बाध्यते विरोधमुपनीयते अन्यथा क्रियत इत्यर्थः । किमुक्तं भवति । भवदागमबाह्या आप्ताभिमानदग्धाः सर्वथैकान्तवादिनः तेषां स्वेष्टं दृष्टेन बाध्यते । धर्मकीर्तिमतनिरासार्थमन्वयव्यतिरेकावुक्तवानाचार्यः । द्रव्यार्थिकपर्यायार्थिकानुग्रहार्थं वा ॥ ७ ॥

परवादिस्वेष्टस्य दृष्टेन बाधां प्रदर्श्य इदानीं स्वेष्टेन स्वेष्टस्य बाधां दर्शयितुमाह—

अष्टशती—अनेकांतात्मकवस्तुसाक्षात्करणं बहिरंतश्च सकलजगत्साक्षीभूतं विपक्षे प्रत्यक्षविरोधलक्षणं—अनेन दर्शयति—

न हि किंचिद्रूपांतरविकलं सदसन्नित्यानित्याद्येकांतरूपं संवेदनमन्यद्वा पश्यामो यथा प्रतिज्ञायेत चित्रज्ञानवत्कथंचिदसंकीर्णविशेषैकात्मनः सुखादिचैतन्यस्य वर्णसंस्थानाद्यात्मनः स्कन्धस्य च प्रेक्षणात् । सामान्यविशेषैकात्मनः संवित्तिरेकांतस्यानुपलब्धिर्वा सर्वतः सिद्धा चक्षुरादिमतामनार्हतकल्पनामस्तं गमयति इति किं नः प्रमाणांतरेण । न हि दृष्टाज्ज्येष्ठं गरिष्ठमिष्टं तदभावे प्रमाणांतराप्रवृत्तेः समारोपविच्छेदविशेषात् अन्वयव्यतिरेकयोः स्वभावभेदप्रदर्शनार्थत्वाच्च । अनेकांतैकांतयोरुपलंभानुपलंभयोरेकत्वप्रदर्श-

---

१ प्रकृतं । २ समर्पितं । ३ अविनाभावः । ४ सौगतानां । ५ निर्विकल्पकत्वात् । ६ बौद्धाचार्यः ।

नार्थं मतांतरप्रतिशेषार्थं वा । यदाह—साधर्म्यवैधर्म्ययोरन्यतरेणार्थगतावुभयप्रतिपादनं पक्षादिवचनं वा निग्रहस्थानमिति न तद्युक्तं साधनसामर्थ्येन विपक्षव्यावृत्तिलक्षणेन पक्षं प्रसाधयतः केवलं वचनाधिक्योपलंभछलेन पराजयाधिकरणप्राप्तिः स्वयं निराकृतपक्षेण प्रतिपक्षिणा लक्षणीयेति प्रतिज्ञानुयोगिशास्त्रादिष्वपि नाभिधीयेत विशेषाभावात् । यत्सत्तत्सर्वं क्षणिकं यथा घटः संश्च शब्दः इति त्रिलक्षणं हेतुमभिधाय यदि समर्थयते कथमिव संधामतिशेते तावत्तार्थप्रतिपत्तौ समर्थनं वा निगमनादिकं यतः पराजयो न भवेत् । सत्त्वमात्रेण नश्वरत्वसिद्धौ–उत्पत्तिमत्त्वकृतकत्वादिवचनं अतिरिक्तविशेषणोपादानात् कृतकत्वप्रयत्नानंतरीयकत्वादिषु च कप्रत्ययातिरेकादसाधनांगवचनं पराजयाय प्रभवेत् । क्वचित्पक्षधर्मप्रदर्शनं संश्चशब्दः इत्यविगानात् त्रिलक्षणवचनसमर्थनं च, असाधनांगवचनं अपजयप्राप्तिरिति व्याहतं । तथान्यस्यापि प्रस्तुतेतरस्य वादिनोक्तावितरस्य स्वपक्षमसाधयतो विजयासंभवात् निग्रहस्थानमयुक्तं । साधनांगस्यावचनं, प्रतिवादिनाप्यदोषस्योद्भावनं दोषस्यानुद्भवनं वा–अनेन प्रत्युक्तं । विजिगीषुणोभयं कर्तव्यं स्वपरपक्षसाधनदूषणं । अतोऽन्यतरेणासिद्धानैकांतिकवचनेऽपि जल्पापरिसमाप्तिः ॥ ७ ॥

निराकृतावस्थापितविपक्षस्वपक्षयोरेव जयेतरव्यवस्था नान्यथेति दर्शयन्नुभयमाह–

कुशलाकुशलं कर्म परलोकश्च न क्वचित् ।
एकांतग्रहरक्तेषु नाथ स्वपरवैरिषु ॥ ८ ॥

वृत्तिः–कुशलं सुखनिमित्तं, अकुशलं दुःखहेतुकं, कर्म मिथ्यात्वासंयमकषाययोगकारणसंचितपुद्गलप्रचयः । कुशलं चाकुशलं च कुशलाकुशलं कर्म शुभाशुभमित्यर्थः । परलोको भवांतरगतिरन्यजन्म । चशब्दोऽनुक्तसमुच्चयार्थः । तेन तत्फलबंधमोक्षेहलोकादयो गृह्यन्ते । नशब्दः प्रतिषेधार्थः । क्वचित् केषुचित् । एक एवांतो धर्मः एकांतः तस्य ग्रहणमभ्युपगमो ग्रहः एकांतग्रहः तस्मिन् तेन वा रक्ता रंजिताः, प्रविष्टा भक्ता एकांतग्रहरक्ताः । अथवा ग्रह इव ग्रहः तेन व्याकुलिताः तेषु एकांतग्रहरक्तेषु । नाथ ! स्वामिन्! श्रद्धावचनमेतत् । स्वश्चात्मा च परे चान्ये च स्वपरे तेषां वैरिणः शत्रवः तेषु स्वपरवैरिषु । किमुक्तं भवति?—हे नाथ! अर्हन्! एकांतग्रहरक्तेषु स्वपरवैरिषु केषु चिदपि शुभाशुभकर्म नास्ति । परलोकादयश्च न सन्ति । एकांततत्त्वग्रहणात् । यद्यपि पक्षान्तर्भूतो हेतुस्तथापि पृथग्द्रष्टव्यः । अंतर्व्याप्तिसंग्रहात् । न केवलमेकान्तवादे कुशलाकुशलादिकं कर्म न घटते किं तु प्रमाणप्रमेयपक्षविपक्षहेतुहेत्वाभासदूषणाभासादिकमपि सर्वथार्थक्रियायोगात् ॥ ८ ॥

सामान्येनैकांतवाद्यभ्युपगतस्य वाचं प्रदर्श्येदानीं दूषयितुमनाः स्वल्पोऽपि शत्रुर्नोपेक्षणीय इति न्यायमनुसरन्प्रथमतरं तावद्भावैकांतं भस्मसात्कर्तुमाह–

अष्टशती-कर्मफलसबंधपरलोकादिकं-एकांतवादिनां प्रायेणेष्टं तदनेकांतप्रतिषेधेन बाध्यते'ततोऽनुष्ठानमभिमतव्याघातकृत्, सदसन्नित्यानित्याद्येकांतेषु कस्यचित् कुतश्चित् कदाचित् क्वचित्प्रादुर्भावासंभवात् । न हि सर्वात्मना सर्वस्य भूतावेव जन्मविरुद्धं–अपि तु सर्वथाऽभावेऽपि, व्यलीकप्रतिभासानामनुपरमप्रसंगात् । न केवलं स्वभावनैरात्म्य एवायं दोषः किं त्वंतरुभयत्र वा निरन्वयसत्त्वेऽपि न, कार्यकालमप्राप्नुवतः कारणत्वानुपपत्तेश्चिरतरातीतवत् । सत्यभवतः स्वयमेव नियमेन पश्चाद्भवतस्तत्कार्यत्वं विरुद्धं कालांतरेऽपि किं न स्यात् तदभावाविशेषात् समनंतरवत् । समर्थे सत्यभवतः पुनः कालांतरभाविनस्तत्प्रभावाभ्युपगमे कथमक्षणिकेऽर्थक्रियानुपपत्तिः ! तत्सत्त्वासत्त्वयोरविशेषात् । कारणसामर्थ्यापेक्षिणः कालनियमकल्पनायां–अचलपक्षेऽपि समानः परिहारः । क्षणवर्तिन एकस्मात्कारणस्वभावमभेदयतां विचित्रकर्मणामुत्पत्तौ कूटस्थेपि किं न स्यात् कार्योत्पत्तिः । कथमत्रोत्पत्तिर्नाम ? तत्र समानः पर्यनुयोगः, सदसतोरनुत्पत्तेः,निष्पन्नखपुष्पवत् । सतः

---

१ नित्यपक्षेऽपि ॥

पुनर्गुणांतराधानमनेकं क्रमशोऽप्यनुभवतः किं विरुद्ध्येत क्षणस्थायिनः कस्य चिदेव ग्राह्यग्राहकाकार-वैश्वरूप्यानभ्युपगमेऽपि संविदितज्ञानस्य ग्राह्यग्राहकाकारविवेकं परोक्षं विभ्राणस्य सामर्थ्यप्राप्तेः—अन्यथा शून्यसंविदोर्विप्रतिषेधात् । तदयं क्षणस्थायिकारणं स्वसत्तायां कार्यं कुर्वदभ्युपगच्छन् क्रमोत्पत्तिमुपरुणद्धि, सकलजगदेकक्षणवृत्तिप्रसंगात् । कारणस्य कार्यकालप्राप्तौ क्षणभंगभंगानुषंगात् । तदप्राप्नुवतस्तत्कृतौ व्यलीककल्पनाविशेषेण कूटस्थानतिशायनात् । ततः सुभाषितं कुश्रुलाद्यसंभूतिरेकांतग्रहरक्तेश्विति ॥ ८ ॥

भावैकांते पदार्थानामभावानामपह्नवात् ।
सर्वात्मकमनाद्यंतमस्वरूपमतावकम् ॥ ९ ॥

वृत्तिः—भाव एवेति सन्नेवेति एकांतः असहायधर्मग्रहो भावैकांतः । सर्वथा सत्त्वाभ्युपगम इत्यर्थः । तस्मिन्भावैकान्ते पदार्थानां । पंचविंशतितत्त्वानां चेतनाचेतनदेवमनुजपशुनारकस्तम्भकुम्भाम्भःप्रभृतीनां वा अभावानां वस्तुधर्माणां हेत्वङ्गानां विशेषणमित्यर्थः, बहुवचनाच्चत्वारोऽपि परिगृह्यन्ते अपह्नवान्निराकरणादित्यर्थः । किं स्यात् ? सर्वं निरवशेषमात्मा स्वरूपं यस्य तत्सर्वात्मकं विश्वमेकस्वरूपमित्यर्थः । आदिरुत्पत्तिःपूर्वस्मिन्नसत्त्वं । अंतोऽवसानं विनाशो वा आदिश्चान्तश्चाद्यंतौ तौ न विद्येते यस्य तदनाद्यन्तमनाद्यनन्तमित्यर्थः । स्वमात्मीयरूपमाकारः स्व आत्मैव वा रूपं स्वरूपं न विद्यते तद्यस्य तदस्वरूपं । अभाव इत्यर्थः । तवेदं तावकं न तावकमतावकं । किमुक्तं भवति—पदार्थानां भावैकांताभ्युपगमे अतावकं सर्वाद्यात्मकमनाद्यनंतमस्वरूपं स्यात् कस्मात्सर्वाभावापह्नवात् ॥ ९ ॥

अथ मतं केऽभावाः, कियंतो वा, कान्यनाद्यनंतानि ? कस्मादभावात् किं स्यादत आहः—

अष्टशती—निष्पर्यायद्रव्यैकांतपक्षे सर्वात्मकत्वादिदोषानुषंगः कुतः पुनर्विशेषानपह्नुवीत तत्साधनव्यभिचारात् । संविन्निर्भासभेदाद्भावस्वभावभेदः प्रकल्प्यते, स पुनरभेदेऽप्यात्मनः खंडशः प्रतिभासमानात्, तदन्यत्रापि विभ्रमाभावे कोशपानं विधेयं । तदेकं चक्षुरादिज्ञानप्रतिभासभेदवशाद् रूपादिव्यपदेशभाक् ग्राह्यग्राहकसंवित्तिवत् । इतरेतराभावविकल्पोऽपि कथमयतार्थो न स्यात् वर्णादिविकल्पवत् । न हि वस्तुव्यतिरिक्तमसन्नाम प्रमाणस्यार्थविषयत्वात् । अभावदृष्टौ हि तदवसानकारणाभावाद्भावदर्शनमनवसरं प्राप्नोति । सकलशक्तिविरहलक्षणनिरुपाख्यस्य स्वभावकार्यादेरभावात् । कुतस्तत्प्रमितिः ? वस्तुनानात्वं बुद्ध्यादिकार्यनानात्वात् प्रतीयते । स्वभावाभेदेऽपि विविधकर्मता दृष्टा युगपदेकार्थोपनिबद्धदृष्टिविषयक्षणवत् । शक्तिनानात्वे प्रसवविशेषात् स चेद्व्यभिचारी ? तस्तद्गतिः ? । केवलमविद्यास्वभावदेशकालावस्थाभेदेनात्मनि परत्र चासतः स्वयमसता मिथ्याव्यवहारपदवीमुपनयति-यतः क्षणभंगिनो भिन्नसंततयः स्कंधा विकल्प्येरन् । अन्यथा चेति प्रतिभासकार्याद्यभेदेऽपि कस्य चिदेकत्वं प्रसाधयतीति साध्यसाधनयोरभेदे किं केन कृतं स्यात् ? पक्षविपक्षादेरभावात् । न क्वचिदसाधना साध्यसिद्धिरितिप्रसंगात् ॥ ९ ॥

कार्यद्रव्यमनादि स्यात्प्रागभावस्य निह्नवे ।
प्रध्वंसस्य च धर्मस्य प्रच्यवेऽनंततां व्रजेत् ॥ १० ॥

वृत्तिः—कार्यं च द्रव्यं च कार्यद्रव्यं वस्त्वन्यथाभावः, घटादिकं । क्रियत इति कार्यम् । अवस्थान्तरं द्रवति गच्छतीति द्रव्यम् । अनाद्यनंतसर्वकालैकस्वरूपं नित्यमादिरहितं स्याद्भवेत् । प्राक् पूर्वस्मिन्नभावः असत्त्वं प्रागभावः । मृत्पिण्डे घटस्यासत्त्वमित्यर्थः । तस्य प्रागभावस्य निह्नवे विलोपे निराकरणे । प्रध्वंसस्य च विनाशस्य च घटस्य कपालनाशादय इत्यर्थः । धर्मस्य—विशेषस्य गुणस्य प्रच्यवे अभावे निराकरणे । अनंतस्य भावोऽनंतता तामनंततामपर्यवसानं सर्वकालकार्यमिति संबंधनीयम् । व्रजेत् गच्छेत् । किमुक्तं भवति—प्रागभावस्य निह्नवो यदि स्यात्कार्यद्रव्यमनादि स्यात् । प्रध्वंसाभावास्याभावस्य चाभावे तदेव कार्यद्रव्यमनंततां व्रजेत् ॥ १० ॥

तृतीयचतुर्थाभावस्वरूपं तदभावे च यद्भवति—

अष्टशती–प्रागभावानभ्युपगमे घटादेरनादित्वप्रसंगात् पुरुषव्यापारानर्थक्यं स्यात् । कल्पयित्वापि तदभिव्यक्तिं तस्याः प्रागभावोऽगीकर्तव्यः । तथाहि सतः शब्दस्य ताल्वादिभिरभिव्यक्तिः प्रागसती क्रियते न पुनः शब्द एवेति स्वरुचिविरचितदर्शनप्रदर्शनमात्रं । सा यदि श्रवणज्ञानोत्पत्तिः सैव कथं प्राक् सती यत्नतः कर्तव्या। योग्यतायां समानश्चर्चः। तदावरणविगमः प्राक् किमभूत् भूतौ वा किं यत्नेन ? विशेषाधानमपि तादृगेव कर्तृकर्मकरणानां प्रागभावाभावात्, न कश्चिद्विशेषहेतुः, ताल्वादयो व्यंजका न पुनश्चक्रादयोऽपि इति । न हि व्यंजकव्यापृतिर्नियमेन व्यंजकं संनिधापयति । नायं दोषः सर्वगतत्वाद्वर्णानामित्यपि वार्तं ? अन्यत्रापि तथाभावानुषंगात् । इष्टत्वात् अदोषोऽयं न कारणव्यापारेष्वपि चोद्यानिवृत्तेः । एतेनानवस्था प्रत्युक्ता तद्विशेषैकांते तद्वतोऽनुयोगस्तावतेति कर्तव्यतास्थानात् । अभेदैकांते पूर्ववत्प्रसंगः । परिणामेऽप्येषः पर्यनुयोगस्तदभिन्नानां क्रमशोवृत्तिर्माभूत् । भिन्नानां व्यपदेशोऽपि माभूत् संबंधासिद्धेरनुपकारकत्वात् । उपकारेऽपि सर्वं समानं अनवस्था च । विनाशानभ्युपगमे तस्य किंकृतमश्रावणं ? तदात्मानमखंडयतः कस्यचिदावरणत्वायोगात् । आवृतानावृतस्वभावयोरभेदानुपपत्तेः । तयोरभेदे वा शब्दस्य श्रुतिरश्रुतिर्वा इत्येकांतः ? तमसापि घटादेरखंडने पूर्ववदुपलब्धिः किं न भवितुमर्हति ? स्वसवित्त्युत्पत्तौ कारणांतरापेक्षा माभूत् तत्करणसमर्थस्य, अन्यथा तदसामर्थ्यमखंडयदकिंचित्करं किं सहकारिकारणं स्यात् । तत्खंडने वा स्वभावहानिरव्यतिरेकात् । व्यतिरेके व्यपदेशानुपपत्तिरिति पूर्ववत्सर्वं । वर्णानां व्यापित्वान्नित्यत्वाच्च क्रमश्रुतिरनुपपन्नैव, समानकरणानां तादृशामभिव्यक्तिनियमायोगात् । सर्वत्र सर्वदा सर्वेषां संकुला श्रुतिः स्यात् । वक्तृश्रोक्तृविज्ञानयोस्तत्कारणकार्ययोः क्रमवृत्तित्वमपेक्ष्य परिणामिनां क्रमोत्पत्तिप्रतिपत्त्योर्न किंचिद्विरुद्धं पश्यामः । सर्वगतानामेष क्रमो दुष्करः स्यात् क्षणिकेष्वेव करणांगहारादिषु प्रत्यभिज्ञानाद्विरुद्धो हेतुः । तत्क्रियैकत्वेऽपि किमिदानीमनेकं स्यात्। सर्ववर्णैकत्वप्रसंगात् । शक्यं हि वक्तुं–अभिव्यंजकभेदाद्वैश्वरूप्यं जलचंद्रवत् । क्वचित्प्रत्यक्षविरोधे ? तदन्यत्राप्यविरोधः कुतः ? तदयं ताल्वादिव्यापारोपजनितश्रावणस्वभावं परित्यज्य विपरीतमासादयन्नपि नित्यश्चेन्न किंचिदनित्यं । युगपत्प्रतिनियतैकदेशमंद्रतारश्रुतेः कस्य चिदेकत्वेन क्वचिदनेकत्वसिद्धेः । न हि कथंचित् क्वचित्प्रत्यवमर्शो न स्यात्, तच्छेषविशेषबुद्धेरभिव्यंजकहेतुत्वप्रक्लृप्तौ सर्वं समंजसं प्रेक्षामहे । तदेतेषां पुद्गलानां करणसंनिपातोपनीतश्रावणस्वभावः शब्दः पूर्वापरकोट्योरसन् प्रयत्नानंतरीयको घटादिवत् पुद्गलस्वभावत्वे दर्शनविस्तारविक्षेपप्रतीघातकर्णपूरणैकश्रोत्रप्रदेशाद्युपलंभो गंधपरमाणुप्रतिविधानतयोपेक्षामर्हति । कर्णशष्कुल्यां कटकटायमानस्य प्रायशः प्रतिघातहेतोर्भवनाद्युपघातिनः शब्दस्य प्रसिद्धिः-अस्पर्शत्वकल्पनामस्तं गमयति । निश्छिद्रानिरगमनादयः सूक्ष्मस्वभावत्वात् स्नेहादिस्पर्शादिवन्न विरुध्येरन् अतो यत्नजनितवर्णाद्यात्मा श्रावणमध्यस्वभावः प्राक् पश्चादपि पुद्गलानां नास्तीति तावानेव ध्वनिपरिणामः । ततः प्राक्प्रध्वंसाभावप्रतिक्षेपे कौटस्थ्यं क्रमयौगपद्याभ्यां स्वाकारज्ञानाद्यर्थक्रियां व्यावर्तयतीति निरूपाख्यत्वमित्यभिप्रायः । तदानुपूर्वीकल्पनां विस्तरेण प्रतिक्षेप्स्यामः ॥ १० ॥

सर्वात्मकं तदेकं स्यादन्योपाहव्यतिक्रमे ।
अन्यत्र समवायेन व्यपदिश्येत सर्वथा ॥ ११ ॥

वृत्तिः–सर्वो विश्वो निरवशेषः आत्मा स्वरूपं यस्य तत् सर्वात्मकम् । तत् किंचिद्वस्तु विवक्षितरूपं, एकं-अभेदरूपं–स्यात् भवेत् । अन्यस्य अपरस्य अपोहो–निराकरणं तस्य व्यतिक्रमः–निह्नवः निराकृतिः स तथाभूतः तस्मिन्नन्यापोहव्यतिक्रमे इतरेतराभावाभावे इत्यर्थः । अन्यत्र अत्यन्ताभावाभावे । समवायेन मीलनेन समुदायेन । व्यपदिश्येत कथ्येत अभ्युपगम्येत । सर्वथा सर्वप्रकारैः । खरविषाणादि । अथानयोरभावयोः को विशेषः ? इति चेत्–घटे पटाभाव इतरेतराभावः । कदाचित्कालांतरे तत्तेन स्वरूपेण भवति, शक्तिरूपेण विद्यमानत्वात् । अत्यंताभावः पुनर्जीवत्वेन पुद्गलस्याभावः कदाचिदपि तेन स्वरूपेण न भवति ।

एतदुक्तं भवति–अन्यापोहव्यतिक्रमे सति, किंचिद्विवक्षितं सर्वात्मकमेकं भवति । अत्यंताभावाभावे पुनरैक्येन सर्वप्रकारैर्व्यपदिश्येत । ततो न किंचित्स्यात् ॥

भावैकांतपक्षे कुशलाकुशलकर्मादेरघटनां प्रदर्श्य अभावैकांतपक्षेऽपि भृशं न घटत इति प्रदर्शयन्नाह–

अष्टशती–स्वभावांतरात्स्वभावव्यावृत्तिरन्यापोहः । संविदो ग्राह्याकारात्कथं चिद्व्यावृत्तौ- अनेकांतसिद्धिः-अन्यथा संबंधासिद्धिः । अव्यावृत्तावन्यतरस्वभावहानेर्न किंचित्स्यात् विषयाकारविकलस्यानुपलब्धेः । संवित्तेः स्वलक्षणप्रत्यक्षवृत्तावपि संवेद्याकारविवेकस्वभावांतरानुपलब्धेः स्वभावव्यावृत्तिः । शबलविषयनिर्भासेऽपि लोहितादीनां परस्परव्यावृत्तिरन्यथा चित्रप्रतिभासासंभवात्, तदन्यतमवत्तदालंबनस्यापि नीलादेरभेदस्वभावापत्तेः । तद्वतस्तेभ्योव्यावृत्तिरेकानेकस्वभावत्वात् रूपादिवत् अन्यथा द्रव्यमेव स्यान्न रूपादयः । स्वाभाविकत्वेऽपि निर्भासवैलक्षण्यं करणसामिग्रीभेदमनुविदध्यात् दूरासन्नैकार्थोपनिबद्धनानादर्शननिर्भासवत् । प्रति पुरुषं विषयस्वभावभेदो वा सामिग्रीसंबंधभेदात् । अन्यथा न केवलं रूपादेरभेदः । कस्य चित्क्रमशः संबंध्यंतरोपनिपातोऽपि स्वभावं न भेदयेत् । ततः क्रमवंत्यपि कार्याणि तत्स्वभावभेदं नानुमापयेयुः । ततो यावंति संबंध्यंतराणि तावंतः प्रत्येकं भावस्वभावभेदाः परस्परव्यावृत्ताः । न हि कस्यचित्केनचित् साक्षात्परंपरया वा संबंधो नास्ति निरुपाख्यत्वप्रसंगात् । तदेवं प्रतिक्षणमनंतपर्यायाः प्रत्येकमर्थसार्थाः । क्रमशोऽपि विच्छेदे, अर्थक्रियानुपपत्तेः । स्वभावमसंतन्वतः क्वचिदुपकारितानुपपत्तेः । कारणस्य स्वकार्यात्मना भवतः प्रतिक्षेपायोगात् । स्वभावांतरानपेक्षणात् । तस्मादयमुत्पिप्सुरेव नश्यति । नश्वर एव तिष्ठति । स्थास्नुरेवोत्पद्यते । ततः प्रतिक्षणं त्रिलक्षणं–स्थितिरेवोत्पद्यते । विनाश एव तिष्ठति । उत्पत्तिरेव नश्यति । स्थितिरेव स्थास्यत्युत्पस्यते विनश्यति । विनाश एव स्थास्यति उत्पस्यते विनश्यति । उत्पत्तिरेव उत्पत्स्यते विनश्यति स्थास्यतीति न कुतश्चिद्[1]परम इति भावः । द्रवति द्रोष्यति अदुद्रवत् सत्त्वेव विशिष्यते द्रव्य-क्षेत्र-काल-भावात्मना । ततः परस्परव्यावृत्तस्वभावानंतगुणपर्यायान् प्रतिक्षणमासादयंती सत्त्वेव तिष्ठतीत्यादि योज्यं । तथा भेदानेव संद्रवंतीत्यादि प्रतिपत्तव्यं । अत्यंताभावापकृतौ न क्वचित्किंचित् कथंचित् वर्तते तथा सर्वं सर्वत्र सर्वदोपलभ्येत । कथं पुनरभावप्रतिपत्तिः ? कथंचन स्यात् । प्रत्यक्षस्य रूपादिस्वलक्षणविषयत्वात् प्रमाणांतरस्यापि स्वकारणाविषयत्वादंतशोऽनुपलब्धेः । पर्युदासवृत्त्या वस्तुनि नियमादेकस्य कैवल्यं इतरस्य वैकल्यमिति ब्रुवन्नपि देवानांप्रियो नावधारयति भावाभावप्रतिपत्तेरभावाभ्युपगमात् । स्वपररूपादिभावाभावलक्षणत्वात् सर्वस्य निःश्रेणीपदबंधाभ्यामिव भावाभावस्वभावाभ्यां प्रतिबंधान्न किंचित्प्रमाणं सर्वात्मना भावमभावं वा गृहीतु महंति अनियमप्रसंगात् । भावप्रमेयैकांतवादिनामभावप्रतिपत्तिरयुक्तिः अतो न भावप्रतिपत्तिः तत्प्रमेयतोपसंख्यानं प्रमाणद्वयनियमं विघटयति । भावनैरात्म्यस्य प्रमाणाकारणत्वात् प्रतिबंधनियमोपि माभूत् ॥ ११ ॥

अभावैकांतपक्षेऽपि भावापह्नववादिनां ।
बोधवाक्यं प्रमाणं न केन साधनदूषणम् ॥ १२ ॥

वृत्तिः–अभाव इति [2]असन्निति एकांतो मिथ्याभिप्रायोऽभावैकांतः । स एव पक्षोऽभ्युपगमस्तस्मिन्नप्यभावैकांतपक्षेऽपि । न केवलं भावैकांते, किं त्वभावैकांतेऽपि भावस्य सत्त्वस्य अपह्नवः अभावो निराकरणं तं वदितुं शीलं येषां ते तथाभूतास्तेषां भावापह्नववादिनाम् । बोधो ज्ञानं स्वार्थानुमानं, वाक्यं आगमः परार्थानुमानम् । बोधश्च वाक्यं च बोधवाक्यम् । प्रमीयतेऽनेनेति प्रमाणं स्वपरावभासकं ज्ञानं । न प्रतिषेधवचनम् । केन कतरेण । साधनं च दूषणं च साधनदूषणं द्वंद्वैकवद्भावः । स्वपक्षसिद्धिः परपक्षनिराकरणं । भावापह्नववादिनामभावैकांते बोधवाक्ययोरप्यभावस्ततः प्रमाणाभावात् केन साधनं केन वा दूषणं क्रियत इति संबंधः ॥ १२ ॥

---

१ कुतश्चिदुपरमते पाठोऽयं लिखित. पुस्तके ।　　२ असदिति पाठो लिखितपुस्तके ।

भावाभावैकांते विरोधं निरूप्योभयैकांतवादिनामपि न किंचित्संगच्छत इत्याह—

अष्टशती—बहिरंतश्च परमार्थसत् अन्यतरापायेऽपि साधनदूषणप्रयोगानुपपत्तेरिति प्रकृतार्थपरिसमाप्तौ किं त्रिलक्षणविकल्पनया। न हि संवृत्त्या साध्यसाधनव्यवस्था युक्तिमती। शून्यसिद्धेरपरमार्थत्वे पुनरनिराकृतस्वद्भावस्य सर्वस्याशून्यतानुषंगात्। समारोपव्यवच्छेदेऽपि समानं। हेयोपादेयोपायरहितमयमहीकः केवलं विक्रोशति। संवृत्त्यास्तीति स्वरूपेणास्त्ययमर्थः ? कृतमनुकूलं। केवलं वक्ता आत्मनो वैयात्यं सूचयति। अथ परस्वरूपेण नास्ति नाग्नि विवादात् एतदपि तादृगेव। तदेतेनोभयानुभयविकल्पः प्रत्युक्तः। तदस्ति मृषात्मनेति समानश्चर्चः। संवृत्तिविचारानुपपत्तिरित्ययुक्तं। तदभावात्तत्प्रतिपादनार्थं शास्त्रमुपदिशन्नुपदेष्टारं चावर्णयन् सर्वं प्रतिक्षिपतीति कथमनुन्मत्तः ? सौद्रोदनेरेव तावत्प्रज्ञापराधोऽयं लोकातिक्रांतः कथं वभूवेत्यतिविस्मयमास्महे। तमन्ये पुनरद्यापि कीर्तयंतीति किं बत परमन्यत्र मोहनीयप्रकृतेः ॥ १२ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ १३ ॥

वृत्तिः—विरोधाद्व्यभिचारात् पूर्वापरासंगतत्वात्। न प्रतिषेधवचनम्। एक आत्मा स्वभावो ययोस्तौ तथा तयोर्भावस्तदैकात्म्यम्। उभयोः सत्त्वासत्त्वयोरैकात्म्यमुभयैकात्म्यं भावाभावैक्यमित्यर्थः। न्यायो युक्तिः प्रमाणेन प्रमेयस्य घटना। स्याद्वाद एव न्यायः स्याद्वादन्यायस्तस्मै विद्विषंतं वा विद्विषन्तीति स्याद्वादन्यायविद्विषस्तेषां स्याद्वादन्यायविद्विषामनेकांतवैरिणाम्। अथ भावाभावोभयकांतपक्षदोषदर्शनादवाच्यतैकांत आश्रीयते ? तथापि दोष एव अत आह। उच्यत इति वाच्यं न वाच्यमवाच्यं तस्य भावोऽवाच्यता सैव एकांतोऽविद्याध्यवसायोऽवाच्यतैकांतस्तस्मिन्नवाच्यतैकांते अपि। शब्दार्थयोरवाच्यवाचकत्वेऽपि। उक्तिर्वचनं अवाच्यमित्यवक्तव्यमिति। न युज्यते न घटते। स्याद्वादन्यायविद्विषां वादिनामुभयैकात्म्यं न भवति। विरोधात्। विज्ञानशून्यवत्। तथावक्तव्यैकांतपक्षेऽपि अवाच्यमित्येवं या उक्तिः साऽपि न युज्यते। सर्वथाऽवाच्यत्वात्। एकशब्देन घटपटादिवत् ॥ १३ ॥

एकहेलया यदि सर्वथा सदसदुभयावक्तव्यरूपं तत्त्वं नास्ति कथं तर्हीत्याह—

अष्टशती—भावाभावयोरेकतरप्रतिक्षेपैकांतपक्षोपक्षिप्तदोषपरिजिहीर्षया सदसदात्मकं सर्वमभ्युगच्छतोऽपि वाणी विप्रतिषिध्यते। तस्याः परस्परपरिहारस्थितिलक्षणत्वात्। न हि सर्वात्मना कंचिदर्थं संतं तथैवासंतमाचक्षाणः स्वस्थः स्वाभ्युपगमेतरनिरासविधानकरणात् शून्यावबोधवत्। त्रैलोक्यं व्यक्तेरपैति नित्यत्वप्रतिषेधात्—अपेतमप्यस्ति विनाशप्रतिषेधादिति वा तदन्यथापेतमन्यथास्तीति स्याद्वादावलंबनमंधसर्पविलप्रवेशन्यायमनुसरति। योऽपि पक्षत्रयोपक्षिप्तदोषपरिजिहासया सर्वथाऽवक्तव्यतत्त्वमवलंबते सोऽपि कथमवक्तव्यं ब्रूयात् ? नैष दोषः स्वलक्षणमनिर्देश्यं प्रत्येकं कल्पनापोढमित्यादिवत्। तदप्यसत् यदसतः समुदाहृतं। यथैवाक्षविषयेऽभिधानं नास्ति तथाक्षज्ञाने विषयो नैवास्ति ततस्तत्र प्रतिभासमानेऽपि न प्रतिभासते। न केवलं विषयबलात् दृष्टेरुत्पत्तिः—अपि तु चक्षुरादिशक्तेश्च। तदर्थवत् करणमनुकर्तुमर्हति, न वार्थं विशेषाभावात्। दर्शनस्य कारणांतरसद्भावेऽपि विषयानुकारानुकारित्वमेव, सुतस्येव पित्राकारानुकरणमित्यपि वार्तं स्वोपादानमात्रानुकरणत्वप्रसंगात्। उभयाकारानुकरणेऽपि रूपादिवदुपादानस्यापि विषयतापत्तेरतिशयाभावात्। वर्णादेर्वा तद्वदविषयत्वप्रसंगात्। तज्जन्मरूपाविशेषेऽपि तदध्यवसायनियमात् बहिरर्थविषयत्वमित्यसारं। दर्शनस्यानध्यवसायात्मकत्वाददोषोऽयं प्रत्यक्षस्याध्यवसायहेतुत्वा'दित्यनिरूपिताभिधानं तत्राभिलापाभावात्। तदभावेऽप्यध्यवसायकल्पनायां प्रत्यक्षं किं नाध्यवस्येत्। यथैव हि प्रत्यक्षस्याभिलापसंसर्गयोग्यता नास्ति तथा तत्समनंतरभाविनोऽपि विकल्पस्य। तथाहि किंचित्केन चिद्विशिष्टं गृह्यमाणं विशेषणविशेष्यतत्संबंधव्यवस्थाग्रहणमपेक्षते दंडिवत्। नचायमियतो व्यापारान् कर्तुं समर्थः ? प्रत्यक्षबलोत्पत्तेरविचारकत्वात्—प्रत्यक्षवत्। नैतदेवं शब्दार्थविकल्पवासनाप्रभवत्वान्मनोविकल्पस्य ततस्तर्हीं

कथमक्षबुद्धेरूपादिविषयत्वानियमः ? तदभ्युगमे वा तदभिलापसंसर्गोऽपि तद्बदनुमीयते । तस्मादयं किंचित्पश्यन् तत्सदृशं पूर्वदृष्टं न स्मर्तुमर्हति तन्नामविशेषास्मरणात् । तदस्मरन्नेव तदाभिधानं प्रतिपद्यते । तदप्रतिपत्तौ तेन तन्न योजयति । तदयोजयन्नाध्यवस्यतीति न क्वचिद्विकल्पः शब्दो वेत्यविकल्पाभिधानं जगत् स्यात् । तथाहि–बहिरंतर्वा गृहीतमप्यगृहीतकल्पं क्षणक्षयलक्षणसंवेदनादिवत् तथाचायातमचेतनत्वं जगत । सहस्मृतिरयुक्तैव तन्नामाक्षरमात्राणामपि क्रमशोऽध्यवसानात् अन्यथा संकुला प्रतिपत्तिः स्यात् । नाम्नो नामांतरेण विनापि स्मृतौ केवलार्थव्यवसायः किं न स्यात् । तन्नामांतरपरिकल्पनायामनवस्था । तदयमशब्दं सामान्यं व्यवस्यन् स्वलक्षणमपि व्यवस्येत् । भेदाभावात् सामान्यवत्।स्वलक्षणमध्यवस्यन्नभिलापेन योजयेत् ततो न किंचित्प्रमेयमनभिलाप्यं नाम । प्रत्यक्षस्यानभिलाप्यत्वे स्मार्ते शब्दानुयोजनं दृष्टसामान्यव्यवसायो यद्यपेक्षेत सोऽर्थो व्यवहितो भवेत् तदिंद्रियज्ञानात्सामान्यव्यवसायो न स्यात् प्रागिवाजनकत्वात् तदंतरेणापि दर्शनमयं गौरिति निर्णयः स्यात्।अनभिलाप्यस्य विशेषस्यानुभवे कथमभिलाप्यस्य स्मृतिरत्यंतभेदात्?।शब्दार्थयोः संबंधस्यास्वाभाविकत्वे कथमर्थमात्रं पश्यन् शब्दमनुस्मरेत्?। तदर्थं वा यतोऽयं व्यवसायः । चक्षुरादिज्ञानस्य कथंचिद् व्यवसायात्मकत्वाभावे दृष्टसजातीयस्मृतिर्न स्यात् । दानहिंसाविरतिचेतसः स्वर्गादिफलजननसामर्थ्यसंवेदनवत् । क्षणक्षयानुभववद्वा प्रत्यक्षेऽभिलापसंस्कारविच्छेदे कुतस्तद्विकल्पाभिलापसंयोजनं यतः सामान्यमभिलाप्यं स्यात् । नच ग्राहकप्रत्यक्षस्मृतिप्रतिभासभेदाद्विषयस्वभावभेदः सकृदेकार्थोपनिबद्धदर्शनप्रत्यासन्नेतरपुरुषज्ञानविषयवत् । तथा च मंदप्रतिभासिनि तत्संकेतव्यवहारनियमकल्पनायामपि कथंचिदभिधेयत्वं वस्तुनः सिद्धमित्यलं प्रसंगेन । तस्मादवाच्यैकांते यदवाच्यमित्यभिधानं तदसमंजसं स्वलक्षणमनिर्देश्यमित्यादिवत् स्ववचनविरोधात् ॥ १३ ॥

कथंचित्ते सदेवेष्टं कथञ्चिदसदेव तत् ।
तथोभयमवाच्यं च नययोगान्न सर्वथा ॥ १४ ॥

वृत्तिः–कथंचित्-केन चित्प्रकारेण । ते-तव सदेव-भाव एव । इष्ट-मतमभ्युपेतम् । कथंचित्-केनचित्प्रकारेण । असदेव-अभाव एव । तत् यदेव सत् । तथा तेनैव केनचित्प्रकारेण । उभयं सदसदात्मकम् । अवाच्यमवक्तव्यम् । चकारात्कथंचिदित्यर्थः । नयस्य वक्तुरभिप्रायस्य योगो युक्तिर्नययोगस्तस्मान्नययोगादभिप्रायवशादित्यर्थः । न सर्वथा-सर्वकारैर्न । किमुक्तं भवति–सदसदुभयावक्तव्यं वस्तु न भवति । किंतु केन चित्प्रकारेण ।

तदेव स्वष्टयति अनवस्थां च निराकरोति उत्तरकारिकया–

अष्टशती–नावग्रहादेरन्योन्यं स्वलक्षणविवैकैकांतो जीवांतरवत् स्वात्मन्यपि संतानभेदप्रसंगात् । अहमहमिकयात्मा विवर्तानुभवननादिनिधनः स्वलक्षणप्रत्यक्षः सर्वलोकानां क्वचिच्चित्रविज्ञानक्षणे नीलादि विशेषनिर्भासवत् आत्मभूतान् परस्परतो विविक्तान् सहक्रमभाविनो गुणपर्यायानात्मसात्कुर्वन् सन्नेव । तदेकत्वाभावे नीलादिविशेषनियतदर्शननानासंतानसंवेदनक्षणवाच्चित्रसंवेदनं न स्यात् । तथा क्रमवृत्तीनां सुखादीनां मतिश्रुतादीनां वा तादात्म्यविगमैकांते संततिरनेकपुरुषवत् । नैरंतर्यादेरविशेषात्संतानव्यतिकरोऽपि किं न स्यात् । न हि नियामकः काश्चिद्विशेषोऽन्यत्र भेदाभेदपरिणामात् असंकरे हर्षविषादादिचित्रप्रतिपत्तेरयोगात् । यथैकत्र समनंतरावग्रहादिसदादिस्वभावसंकरपरिणामस्तथैव सर्वत्र चेतनाचेतनेषु संप्रत्यतीतानागतेषु, तत्स्वभावाविच्छित्तेः । अतः कथंचित्सदेवेष्टं । न केवलं जीवाजीवप्रभेदाः सजातीयविजातीयव्यावृत्तिलक्षणाः किंतु बुद्धिक्षणेपि क्वचिद्ग्राह्यग्राहकयोः सितादिनिर्भासांशपरमाणुसंवित्तयोऽपि, परस्परपरिहारस्थितिलक्षणत्वात् अन्यथा स्थूलशबलालोकनाभावात्,तदेकांशवत् । तथाच सकलचेतनेतरक्षणपरिणामलवविशेषाः परस्परविविक्तात्मनस्तदन्योन्याभावमात्रं जगत् अन्यथा सर्वथैकत्वप्रसंगात् । अन्वयस्य विशेषापेक्षणादभावो वा । तदिष्टसदेव कथंचित् । न हि भावाभावैकांतयोर्निःपर्यायमंगीकरणं युक्तं । यथैवास्ति तथैव नास्तीति विप्रतिषे-

धात् कथंचित्सदसदात्मकं द्रव्यपर्यायनयापेक्षया, विपर्यये तथैवासंभवात्। सर्वथा जात्यंतरकल्पनायां तदंशनिबंधनविशेषप्रतिपत्तेरत्यंताभावप्रसंगात्। सर्वथोभयरूपत्वे वा जात्यंतरप्रतिपत्तेरयोगात्। तथा चानवस्थादिदोषानुषंगः। तदिष्टं स्याद्उभयं, सद्भावेतराभ्यामनभिलापे वस्तुनः केवलं मूकत्वं जगतः स्यात् विधिप्रतिषेधव्यवहारायोगात्। न हि सर्वात्मनाभिलाप्यस्वभावं बुद्धिरध्यवस्यति। न वानध्यवसायं प्रमितं नाम गृहीतस्यापि तादृशस्यागृहीतकल्पत्वात् मूर्छाचैतन्यवत्। सर्वात्मनाभिधेयत्वेऽपि प्रत्यक्षेतराविशेषप्रसंगात्। तथाभिधेयत्वेऽपि सत्येतरयोरभेदः स्यात्। स्वपक्षविपक्षस्यासत्वात् तत्त्वप्रदर्शनाय यत्किंचित्प्रणयन् वस्तु सर्वथानभिधेयं प्रतिजानातीति किमप्येतन्महादद्भुतं, तत्कृतां वस्तुसिद्धिमुपजीवति न च तद्वाच्यतां चेति स्वदृष्टिरागमात्रमनवस्थानुषंगात्॥ १४॥

सदेव सर्वं को नेच्छेत् स्वरूपादिचतुष्टयात्।
असदेव विपर्यासान्न चेन्न व्यवतिष्ठते॥ १५॥

वृत्तिः—सदेव-सत्त्वमेव सर्वं-निरवशेषं विश्वम्। को नेच्छेत्-को न मन्यते कस्य नेष्टं? किंतु इष्टमेव सर्वस्य। स्वरूपमात्मरूपं स्वस्य वा रूपं तदादिर्यस्य तत्स्वरूपादि तच्चैतच्चतुष्टयं चतुर्विकल्पं तत्तथाभूतं। तस्मात्स्वरूपादिचतुष्टयात्। किं तत्? स्वद्रव्यस्वक्षेत्रस्वकालस्वभावः। तस्मात्। असदेव नास्तित्वमेव विपर्यासात्-अस्वरूपादिचतुष्टयात्। अस्वद्रव्यक्षेत्रकालभावात्। न चेत्-यद्येवं न। न व्यवतिष्ठते-न घटते नात्मस्वरूपं लभत इत्यर्थः। किमुक्तं भवति-स्वरूपादिचतुष्टयात्सर्वं सदेव को नेच्छेत्?। विपर्ययाद्विपर्ययं को नेच्छेत्?। यदि पुनर्येनैव सत्त्वं तेनैवासत्त्वमिति स्यान्न किंचिदपि स्यात्।

शेषभंगप्ररूपणार्थमाह—

अष्टशती-स्यात्सदसदात्मकाः पदार्थाः सर्वस्य सर्वकरणात्। नहि पटादयो घटादिवत् क्षीराद्याहारणलक्षणामर्थक्रियां कुर्वंति घटादिज्ञानं वा। तदुभयात्मनि दृष्टांतः सुलभः। शब्देतरप्रत्ययोः एकानेकवस्तुविषययोः, एकात्मसमवेतयोः कारणविशेषवशात् परिवृत्तात्मनोः स्वभावभेदेऽपि कथंचिदेकत्वमस्त्येव विच्छेदानुपलब्धेः। उपादानस्य कार्यकालमात्मानं कथंचिदनयतश्चिरतरनिवृत्ताविशेषात् कार्योत्पत्तावपि व्यवदेशानुपपत्तेस्तादृशं स्वरूपैकत्वमस्त्येव विशेषापेक्षया तु नास्त्येव। न हि पौरस्त्यः पाश्चात्यः स्वभावः, पाश्चात्यो वा पौरस्त्यः निरपेक्षः। तत्र क्रमोऽपि प्रतिभासातिशयवशात् प्रकल्प्येत तदेकत्वादक्रमः किं न स्यात्। तदेकमनेकाकारं, अक्रमक्रमात्मकं, अन्वयव्यतिरेकरूपं सामान्यविशेषात्मकं सदसत्परिणामं स्थित्युत्पत्तिविनाशात्मकं स्वप्रदेशनियतं स्वशरीरव्यापिनं त्रिकालगोचरमात्मानं परं वा कथंचित् साक्षात्करोति परोक्षयति वा केशादिविवेकव्यामुग्धबुद्धिवत्। तादृशैकचैतन्यं सुखादिभेदं वस्तु स्वतोऽन्यतः सजातीयविजातीयाद्विवृत्तलक्षणं विभर्त्ति—अन्यथा अनवस्थानात् क्वचित्कथंचिदनियमः स्यात्॥ १५॥

क्रमार्पितद्वयाद् द्वैतं सहावाच्यमशक्तितः।
अवक्तव्योत्तराः शेषास्त्रयो भंगा स्वहेतुतः॥ १६॥

वृत्ति—क्रमेण परिपाट्या अर्पितं विवक्षितं क्रमार्पितं तच्च तद्द्वयं द्वितयं क्रमार्पितद्वयं तस्मात्क्रमार्पितद्वयात्। द्वाभ्यामितं द्वीतं-द्वीतमेव द्वैतं-द्वयात्मकमस्तित्वनास्तित्वस्वरूपं-क्रमविवक्षितस्वपरचतुष्टयादस्तित्वनास्तित्वस्वरूपामित्यर्थः। सह-युगपत् एकहेलया विवक्षितस्वपरचतुष्टयादित्यर्थः। यद्यपि द्वयशब्दः समासांतर्भूतस्तथापि तेन संबंधोऽन्यस्याऽश्रुतत्वात्। अवाच्यं—अवक्तव्यमुच्चारयितुमशक्यमित्यर्थः। कुतः? अशक्तितः असामर्थ्यात्। अवक्तव्यमवाच्यमुत्तरं-परं येषां भङ्गानां तेऽवक्तव्योत्तराः शेषा अन्ये त्रयो भङ्गास्त्रयो विकल्पाः। स्वहेतुतः स्वकीयकारणात्। के ते स्वहेतवः स्वरूपादिचतुष्टयात्सहविवक्षितस्वरूपादिचतुष्टयाच्चास्ति चावक्तव्यं। तथा पररूपादिचतुष्टयात्, युगपद्गृहीतस्वपररूपादिचतुष्टयाच्च नास्ति चावाच्यम्। तथा क्रमार्पितस्वरूपादिचतुष्टयाद्युगपद्विवक्षितस्वपररूपादिचतुष्टयाच्चास्ति नास्ति चावक्तव्यं च।

किमुक्तं भवति ?— स्वहेतोः स्यादस्ति १ । स्यान्नास्ति २ । स्यादस्ति नास्ति च ३ । स्यादवक्तव्यम् ४ । स्यादस्ति चावक्तव्यम् ५ । स्यान्नास्ति चावक्तव्यम् ६ । स्यादस्ति नास्ति चावक्तव्यं च ७ वस्तुत इत्यर्थः ॥

अस्तित्वादीन् धर्मान् युक्तितः समर्थ्य, अधुना तेषामेकस्मिन्नधिकरणेऽवस्थानस्य विरोधमन्तरेण परस्परपरिहारेण रूपादीनामिव युक्तितः समर्थनार्थमाह—

अष्टशती-स्वपररूपाद्यपेक्षं सदसदात्मकं वस्तु न विपर्यासेन तथा दर्शनात्, कल्पयित्वापि तज्जन्मरूपाध्यवसायान् स्वानुपलंभव्यावृत्तिलक्षणं दर्शनं प्रमाणयितव्यं । तथाहि—बुद्धिरियं यथा प्रत्यासत्त्या कस्य चिदेवाकारमनुकरोति तया तमेव नियमेनोपलभेत नान्यथा पारंपर्यपरिश्रमं परिहरेत् । त्रिलक्षणस्यापि विभ्रमहेतुफलविज्ञानैर्व्यभिचारात् तदनभ्युपगमे स्वाभ्युपगमासिद्धेः किंसाधनः परमुपालभेत ? । तदेकोपलंभनियमः स्वपरलक्षणाभ्यां भावाभावात्मनं प्रसाधयति, तदभावे न प्रवर्तयति नापि निवर्तयति प्रमाणांतरवन्निष्पर्यायं भावाभावाभिधानं नांजसैव विषयीकरोति शब्दशक्तिस्वाभाव्यात् । वचनसूचनसामर्थ्यविशेषानतिलघनात् । संकेतानुविधानेऽपि कर्तृकर्मणोः शक्तयशक्तयोरन्यतरव्यपदेशार्हत्वात् । अयोदारुवज्रलेखनवत् । अन्यथा चाक्षुषत्वादयः शब्दादिधर्मा न भवेयुः । अतो यावंति पररूपाणि तावत्येव प्रत्यात्मं स्वभावांतराणि तथा परिणामात् । द्रव्यपर्यायौ व्यस्तसमस्तौ समाश्रित्य चरमभंगत्रयव्यवस्थानं । न खलु सर्वात्मना सामान्यं वाच्यं ? तत्प्रतिपत्तेरर्थक्रियां प्रत्यनुपयोगात् । न हि गोत्वं वाहदोहादावुपयुज्यते । लक्षितलक्षणया वृत्तैः कथंचित्तादात्म्येन भवेत्, संबंधांतरासिद्धेः कार्मुकादिवत् । तादृशानुपलंभात्संकेतोऽपि न सिद्धयेत् । सतापि तादृशान्यव्यावृत्त्यात्मना भवितव्यं अन्यथा विशेषवत्स्वभावहानिप्रसंगात् विशेषाणां वा तद्वत्ततो व्यावृत्तेर्नचान्यापोहः सर्वथार्थः शब्दस्य विकल्पस्य वा । साधनवचनेन नित्यत्वसमारोपव्यवच्छेदेऽपि स्वलक्षणस्यानित्यत्वासिद्धौ साधनवचनानर्थक्यात् । विकल्पाभिधानयोर्वस्तुसंस्पर्शाभावे स्वलक्षणदर्शनस्याकृतनिर्णयस्य वस्तुसन्निधेरविशेषात् किं केन प्रमितं स्यात् । न हि मिथ्याध्यवसायेन तत्त्वव्यवस्थानं वस्तुदर्शनसमारोपव्यवच्छेदयोः अन्यतरस्यापि स्वतस्तत्त्वापरिनिष्ठितौ इतरेतराश्रयदोषः । समयादर्शिनोऽपि क्वचिदन्वयबुद्ध्यभिधानव्यवहारो तत्कार्यकारणव्यतिरेकव्यवस्थायां गुडुच्याद्युदाहरणप्रक्लृप्तिं विपर्यासयति—॥ १६ ॥

अस्तित्वं प्रतिषेध्येनाविनाभव्येकधर्मिणि ।
विशेषणत्वात्साधर्म्यं यथा भेदविवक्षया ॥ १७ ॥

वृत्तिः-अस्तित्वं सत्त्वं प्रतिषेध्येन—नास्तित्वेन अविनाभावि—नास्तित्वेन विना न भवति पृथग्भूतं नोपलभ्यत इत्यर्थः । धर्मा आस्य सन्ति धर्मी एकश्चासौ धर्मी च तस्मिन्नेकधर्मिणि । विशेषणत्वात् । उपाधिवशात्[1] । समानो धर्मः सधर्मस्तस्य भावः साधर्म्यमन्वयः । यथा—दृष्टांतप्रदर्शकः । भेदस्य विवक्षाऽर्पणा तया इत्यर्थः । एकधर्मिणि शब्दादौ अस्तित्वं नास्तित्वाविनाभावि कुतः ? विशेषणत्वात् । यथा कृतकत्वादौ साधर्म्यं वैधर्म्येण विना न भवति । यद्विशेषणं तत्प्रतिषेध्याविनाभावि यथा साधर्म्यं व्यतिरेकविवक्षया । द्रुमादौ विशेषणं चास्तित्वं । तस्मात्प्रतिषेध्यधर्माविनाभावि ॥ १७ ॥

तथा—

अष्टशती— सर्वमित्थमनित्थं चेति प्रतिज्ञाय-अभिप्रेत्य वा प्रमेयत्वादिहेतूपादनेऽपि व्यतिरेकोऽस्त्येव प्रमेयत्वस्य वस्तुधर्मत्वात् । खपुष्पादयोऽपि तत्र व्यवहारमिच्छता प्रमेयाः प्रतिपत्तव्या इति न किंचित्प्रमाणं प्रमेयाभावस्यापि तथाभावानुषंगेणाव्यवस्थाप्रसंगात् । नचैतद्विरुद्धं स्वलक्षणमनिर्देश्यमित्यादिवत् ।

---

१ लिखितपुस्तके उपाधित्वादिति पाठः ।

दर्शने स्वाकारमनपर्यंतां स्वभावकार्यप्रतिबंधाभावे प्रमेयत्वं प्रमाणांतरमवश्यमाकर्षयति ।- ततोविप्रतिषिद्धमेतत् । नच स्वलक्षणमेवान्यापोहः सर्वथाविधिनियमयोरेकतानत्वाऽसंभवात् । तत्स्वभावभेदाभावे च संकेतविशेषानुपपत्तेः-अभिधानप्रत्ययविशेषोऽपि माभूत्तदन्यतरवत् । ततो यावंति पररूपाणि प्रत्येकं तावंतस्तततः परावृत्तिलक्षणाः स्वभावभेदाः प्रतिक्षणं प्रत्येतव्याः । यदि संबंध्यंतराणि भावस्वभावभेदकानि न स्युस्तदा नित्यत्वेऽपि कस्यचित्संबंध्यंतरेषु कदाचित्केषु क्रमशोऽर्थक्रिया न वै विप्रतिषिध्येत । शक्यं हि वक्तुं क्रमवर्तीनि कारणानि तत्तन्निर्वतनात्मकानि इति नित्यं स्वभावं न वै जहाति क्षणिकसामिग्रीसन्निपातैकतमवत् । तदेतत्तदा तदा तत्तत्कर्तुं समर्थमेकं स्वभावं अविचलितं बिभ्राणं सहकारिकारणानि स्वभावस्याभेदकानि नानाकार्यनिबंधनानि कादाचित्कानि प्रतीक्ष्यंत इति । तदिमेऽर्था विधिप्रतिषेधाभ्यां संप्रतिवत् हानप्रतिबंधमतिवर्तंते वस्तुत एव । ततो न संवृत्तिस्तद्व्यवहाराय भेदमावृत्य तिष्ठतीति युक्तं । तदनेकस्वभावाभावे विनिर्भासासंभवात् आत्मनि परत्र चासंभविनमाकारमादर्शयतीति मुग्धायते सर्वत्रासहायरूपानुपलब्धेः । तदियं संवृतिः सामान्यसामानाधिकरण्य-विशेषणविशेष्यभावादिव्यवहारनिर्भासान् बिभ्रती स्वयमनेकरूपतां प्रतिक्षिपंतं व्यवस्थापयति । तद्वद्भावांतराणामनेकात्मकत्वे वास्तवी साधर्म्यादिस्थितिरविशेषेण विकल्पबुद्धेर्मिथ्यात्वं प्रतिजानंतं प्रतिक्षिपत्येव । यत्पुनरेतदन्यतो व्यावृत्तिरनात्मिकैवेति तन्न चक्षुरादिज्ञानस्य निर्व्यवसायात्मकस्य स्वयमभूताविशेषात् । निर्णयस्य भावस्वभावाऽसंस्पर्शिनः सर्वथा वस्तुतत्त्वापरिच्छेदादच्छमेवेति स्वयमेकांतानुपपत्तेः । अतोऽयं स्वभावः स्वभावभेदान् विधिप्रतिषेधविषयान् बिभ्राणः प्रत्यक्षेतरप्रमाणसमाधिगतलक्षणः प्रतीयेत । तस्माद्यद्विशेषणं तत्प्रतिषेध्याविनाभावि क्वचिद्धर्मिणि यथा साधर्म्यं भेदविवक्षया, कृतकत्वादौ विशेषणं चास्तित्वं ततः प्रतिषेध्यधर्मप्रतिबंधी ॥ १७ ॥

नास्तित्वं प्रतिषेध्येनाविनाभाव्येकधर्मिणि ।
विशेषणत्वाद्वैधर्म्यं यथाऽभेदविवक्षया ॥ १८ ॥

वृत्तिः–नास्तित्वं प्रतिषेध्येनास्तित्वेनाविनाभावि विशेषणत्वात् । यथा वैधर्म्यमभेदविवक्षया ॥ यत्किंचित् विशेषणं तत्सर्वमेव प्रतिपक्षधर्माविनाभावि यथा वैधर्म्यं साधर्म्यविवक्षया । हेतोर्विशेषणं च नास्तित्वं ॥ १८ ॥

पुनरप्यविरोधं दर्शयन्नाह–

अष्टशती–भेदाभेदविवक्षयोरवस्तुनिबंधनत्वे विपर्यासोऽपि किं न स्यात् । ततः समंजसमेतत् । यत्किंचिद्विशेषणं तत् सर्वमेकत्र प्रतिपक्षधर्माविनाभावि यथा वैधर्म्यमभेदविवक्षया हेतौ । तथा च नास्तित्वं विशेषणं–अन्यथा व्यवहारसंकरप्रसंगात् । न हि स्वेच्छाप्रक्लृप्तधर्मधर्मिव्यवस्थायां परमार्थावतारः स्यात् । तदसमीक्षिततत्त्वार्थैर्लोकप्रतीतिवशाद्भेदाभेदव्यवस्थितिस्तत्त्वप्रतिपत्तये समाश्रियत इति बालाभिलापकल्पं । भावस्वभावोपरोधात् ॥ १८ ॥

विधेयप्रतिषेध्यात्मा विशेष्यः शब्दगोचरः ।
साध्यधर्मो यथा हेतुरहेतुश्चाप्यपेक्षया ॥ १९ ॥

वृत्तिः–विधेयशब्दवाच्यः साध्य इत्यर्थः । प्रतिषेध्यो निराकरणीयः । द्वन्द्वः । तावात्मा स्वरूपं यस्य स विधेयप्रतिषेध्याध्यात्मा विशेष्यो धर्मी पक्ष इत्येकार्थः । शब्दगोचरः शब्दविषयः । साध्यस्य धर्मः साध्यधर्मः । यथा दृष्टान्तप्रदर्शकः । हेतुः साधनमहेतुरसाधनम् । अपिः सम्भावनायाम् । अपेक्षया विवक्षया ॥ विशेष्यो विधेयप्रतिषेध्यात्मा शब्दगोचरत्वात् यथा साध्यधर्मो हेतुश्चाहेतुश्च भवति विवक्षया । अग्निमत्त्वे साध्ये धूमो हेतुर्भवति जलत्वे साध्येऽहेतुरेकस्मिन्धार्मिणि । एवमत्रापि–यो यः शब्दविषयः स सर्वोऽपि विधेयप्रतिषेध्यात्मा विशेष्यः । यथा साध्यधर्मो हेतुरहेतुश्चापेक्षया । शब्दविषयश्च विशेष्यः तस्माद्विधेयप्रतिषेध्यात्मा ॥ १९ ॥

शेषभंगान् समर्थयन्नाह–

अष्टशती–किंचित्केन चिद्विशिष्टं गृह्यमाणं विशेषणविशेष्यतत्संबंधलोकस्थितिसंकलनेन गृह्येत नान्यथेत्यभिनिवेशेऽपि वस्तुनो विधिप्रतिषेधस्वभावयोः प्रत्येकं दर्शनमवश्यंभावि । ततो विधिप्रतिषेधावात्मानौ विशेषस्य सविकल्पकत्वं प्रसाधयतः । ततः सामान्यविशेषात्मकत्वं वस्तुत्वलक्षणं । अस्तित्वनास्तित्वयोर्धर्मी सामान्यं तत्र तादात्म्यलक्षणः संबंधः संबंधांतरकल्पनायामनवस्थाप्रसंगात् । तन्नैतत्सारं, जात्यादिमतामेतन्न संभवत्येवेति तदभाव एवासंभवात् तथा सति नैकांतेन दर्शनविकल्पाभिधानानां विषयभेदोऽस्ति कथंचित्प्रतिभासभेदेऽपि प्रत्यासन्नेतरपुरुषदर्शनवत् । तथाहि धूमादयः कृतकत्वादयो वा क्वचिदग्निसलिलयोर्विनाशेतरयोर्वा साधनेतरस्वभावाभ्यां साक्षात्क्रियेरन् । इतरथा हि विशेष्यप्रतिपत्तेरयोगात् । अनापेक्षायां तु विरोधः । तस्मात् यदभिधेयं तद्विशेष्यं यद्वा विशेष्यं तदभिलाप्यं यद्वा वस्तु तत्सर्वं विधेयप्रतिषेध्यात्मकं यथोत्पत्त्यादिः । अपेक्षया हेतुः–अहेतुश्च साध्येतरयोः–तथा च विमत्यधिकरणं सत्त्वाभिधेयत्वादि॥१९॥

शेषभंगाश्च नेतव्या यथोक्तनययोगतः ।
न च कश्चिद्विरोधोऽस्ति मुनींद्र तव शासने ॥ २० ॥

वृत्तिः–शेषभंगाश्च अवक्तव्यादयो नेतव्या ज्ञातव्या योजनीयाः । यथोक्तश्चासौ नयश्च यथोक्तनयः तस्य योगस्तस्मात् विशेषणत्वादिति हेतोरित्यर्थः । विरोधोऽपि न कश्चित् । उपलक्षणमेतत् । विरोध इति संशयविरोधवैयधिकरण्योभयदोषप्रसंगसंकरानवस्थाऽभावानाक्षिपति एते दोषा न संति । कस्मात्? अनेकांतत्वाद्वस्तुनः । जीवादिपदार्थयाथात्म्यमननान्मुनयस्तेषामिंद्रो भगवान् केवली तस्य संबोधनं हे मुनींद्र । तव शासने युष्मन्मते । अनभिलाप्यादयोऽपि धर्माः क्वचिदेकधर्मिणि प्रत्यनीकस्वाभावाविनाभाविनो विशेषणत्वात् पूर्वोक्तमुदाहरणम् ॥

अष्टशती–स्यादस्ति स्यान्नास्तीति भंगद्वयमुपयुक्तं तदपेक्षयाशेषत्वं । भंगत्रयापेक्षं वा । यथोक्तनययोगत इति विशेषणत्वादीनाक्षिपति । तदनभिलाप्यादयोऽपि क्वचिद्धर्मिणि प्रत्यनीकस्वभावाविनाभाविनः प्रतीयंते विशेषणत्वादिभ्यः पूर्वोक्तमुदाहरणं । नचैवं सति किंचिद्विप्रतिषिद्धं–अन्यथैव विरोधात् ॥ २० ॥

अनेकांतात्मकं तत्त्वं व्यवस्थाप्यैकांतं निराकर्तुमाह—

एवं विधिनिषेधाभ्यामनवस्थितमर्थकृत् ।
नेति चेन्न यथाकार्यं बहिरंतरुपाधिभिः ॥ २१ ॥

वृत्तिः–एवमनेन प्रकारेण । विधिनिषेधाभ्यामस्तित्वनास्तित्वाभ्याम् । अनवस्थितमनवधारितं यद्वस्तु तदर्थ कृत्-कार्यकारि भवति । नेति चेत् यद्येवं न भवति । न । यथाकार्यं यथाभूतं कार्यमुपलभ्यते तस्य कारकं न स्यात् । बहिरंतरुपाधिभिः बाह्याभ्यंतरहेतुभिः सहितैरपि । अथवा अनवस्थितं शून्यं अयथाकार्यम् ॥

अथ मतं स्यादस्तीत्यनेनैव स्याच्छब्देन सर्वे भंगा गृहीताः । किमेतेषां प्रपंचोऽत आह–

अष्टशती–सप्तभंगीविधौ स्याद्वादे विधिप्रतिषेधाभ्यां समारूढं वस्तु सदसदात्मकमर्थक्रियाकारि कथंचित्सत एव सामग्रीसन्निपातिनः स्वभावातिशयोपपत्तेः सुवर्णस्य केयूरादिसंस्थानं नेति चेदित्यादिनैकांतेऽर्थक्रियां प्रतिक्षिपति । न तावत्सतः पुनरुत्पत्तिरस्ति । न चानुत्पन्नस्य स्थितिविपत्ती खपुष्पवत् । नाप्यसतः सर्वथोत्पत्त्यादयस्तद्वत् । यदि पुनः सामग्र्याः प्राग्विद्यमानस्य जन्म न स्यात् को दोषः स्यात् । तस्या निरन्वयविनाशे निष्कारणस्य तथैवोत्पत्तिर्न स्यात् । न हि निराधारोत्पत्तिर्विपत्तिर्वा क्रियारूपत्वात् । स्थितिवन्नैतन्मंतव्यं । नोत्पत्त्यादिः क्रिया क्षणिकस्य तदसंभवात् । ततोऽसिद्धो हेतुरिति प्रत्यक्षाविरोधात् । प्रादुर्भावादिमतः चक्षुरादिबुद्धौ प्रतिभासनात् । अन्यथा तद्विशिष्टविकल्पोऽपि माभूत् न हि दंडपुरुषसंबं-

धादर्शने दंडीति विकल्पः स्यात् । तस्मात्सूक्तं यदेकांतेन सदसद्वा तन्नोत्पत्तुर्महति व्योमबंध्यासुतवत् । इति । कथमिदानीमनुत्पन्नस्य गगनादेः स्थितिः[1] इति चेत् न—अनभ्युपगमात् । द्रव्यनयापेक्षया, परप्रसिद्धया वा उदाहरणं ॥ २१ ॥

धर्मे धर्मेऽन्य एवार्थो धर्मिणोऽनंतधर्मणः ।
अंगित्वेऽन्यतमांतस्य शेषांतानां तदंगता ॥ २२ ॥

वृत्तिः—धर्मे धर्मे धर्मनिर्देशे । भङ्गे भङ्गे इति वा पाठांतरं । अन्य एवार्थोऽपूर्व एवार्थः । कुतः ? धर्मिणो वस्तुनः । अनंता धर्माः स्वभावा यस्य सोऽनंतधर्मा तस्यानंतधर्मणः । अंगित्वे प्रधानत्वे । अन्यतमांतस्यास्तित्वादीनां मध्ये एकतमस्य । शेषांतानां परिशेषधर्माणां नास्तित्वादीनां । तत्तस्मात् । अंगता अप्रधानता । अथवा तदांगता इति पाठांतरम् । तदा तस्मिन्काले । शेषाणामप्रधानता । अतः पुनरुक्तता नास्ति । अथवा सुनयसप्तभंगीनिरूपणार्थमियं कारिका, संक्षेपार्था चेयं ॥ २२

सप्तभंगीं योजयन्नाह—

अष्टशती—यदि पुनः प्रत्युपाधि परमार्थतः स्वभावभेदो न स्यात् तदा दृष्टेऽभिहिते वा प्रमाणांतर मुक्तयंतरं वा निरर्थकं स्यात् । गृहीतग्रहणात्पुनरुक्तेश्च स्वभावातिशयाभावात्, सदुत्पत्तिकृतकत्वादेः प्रत्यनीकस्वभावविशेषाभावात् । यावंति पररूपाणि तावंत्यस्ततस्ततो व्यावृत्तयः प्रत्येकमित्येषापि कल्पना माभूत् । सतां हि स्वभावानां गुणप्रधानभावः स्यात् । ततः परिकल्पितव्यावृत्त्या धर्मांतरव्यवस्थानं परिफल्गुप्रायं वस्तुस्वभावाभावप्रसंगात् । तथेंद्रियबुद्धयोऽपि स्वलक्षणविषया माभूवन्, केवलं व्यावृत्तिं पश्येयुः, अदृष्टे[2] विकल्पायोगात् । अतिप्रसंगाच्च ॥ २२ ॥

एकानेकविकल्पादावुत्तरत्राऽपि योजयेत् ।
प्रक्रियां भंगिनीमेनां नयैर्नयविशारदः ॥ २३ ॥

वृत्तिः—नयविशारदो नयः प्रमाणपरिगृहीतार्थैकदेशे वस्त्वध्यवसायस्तस्मिन्कुशलः । नयैः स्वहेतुभिर्विशेषणत्वादिभिः । एनां प्रक्रियाम् । भंगिनीं भंगवतीं भंगबहुलां । उत्तरत्रापि इह ऊर्ध्वमपि । योजयेदुद्घाटयेत् ॥ क । एकश्च अनेकश्च तावेव विकल्पौ तावादिर्यस्य तस्मिन्नेकानेकविकल्पादौ । कथं ? स्यादेकः । स्यादनेकः । स्यादेकश्चानेकश्च । स्यादवक्तव्यः । स्यादेकश्चावक्तव्यः । स्यादनेकश्चावक्तव्यश्च । स्यादेकश्चानेकश्चावक्तव्यश्च । एवमनेन द्वैताद्वैतादिषु योज्यं ॥ २३ ॥

सदाद्येकांतेषु दोषमुद्भाव्यैवमद्वैतैकांतं दूषयितुमाह—

अष्टशती—स्यादेकं सद्द्रव्यनयापेक्षया । यद्यपि विशेषाः परस्परव्यावृत्तपरिणामाः कालादिभेदेऽपि सद्रूपाविशिष्टचित्रज्ञाननीलादिनिर्भासवत् स्यादनेकत्वमास्कंदंति । न हि संख्यासंख्यावतोर्भेदेनादृष्टौ विशेषेणविशेष्यविकल्पः कुंडलिवत् । क्षीरोदकवद्दतद्वेदिनि-नच भेदैकांते तद्वत्तास्ति व्यपदेशनिमित्ताभावात् । अनवस्थाप्रसंगाच्च । तस्मादयं कथंचिदेव संख्यासंख्यावतोः स्वभावभेदं पश्यति[3] तद्विशिष्टविकल्पनात् । क्वचिन्निर्णयेऽप्यन्यत्र संशयाद्, वर्णरसादिवत् ॥ २३ ॥

इत्याप्तमीमांसाभाष्ये प्रथमः परिच्छेदः ।

---

१ । अदृष्टविकल्पायोगात् पाठोयं ख. पुस्तके । २ पश्यन् पश्यतीति ख. पुस्तके पाठः ।

अद्वैतैकांतपक्षेऽपि दृष्टो भेदो विरुध्यते ।
कारकाणां क्रियायाश्च नैकं स्वस्मात्प्रजायते ॥ २४ ॥

वृत्तिः—अद्वैतमेवेत्येकांतोऽसद्ग्रहः स एव पक्षो जिज्ञासितविशेषो धर्मी तस्मिन्नपि दृष्टो भेदः प्रत्यक्षप्रमाणपरिच्छिन्नं नानात्वं लोकप्रसिद्धं वा । विरुध्यते मिथ्या भवेत् । कारकाणि कर्त्रादीनि क्रिया आकुंचनादिका पाकादिका वा एतेषां परस्परेण "इयं क्रिया इमानि कारकाणि इदं कर्तृकारकमिदं कर्मेत्यादि । इयं दहनक्रिया इयं पचनक्रियेत्यादि । चशब्दादिदं प्रमाणमिदं परिच्छेद्यं वस्तु " इति भेदो न स्यात् । कुतः ? नेति एकांतप्रतिषेधवचनम् । एकमसहायम् स्वस्मादात्मनः । प्रजायत उत्पद्यते ॥ २४ ॥

तथैवमपि—

अष्टशती—सदाद्येकांतेषु दोषोद्भावनमभिहितं । अद्वैतैकांताभ्युपगमात् न तावतानेकांतसिद्धिरिति चेत् ? न प्रत्यक्षादिविरोधात् । न हि कस्यचिदभ्युपगममात्रं प्रमाणसिद्धं क्रियाकारकभेदं प्रतिरुणद्धि क्षणिकाभ्युपगमवत् । न स्वतो जायते परतो वा अपि तु सुषुप्तायते प्रतिपत्त्युपायाभावात् । तस्मात् यद्दृष्टविरुद्धं तन्न समंजसं । यथा नैरात्म्यं । विरुद्ध्यते च तथाऽद्वैतं क्रियाकारकभेदप्रत्यक्षादिभिः ॥ २४ ॥

कर्मद्वैतं फलद्वैतं लोकद्वैतं च नो भवेत् ।
विद्याऽविद्याद्वयं न स्यात् बंधमोक्षद्वयं तथा ॥ २५ ॥

वृत्तिः—शुभकर्माशुभकर्मेति द्वयं न स्यात् । पुण्यमिदं पापमिदं इहलोकः परलोको ज्ञानमज्ञानं बंधो मोक्षश्च जीवप्रदेशकर्मप्रदेशान्योन्याश्लेषो बंधः । अष्टविधकर्ममोक्षो मोक्ष इत्येवमादि न स्यात् ॥

प्रमाणादद्वैतं निराकर्तुमाह—

अष्टशती—प्रमाणप्रत्यनीकं स्वमनीषिकाभिरद्वैतमन्यद्वा किंचित्फलमुद्दिश्य आरचयेत् । अन्यथा तत्प्रतिपत्तिप्रवर्तनायोगात्प्रेक्षावृत्तेः । तथाहि पुण्यपापसुखदुःखेहपरलोकविद्येतरबंधमोक्षविशेषरहितं प्रेक्षापूर्वकारिभिः अनादरणीयं यथा नैरात्म्यदर्शनं । तथा च प्रस्तुतं ॥ २५ ॥

हेतोरद्वैतसिद्धिश्चेद्द्वैतं स्याद्धेतुसाध्ययोः ।
हेतुना चेद्विना सिद्धिर्द्वैतं वाङ्मात्रतो न किं ॥ २६ ॥

वृत्तिः—अद्वैतस्य सिद्धिः किं हेतोराहोस्विद्वचनमात्रात् ? यदि हेतोरिदं साधनमिदं साध्यमिति द्वैतं स्यात् । साधनमंतरेणाद्वैतस्य सिद्धिश्चेदेवं वचनमात्राद्द्वैतं कस्मान्न स्यादिति समानं ॥ २६ ॥

पुनरप्यद्वैतं निराकर्तुमाह—

अष्टशती—यदसिद्धं तन्न हितेप्सुभिः-अहितं जिहासुभिर्वा प्रतिपत्तव्यं । यथा शून्यैकांतः । तथा चासिद्धमद्वैतमित्यत्र नासिद्धो हेतुः । तत्सिद्धिर्यदि साधनात् ? साध्यसाधनयोस्तर्हि द्वैतं स्यात् । अन्यथा अद्वैतसिद्धिवत् द्वैतसिद्धिः कथं न स्यात् ? स्वाभिलापमात्रादर्थसिद्धौ सर्वं सर्वस्य सिद्धयेत् ॥ २६ ॥

अद्वैतं न विना द्वैतादहेतुरिव हेतुना ।
संज्ञिनः प्रतिषेधो न प्रतिषेध्याद्ऋते क्वचित् ॥ २७ ॥

वृत्तिः—द्वैताद्विना न भवत्यद्वैतं । यथा अहेतुर्हेतुमंतरेण न भवति । संज्ञिनो नामवतः प्रतिषेध्यमंतरेण प्रतिषेधो यस्मात् । यो यः संज्ञी तस्य तस्य प्रतिषेध्यमंतरेण प्रतिषेधो न भवति । यथा कुसुममंतरेण आकाशादौ कुसुमस्य । संज्ञि चाद्वैतं तस्माद्द्वैतेन विना प्रतिषेधो न भवति ॥ २७ ॥

---

१ इत्यतोऽग्रे प्रमाणादि न स्यादित्यपि पाठः । २ । आरभयेत् पाठः ख. पुस्तके । ३ । प्रकृतमित्यर्थः ।

अधुना सर्वथा सर्वपदार्थपृथक्त्वैकांतवादिवैशेषिकादिमतकदर्थनार्थमाह—

अष्टशती–अद्वैतशब्दः स्वाभिधेयप्रत्यनीकपरमार्थापेक्षः-नञ्पूर्वाखंडपदत्वात् अहेत्वभिधानवत् । नात्र किंचिदतिप्रसज्यते तादृशो नञो वस्तुप्रतिषेधनिबंधनत्वात् । सर्वत्र प्रतिषेध्याद्दते संज्ञिनः प्रतिषेधाभावः प्रत्येतव्यः ॥ २७ ॥

इष्टमद्वैतैकांतापवारणं पृथक्त्वैकांतांगीकरणात् इति मावदीधरत् ।

पृथक्त्वैकांतपक्षेऽपि पृथक्त्वादपृथक्कृतौ ।
पृथक्त्वे न पृथक्त्वं स्यादनेकस्थो ह्यसौ गुणः ॥ २८ ॥

वृत्तिः–यद्यप्यद्वैतैकांतपक्षे दोषभयात् पृथक्त्वमित्येकांतपक्षोऽभ्युपगम्यते तथापि पृथग्गुणात्तावपृथग्भूतावभ्युपगन्तव्यौ गुणगुण्यादी । अन्यथा तस्मादपि यदि तौ पृथक् भिन्नौ स्यातां तदानीं पृथक्त्वाख्योगुणो न स्यात् ? कुतः । यतोऽनेकस्थो ह्यसौ गुणो दृष्ट इत्यर्थः न च तयोः पृथक्त्वगुणः पृथग्गतिः सर्वेषामभावः स्यात् । तस्मात् भेदपक्षोऽपि न श्रेयान् ॥

इदानीं पृथक्त्वैकांतवादिविशेषमायासु क्षणिकत्वैकांतकदर्थनार्थमाह—

अष्टशती–पृथग्भूतपदार्थेभ्यः पृथक्त्वस्य पृथग्भावे तेषामपृथक्त्वप्रसंगात् । तद्गुणगुणिनोरतादात्म्ये घटपटवद् व्यपदेशोऽपि माभूत् संबंधनिबंधांतराभावात् । पृथक्त्वमन्यद्वा पृथग्भूतमनंशं-अनेकस्थेषु निष्पर्यायं वर्तते–इति दुरवगाहं ॥ २८ ॥

संतानः समुदायश्च साधर्म्यं च निरंकुशः ।
प्रेत्यभावश्च तत्सर्वं न स्यादेकत्वनिह्नवे ॥ २९ ॥

वृत्तिः–एकत्वस्य सादृश्यस्य कथंचित्तादात्म्यस्य । निह्नवोऽपह्नुतिर्निराकरणम् । अथवा एकशब्दो द्रव्यवचनोऽयं ततः स्वार्थिकस्त्वप्रत्ययः तस्मिन्नेकत्वनिह्नवे । क्रमभाविनां कारणतद्वतामालीनकमन्दकमधुरकादीनां गोरसजातिमजहतामुत्तरोत्तरपरिणामप्रवाहः संतानो न स्यान्न भवेत् । तथा रूपरसादीनां धर्माणां सहभुवां नियमतो युगपदुत्पादव्ययभाजामेकस्मिन्नवस्थानं समुदयो न स्यात् यद्यनेकांतात्मकं द्रव्यं न स्यात् । तथा शब्दघटादीनां साधर्म्यं च न स्यात् । मृत्वाऽमुत्र प्राणिनः प्रादुर्भावः प्रेत्यभावः सोऽपि न स्यात् । निरंकुशो निर्बाधोऽस्खलितरूपः सर्वत्र सबंधनीयः । चशब्देन प्रत्यभिज्ञानादयोऽपि न स्युः । तदेतत्सर्वं न स्यादिति समुदायेन निर्देशात् यथायोग्यं सबंधो भवति । सामान्यनिर्देशान्नपुंसकलिंगता ।

पुनरपि भेदैकांते दूषणमाह–

अष्टशती–कार्यकारणयोः पृथक्त्वैकांते कार्यकालमात्मानमनयतः कारणत्वाऽसंभवात्तदनुत्पत्तेः कुतः संततिः ? पूर्वापरकालभाविनोरपि हेतुफलव्यपदेशभाजोरतिशयात्मनोरन्वयः संतानः क्वचित्क्षणांतरे नीललोहितादिनिर्भासचित्रैकसंवेदनवत् कथंचिदेकत्वमेव भवितुमर्हति । तदवयवपृथक्त्वकल्पनायां चित्रनिर्भासो मा भूत् । पृथग्व्रर्णांतरविषयानेकसंतानैकक्षणवत् तत्र प्रत्यासत्तिविशेषः कथंचिदैक्यात् कोऽपरः स्यात् ? अन्यथा वेद्यवेदकाकारयोरपि पृथक्त्वैकांतप्रसंगात् । स्वभावभेदेऽपि सहोपलंभनियमात्कथंचिदभेदाभ्युपगमे कथमेकसंतानसंविदां समनंतरोपलंभनियमात्कथंचिदैक्यं न स्यात् । तत्र यथा प्रत्यासत्या संतानः समुदायश्च तथैव कथंचिदैक्यमस्तु । न हि तादृशां साधर्म्यमन्यदन्यत्रात्मसांकार्यात् । एकज्ञाननिर्भासविशेषाणां मिथः स्वभावभेदेऽपि यथैकत्वपरिणामः स्वभावतोऽनंकुशः-तथा प्रेत्यभावादिषु संतानान्वयः परमार्थैकत्वमात्मसत्त्वजीवादिव्यपदेशभाजनं स्वभावभेदानाक्रम्य स्वामिवदनन्यत्र वर्तयति ॥ २९ ॥

---

१ अभिमतमद्वैतैकांतप्रतिषेधः इत्यर्थः । २. सर्वमित्यत्रेत्यर्थः । ३ । मा भूदिति ख. पुस्तके पाठः ।

सदात्मना च भिन्नं चेत् ज्ञानं ज्ञेयाद्द्विधाऽप्यसत् ।
ज्ञानाभावे कथं ज्ञेयं बहिरंतश्च ते द्विषां ॥ ३० ॥

वृत्तिः—तथा चैतन्यस्वरूपेण ज्ञेयात्प्रमेयात् ज्ञानमवबोधो भिन्नमन्यच्चेद्यदि सदात्मना चास्तित्वरूपेणापि पृथक् स्यात् । द्वेधाऽपि ज्ञानं ज्ञेयं चासत्स्यात् । अभावः स्यात् । कुतः ? ज्ञानाभावे बोधशून्ये कथं ज्ञेयम् । बहिर्बाह्यं । अन्तः अतरङ्गं च । ते द्विषां तुभ्यं द्विषतां मिथ्यादृशाम् । यस्माज्ज्ञाने सति [1]ज्ञेयं विषयत्वात्, ज्ञेये सति ज्ञानं च भवति तत्परिच्छेदकत्वात् । तस्मात् ज्ञानं कथंचिदभिन्नमेषितव्यं सदाद्यात्मनाऽन्यथाऽवस्तु स्यात् ।

सार्थविशेषस्य वाच्यवाचकतेष्यते तस्य पूर्वमदृष्टत्वात्सामान्यं त्वेपदिश्यते शब्दैरित्यभिप्रायवतो मतमाश्रित्य तत्कदर्थयितुमाह—

अष्टशती—विषयिणो विषयात्कथंचित्स्वभावभेदेऽपि सदाद्यात्मना तादात्म्यं बोधाकारस्येव विषयाकारात्, विशेषाभावात् । अन्यथा ज्ञानमवस्त्वेव खपुष्पवत् । तदभावे बहिरंतर्वा ज्ञेयमेव न स्यात् तदपेक्षत्वात् ॥ ३० ॥

सामान्यार्था गिरोऽन्येषां विशेषो नाभिलप्यते ।
सामान्याभावतस्तेषां मृषैव सकला गिरः ॥ ३१ ॥

वृत्तिः—अथ मतं सामान्यमस्माभिरिष्यते किंतु शब्दगोचरत्वादवस्तु, अत आह । सामान्यं विकल्पेनेष्टोऽर्थो वाच्यो यासां ताः सामान्यार्थाः । गिरो वाचः । अन्येषां मिथ्यादृशां । यतस्ताभिर्विशेषो याथात्म्यं स्वलक्षणं नाभिलप्यते । यद्येवं सामान्यं तेषामवस्तु अतस्तस्याभावात्सकलाः समस्ता गिरो वचनानि मृषैवासत्यरूपा एव अतो न वाच्यं नापि वाचकोऽनुमानाभावः[2] ॥ ३१ ॥

उभयैकांतं निराकर्तुकामः प्राह—

अष्टशती-विशेषाणामसंकीर्णसमयत्वात्–असंकीर्तितानभिधानात् विशेषदर्शनवत्तद्बुद्धावप्रतिभासनात् अर्थसंनिधानानपेक्षणाच्च, स्वलक्षणमनभिधेयं सामान्यमस्तु ? उच्यत इति वस्तु नोच्यत इति स्यात् । ततः किं शब्दोच्चारणेन संकेतेन वा ? गोशब्दोऽपि हि गां नाभिधत्त यथाश्वशब्दः । तथाच मौनं यत्किंचिद्वा वचनमाचरेत् विशेषाभावात् । अस्ति विशेषः कथं स्वार्थं नाभिदधीत न वै परमार्थैकतानत्वात् अभिधाननियमः किंतूपादानविशेषात् ? इत्यपि वार्तं अविकल्पेऽपि तथैव प्रसंगात् । तदेवमनवधारितात्मकं वस्तुस्वलक्षणमापनीपद्येत । नावश्यमिंद्रियज्ञानं–अर्थसंनिधानमपेक्षते विप्लवाभावप्रसंगात् । नापि विशादात्मकमेव दूरेऽपि तथाप्रतिभासप्रसंगात् । यथारात् । क्षणभंगादिसाधनवचनमन्यद्वा न किंचित्सत्यं वक्तुरभिप्रेतमात्र सूचितत्वात् । प्रधानेश्वरादिसाधनवाक्यवत् । सदर्थाप्रतिपादनाद्वा प्रसिद्धालीकवचनवत् । दृश्यविकल्पार्थाकारयोः कथंचिदप्यतादात्म्ये स्वलक्षणं सर्वथानवधारितलक्षणं दानादिचेतोधर्मादिक्षणवत् कथं संशीति मतिवर्तेत । विकल्पानां चावस्तुविषयत्वादविकल्पेतरराश्योरर्थेतरविषयत्वमन्यद्वा स्वांशमात्रावलंबिना विकल्पांतरेण प्रत्येतीति सुपरिबोधप्रज्ञो देवानांप्रियः । स्वत एव विकल्पसंविदां निर्णये स्वलक्षणविषयोऽपि विकल्पः स्यात् । परतश्चेत् ? अनवस्थानादप्रतिपत्तिः । अतोऽर्थविकल्पोऽपि माभूत् इत्यंधकल्पं जगत्स्यात् । नचायं परोक्षबुद्धिवादमतिशेते स्वयमनिर्णीतेन नामात्मना बुद्धिरर्थं व्यवस्थापयतीति सुव्यवस्थितं तत्त्वं । न वै स्वरूपं पररूपं वा बुद्धिरध्यवस्यति निर्विषयत्वादिभ्रांतेः । इदमतो-भ्रांततरं बहिरंतश्च सद्भावासिद्धेः । स्वपरस्वभावप्रतिपत्तिशून्येन स्वपरपक्षसाधनदूषणव्यवस्था प्रत्येतीति किमपि महाद्भुतं ॥ ३१ ॥

---

१ ज्ञेयं भवतीत्यर्थः ।　　२ तथागतमते स्वलक्षणविषयं प्रत्यक्षं सामान्यविषयं चानुमानं ततश्च सामान्याभावेऽनुमानाभावः स्यादित्येतदर्थः ।

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्य मिति युज्यते ॥ ३२ ॥

वृत्तिः—अथ मतं यद्येकैके दोष उभयैकात्म्यमेषितव्यमिति दूषणमाह । एकत्वपृथक्त्वपरप्रत्यनीकस्वभावद्वयसम्भवोऽपि न संभवति अस्तित्वनास्तित्ववत् प्रतिषेधात् । एकैनैकस्य निराकृतत्वात् । अथावाच्यमिष्यते तदपि न । अवाच्यत्वे येयमुक्तिः साऽपि न संभवति मिथ्यादृशां ।

सामान्यविशेषौ परस्परानपेक्षावन्याभ्युपगतौ निरस्य तौ सापेक्षौ संतावर्थक्रियां कुरुत इत्यस्यार्थस्य प्रतिपादनार्थमाह—

अष्टशती—अस्तित्वनास्तित्वैकत्वानेकत्ववत् पृथक्त्वेतरप्रत्यनीकस्वभावद्वयसंभवोऽपि माभूत् विप्रतिषेधात् । न खलु सर्वात्मना विरुद्धधर्माध्यासोस्ति तदन्योन्यविधिप्रतिषेधलक्षणत्वाद्, बंध्यासुतवत् । सर्वथानभिलाप्यतत्त्वाभ्युपगमेऽपि यदेतदनभिलाप्यं तत्त्वमिति तद्व्याहन्येत ॥ ३२ ॥

अनपेक्षे पृथक्त्वैक्ये ह्यवस्तु द्वयहेतुतः ।
तदैक्यं पृथक्त्वं च स्वभेदैः साधनं यथा ॥ ३३ ॥

वृत्तिः—परस्परानपेक्षे पृथक्त्वैक्ये सामान्यविशेषाववस्तु अर्थक्रियाकारि न भवति द्वयहेतोर्द्वाभ्यां । कथं ? यद्यद्विशेषशून्यं तत्तन्नास्ति यथा खरविषाणं सामान्यं च तथा परपरिकल्पितं । तस्मान्नास्ति विशेषः सामान्यशून्यत्वात् । खरविषाणविशेषवत् । इत्यनेन हेतुद्वयेन सामान्यविशेषयोरवस्तुत्वं साधनीयं । तदेव वस्तु ऐक्यं-सामान्यं-विशेषश्च पृथक्त्वं च द्वयात्मकं । कुतः ? अविरोधात् । यथा साधनं हेतुज्ञानं वाक्यं वा स्वभेदैः स्वधर्मैः पक्षधर्मान्वयव्यतिरेकादिभिर्भिन्नमेकं भवति ।

ननु तदेवैक्यं पृथक्त्वं च कथं ? यावता विरुद्धमेतत् ,—

अष्टशती—एकत्वपृथक्त्वेऽनेकांततः स्तः प्रत्यक्षादिविरोधात् इति स्पष्टयति—पृथक्त्वैकत्वे तथाभूते न स्तां—एकत्वपृथक्त्वरहितत्वाद् व्योमकुसुमादिवत् । सापेक्षत्वे हि तदेवैक्यं पृथक्त्वमित्यविरुद्धं सपक्षविपक्षयोर्भावाभाभ्यां साधनवत् । स्वभेदैर्वा संवेदनवत् । सारंभकावयवैर्वा घटादिवत् । तादृशं हि साधनं स्वार्थक्रियायास्तदंतरेणापि पाठांतरमिदं बहुसंगृहीतं भवति ॥ ३३ ॥

सत्सामान्यात्तु सर्वैक्यं पृथक् द्रव्यादिभेदतः ।
भेदाभेदविवक्षायामसाधारणहेतुवत् ॥ ३४ ॥

वृत्तिः—सतोऽस्तित्वस्य सामान्यं यत्तत्तथा तस्माच्च सर्वस्यैक्यमेव । द्रव्यादिभेदैर्द्रव्यपर्यायगुणादिभेदैरथवा द्रव्यक्षेत्रकालभावैर्भिन्नं पृथक्त्वादेव । भेदश्चाभेदश्च तयोर्विवक्षायां क्रियमाणायामसाधारणहेतुः श्रावणत्वप्राणादिमत्त्वादिस्तद्वत् । यद्यप्यत्रान्वयो नास्ति तथाप्यन्यथानुपपत्तिबलेन सिद्धमिति ॥ ३४ ॥

केषांचिद्विद्यमानस्याविवक्षाऽविद्यमानस्यैव विवक्षा अन्येषां वैयाकरणानां विद्यमानस्यैव विवक्षा नाविद्यमानस्य, अन्येषां विवक्षा नास्तीत्येतन्मतनिराकरणायाह—

अष्टशती—सर्वार्थानां समानपरिणामेऽपि कथमैक्यं भेदानां स्वभावसांकर्यानुपपत्तेः । यथैकभेदस्य स्वभावविच्छेदाभावात् । अन्यथैकं सदन्यदसत्स्यात् ? तत्समंजसं सर्वमेकं सदविशेषात् इति । तस्यैव सतो द्रव्यादिभेदात् पृथक्त्वं । उदाहरणं पूर्ववत् ॥ ३४ ॥

---

१ अभिन्नमित्यर्थः ।

विवक्षा चाविवक्षा च विशेष्येऽनंतधर्मिणि ।
सतो विशेषणस्यात्र नासतस्तैस्तदर्थिभिः ॥ ३५ ॥

वृत्तिः-सतो विद्यमानस्य विशेषणस्यास्तित्वादेर्विवक्षा चाविवक्षा च । नासतो नाविद्यमानस्य क्रियते । कैस्तदर्थिभिर्विवक्षाप्रयोजनवद्भिः । अत्रैकस्मिन् । कुतः ? लोकप्रसिद्धमेतत् ।

कस्यचिद्भेदः संवृतिकल्पितोऽन्यस्याभेदः संवृतिकल्पित इत्येतां दुरागमवासनाजनितां विप्रतिपत्तिं निराकर्तुमाह-

अष्टशती-विधिप्रतिषेधधर्माणां सतामेव विवक्षेतराभ्यां योगस्तदर्थिभिः क्रियेत अन्यथा अर्थनिष्पत्तेरभावात् उपचारमात्रं तु स्यात् । नचाऽग्निर्माणवक इत्युपचारात्पाकादावुपयुज्यते । तदेकैकशः परस्परव्यावृत्तयोऽपि परिणामविशेषाः ॥ ३५ ॥

प्रमाणगोचरौ संतौ भेदाभेदौ न संवृती ।
तावेकत्राविरुद्धौ ते गुणमुख्यविवक्षया ॥ ३६ ॥

वृत्तिः-भेदाभेदौ प्रमाणगोचरौ-प्रमाणविषयौ संतौ-भवंतौ संवृतिरूपावपरमार्थौ न प्रमाणविषयत्वात् । अतस्तवागमे तावेकत्रैकस्मिन् धर्मिणि न विरुद्धौ । गुणविवक्षया अप्रधानविवक्षया । मुख्यविवक्षया प्रधानविवक्षया । दृश्यते च लोके प्रधानाप्रधानविवक्षा यथाऽनुदरा कन्येत्यादि ॥ ३६ ॥

नित्यत्वैकांतं निराकर्तुकाम आह—

अष्टशती-प्रमाणमविसंवादिज्ञानमनधिगतार्थाधिगमलक्षणत्वात् । तदेवं सति भेदमभेदं वा नान्योऽन्यरहितं विषयीकरोति । न हि बहिरंतर्वा स्वलक्षणं सामान्यलक्षणं वा तथैवोपलभामहे यथैकांतवादिभिराम्नायते । सूक्ष्मस्थूलाकाराणां स्थूलसूक्ष्मस्वभावव्यतिरेकेण प्रत्यक्षादावप्रतिभासनात् तत्र स्वभावांतरस्य प्राधान्यविवक्षायां-आकारांतरस्य गुणभावः स्यात् । घटोऽयं परिमाणवो रूपादयो वेति ॥ ३६ ॥

इति आप्तमीमांसाभाष्ये द्वितीयः परिच्छेदः ।

नित्यत्वैकांतपक्षेऽपि विक्रिया नोपपद्यते ।
प्रागेव कारकाभावः क्व प्रमाणं क्व तत्फलम् ॥ ३७ ॥

वृत्तिः-उक्तपक्षदोषभयान्नित्यत्वैकांतपक्ष आश्रीयते तत्रापि सतो भावस्यांतरावाप्तिर्विक्रिया सा नोपपद्यते न घटत इत्यर्थः । अत एव कारणात् कारकाणि कर्त्रादीनि तेषामभावः शून्यता । प्रागेव पूर्वमेव । तस्मिन्नभावे कारकविशेषप्रमाणवस्तुयाथात्म्यप्रतिपादकं क्व तस्मिन् किंतु न क्वचिदपि । तदभावे क्व प्रमाणफलमुपक्षाहानोपादानादिकम् ? ॥ ३७ ॥

माभूद्विक्रिया व्यंग्यव्यंजकभावो भविष्यत्यत आह-

अष्टशती-सदसदैकत्वपृथक्त्वैकांतप्रतिषेधानंतरं नित्यत्वैकांतप्रतिक्षेपः । पूर्वापरस्वभावपरिहारावाप्तिलक्षणामर्थक्रियां कौटस्थ्येऽपि ब्रुवाणः कथमनुन्मत्तः ? कारकज्ञापकहेतुव्यापारासंभवात् । परिणामविवर्तधर्मावस्थाविकाराणां स्वभावपर्यायत्वात् । तदेतद्विनाशोत्पत्तिनिवारणमबुद्धिपूर्वकं प्रत्यक्षादिविरोधात् क्षणिकैकांतवत् ॥ ३७ ॥

प्रमाणकारकैर्व्यक्तं व्यक्तं चेदिंद्रियार्थवत् ।
ते च नित्ये विकार्यं किं साधोस्ते शासनाद्बहिः ॥ ३८ ॥

वृत्तिः—प्रमाणानि प्रत्यक्षादीनि । कर्तृकर्मकरणसंप्रदानापादानाधिकरणानि कारकाणि तैर्व्यक्तं प्रकाशितं व्यंजितं कृतं । व्यक्तं महदादि । यथेंद्रियैश्चक्षुरादिभिरर्थो विषयः । चेद्यद्येवं । ते च व्यंग्यव्यंजके नित्ये अविचलितैकरूपे । किं विकार्ये यावता हि न किंचिदपि । तव साधोर्मुनेः शासनात् प्रवचनात् । बहिरंतेष्वयमेव हि विकारो यो वस्तुन्यन्यथाभावो व्यक्तिरप्यन्यथाभावः अव्यक्ताद्व्यक्तमन्यत् । तव शासने पुनः सर्वं सुघटम् ।

पुनरपि कदर्थयितुमाह—

अष्टशती-अथ मतं—प्रमाणकारकाणि व्यवस्थितमेव भावं व्यंजयंति । चक्षुरादिवत्स्वार्थं ततो न किंचिद्विप्रतिषिद्धं । विषयविशेषविज्ञानादेः शाश्वतत्वान्न किंचिद् व्यक्तार्थं पश्यामः । कथंचिदपूर्वोत्पत्तौ तदेकांतविरोधात् तदभावविकार्य्यानुपपत्तेः । न वै किंचिद्विरुद्धं कार्यकारणभावाभ्युपगमात् इत्यनालोचितसिद्धांतः ॥

यदि सत्सर्वथा कार्यं पुंवन्नोत्पत्तुमर्हति ।
परिणामप्रक्लृप्तिश्च नित्यत्वैकांतबाधिनी ॥ ३९ ॥

वृत्तिः—असत्किंचिदपि नोपपद्यते सर्वं सर्वत्र सर्वस्मादत आह । यदि सर्वथा विश्वप्रकारैर्यथाशक्त्यात्मना एवं व्यक्तात्मनापि कार्यं घटादिकं सत् विद्यमानं पुमानिव पुंवत् सांख्यपरिकल्पितपुरुषवत् । नोत्पत्तुं नो प्रादुर्भवितुमर्हति योग्यं भवति । यद्यत्सर्वथा सत् न तदुत्पद्यते यथा सांख्यपुरुषः सच्च सर्वथा कार्यं तस्मान्नोत्पद्यते । अथ व्यवस्था तस्य द्रव्यस्य धर्मांतरत्यागैर्धर्मांतरोपजनितः परिणाम इष्यते ? अत आह परिणामस्य प्रक्लृप्तिः कल्पना समर्थनं च सर्वस्य नित्यत्वमिति योऽयमेकांतस्तस्य बाधिनी निराकरणशीला विरोधिनी इत्यर्थः ।

अतो बन्धमोक्षादिकमत्र न संभवति नित्यत्वात्प्रकृतिपुरुषयोस्तव मते पुनः संभवतीत्याह—

अष्टशती-न तावत्सतः कार्यत्वं चैतन्यवत् । नाप्यसतः सिद्धांतविरोधात् गगनवत्कुसुमवत् । नापरमेकांतप्रकारांतरमस्ति । विवर्तादेः पूर्वोत्तरस्वभावप्रध्वंसोत्पत्तिलक्षणत्वात् । तदेतत्त्रैलोक्यं व्यक्तेरपैति नित्यत्वप्रतिषेधात्-अपेतमप्यस्ति विनाशप्रतिषेधात् इत्यनेकांतोक्तिरंधसर्पविलप्रवेशन्यायमनुसरति ॥ ३९ ॥

पुण्यपापक्रिया न स्यात् प्रेत्यभावः फलं कुतः ।
बंधमोक्षौ च तेषां न येषां त्वं नासि नायकः ॥ ४० ॥

वृत्तिः—मैत्रीप्रमोदकरुणादिक्रियाऽभावे कुतः पुण्यहेतुत्वात् पुण्यं । हिंसादिरशुभपरिणामः पापहेतुत्वात्पापं । तयोः क्रिया क्षयोपार्जनं न स्यान्न भवेत् अत एव क्रियाऽभावे कुतः प्रेत्यभावः ? जन्मांतरफलं च सुखदुःखादिरूपं कुतः ? बंधः कर्मणाऽस्वतंत्रीकरणं मोक्षः स्वात्मोपलब्धिः एतौ च द्वौ तेषां न येषां त्वं नासि—न भवसि नायकः प्रभुः ? किमुक्तं भवति एतत्सर्वं त्वच्छासन एव नान्येषां नित्यत्ववादिनां कुतः ? विक्रियाऽभावात् ॥

न केवलं नित्यैकांत एतेषामभावः किंतु—

अष्टशती-नैतत्प्रेक्षापूर्वकारिभिराश्रयणीयं पुण्यपापप्रेत्यभावबंधमोक्षविकल्परहितत्वात् नैरात्म्यादिवत् । न चैतत्क्वचिदेकांते संभवति ॥ ४० ॥

क्षणिकैकांतपक्षेऽपि प्रेत्यभावाद्यसंभवः ।
प्रत्यभिज्ञाद्यभावान्न कार्यारंभः कुतः फलं ॥ ४१ ॥

वृत्तिः—क्षणिको निरन्वयविनाशः स एवैकांतपक्षस्तस्मिन्नपि प्रेत्यभावादीनां जन्मांतरादीनामसंभवोऽभावः । प्रत्यभिज्ञा स एवायमिति ज्ञानं सा आदिर्येषां ते प्रत्यभिज्ञादयस्तेषामभावस्तस्मान्न कार्यारंभ ओ-

दनघटादेरारंभ आदिक्रिया। अतः कुतः फलं समर्पणादिकं परिहारोऽनिष्टस्य। अस्मादेतत्कार्यं भविष्यति नान्यस्मादेतदपि न संभवत्येव। आदिशब्देन पर्यालोचनाध्यवसायादीनां ग्रहणं। यदि कश्चित् स्थिरः कर्ता स्यादुपादानादीन्यपि यदि स्थिराणि संत्यस्य कार्यस्य, एतद्योगे एव तन्निराकरणमपि। कथंचिद्यदि कार्यरूपेण परिणमति[२] तदा सर्वं सुघटं नान्यथा ॥ ४१ ॥

तत्र कारणे कार्यं मनागपि नास्तीति चेदत आह—

अष्टशती-क्षणक्षयैकांतदर्शनं-अहितं, असंभवत्प्रेत्यभावादित्वात् उच्छेदैकांतवत्। ध्रौव्यैकांताभ्युपगमवद्वा। भिन्नकालक्षणानामसंभवद्वासनत्वात् अकार्यकारणवत्। न विनष्टं कारणमसत्त्वाच्चिरतरातीतवत्। समनंतरत्वेऽप्यभावाविशेषात्। न च पूर्वस्योत्तरं कार्यं तदसत्येव हि भावात् वस्त्वंतरवत् अतिक्रांततमवद्वा नहि समर्थेऽस्मिन् सति स्वयमनुपित्सोः पश्चाद्भवतस्तत्कार्यत्वं? समनंतरत्वे वा नित्यवत्। कारणाभावाविशेषेऽपि कार्योपत्तिसमयनियमावक्लृप्तौ कस्यचित् कौटस्थ्येऽपि तत्कारणसामर्थ्यसद्भावाभेदेपि कार्यजन्मनः कालनियमः किं न स्यात्? विशेषाभावात्। तथा चाकस्मिकत्वं स्यात्। उभयत्राविशेषेण कथंचिदनुपयोगेऽपि क्वचिद् व्यपदेशकल्पनायामन्यत्रापि किं न भवेत्क्षणस्थितिः-। एकोऽपि भावोऽनेकस्वभावः चित्रकार्यत्वात् नानार्थवत्। न हि कारणशक्तिभेदमंतरेण कार्यनानात्वं युक्तं रूपादिज्ञानवत्। अन्यथा रूपादेर्नानात्वं न सिद्धयेत् चक्षुरादिसामिग्रीभेदात् तज्ज्ञाननिर्भासभेदोऽवकल्पेत। युगपदेकार्थोपनिबद्धदृष्टीनामपि भवितव्यमेव प्रतिभासभेदेन कारणसामिग्रीभेदात्। अन्यथा दर्शनभेदोऽपि माभूत्। प्रत्यासन्नेतरयोर्वैशद्येतरनिर्भासोपलब्धेः। सेयमुभयतः पाशारज्जुः। सकृत्कारणस्वभावभेदमंतरेण यदि कार्यनानात्वं क्रमशोऽपि कस्यचिदपेक्षितसहकारिणः कार्यसंततिः किं न स्यात्। सहकारिणस्तद्धेतुस्वभावमभेदयंतोऽपि कार्यभेदहेतवः स्युः क्षणक्षयवत्। न हि कादाचित्कानि तत्कर्तुं समर्थानीति स्थिरोऽर्थस्तत्करणस्वभावं जहाति तद्बुद्धिपूर्वकत्वाभावात्। क्षणिकसामिग्रीसन्निपतितैककारणांतरवत्। कल्पयित्वापि स्वहेतुप्रकृतिं भावानां स्वप्रकृतिरवश्यं-अन्वेष्याः। तत्स्वभाववशात्तत्कारणप्रकृतिव्यवस्थापनात्। तदयमकारणोऽपि स्वभावनियतोऽर्थः स्यात्। यद्यद्भावं प्रत्यनपेक्षं तत्तद्भावनियतं तथा विनाशं प्रत्यनपेक्षं विनश्वरं तथैव स्थितिं प्रत्यनपेक्षं स्थास्नु तद्धेतोरकिंचित्करत्वात् तद् व्यतिरिक्ताव्यतिरिक्ताकारणात् इत्यादि सर्वं समानं। आदौ स्थितिदर्शनात् विद्युत्प्रदीपादेरंतेऽपि स्थितेरनुमानं युक्तं। अन्यथांते क्षयदर्शनात् आदौ तत्प्रतिपत्तिरसमंजसैव तादृशः कारणादर्शनेऽपि कथंचिदुपादानानुमानवत् तत्कार्यसंतानस्थितिरदृष्टाप्यनुमीयेत। तस्मात्कथंचन स्थितिमतः प्रतिक्षणं विवर्तोऽपि नान्यथा प्रभावादेरयोगात्। कुतः प्रेत्यभावादिः? सत्यपि हेतुफलभावे कारणकार्यांतरवत् संततिर्न स्यात्। अतादात्म्याविशेषात् तत्स्वभावविशेषावक्लृप्तौ तादात्म्येऽपि कोऽपरितोषः? विरोधस्य सर्वथाप्यपरिहार्यत्वात्। तत्संतानापेक्षया प्रेत्यभावादिः मामंस्त ज्ञानज्ञेययोः प्रतिक्षणं विलक्षणत्वात्। न वै प्रत्यभिज्ञादिः पुरुषांतरवदर्थांतरवच्च। ततः कर्मफलसंबंधोऽपि नानासंतानवदनियमात् न युक्तिमवतरति। तत्सूक्तं क्षणिकपक्षो विद्वद्भिरनादरणीयः सर्वथार्थक्रियाविरोधात् नित्यत्वैकांतवत्। सत्येव कारणे यदि कार्यं त्रैलोक्यमेकक्षणवर्ति स्यात्। ततः संतानाभावात् पक्षांतरासंभवाच्चेति स्थितमेतत् ॥ ४१ ॥

यद्यसत्सर्वथा कार्यं तन्माजनि खपुष्पवत्।
मोपादाननियमोभून्माऽऽश्वासः कार्यजन्मनि ॥ ४२ ॥

वृत्तिः—सर्वथा शक्तिव्यक्तिस्वरूपेण यदसदविद्यमानं तत्कार्यं माजनि माभूत्। खपुष्पं गगनकुसुमं तदिव खपुष्पवत्। उपादानं मृत्पिंडतत्त्वादिकं तस्य नियामोऽस्मादेतत्कार्यं भवतीति निश्चयः सोऽपि माभूत्। आश्वासोऽस्मादेतद्भविष्यत्ययमपि माभूत्। कार्यजन्मनि कार्योपत्तौ ॥ ४२ ॥

पुनरपि दोषमुद्भावयितुमाह—

१। एतद्योग्यमेव पाठोऽयं लिखितपुस्तके। २ परिणमनमपि पाठोयं मुद्रितपुस्तके।

अष्टशती—कथंचित् सतः कार्यत्वं-उपादानस्योत्तरीभवनात् सकृदपि विरुद्धधर्माध्यासानिराकृतेः। तथा चान्वयव्यतिरेकप्रतीतेर्भावस्वभावनिबंधनायाः किं फलमपलापेन। तदन्यतरनिराकृताबुभयनिराकृतिः-अभेदात्। तन्नासत्कार्यं सर्वथानुत्पादप्रसंगात् खपुष्पवत्। न तादृशकारणवत् सर्वथाऽभूतत्वात् बंध्यासुतवत्। कथंचिदस्थितानुत्पन्नत्वादिति योज्यं। सत्यपि प्रभवलक्षणे पूर्वपूर्वस्योत्तरीभवनं मृत्पिंडस्थासकोशकुशूलादिषु सकललोकसाक्षिकं, स्वमनीषिकाभिः सदृशापरापरोत्पत्तिविप्रलंभानवधारणावकल्पितमारचयतां मोपादाननियामोऽभूत्कारणांतरवत् तदन्वयाभावाविशेषात् सर्वथा वैलक्षण्यात्। निरन्वयस्यापि तादृशी प्रकृतिरात्मानं कारणांतरेभ्यो यया विशेषयतीति चेत्? न अत्यंतविशेषानुपलब्धेः। तदविशेषादर्शने सर्वथा साध्यं स्यात्। तस्मात् इयमस्य प्रकृतिर्यया पूर्वोत्तरस्वभावहानोपादानाधिकरणस्थितिं प्रतिक्षणं विभर्ति यतोऽयमुपादाननियमः सिद्धः। अथापि कथंचिदुपादाननियमः कल्प्येत कार्यजन्मनि कथमाश्वासः? तदत्यंतासतः-कार्यस्योत्पत्तेः तंतुभ्यः पटादिरेव न घटादिरिति निर्हेतुको नियमः स्यात्। पूर्वपूर्वविशेषादुत्तरोत्तरनियमकल्पनायामनुपादानेऽपि स्यात्। तथादर्शनमहेतुरत्रैव विचारात् कथंचिदाहितविशेषतंतूनां पटस्वभावप्रतिलंभोपलंभात्। तदन्यतरविधिप्रतिषेधनियमनिमित्ताभ्यात् प्रतीतेरलमपलापेन। तस्मादुभयलक्षणप्राप्तानुपलब्धिरन्वयस्यैव न पुनरुभयरूपस्येत्यलं प्रसंगेन ॥ ४२ ॥

न हेतुफलभावादिरन्यभावादनन्वयात्।
संतानांतरवन्नैकः संतानस्तद्वतः पृथक् ॥ ४३ ॥

वृत्तिः—क्षणिकैकांतपक्षे हेतुः-कारणं। फलं-कार्यं तयोर्भावोऽस्तित्वं स आदिर्यस्य स हेतुफलभावादिरुपादानोपादेयस्वरूपं कार्यकारणभावो वाच्यवाचकभावश्च न स्यात्। कुतः? अन्यभावादत्यंतपृथक्त्वात्। तदपि कुतः? अनन्वयादेकस्य पूर्वापरावस्थाऽभावात्[1]। तथा संतानांतरे प्रस्तुतसंतानादन्यः संतानः संतानांतरं तस्मिन्यथा न संभवति कार्यकारणभावः मृत्पिण्डात्पटइव[2]। अभ्युपगम्यैतदुक्तं परमार्थतस्तु संतानिभ्यो भिन्नेभ्यः पृथग्भूतेषु, ततो न कश्चिदेकः संतानोऽनुगतैकाकारः। अन्यानन्यभावाभ्यां[3] निराकृतत्वात्। तस्मान्न संतानो नापि संतानिन इति ॥ ४३ ॥

पुनरपि तस्य दूषणमाह—

अष्टशती-विलक्षणानामत्यंतभेदेपि स्वभावतः किलासंकीर्णाः संततयः कर्मफलसंबंधादिनिबंधनं शशविषाणस्येव वर्तुलत्वमारचितं कश्चेतनः श्रद्दधीत? ॥ ४३ ॥

अन्येष्वनन्यशब्दोऽयं संवृतिर्न मृषा कथं।
मुख्यार्थः संवृतिर्नास्ति विना मुख्यान्न संवृतिः ॥ ४४ ॥

वृत्तिः—सत्यं संतानिभ्यो व्यतिरिक्तः संतानो नास्ति किं तु अन्येषु पृथग्भूतेषु योऽयमनन्यशब्दोऽनन्यबुद्धिश्च संतानः सा संवृतिरुपचारः। यद्येवं कथं सा न मृषा व्यलीका भवेत्?। न च मुख्यार्थः संवृतिरस्ति तस्यास्तुच्छरूपत्वात्। संवृतिस्तूपचारः। न च मुख्यार्थमंतरेण संवृतिः, सति मुख्यार्थे तस्याः संभवो यथा सिंहोऽयं माणवकः, सति मुख्यसिंहे माणवके सिंहकल्पना। न चैवं संवृतेरस्ति मुख्यार्थ इति ॥ ४४ ॥

अथैवं परिकल्प्यते—

अष्टशती-संतानिभ्योऽनन्यः संतानः अन्यथा आत्मनो नामांतरकरणात्-नित्यानित्यविकल्पानुपत्तेः।

---

१ पूर्वापरभावात् पाठोऽयं लिखितपुस्तके। २ मृत्पिंडाद्घट इव पाठो मुद्रितपुस्तके। ३ तस्याः शब्द स्त्वत्र पाठोयं लिखित पुस्तके।

अपि तु तेष्वनन्यव्यवहारादेकत्वमुपचरितमिति । व्यलीकव्यवहारेऽपि विशेषानुपपत्तेः संबधनियमाभावस्तदवस्थः । उपचारस्तु नर्ते मुख्यात् यथाग्निर्माणवक इति स्खलति हि तत्रानन्यप्रत्ययः परीक्षाऽक्षमत्वात् । अत एवामुख्यार्थः प्रस्तुतासाधनं ॥ ४४ ॥

चतुष्कोटेर्विकल्पस्य सर्वांतेषूक्तयोगतः ।
तत्त्वान्यत्वमवाच्यं च तयोः संतानतद्वतोः ॥ ४५ ॥

वृत्तिः—यथा सर्वधर्मेषु चतस्रः कोटयो सत्त्वैकत्वादिषु विभागा यस्यासौ चतुष्कोटिर्विकल्पस्तस्य सदसदुभयादिभेदभिन्नस्य विकल्पस्य । उक्तिर्वचनं तस्या अयोगोऽसंभवः ततः । तयोः संतानतद्वतोश्चतुष्कोटेर्विकल्पस्य वचनस्यायोगात्तत्त्वान्यत्वमेकत्वानेकत्वमवाच्यं ॥ ४५ ॥

चेदत आह—

अष्टशती-सत्त्वैकत्वादिषु सर्वधर्मेषु सदसदुभयानुभयचतुष्कोटेरभिधातुमश्यक्यत्वात् संतानतद्वतोरपि भेदाभेदोभयानुभयचतुष्कोटेरनभिलाप्यत्वं । सत्त्वे तदुत्पत्तिविरोधात्-असत्त्वे पुनरुच्छेदपक्षोपक्षिप्तदोषात् । उभयत्रोभयदोषप्रसंगात् । अनुभयपक्षेऽपि विकल्पानुपपत्तिरित्यादि योज्यं ॥ ४५ ॥

अवक्तव्यचतुष्कोटिविकल्पोऽपि न कथ्यतां ।
असर्वांतमवस्तु स्यादविशेष्यविशेषणं ॥ ४६ ॥

वृत्तिः—तर्ह्यवक्तव्यचतुष्कोटिविकल्पोऽपि यः सोऽपि न कथ्यतां नोच्यतां माभाणीदित्यर्थः । अन्यथा भेदाभेदोभयानुभयस्वरूपेणाभिलाप्यत्वे कथंचिदनभिलाप्यत्वं स्यात् । अन्यथैवं सति असर्वांतं सर्वविकल्पातीतमवस्तु स्यात् । अविशेष्यविशेषणं स्यात् । विशेष्यत इति विशेषः विशेष्यतेऽनेनेति विशेषेणं तयोरभावात् ॥ ४६ ॥

अन्यच्च प्रतिषेधोऽपि न घटते, तत्कथमत आह—

अष्टशती-न हि सर्वथानभिलाप्यत्वेऽनभिलाप्यचतुष्कोटेराभिधेयत्वं युक्तं कथंचिदभिलाप्यत्वप्रसंगात् । अपि चैवं सति सर्वविकल्पातीतमवस्त्वेव स्यादन्यत्र वाचोयुक्तेः ॥ ४६ ॥

द्रव्याद्यंतरभावेन निषेधः संज्ञिनः सतः ।
असद्भेदो न भावस्तु स्थानं विधिनिषेधयोः ॥ ४७ ॥

वृत्तिः—द्रव्यमादिर्येषां ते द्रव्यक्षेत्रकालभावास्तेभ्योऽन्यानि द्रव्याद्यंतराणि तेषामभावस्तेन परद्रव्यपरक्षेत्रपरकालपरभावस्वरूपेण यः प्रतिषेधः सतो विद्यमानस्य । संज्ञिनो नामवतो भवति । यः पुनरसद्भेदोऽभावविशेषः परपरिकल्पितो नासौ भावः स्वलक्षणं । विधिनिषेधयोरस्तित्वनास्तित्वयोः । स्थानमास्पदं । कुतः ? सर्वथा तस्य तुच्छत्वात् । तस्माद्भाव एव विधिनिषेधयोरवस्थानं तस्यैव स्वपररूपेणास्तित्वनास्तित्वं ॥

यतः—

अष्टशती-द्रव्यक्षेत्रकालभावांतरप्रतिषेधः संज्ञिनः सतः क्रियते न पुनरसतस्तद्विधिप्रतिषेधाविषयत्वात् । नचैतद्विरुद्धं ? स्वलक्षणमनिर्देश्यमित्यादिवत् । अभावोऽनभिलाप्य इत्यपि भावाभिधानादेकांतवृत्तावेव दोषात् । भावाभिधानैरपि कथंचिदभावाभिधानात् ॥ ४७ ॥

अवस्त्वनभिलाप्यं स्यात् सर्वांतैः परिवर्जितं ।
वस्त्वेवावस्तुतां याति प्रक्रियाया विपर्ययात् ॥ ४८ ॥

वृत्तिः—सर्वांतैः सर्वधर्मैः । परिवर्जितं विरहितं । सर्वथा यत्तदनभिलाप्यमवाच्यमवस्तु स्यात् न किंचिदपि भवेत् परपरिकल्पितं । कथं तर्ह्यवस्तुत्वमत आह-वस्त्वेवावस्तुतां याति-अर्थक्रियायाः सर्व एव

पदार्थो भवति । कुतः ? प्रक्रियायाः स्वरूपादिचतुष्टयलक्षणायाः विपर्ययात्पररूपादिचतुष्टयात् । तस्माद्यदवस्तु तदनभिलाप्यं यथा न किंचित् । यत्पुनरभिलाप्यं तद्वस्तु यथा खपुष्पं । तस्मादेतदेवैकस्योपलब्धिर्यदन्यस्यानुपलब्धिरिति ॥

पुनरप्यवक्तव्यवादिनमुपालभते—

अष्टशती-भावव्यतिरेकवाचिभिरपि वाक्यतामापन्नैर्भावाभिधानात्, नात्र किंचिद्विरुद्धं । अतः सूक्तं यदवस्तु तदनभिलाप्यं यथा न किंचित् । यत्पुनरभिलाप्यं तद्वस्त्वेव यथा खपुष्पं । अन्यस्य कैवल्यमितरस्य वैकल्यं, स्वभावपरभावाभ्यां भावाभावव्यवस्थितिर्भावस्य ॥ ४८ ॥

सर्वांताश्चेदवक्तव्यास्तेषां किं वचनं पुनः ।
संवृत्तिश्चेन्मृषैवैषा परमार्थविपर्ययात् ॥ ४९ ॥

वृत्तिः—यदि सर्वांताः सर्वधर्मा अवक्तव्या अवाच्यास्तेषां मतानां यदेतद्वचनमुक्तिः "सर्वथा प्रतिक्षणं निरन्वयविनाशिनो निरंशाः सजातीयविजातीयव्यावृत्ता इत्यादिकं" पुनः पुनरावर्तमानं किमर्थं स्यात् । अथ मतं परमार्थं न तद्भवेत्किं तु संवृतिः । यद्येवं मृषैवैषा व्यलीकैव सा । कुतः ? परमार्थस्य तत्त्वरूपस्य विपर्ययोऽभावः यतः । संवृतिर्नामोपचारः, न च सा परमार्थमंतरेण भवति ॥ ४९ ॥

अष्टशती—पुनरपि—अवक्तव्यवादिनं पर्यनुयुंज्महे—सर्वधर्मा यदि वाग्गोचरतामतीताः, कथमिमेऽभिलाप्यंते इति । संवृत्या इति चेत् ? न विकल्पानुपपत्तेः । स्वरूपेण चेत् ? कथमनभिलाप्याः ? पररूपेण चेत्तेषां स्वरूपं स्यात् केवलं वाचः स्खलनं गम्यते । उभयपक्षेऽप्युभयदोषप्रसंगः । तत्त्वेन चेत् ? कथमवाच्याः । मृषात्वेन चेत् ? कथमुक्ताः तदलमप्रतिष्ठितमिथ्याविकल्पोधैः ॥ ४९ ॥

अशक्यत्वादवाच्यं किमभावात्किमबोधतः ।
आद्यंतोक्तिद्वयं न स्यात् किं व्याजेनोच्यतां स्फुटं ॥ ५० ॥

वृत्तिः-इदं तावदवक्तव्यवादी प्रष्टव्यः । किमशक्यत्वादसामर्थ्यादवाच्यं ? आहोस्विदभावात् ? किमज्ञानात् ? विकल्पत्रयं । न तावदशक्यत्वाद्दशनागसहस्रबलवत्त्वाद् बुद्धस्य । नाप्यज्ञानात्सर्वज्ञत्वेन परिकल्पितं यतः । यस्मादायुक्तिरादिविकल्पोऽतोक्तिस्तृतीयविकल्प एतद्वयं न भवेत् । तस्मात्किं व्याजेन छद्मना ? उच्यतां भण्यतामभावादेवावाच्यं स्फुटमिति । न चैतदभावमात्रं प्रमाणसिद्धं प्रमाणस्याप्यभावात् ॥ ५० ॥

क्षणिकैकांतवादिकल्पिता हिंसा पंचभिः कारणैः प्राणप्राणिजनव्याघातचित्ततद्गतचेष्टाप्राणवियोगैर्न, बंधमोक्षादिश्च न घटत इत्याह—

अष्टशती-अर्थस्यानभिलाप्यत्वं-अभावात्, वक्तुरशक्तेः ?—अनवबोधाद्वा प्रकारांतराभावाद्वा ? बुद्धिकरणपाटवापेक्षत्वात् ? न च सर्वत्र तदभावो युक्तः ततो नैरात्म्यान्न विशिष्यते मध्यमपक्षावलंबनात् । अशक्यसमयत्वात् अनभिलाप्यमर्थरूपमिति चेन्न कथंचिच्छक्यसंकेतत्वात्, दृश्यविकल्पस्वभावत्वात् परमार्थस्य प्रतिभासभेदेऽपि इत्युक्तं । विषयविषयिणोर्भिन्नकालत्वं प्रत्यक्षेऽपि समानं । अविपरीतविप्रतिपत्तिरन्यत्रापि । दर्शनविकल्पयोः परमार्थैकतानत्वाभावे न किंचित्सिद्धं दृष्टस्यानिर्णयात् अदृष्टकल्पत्वात् । अदृष्टनिर्णयस्य प्रधानादिविकल्पाविशेषात् ॥ ५० ॥

हिनस्त्यनभिसंधातृ न हिनस्त्यभिसंधिमत् ।
बद्ध्यते तद्वयापेतं चित्तं बद्धं न मुच्यते ॥ ५१ ॥

वृत्तिः—क्षणिकैकांतवादेऽभिसंधिमत्-मारणाभिप्रायवत् । चित्तं तत्परिकल्पितरूपज्ञानं जीवसदृशं तत्प्राणिनं न हिनस्ति न मारयति । यच्च हिनस्ति तदनभिसंधातृ अनभिप्रायवत् । बध्यते च कर्मणा तद्द्वयापेतं ॥५१॥

तद्वचनविरोधं दर्शयति--

अष्टशती-संतानादेरयोगात्, इति कर्तव्यतासु चिकीर्षोर्विनाशात् कर्तुरचिकीर्षत्वात् तदुभयविनिर्मुक्तस्य बंधात् तदविनिर्मुक्तेश्च, यमनियमादेरभिधेयत्वं कुर्वतो वा यत्किंचनकारित्वं ॥ ५१ ॥

अहेतुकत्वान्नाशस्य हिंसाहेतुर्न हिंसकः ।
चित्तसंततिनाशश्च मोक्षो नाष्टांगहेतुकः ॥ ५२ ॥

वृत्तिः--यो हिंसाया हेतुर्निमित्तं नासौ हिंसकः प्राणवियोजकः कुतोऽहेतुकत्वान्नाशस्य । यदेतत्प्राणिनो मरणनिमित्तं यच्च मोक्षस्तैरभ्युपगतः चित्तानां रूपविज्ञानक्षणानां संततिर्नैरंतर्यं तस्य नाशः क्षयः प्रदीपनिर्वाणरूपो वा । अष्ट अंगान्यवयवा यस्य स हेतुर्यस्यासौ अष्टांगहेतुकः । कानि तान्यष्टांगानि सम्यक्त्वसंज्ञा-संज्ञि-वाक्कायकर्म-अंतर्व्यायाम-स्मृति-समाधिलक्षणानि । सोऽपि न स्यात् । कुतः स्वत एव-हेतुमंतरेणाभ्युपगतत्वात् ॥ ५२ ॥

अथ मतं स्वभावविनाशार्थं न निमित्तमस्माभिरिष्यते, किं तु विभागार्थमित्यत आह—

अष्टशती-अहेतुं विनाशमभ्युपगम्य कस्य चिद् यदि हिंसकत्वं ब्रूयात् कथमविक्लवः ? तथा निर्वाणं संतानसमूलप्रहरणलक्षणं सम्यक्त्वसंज्ञासंज्ञिवाक्कायकर्मांतर्व्यायामजीवस्मृतिसमाधिलक्षणाष्टांगहेतुकं ? तदन्योऽन्यं विप्रतिषेधात् ॥ ५२ ॥

विरूपकार्यारम्भाय यदि हेतुसमागमः ।
आश्रयिभ्यामनन्योऽसावविशेषादयुक्तवत् ॥ ५३ ॥

वृत्ति—विरूपकार्यं विभागसन्तानः कपालादिस्तस्यारम्भस्तस्मै विरूपकार्यारंभाय । यदि हेतोः समागमः कारणापेक्षणं । तर्ह्यसौ विरूपकार्यारम्भ आश्रयिभ्यामुत्पादविनाशाभ्यामनन्योऽभिन्नः । कुतः ? अविशेषादभेदात् । अविशेषेणाभेदोनोपलब्धिराश्रयिभ्यो यतः । अयुक्तवत् यथा ग्राह्यग्राहकाकारा सहायुतसिद्धिः ॥

चित्तविशेषरूपरसादिबद्धान् प्रागुत्पादादीनभ्युपगम्य क्षणिकवादे दूषणमभाणि । साम्प्रतं तु तेषामुत्पादादीनामसभवमेव दर्शयन्नाह—

अष्टसती-विसभागसंतानोत्पादनाय हेतुसन्निधिर्न प्रध्वंसाय पूर्वस्य स्वरसनिवृत्तेः इति चेत् ? स पुनरुत्तरोत्पादः स्वरसतः किं न स्यात् विनाशहेतुवत् । स्वरसोत्पन्नमपि तदनंतरभावित्वात् तेन व्यपदिश्यते ? इति चेत् इतरत्र समानं । परमार्थस्तदहेतुकत्वं, प्रतिपत्रभिप्रायाविशेषेऽपि स्वतः प्रहाणवादी न शक्नोत्यात्मानं न्यायमार्गमनुकारयितुं सर्वदा विरूपकार्यत्वात् । सभागविसभागावक्लृप्तिं प्रतिपत्रभिप्रायवशात् समनुगच्छन् सहेतुकं विनाशं ततः किं नानुजानीयात् । नच समनंतरक्षणयोर्नाशोत्पादौ पृथग्भूतौ मिथः स्वाश्रयतो वा यौ समं सहेतुकेतरौ स्तां । प्रत्यभिधानभेदेऽपि ग्राह्यग्राहकाकारवत् स्वभावप्रतिबंधात् संज्ञाछंदमतिस्मृत्यादिवत् सत्यपि भेदे समकालभाविनोः कथं सहकारी पुनरन्यतरस्यैव हेतुरहेतुर्वा कार्यरूपादेरिव कारणं । तस्मात्कार्यकारणयोरुत्पादविनाशौ न सहेतुकाहेतुकौ सहभावाद्रसादिवत् । न तस्य किंचिद्भवति । न भवत्येव केवलमिति चेत् भवत्येव केवलमिति समानं । तस्मादयं विनाशहेतुर्भावमभावीकरोति न पुनरकिंचित्करः, कार्योत्पत्तिहेतुर्वा, यद्यभावं न भावी कुर्यात् भावं करोतीति कृतस्य करणायोगात्-अकिंचित्करः । तदतत्करणादिविकल्पसंहतिरुभयत्र सदृशी ॥ ५३ ॥

स्कंधाः संततयश्चैव सवृतित्वादसंस्कृताः ।
स्थित्युत्पत्तिव्ययास्तेषां न स्युः खरविषाणवत् ॥ ५४ ॥

---

१ तस्य बद्धस्य अविनिर्मुक्तेरित्यर्थः ।

वृत्तिः—स्कंधा रूपवेदनाविज्ञानसंज्ञासंस्कारास्तेषां संततयश्च कार्यकारणयोराविच्छेदाः । एवकारोऽवधारणार्थः । असंस्कृता एवापरमार्था एव । कुतः ? संवृतित्वान्मिथ्यारूपत्वात् । अतस्तेषां स्थितिः । सदवस्थानमुत्पत्तिर्घटावस्था, विनाशः कपालादिरूपस्ते न स्युर्न भवेयुः खरविषाणवत् । यथा खरविषाणस्य स्थित्युत्पत्तिव्यया न सन्त्येवमेतेषां, अभावं प्रत्यविशेषात् । यत्पुनः संस्कृतं तत्परमार्थसत् यथा स्वलक्षणम् । न तथा स्कंधाः संततयश्च । ततः स्थित्युत्पत्तिविपत्तिविरहस्ततोऽपि विभागसंतानोत्पत्तये विनाशहेतुरिति पोष्ट्रयते ॥

यस्य मिथ्यादृश उभयैकांतपक्षस्तन्निरासार्थमाह——

अष्टशती-रूप-वेदना-विज्ञान-संज्ञा-संस्कारस्कंधसंततयोऽसंस्कृताः संवृत्तित्वात् । यत्पुनः संस्कृतं तत्परमार्थसत् । यथा स्वलक्षणं । न तथा स्कंधसंततयः । ततः स्थित्युत्पत्तिविपत्तिरहिताः । ततो विसभागसंतानोत्पत्तये विनाशहेतुरिति पोष्ट्रयते ॥ ५४ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ५५ ॥

वृत्तिः—उभयैकात्म्यं नित्यानित्यैकांतद्वयमयुक्तमंगीकर्तुं, कुतः? मिथ्यादृशां तद्विरोधात् । अनाभिलाप्यमपि न युक्तमनेकांतवैरिणां ॥ ५५ ॥

एकांतवादिपक्षं निरस्यानेकांतं समर्थयन्नाह—

अष्टशती-नित्यत्वेतरैकांतद्वयमप्ययुक्तमंगीकर्तुं विरोधात् युगपज्जीवितमरणवत् नित्यत्वानित्यत्वाभ्यां । अत एवानभिलाप्यमित्ययुक्तं ? तदेकांतेऽनभिलाप्योक्तेरनुपपत्तेः ॥ ५५ ॥

नित्यं तत् प्रत्यभिज्ञानान्नाकस्मात्तदविच्छिदा ।
क्षणिकं कालभेदात्ते बुद्ध्यसंचरदोषतः ॥ ५६ ॥

वृत्तिः—तच्छब्देन तत्त्वमुच्यते प्रस्तुतत्वात् तत्त्वं कथंचिन्नित्यं प्रत्यभिज्ञानात् । वस्तुनः पूर्वापरकालव्याप्तिज्ञानं प्रत्याभिज्ञानं । यथा स एवायं देवदत्त इत्यादि । तस्मात्प्रत्यभिज्ञानात् । तस्य प्रत्यभिज्ञानस्य अविच्छिदा अविच्छेदोऽन्वयः । सोऽकस्मात् । अहेतोर्न भवति यस्मात् । न च नित्यत्वमेव । कालभेदात्परिणामवशात् क्षणिकं नश्वरं । तवार्हद्भट्टारकस्य नान्यस्य क्षणिकाणिकवादिनः । बुद्धेरसंचारोऽसंचरणमन्यत्रागमनं स एव दोषस्तस्मात् । न हि एकं पदार्थं विज्ञायान्यस्य पदार्थस्य परिच्छित्तिः संभवति । उभयैकांते पुनः सुघटा ॥ ५६ ॥

तदेव दर्शयति—

अष्टशती-तदेकांतद्वयेऽपि परामर्शप्रत्ययानुपपत्तेरनेकांतः । स्थित्यभावे हि प्रमातुरन्येन दृष्टं नापरः प्रत्यभिज्ञातुमर्हति । संबंधविशेषेऽपि पित्रेव पुत्रः सन्नप्यतिशयः पृथक्त्वं न निराकरोति । तदेवान्यत्रापि प्रत्यवमर्शाभावनिबंधनमेकसंतत्या प्रत्यभिज्ञानं प्रत्यभिज्ञानबलाच्चैकसंततिरिति व्यक्तमितरेतराश्रयणमेतत् । नच पक्षांतरे समानं स्थितेरनुभवात् । तद्विभ्रमकल्पनायामुत्पादविनाशयोरनाश्वासः । तथानुभवनिर्णयानुपलब्धेर्यथा स्वलक्षणं परिगीयते तत्रैतत्स्यात् । स्वभावाविनिर्भागेऽपि न संकलनं दर्शनक्षणांतरवत् । सत्यमेकांत एवायं दोषः । ततःक्षणिकं कालभेदात्,दर्शनप्रत्यभिज्ञानसमयोरभेदे तदुभयाभावप्रसंगात् । किंच पक्षद्वयेऽपि ज्ञानासंचारानुषंगात् अनेकांतसिद्धिः । अपोद्धारकल्पनया कथंचिज्जात्यंतरेऽपि वस्तुनि प्रत्यभिज्ञानादिनिबंधने स्थित्यादयो व्यवस्थाप्येरन् । न च स्वभावभेदोपलंभेऽपि नानात्वविरोधः संकरानवस्थानुषंगः, चेतसि ग्राह्यग्राहकाकारवत् ॥ ५६ ॥

न सामान्यात्मनोदेति न व्येति व्यक्तमन्वयात् ।
व्येत्युदेति विशेषात्ते सहैकत्रोदयादि सत् ॥ ५७ ॥

वृत्तिः—कथमनेकांते त्रयमेकस्मिन् संभवति? इति चेदत आह । सामान्यात्मना द्रव्यरूपेण नोदेति नोत्पद्यते न व्येति न विनश्यति कुतोऽन्वयात् सर्वपर्यायेष्वनुगतैकाकारेण वर्तनात् । व्यक्तं स्फुटमेतत् । विशेषात्पर्यायरूपेणोत्पद्यते विनश्यति च । तवार्हतः । सह युगपदेकत्रैकस्मिन् वस्तुनि । उदयादि सत्-उत्पादविनाशस्थितयः सत्यो विरोधाभावात् ॥ ५७ ॥

कथं य एवोत्पादः स एव विनाशो यावेव विनाशोत्पादौ तावेव स्थितिः ? इत्यत आह—

अष्टशती-चलाचलात्मकं वस्तु कृतकाकृतकात्मकत्वात् । न हि चेतनस्य अन्यस्य वा सर्वथोत्पत्तिः सदादिसामान्यस्वभावेन सत एवातिशयांतरोपलंभात् घटवत् । कथंचिदुत्पादविगमात्मकत्वादिति योज्यं ॥५७॥

कार्योत्पादः क्षयो हेतोर्नियमाल्लक्षणात्पृथक् ।
न तौ जात्याद्यवस्थानादनपेक्षाः खपुष्पवत् ॥ ५८ ॥

वृत्तिः—योऽयं कार्यस्योत्पादः स एव हेतोरुपादानकारणस्य क्षयो विनाशो नियमान्निश्चयात् । लक्षणात्पुनः पृथग्-भिन्नौ स्वरूपभेदात् । जात्यादेरवस्थानात् सत्त्वप्रमेयत्वादिना न तौ भिन्नौ । कुतः ? तेन रूपेणैकत्वात् । अनपेक्षाः परस्परापेक्षामंतरेण ते स्थित्युत्पत्तिविनाशाः खपुष्पसमानाः । तस्मादेते कथंचित् परस्परमभिन्नाः कथंचिद्भिन्नाश्च भवंति ॥ ५८ ॥

लौकिकदृष्टांतेन स्पष्टयन्नाह--

अष्टशती-कार्यकारणयोरुत्पादविनाशौ कथंचिद्भिन्नौ भिन्नलक्षणसंबंधित्वात् सुखदुःखवत् । स्याद्भिन्नौ तदभेदस्थितजातिसंख्याद्यात्मकत्वात् पुरुषवत् । उत्पादविगमध्रौव्यलक्षणं स्याद्भिन्नं-अस्खलन्नानाप्रतीतिरूपादिवत् । उत्पादः केवलो नास्ति स्थितिविगमरहितत्वात् वियत्कुसुमवत् । तथा स्थितिविनाशौ प्रतिपत्तव्यौ ॥ ५८ ॥

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयं ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥ ५९ ॥

वृत्तिः—अयं जनस्त्रितयार्थी यो घटार्थी स तस्मिन् भग्ने शोकं याति । यश्च मौल्यर्थी स तस्मिन्नुत्पन्ने हर्षं याति । यश्च सुवर्णार्थी स माध्यस्थ्यं याति सुवर्णसद्भावात् । नचैतदहेतुकं किंतु सहेतुकमेव । तदेव सुवर्णद्रव्यं घटस्वरूपेण विनश्यति, तदेव मौलिस्वरूपेणोत्पद्यते, सुवर्णस्वरूपेणानुगतैकाकारस्वरूपेण तिष्ठति । एवं सर्वं वस्तु ॥ ५९ ॥

अष्टशती-प्रतीतिभेदमित्थं समर्थयते-घटं भंक्त्वा मौलिनिर्वर्तने घटमौलिसुवर्णार्थी तन्नाशोत्पादस्थितिषु विषादहर्षौदासीन्यस्थितिमयं जनः प्रतिपद्यत इति । निर्हेतुकत्वे तदनुपपत्तेः ॥ ५९ ॥

पुनरपि लोकोत्तरदृष्टांतेन पोषयति--

पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः ।
अगोरसव्रतो नोभे तस्मात्तत्त्वं त्रयात्मकं ॥ ६० ॥

वृत्तिः—यस्य पयो-दुग्धमेवाहं भुञ्ज इति व्रतं नियमः, नासौ दध्यत्ति-दधि भुंक्ते । यस्य च दध्यहं भुञ्ज इति व्रतं नासौ पयोऽत्ति-दुग्धं भुक्ते । यस्य चागोरसमहं भुंज इति व्रतं नासावुभयमत्ति । कुतः गोरसरूपेण तयोरेकत्वात् । दुग्धव्रतस्य दधिरूपेणाभावात् । दधिव्रतस्य पयोरूपेणाभावात् । अगोरसव्रतस्य

दधिदुग्धरूपेणाभावात् । तस्मात्तत्त्वं वस्तु त्रयात्मकं स्थित्युत्पत्तिव्ययात्मकं सुघटमेतदनेकांते जैनमते इति स्थितम् ॥ ६० ॥

अष्टसती—लोकोत्तरदृष्टांतेनापि तत्र प्रतीतिनानात्वं विनाशोत्पादस्थितिसाधनं प्रत्याययति । दधिपयोगोरसव्रतानां क्षीरदध्युभयवर्जनात् क्षीरात्मना नश्यद्ध्यात्मनोत्पद्यमानं गोरसस्वभावेन तिष्ठतीति । तस्मात्तत्त्वं त्रयात्मकं ॥ ६० ॥

इति आप्तमीमांसाभाष्ये तृतीयः परिच्छेदः ।

वृत्ति—द्रव्यपर्यायरूपं तत्त्वं व्यवस्थाप्य नैयायिकवैशेषिकमतमाशङ्क्य दूषयितुकामः प्राह—

कार्यकारणनानात्वं गुणगुण्यन्यताऽपि च ।
सामान्यतद्वदन्यत्वं चैकांतेन यदीष्यते ॥ ६१ ॥

वृत्तिः—कार्यं घटादिरूपं कारणं मृत्पिण्डादिकं तयोर्नानात्वं भेद इष्यते चेत्? गुणो रूपादिर्गुणी द्रव्यं तयोरपि यद्यन्यतेष्यते सर्वथा भेद इष्यते? सामान्यं बुद्ध्यभिधानप्रवृत्तिलक्षणं तद्वत्सामान्यवत्-व्यक्तयः, तयोश्च यद्यन्यतेष्यते सर्वथैकांतेन? ॥ ६१ ॥

तदानीं किं स्यादत आह—

अष्टशती—अवयवगुणसामान्यतद्वतो व्यतिरेकैकांतमाशंक्य प्रतिविधत्ते ॥ ६१ ॥

एकस्यानेकवृत्तिर्न भागाभावाद्बहूनि वा ।
भागित्वाद्वाऽस्य नैकत्वं दोषो वृत्तेरनार्हते ॥ ६२ ॥

वृत्तिः—एकस्यावयव्यादेः कार्यस्य घटादेरनेकेषु स्वारंभकावयवेषु वृत्तिर्वर्तनं सा न स्यात्। कुतः? भागाभावात् निरवयवत्वात् । अवयविनो अर्थे वर्तन्ते अवयवबहुत्वं स्यादनिष्टं चैतत् । यथास्य भागाः परिकल्प्यंते, एवं सति नैकत्वमस्य भागित्वात् । तस्मादनार्हते मते वृत्तिविकल्पस्य सर्वात्मनैकदेशेन दोष एव । आर्हते पुनर्मते सर्वं युक्तमनेकांतात् ॥ ६२ ॥

पुनरपि भेदपक्षे दूषणमाह—

अष्टशती—एकमनेकत्र वर्तमानं प्रत्यधिकरणं । न तावदेकदेशेन निष्प्रदेशत्वात् । नापि सर्वात्मना अवयव्यादिबहुत्वप्रसंगात् । अथापि कथंचित्प्रदेशवत्त्वं तत्रापि वृत्तिविकल्पोऽनवस्था च । तदेकत्वमेव न स्यात् । नायं प्रसंगोऽनेकांते कथंचित्तादात्म्यात् वेद्यवेदकाकारज्ञानवत् ॥ ६२ ॥

देशकालविशेषेऽपि स्याद्वृत्तिर्युतसिद्धवत् ।
समानदेशता न स्यात् मूर्तकारणकार्ययोः ॥ ६३ ॥

वृत्तिः—देशः क्षेत्रं कालः समयादिकः तयोर्विशेषो भेदस्तस्मिन्नपि तयोरवयवावयविनोर्या वृत्तिर्वर्तनं स्यात् युतसिद्धानामिव पृथग्भिन्नानामिव युतसिद्धवत् घटपटादिवत् इत्यर्थः । अन्यच्च समानदेशता न स्यात् तयोरवयवावयविनोरेकस्मिन्नवस्थानं न स्यात् मूर्तिमत्त्वात् यथा खरकरभयोः ॥ ६३ ॥

पुनरपि भेदवादिनं प्रति दूषणमाह—

अष्टशती—तस्मादंगांग्यादेरत्यंतभेदादेशकालविशेषेणापि वृत्तिः प्रसज्येत । घटवृक्षवद्वर्णादिभिरनैकांतिकत्वमित्ययुक्तं तद् व्यतिरेकैकांतानभ्युपगमात् । अवयवावयविनोः समानदेशवृत्तिर्न भवेत् मूर्तिमत्त्वात् खरकरभवत् ॥ ६३ ॥

आश्रयाश्रयिभावान्न स्वातंत्र्यं समवायिनां ।
इत्ययुक्तः स संबंधो न युक्तः समवायिभिः ॥ ६४ ॥

वृत्तिः-स्वातंत्र्यं स्वप्रधानता तेषां नास्ति। कुतः ? आश्रयाः स्वारंभकावयवा आश्रयी अवयवी कार्यादिस्तयोर्भावस्तस्मात् । यस्मात् आश्रयमंतरेण नाश्रयी वर्तते नाश्रयिणमंतरेणाश्रयः परस्परप्रतिबंधात्। तस्मान्न कालादिभेदेन वृत्तिस्तेषां समवायिनां कार्यकारणानामिति चेदत्रोत्तरमाह । सोऽयुक्तः संबंधः समवायिभिः सह न युक्तः, समवायसंबंधः परैरिष्टः कार्यकारणादिभिः सह स न घटते विचार्यमाणायोगात् । अनवस्थादिदोषादिति ॥ ६४ ॥

तदेव विघटयन्नाह—

अष्टशती—कार्यकारणादीनां परस्परं प्रतिबंधात् कुतः स्वातंत्र्यं यतो देशकालादिभेदेन वृत्तिः ? इति चेत् समवायस्य समवायांतरेण वृत्तौ अनवस्थाप्रसंगात्। स्वत एव वृत्तौ द्रव्यादेस्तथापत्तेरसंबद्धः समवायः कथं द्रव्यादिभिः सह वर्तेत यतः पृथक् सिद्धिर्न स्यात् ॥ ६४ ॥

सामान्यं समवायश्चाप्येकैकत्र समाप्तितः ।
अंतरेणाश्रयं न स्यान्नाशोत्पादेषु को विधिः ॥ ६५ ॥

वृत्तिः—सामान्यं भिन्नेष्वभिन्नकारणं । समवाय इहेदं प्रत्ययलक्षणं । एकैकत्र एकस्मिन्नवयवे व्यक्तौ वा । समाप्तितः समाप्तेर्व्यवस्थितत्वादित्यर्थः । आश्रयमंतरेण यस्मात्तयोरवस्थानं नास्ति । एवं सति नाशोत्पादा विद्यंते येषां तेषु नाशोत्पादिषु खण्डमुण्डघटपटादिषु को विधिः कः क्रमः ? किं तु न कश्चिदपि स्यात् ॥

पुनरपि संबंधस्य दूषणमाह—

अष्टशती—प्रत्येकं परिसमाप्तेराश्रयाभावे सामान्यसमवाययोरसंभवादुत्पत्तिविपत्तिमत्सु कथं वृत्तिः—उत्पित्सुप्रदेशे प्राङ् नासीत् नान्यतो याति, स्वयमेव पश्चाद्भवति स्वाश्रयविनाशे च नश्यति प्रत्येकं परिसमाप्तं चेति व्याहतमेतत् ॥ ६५ ॥

सर्वथाऽनभिसंबंधः सामान्यसमवाययोः ।
ताभ्यामर्थो न संबद्धस्तानि त्रीणि खपुष्पवत् ॥ ६६ ॥

वृत्तिः—सामान्यसमवाययोः परस्परेण सर्वथा सर्वप्रकारेणानभिसंबंधोऽसंयोगोऽतस्ताभ्यां सामान्यसमवायाभ्यां अर्थो गुणगुण्यादिर्न संबद्धो न लग्नाऽतस्तानि त्रीण्यपि सामान्यसमवायार्थरूपाणि खपुष्पसमानानि॥

सत्यमेवैतत् समवायादीनां दोषः । अस्माकं पुनः परमाणूनामेकांतेनानन्यत्वमिच्छतां न दोष इत्यत्र दूषणमाह—

अष्टशती—सामान्यसमवाययोः परस्परतः स्वसंबंधासंभवात् ताभ्यामर्थो न बद्धः, ततस्त्रीण्यपि नात्मानं विभृयुः कूर्मरोमादिवत् ॥ ६६ ॥

अनन्यतैकांतेऽणूनां संघातेऽपि विभागवत् ।
असंहतत्वं स्याद्भूतचतुष्कं भ्रांतिरेव सा ॥ ६७ ॥

वृत्तिः—परमाणूनां द्वितीयविभागरहितानां संघातेऽपि प्रचयेऽपि असंहतत्वं पृथक्त्वं स्यात् विभागवत्, यथा घटपटयोः। नान्यताऽनन्यता सैवैकांतस्तस्मिन् परमाणूनां। अन्यथा स्वरूपेण परिणामायोगात्, एकदेशेन सर्वात्मना वा तथा वृत्तिविरोधात् । सहस्राणुमात्रपिंडप्रसंगादणोः । तस्मात्प्रविरलत्वं प्रविकलत्वं, अणूनां ततो धारणाकर्षणादयो न स्युः । भूतानां पृथिव्यादीनां चतुर्णां भावश्चतुष्कं सा भ्रांतिः स्यात्-भूतचतुष्टयं भ्रांतं स्यादित्यर्थः ॥

१। नानुलभ्यते पाठोयं लिखितपुस्तके प्रविकलत्वस्थानपर्यंतरत्वेत्वनियोज्यः प्रविलरत्वप्राविकलत्वयोः समानार्थकत्वाद्विति ।

सत्येमव नैतत्प्रामणं भावात् [?] पुनरपि दूषणमाह—

अष्टशती—कार्यकारणादेरभेदैकांते धारणाकर्षणादयः परमाणूनां संघातेऽपि माभूवन् विभागवत् । नाहितोऽपि विशेषः तेषां विभागैकांतं निराकरोति । तत एवान्यत्रापि नेष्यते पृथिव्यादि भूतचतुष्टयस्थितिरेवं विभ्रममात्रं प्राप्नोति । इष्टत्वाददोष इति चेत् न प्रत्यक्षादिविरोधात् ॥ ६४ ॥

कार्यभ्रांतेरणुभ्रांतिः कार्यलिंगं हि कारणं ।
उभयाभावतस्तत्स्थं गुणजातीतरच्च न ॥ ६८ ॥

वृत्तिः—अणूनां यदेतत्कार्यं स्थूलघटपटादिकं तस्य यदि भ्रांतिर्विभ्रमस्तदानीं कार्यभ्रांतेरणूनामपि भ्रांतिः । यतः कार्यलिंगं कारणं कार्यद्वारेण कारणस्यावगमो नान्यथा, अतोऽन्यतराभावे उभयोरप्यभावोऽविनाभावनियमात् । उभयाभावाच्च तयोः स्थितं गुणो रूपादिः, जातिः सामान्यं इतरच्च क्रिया एतत्समुदितं न स्यात् । न चैतदिष्टं सर्वप्रमाणप्रसिद्धत्वात् ॥ ६६ ॥

अष्टशती—चक्षुरादिबुद्धौ स्थूलैकाकारः प्रतिभासमानः परमाणुभेदैकांतवादं प्रतिहंति तद्विपरीतानुपलब्धिर्वा तत्रैतत्स्यात् । भ्रांतैकत्वादिप्रतिपत्तिरिति तन्न परमाणूनां चक्षुरादिबुद्धौ स्वरूपमनर्पयतां कार्यलिंगाभावात् । तत्त्वभावाभ्युपगमानुपपत्तेस्तद्द्वयाभावात् वृत्तयो जातिगुणक्रिया न स्युः, व्योमकुसुमसौरभवत् ॥ ६८ ॥

एकत्वेऽन्यतराभावः शेषाभावोऽविनाभुवः ।
द्वित्वसंख्याविरोधश्च संवृतिश्चेन्मृषैव सा ॥ ६९ ॥

वृत्तिः—कार्यकारणयोरेकत्वे द्वयोर्मध्येऽन्यतराभावस्तस्य चाभावे द्वितीयस्य चाभावः । कुतः ? अविनाभावनियमात् । न ह्येकमंतरेणापरं भवति । द्वित्वमिति च या संख्या तस्याश्च विरोधोऽघटना । अथ मतं संवृत्या सर्वं युक्तं ? सा संवृतिर्मृषैव । व्यलीकैव ततो न किंचित् स्यात् बंध्यासुतपरिकल्पितरूपव्यावर्णनवत् ॥ ६९ ॥

उभयैकांतवादिनं प्रत्याह—

अष्टशती—आश्रयाश्रयिणोरेकत्वे तदन्यतराभावस्ततः शेषाभावस्तत्स्वभावाविनाभावित्वात् बंध्यासुत रूपसंस्थानवत् । तथा च सति द्वित्वसंख्यापि न स्यात् । तत्र संवृतिकल्पना शून्यतां नातिवर्तते परमार्थविपर्ययाद् व्यलीकवचनार्थवत् ॥ ६९ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ७० ॥

वृत्तिः—अवयवावयविव्यतिरेकाव्यतिरेकैकांतौ न यौगपद्येन संभविनौ विरोधात्-स्ववचनाविरोधात् । अनभिलाप्यैकांतोऽपि न संभवति । स्याद्वादाभ्युपगमे तु न दोषः कथंचित् तथाभावोपलब्धेः ॥ ७० ॥

तथैव स्पष्टयति—

अष्टसती—अवयेवतरादीनां व्यतिरेकाऽव्यतिरेकैकांतौ न वै यौगपद्येन संभविनौ विरोधात् । तथानभिलाप्यतैकांते स्ववचनविरोधः तदभिलाप्यत्वात् । स्याद्वादाभ्युपगमे तु न दोषः कथंचित्तथाभावोपलब्धेः ॥ ७० ॥

द्रव्यपर्याययोरैक्यं तयोरव्यतिरेकतः ।
परिणामविशेषाच्च शक्तिमच्छक्तिभावतः ॥ ७१ ॥

वृत्तिः-कारणं गुणी सामान्यं वस्तु द्रव्यमित्युच्यते, कार्यं गुणो विशेषः पर्याय इत्युच्यते, तयोरैक्यमेकेत्वं कुतस्तयोरन्यतिरेकतः द्रव्यपर्याययोरव्यतिरेकोपलंभात् । एतेनास्य हेतोः प्रतिज्ञार्थैकदेशासिद्धत्वं प्रत्युक्तम् । परिणामः-कारणस्यान्यथाभावः वाग्गोचराऽतीतस्तस्य विशेषश्च तस्मात्परिणामविशेषाच्च तयोरैक्यं । शक्तयो विद्यन्ते यस्य तच्छक्तिमत्-द्रव्यं परिणामि । प्रतिनियतकार्यसम्पादनसामर्थ्यं विशेषाः शक्तयो यथा घृतादेः स्नेहतर्पणबृंहणादयः । तयोर्भावस्तस्मात् तयोरैक्यमिति वेदितव्यं ॥७१॥

कथंचिद्भेदनिरूपणार्थमाह—

संज्ञासंख्याविशेषाच्च स्वलक्षणविशेषतः ।
प्रयोजनादिभेदाच्च तन्नानात्वं न सर्वथा ॥ ७२ ॥

वृत्तिः-संज्ञा नाम, संख्या एकादिका, तयोर्विशेषो भेदस्तस्मात्तयोर्नानात्वं भेदः । दृश्यते च संज्ञाभेदः ऊढाऽत्र वधूः प्रमदा कामिनी क्रोधवती भामा । द्वित्वादेकत्वं संख्योभेदोऽपि प्रतीतः । स्वमसाधारणं लक्षणं स्वरूपं यस्य स चासौ विशेषस्तस्मात्तयोर्नानात्वं । तथा च द्रव्येणान्यत्प्रयोजनं पर्यायेणान्यत् वृक्षपत्रपुष्पवत् ॥

अपेक्षानपेक्षैकांतप्रतिक्षेपार्थमाह—

अष्टसती-यत्प्रतिभासभेदेऽपि अव्यतिरिक्तं तदेकं यथा वेद्यवेदकज्ञानं रूपादिद्रव्यं वा । तथा च द्रव्यपर्यायौ न व्यतिरिच्येते तदन्यतरापायेऽर्थस्यानुपपत्तेः । उपयोगविशेषाद्रूपादिज्ञाननिर्भासभेदः स्व विषयैकत्वं न वै निराकरोति सामिग्रीभेदेऽपि युगपदेकार्थोपनिबद्धविशदेतरज्ञानवत् । तदेवं सति विरोधाद्गुपलंभश्चतुरस्रधियां मनो मनागपि न प्रीणयति । वर्णादेरप्यभावप्रसंगात् एकत्वानकत्वैकांतौ नान्योऽन्यं विजयेते भावस्वभावप्रतिबंधनात् । यत्परस्परविविक्तस्वभावपरिणामसंज्ञासंख्याप्रयोजनादिकं तद्भिन्नलक्षणं, यथा भेदादि, तथा च द्रव्यपर्यायौ । विरुद्धधर्माध्यासास्खलद्बुद्धिप्रतिभासभेदाभ्यां वस्तुस्वभावभेदसिद्धेः—अन्यथा नानैकं जगत्स्यात् तदभ्युपगमप्रकारांतरासंभवात् ॥ ७१ ॥ ७२ ॥

इत्याप्तमीमांसाभाष्ये चतुर्थः परिच्छेदः

यद्यापेक्षिकसिद्धिः स्यान्न द्वयं व्यवतिष्ठते ।
अनापेक्षिकसिद्धौ च न सामान्यविशेषता ॥ ७३ ॥

वृत्तिः-अपेक्षैव प्रयोजनमेषामर्थानां सिद्धिर्निष्पत्तिर्निश्चितिर्वा । अथवाऽऽपेक्षिकी चासौ सिद्धिश्च सा यदि स्यात् । कार्यकारणादि युगपद्द्वयं न व्यवतिष्ठते न घटते । एकेनैकस्य प्रतिहतत्वात् । यदि पुनरनापेक्षिकसिद्धिस्तस्याभ्युपगम्यमानायां सामान्यं च विशेषश्च तयोर्भावः सामान्यविशेषता सा न स्यात्-न भवेत् । तस्मात्स्वरूपेण स्वत एव सिद्धेन भवितव्यं । धर्मिधर्मभावश्च परस्परापेक्षः ॥ ७३ ॥

उभयैकांतं दर्शयन्नाह—

अष्टशती-कारिकाद्वयेन सामान्यविशेषात्मानमर्थं संहृत्य तत्रापेक्षानपेक्षैकांतप्रतिक्षेपायाह—

तयोरन्योन्योपक्षैकांते स्वभावतः प्रतिष्ठितस्यैकतरस्याप्यभावेनान्यतराभावात् उभयं न प्रकल्पेत । दूरासन्नभावयोरपि स्वभावविवर्ततविशेषाभावे समानदेशादेरप्यभावप्रसंगात् । तदिमौ स्वभावतः स्तां । अन्यथेतरेतराश्रयदोषानुषंगादनपेक्षापक्षेपि नान्वयव्यतिरेकौ स्यातां, भेदाभेदयोरन्योन्यापेक्षात्मकत्वात् विशेषेतरभावस्य ॥ ७३ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ७४ ॥

वृत्तिः-अपेक्षानपेक्षैकांतोभयं नास्ति विरोधात् । नाप्यवाच्यमवाच्यत्वेनापि वाच्यत्वात् ॥ ७४ ॥

तयोरनेकांतं दर्शयन्नाह—

अष्टशती—अनंतरकांतयोर्युगपद्विवक्षा माभूत् विप्रतिषेधात् सदसदैकांतवत् । तथानभिधेयत्वैकांतेऽपीति कृतं विस्तरेण ॥ ७४ ॥

धर्मधर्म्यविनाभावः सिद्ध्यत्यन्योऽन्यवीक्षया ।
न स्वरूपं स्वतो ह्येतत् कारकज्ञापकांगवत् ॥ ७५ ॥

वृत्तिः-क्रमभावि पिंडादिकार्यं सहभावी रूपादिर्गुणो विसदृशपरिणामलक्षणश्च विशेषो धर्मोऽत्र कथ्यते । कारणादिव्यपदेशं द्रव्यं धर्मी । स्वधर्मापेक्षया द्रव्यस्य धर्मिव्यपदेशः । स्वधर्म्यपेक्षया च रूपादेश्च धर्मव्यपदेशस्तयोर्योऽविनाभावोऽव्यभिचारोऽवश्यं सोऽन्योऽन्यापेक्षया सिद्ध्यति भासते उत्पद्यते वा । स्वरूपमसाधारणं रूपं तयोर्न परतः । कुतः ? यस्मात्स्वत एव तत्सिध्यति । यथा कारकज्ञापकांगे कारकक्रियायाः अंगं ज्ञापकक्रियायाः अंगं निबंधनं तयोरिव तद्वत् कर्तृकर्मकबोध्यबोधकवदित्यर्थः । अथवा अंगशब्दो विशेषार्थो द्रष्टव्यः, यथा कर्मकर्तृव्यपदेशाविनाभावो बोध्यबोधकव्यपदेशाविनाभावश्च सिध्यत्यन्योन्यापेक्षयैवमत्रापीत्यर्थः ।

उपेतयत्त्वं व्यवस्थाप्योपायतत्त्वव्यवस्थापनार्थमाह—

अष्टशती—न केवलं सामान्यविशेषयोः स्वलक्षणमपेक्षितपरस्परावित्ताभावलक्षणं स्वतःसिद्धलक्षणं, अपि तु धर्मधर्मिणोरपि, कर्मकर्तृबोध्यबोधकवत् ॥ ७५ ॥

इत्याप्तमीमांसाभाष्ये पंचमः परिच्छेदः ।

सिद्धं चेद्धेतुतः सर्वं न प्रत्यक्षादितो गतिः ।
सिद्धं चेदागमात्सर्वं विरुद्धार्थमतान्यपि ॥ ७६ ॥

वृत्तिः-यदि सर्वं हेतुतो निमित्तात्सिद्धमवगतं तर्हि प्रत्यक्षादितः प्रत्यक्षागमादेर्गतिरवगमो न स्यात् । दृश्यते चैंद्रियकस्याशनपानादेरर्थस्यातींद्रियस्य मलयकाश्मीरादेरत्र क्रमेण प्रत्यक्षादाप्तोपदेशतश्च गतिरिति ॥ अथागमादाप्तोपदेशात्सर्वं चेष्यते ततो विरुद्धार्थानि यानि मतानि तान्यपि सिद्धिमुपगच्छेयुरिति ॥ ७६ ॥

उभयैकात्म्यैकांतं निराकर्तुमाह—

अष्टशती—उपेयतत्त्वं व्यवस्थाप्य-उपायतत्त्वं व्यवस्थाप्यते—

युक्त्या यन्न घटामुपैति तदहं दृष्टापि न श्रद्दधे इत्यादेरेकांते तस्य बहुलं दर्शनात् प्रत्यक्षतदाभासयोरपि व्यवस्थितिः-अनुमानात् अन्यथा संकरव्यतिकरोपपत्तेः । कथंचित्साक्षात्कारणमंतरेण न क्वचिदनुमानं किं पुनः शास्त्रोपदेशाः । नचैते युक्तिनिरपेक्षाः, परस्परविरुद्धार्थतत्त्वसिद्धिप्रसंगात् । न हि प्रत्यक्षानुमानाभ्यामंतरेणोपदेशं ज्योतिर्ज्ञानादिप्रतिपत्तिः ॥ ७६ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ७७ ॥

वृत्तिः—उभयैकांतत्वं नास्ति विरोधात् । अवाच्यमपि न ॥ ७७ ॥

पुनरप्यनेकांतनिरूपणार्थमाह—

अष्टशती-युक्तीतरैकांतद्वयाभ्युपगमोऽपि मास्मभूत्-विरुद्धयोरेकत्र सर्वथाऽसंभवात् । तदवाच्यत्वेऽपि पूर्ववत् ॥ ७७ ॥

वक्तर्यनाप्ते यद्धेतोः साध्यं तद्धेतुसाधितं ।
आप्ते वक्तरि तद्वाक्यात् साध्यमागमसाधितं ॥ ७८ ॥

वृत्तिः-यो यत्राविसंवादकः स तत्राप्तः । ततः परोऽनाप्तः अनाप्ते वक्तरि तत्त्वस्योपदेष्टरि हेतोरनुमानाद्यत्साध्यं शक्याऽभिप्रेतं प्रसिद्धं तद्धेतुसाधितं-लिंगात्प्रतिपादितं । आप्ते वक्तरि वाक्याद्वचनाद्यत्साध्यं तदागमसाधितं-प्रवचनप्रतिपादितं प्रमाणभूतं प्रवचनं हि तत् । अनाप्ते पुनर्विसंवादकं तस्माद्धेतुमंतरेण न तत्सेत्स्यति ॥ ७८ ॥

अंतस्तत्त्वमेव तत्त्वमिति येषां मतं तान्निराकरणायाह—

अष्टशती-यो यत्राविसंवादकः स तत्राप्तः । ततः परोऽनाप्तः । तत्त्वप्रतिपादनमसंवादः तदर्थज्ञानात् । तेनातींद्रिये जैमिनिः-अन्यो वा स्तुतिमात्रावलंबी नैवाप्तः तदर्थापरिज्ञानात्तथागतवत् । न हि तादृशातींद्रियार्थज्ञानमस्ति दोषावरणक्षयातिशयाभावात् । श्रुतेः परमार्थवित्त्वं ततः श्रुतेरविसंवादनमित्यन्योऽन्यसंश्रितं स्वतः श्रुतेर्न वै प्रमाण्यमचेतनत्वात् घटवत् । सन्निकर्षादिभिरनैकांतिकत्वमयुक्तं तत्प्रामाण्यानभ्युपगमात् । अथापि कथंचित्प्रमाणत्वं स्यात् अविसंवादित्वात् श्रुतेरयुक्तमेव । तदभावात् तेनोपचारमात्रं च न स्यात् तदर्थबुद्धिप्रामाण्यासिद्धेः । आप्तवचनं तु प्रमाणव्यपदेशभाक् तत्कारणकार्यत्वात् तदतींद्रियार्थदर्शनोपपत्तेस्तदर्थज्ञानोत्पदनाच्च । नैतत् श्रुतेः संभवति सर्वथाप्तानुक्तेः पिटकत्रयवत् । वक्तृदोषाच्चादृशाप्रामाण्यं तदभावाच्छ्रुतेः प्रामाण्यमिति चेत् कुतोऽयं विभागः सिद्ध्येत् अभ्युपगमानभ्युपगमाभ्यां क्वचित्पौरुषेयत्वमन्यद्वा व्यवस्थापयतीति सुव्यवस्थितं तत्त्वं । एतेन कर्तृस्मरणाभावादयः प्रत्युक्ताः वेदेतरयोरविशेषात् । इतरत्र बौद्धो वक्तेति चेत् तत्र कमलोद्भवादिरिति कथं न समानं । सूदूरमपि गत्वा तदंगीकरणेतरमात्रे व्यवतिष्ठेत् वेदाध्ययनवदितरस्यापि सर्वदाध्ययनपूर्वाध्ययनत्वप्रक्लृप्तौ न वक्त्रं वक्रीभवति । तदतिशयांतराणां च शक्यक्रियत्वादितरत्रापि मंत्रशक्तेर्दर्शनात् सिद्धेऽपि तदनादित्वे पौरुषेयत्वाभावे वा कथमविसंवादकत्वं प्रत्येतव्यं । म्लेच्छव्यवहारादेस्तादृशो बहुलमुपलंभात् कारणदोषनिवृत्तेः कार्यदोषाभावकल्पनायां पौरुषेयस्यैव वचनस्य दोषनिवृत्तिः कर्तुर्वीतदोषस्यापि संभवात् तदध्येतृव्याख्यातृश्रोतॄणां रागादिमत्त्वान्नेतरस्येति निश्शंकं नश्चेतः । वक्तृगुणापेक्षं वचनस्याविसंवादकत्वं चक्षुर्ज्ञानवत् । तदोषानुविधानात् ततोऽनाप्तवचनानर्थज्ञानमंधरूपदर्शनात् । तत्र यदेव युक्तियुक्तं तदेव प्रतिपत्तुं प्रतिपादयितुं वा शक्यं, अग्निर्हिमस्य भेषजमित्यादिवत् नाग्निहोत्रादि वाक्यसाधनं । सिद्धे पुनराप्तवचनत्वे यथा हेतुवादस्तथा आज्ञावादोऽपि प्रमाणं । ननु चापौरुषेयत्ववदाप्तशासनमप्यशक्यव्यवस्थं ? उक्तमत्र सर्वथैकांतवादानां स्याद्वादप्रतिहतत्वात् इति । तत्राप्तिः साक्षात्करणादिगुणः संप्रदायाविच्छेदो वा अन्यथांऽधपरंपरयाऽप्रतिपत्तेः ॥ ७८ ॥

इत्याप्तमीमांसाभाष्ये षष्ठः परिच्छेदः समाप्तः ॥

अंतरंगार्थतैकांते बुद्धिवाक्यं मृषाऽखिलं ।
प्रमाणाभासमेवातस्तत्प्रमाणादृते कथं ॥ ७९ ॥

वृत्तिः-अंतरभ्यंतरमगं कारणं यस्य स चासावर्थश्च तस्य भावोऽतरंगार्थता सैवैकांतो मिथ्यात्वं तस्मिन् । बुद्धिश्च बहिरर्थपरिच्छेदिका । वाक्यं चानुमाननिमित्तं परार्थं । द्वंद्वैकवद्भावः । तदखिलं निरवशेषं

मृषा मिथ्या। प्रमाणमिवावभासत इति प्रमाणाभासमेव। यद्येवं कथं मुख्यप्रमाणमंतरेण तत्प्रमाणाभासं यस्मात्सति प्रमाणे प्रमाणाभासो नान्यथा ॥ ७९ ॥

अथ मतं सर्वं बाह्याभ्यन्तरं ज्ञानमेवैतस्य मतस्य निराकरणार्थमाह——

अष्टशती-तज्जन्मकार्यप्रभवादिवेद्यवेदकलक्षणमनेकांतिकमादर्श्य संवित्तिरेव खंडशः प्रतिभासमाना व्यवहाराय कल्प्यत इत्यभिनिवेशेऽपि प्रमाणं मृग्यं। क्षणिकत्वमनन्यवेद्यत्वं नानासंतानत्वमिति स्वतस्तावन्न सिद्ध्यति भ्रांतेः। तथात्मसंवेदनेऽपि व्यवसायवैकल्ये प्रमाणांतरापेक्षयानुपलंभकल्पत्वात्। न हि तथा बुद्धयः संविदंते यथा व्यावर्ण्यते। नापि परतः संबंधप्रतिपत्तेरयोगात् स्वांशमात्रावलंबिना मिथ्याविकल्पेन प्रकृतितत्त्वव्यवस्थापने बाहिरर्थेष्वप्यविरोधात्। कथंचिदत्र वेद्यलक्षणं यदि व्यवतिष्ठेत प्रकृतं कृतं स्यात् नान्यथा। न चानुक्तदोषं लक्षणमस्ति तत्संभवे नान्यत्र तदभावोऽभिधेयः तत्स्वपक्षपरपक्षयोः सिद्ध्यसिद्ध्यर्थं किंचित्कथंचित्कुतश्चित् आवितथं ज्ञानमादरणीयं अन्यथा शेषविभ्रमासिद्धेः। एतेन यद्ग्राह्यग्राहकाकारं तत्सर्वं भ्रांतं यथा स्वप्नेंद्रजालादिज्ञानं तथा प्रत्यक्षादिकमिति प्रतिविहितं वेदितव्यं ॥ ७९ ॥

साध्यसाधनविज्ञप्तेर्यदि विज्ञप्तिमात्रता।
न साध्यं न च हेतुश्च प्रतिज्ञाहेतुदोषतः ॥ ८० ॥

वृत्तिः-साध्यत इति साध्यं शक्यमभिप्रेतमप्रसिद्धं पक्षधर्मः। साध्यतेऽनेनेति साधन प्रकृते नाविनाभावि तयोराकारो विज्ञप्तिर्विज्ञानं तस्या यदि विज्ञप्तिमात्रता ज्ञानमात्रत्वं। न साध्यं न च हेतुः चकरान्नापि दृष्टान्तः। कुतः? प्रतिज्ञादोषाद्धेतुदोषाच्च। निरंशत्वमभ्युपगम्य स भेदं साधयेत्? अभ्युपगमहानिः प्रातज्ञाहेतुदोषः, अतः प्रतिज्ञादोषे हेतुदोषेऽकिंचित्कराख्यः। अथवा प्रतिज्ञैव हेतुः स दोषस्तस्मात्। यस्मान्न तदेव साध्यं साधनं निरंशत्वात्तस्य ॥ ८० ॥

अथान्तरंगार्थैकांते दोषदर्शनाद्बहिरंगार्थोऽभ्युपगम्यते तत्रापि दोषं दर्शयति——

अष्टशती-सहोपलंभनियमादभेदो नीलतद्धियोर्द्विचंद्रदर्शनवत् इत्यत्रार्थसंविदोः सहदर्शनमुपेत्यैकत्वैकांतं साधयन् कथं अवधेयाभिलापः। स्वाभिलापाभावं वा स्ववाचा प्रदर्शयन् कथं स्वस्थः। पृथगनुपलंभाद्भेदाभावमात्रं साधयेत् तच्चासिद्धं संबंधासिद्धेरभावयोः खरशृंगवत्। एतेन सहानुपलंभादभेदसाधनं प्रत्युक्तं भावाभावयोः संबंधासिद्धेः। तादात्म्यतदुत्पत्त्योरर्थस्वभावनियमात् सिद्धेऽपि प्रतिषेधैकांते विज्ञप्तिमात्रं न सिद्ध्येत् तदसाधनात्तत्सिद्धौ तदाश्रयं दूषणमनुषज्येत। तदेकोपलंभनियनोप्यसिद्धः साध्यसाधनयोरविशेषात्। एकज्ञानग्राह्यत्वं द्रव्यपर्यायपरमाणुभिरनैकांतिकं, अनन्यवेद्यत्वं असिद्धं एकक्षणवर्तिसंवित्तीनां साकल्येन सहोपलंभनियमात्, व्यभिचारिहेतुः तथोत्पत्तेरेव संवेदनत्वात्, दृष्टांतोऽपि साध्यसाधनविकलः तथोपलंभाभेदयोरर्थप्रतिनियमात् भ्रांतौ तदसंभवात्। ननु चासहानुपलंभमात्रादभेदमात्रं कथंचिदर्थस्वभावानवबोधप्रसंगात्। सर्वविज्ञानस्वलक्षणक्षणक्षयविविक्तसंततिविभ्रमस्वभावानुमितेः। साकल्येनैकत्वप्रसंगात् एकार्थसंगतदृष्टयः परचित्तविदो वा नावश्यं तद्बुद्धिं तदर्थं वा संविदैतीति हेतोरसिद्धिः सहोपलंभनियमश्च स्यात् भेदश्च स्यात् किं प्रतिषिध्येत स्वहेतुप्रतिनियमसंभवात्। तस्मादयं मिथ्यादृष्टिः परप्रत्यायनाय शास्त्रं विदधानः परमार्थतः संविदानो वा वचनं तत्त्वज्ञानं च प्रतिरुणद्धीति न किंचिदेतत् असाधनांगवचनात् अदोषोद्भावनाच्च निग्रहार्हत्व त् ॥ ८० ॥

बहिरंगार्थतैकांते प्रमाणाभासनिह्नवात्।
सर्वेषां कार्यसिद्धिः स्याद्विरुद्धार्थाभिधायिनां ॥ ८१ ॥

वृत्तिः-बहिरंगार्थतैकांतो बाह्यार्थैकांतस्तस्मिन्नभ्युपगम्यमाने विरुद्धार्थाभिधायिनां प्रमाणांतरबाधिता-

थंप्रकाशकानां सर्वेषां निरवशेषाणां कार्यस्य सिद्धिर्निष्पत्तिः व्यवहारसिद्धिर्भवेदित्यर्थः । कस्मात्प्रमाणाभासनिह्नवात् प्रमाणस्याभासो मिथ्यात्वं तस्य निह्नवो निराकरणं तस्मात् । एतदपि कुतः ? अंतस्तत्त्वे सति वहिरर्थस्य सिद्धिरसिद्धिश्च नान्यथा ॥ ८१ ॥

उभयैकांतप्रतिक्षेपायाह---

अष्टशती-यत्किंचिच्चेतस्तत्सर्वं साक्षात्परंपरया वा बहिरर्थप्रतिबद्धं यथाग्निप्रत्यक्षेतरसंवेदनं । तथा स्वप्नदर्शनमपि, चेतस्तथाविषयाकारनिर्भासात् । साध्यदृष्टांतौ पूर्ववदित्यत्रापि लोकसमयप्रतिबद्धानां परस्परविरुद्धशब्दबुद्धीनां स्वार्थसंबंधः परमार्थतः प्रसज्येत ॥ ८१ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिनावाच्यमिति युज्यते ॥ ८२ ॥

वृत्तिः-पूर्ववत् ॥

भाव एव तत्त्वं नाभाव इति यस्य मतं तन्निराकरणायाह---

अष्टशती-अंतर्वहिर्ज्ञेयैकांतयोः सहाभ्युपगमो विरुद्धः तद्वाच्यतायां युक्तिविरोधः पूर्ववत् ॥ ८२ ॥

भावप्रमेयापेक्षायां प्रमाणाभासनिह्नवः ।
बहिःप्रमेयापेक्षायां प्रमाणं तन्निभं च ते ॥ ८३ ॥

वृत्तिः-भावो ज्ञानं तदेव प्रमेयं तस्य तस्मिन्वाऽपेक्षाऽभ्युपगमस्तस्यामभ्युपगम्यमानायां । प्रमाणाभासस्य निह्नवो लोपः । कुतः ? ज्ञानस्य तदेतत्प्रामाण्यमप्रामाण्यं च बाह्यार्थापेक्षायां भवति नान्यथा इति ।

एतच्च मतं सर्वं वचो विवक्षामात्रसूचकमित्यस्य निराकरणायाह—

अष्टशती-सर्वसंवित्तेः स्वसंवेदनस्य कथंचित्प्रमाणत्वोपपत्तेः तदपेक्षायां सर्वं प्रत्यक्षं न कश्चित्प्रमाणाभासः । तथानभ्युपगमेऽन्यतम एव बुद्धेनुमानं स्यात् । तत्रार्थज्ञानमलिंगं तदविशेषणासिद्धेर्विशेषे वा तदन्यतरेणार्थपरिसमाप्तेः किं द्वितीयेन । यच्चेदमर्थज्ञानं तच्चेदर्थस्वलक्षणं स्याद् व्यभिचारात् अहेतुः, एतेनेंद्रियादि प्रत्युक्तं । प्रत्यक्षेतरबुद्धयवभासस्य स्वसंवेदनात्प्रत्यक्षविरुद्धं । सुखदुःखादिबुद्धेरप्रत्यक्षत्वे हर्षविषादादयोऽपि न स्युरात्मांतरवत् । एतेन प्रतिक्षणं निरंशं संवेदनं प्रत्यक्षं प्रत्युक्तं यथाप्रतिज्ञमनुभवाभावात् । यथानुभवमनभ्युपगमात् सर्वत्र सर्वदा भ्रांतेरप्रत्यक्षत्वाविशेषात् कथंचिद्भ्रांतौ एकांतहानेर्विकल्पसंवेदनेऽपि विकल्पानतिवृत्तेः । तस्मात्स्वसंवेदनापेक्षया न किंचिद् ज्ञानं सर्वथा प्रमाणं । बहिरर्थापेक्षया तु प्रमाणं तदाभासव्यवस्था तत्संवादकविसंवादकत्वात् क्वचित्स्वरूपे केशमशकादिज्ञानवत् ॥ ८३ ॥

जीवशब्दः सबाह्यार्थः संज्ञात्वाद्धेतुशब्दवत् ।
मायादिभ्रांतिसंज्ञाश्च मायाद्यैः स्वैः प्रमोक्तिवत् ॥ ८४ ॥

वृत्तिः-जीवस्य शब्दः संज्ञा देशामर्शकत्वाद्घटादिसंज्ञाः परिगृह्यंते । सह बाह्येनार्थेन वर्तत इति सबाह्यार्थः । कुतः ? संज्ञात्वात्सनामत्वाद्धेतुशब्दवत् । शब्दस्यार्थस्त्रिधा बहिरर्थो घटाद्याकारः स्वार्थो वा । तथा चोक्तम्-स्वार्थमभिधाय काऽप्यन्यत्र वर्तत इति । यद्येवं भ्रांतिसंज्ञा यास्ताः कथं ? ता अपि स्वैरात्मस्वरूपैरर्थैर्मायाद्यैर्माया स्वप्नेन्द्रजालादिः । भ्रांतिसंज्ञाः स्वार्थवत्यः प्रमाया उक्तिर्यथा, प्रमाणशब्दः प्रमाणाभास शब्दश्च यथा स्वार्थप्रतिपादकः । अथवा सम्यक् ज्ञायतेऽनयेति संज्ञा तस्या भावः संज्ञात्वम् । तस्माद्देशामर्शकत्वादन्येषामपि ग्रहणं प्रमाणतन्निबन्धनविचाराभ्यासदानफलादीनाम् । एतेषामन्यथाऽनुपपत्तेर्जीवादि शब्दः सबाह्यार्थः । अन्यथा एतेषामभावः स्यात् ॥ ८४ ॥

सिद्धसाध्यतापरिहारद्वारेणामुमेवार्थं प्रकटयन्नाह—

अष्टशती-स्वरूपव्यतिरिक्तेन शरीरेंद्रियादिकलापेन जीवशब्दोऽर्थवान् अतो न कृतः प्रत्यक्षतः स्यात् । इति विक्लवोल्लापमात्रं लोकरूढेः समाश्रयणात् । यत्रायं व्यवहारः जीवो गतस्तिष्ठतीति वा नात्र संज्ञा, अभिप्रेतमात्रं सूचयति ततोऽर्थक्रियायां नियमायोगात्, तत्करणप्रतिपत्तीनां तदभावेनादरणीयत्वात्, साधनतदाभासयोरन्याथा विशेषासंभवात्, परंपरयापि परमार्थैकतानत्वं वाचः प्रतिपत्तव्यं । क्वचिद् व्यभिचारदर्शनादनाश्वासे चक्षुरादिबुद्धेस्तदाभासोपलब्धेः कुतो धूमोदरग्न्यादिप्रतिपत्तिः ? कार्यकारणभावस्य व्यभिचारदर्शनात् । काष्ठादिजन्मनोऽग्नेरिव मणिप्रभृतेरपि भावात् । तद्विशेषपरीक्षायामितरत्रापि विशेषाभावात् । अभिसंधिवैचित्र्यादभिधानव्यभिचारोपलंभे तदितरकारणसामग्रीशक्तिवैचित्र्यं पश्यतां कथमाश्वासः । तस्मादयमक्षलिंगसंज्ञादोषाविशेषेऽपि क्वचित्परितुष्यन्नन्यतमप्रद्वेषेण ईश्वरायते परीक्षाक्लेशलेशोऽसहत्वात् । भावोपादानसंभवे हि समाख्यानामितेरतरोपादानप्रक्लृप्तिः। भावश्चात्र हर्षविषादाद्यनेकविकारविवर्तः प्रत्यात्मवेदनीयः प्रतिशरीरं भेदाभेदात्मको प्रत्याख्यानार्हः प्रतिक्षिपंतमात्मानं प्रतिबोधयतीति कृतं प्रयासेन । न हि मायादिसमाख्याः स्वार्थरहिताः विशेषार्थप्रतिपत्तिहेतुत्वात् प्रमाणसमाख्यावत् ॥ ८४ ॥

बुद्धिशब्दार्थसंज्ञास्तास्तिस्रो बुद्ध्यादिवाचिकाः ।
तुल्या बुद्ध्यादिबोधाश्च त्रयस्तत्प्रतिबिंबिकाः ॥८५॥

वृत्तिः–बुद्धिश्च शब्दश्चार्थश्च बुद्धिशब्दार्थास्तेषां संज्ञा बुद्धिशब्दार्थसंज्ञास्तिस्त्रिसंख्याः । बुद्धिरादिर्येषां ते बुद्ध्यादयस्तेषां वाचिकाः प्रतिपादिका तुल्याः समाः । केन ? बुद्ध्याद्यर्थप्रतिपादकत्वेन । बुद्ध्यादीनां बोधाश्च ज्ञानानि च बुद्ध्याद्यर्थस्य प्रविबिंबिका प्रतिनिधयस्त्रयस्तेऽपि तुल्या अर्थप्रतिपादकत्वेन ॥ किमुक्तं भवति–गौरिति जानीत इतीयं बुद्धेर्वाचिका संज्ञा । तस्याश्च श्रोतुः पुरुषस्य स्वार्थे बोधको बोधो भवति । गौरित्याहेतीयं शब्दस्य स्वस्यैव रूपस्य वाचिका संज्ञा । तस्याश्च श्रोतुः पुरुषस्य स्वार्थे शब्दस्य स्वस्मिन्नेव रूपे बोधको बोधो भवति । गामानय दोहार्थमितीयं संज्ञा बाह्यार्थस्य वाचिका भवति । तस्याश्च श्रोतुः स्वार्थे सास्नादिमति पिण्डे बोधको बोधो भवति । ततो बुद्ध्याद्यर्थवाचकत्वेन संज्ञास्तिस्रः समा एव बुद्ध्यादीनां शब्दार्थानां त्रयोऽपि बोधका वेदका बोधा बुद्ध्यादिशब्दार्थप्रतिभासकाश्च समा एव तत्प्रतिभासकत्वेन॥८५॥

पुनरप्याशंक्य तमेव बाह्यार्थं प्रतिपादयन्नाह—

अष्टशती–हेतुर्व्यभिचाराशंकां प्रत्यस्तमयति–तिसृणामपि स्वव्यतिरिक्तवस्तुसंबंधदर्शनात्तद्बुद्धीनां च तन्निर्भासनात्तद्विषयतोपपत्तेः ॥ ८५ ॥

वक्तृश्रोतृप्रमातॄणां वाक्यबोधप्रमाः पृथक् ।
भ्रांतावेव प्रमाभ्रांतौ बाह्यार्थौ तादृशेतरौ ॥ ८६ ॥

वृत्तिः–वक्ता च श्रोता च प्रमाता च वक्तृश्रोतृप्रमातारस्तेषां वक्तृश्रोतृप्रमातॄणां वाचकश्रावकज्ञापकानां । यथासंख्यं वाक्यं च बोधश्च प्रमा च वाक्यबोधप्रमाः शब्दशाब्दप्रत्यक्षानुमानानि । पृथक् व्यवस्थितलक्षणानि । भ्रांतावेव यदि भ्रांतिस्वरूपे व्यवतिष्ठेरन् न तु वर्तेरन्निति वाक्यशेषः । ततः को दोषः स्यादित्याह–प्रमाभ्रांतौ सर्वेषां प्रमाणानां बाह्यापेक्षायां द्वैविध्ये सति प्रमाणयोः प्रत्यक्षप्रत्यक्षयोः प्रत्यक्षानुमानयोर्वा भ्रांतौ भ्रांतिस्वरूपतायां सत्यामपि । बाह्यार्थौ बाह्यविशेषौ दृश्यानुमेयाख्यौ । तादृशात्प्रस्तुताद्भ्रांतस्वरूपादितरावन्यावभ्रांतस्वरूपौ क्रमाक्रमानेकांतात्मकौ संतौ विभावनीयौ स्यातां । अथ वा प्रमाभ्रांतौ यौ भ्रांताभ्रांतौ बाह्यार्थौ भ्रांतावेव तत इदं भ्रांतमिदमभ्रांतमिति विचारोऽनर्थकः स्यात् ॥ ८६ ॥

बाह्यार्थे सति प्रमाणमप्रमाणं च युज्यते नान्यथाऽत आह—

अष्टशती-बहिरर्थाभावाद् वक्त्रादित्रयं न बुद्धेः पृथक्कृतं ततोऽसिद्धतादिदोषः साधनस्येति तन्न रूपादेर्ग्राहकस्य तद्व्यतिरिक्तविज्ञानसंतानकालस्य च स्वांशमात्रावलंबिनः प्रमाणस्य विभ्रमकल्पनायां साकल्येनासिद्धिः अंतर्ज्ञेयाभ्युपगमविरोधात्। तौ हि ग्राहकापेक्षया बाह्यार्थौ भ्रांतावेव कुतस्तत्र हेयोपादेयविवेकः ८६

बुद्धिशब्दप्रमाणत्वं बाह्यार्थे सति नासति।
सत्यानृतव्यवस्थैवं युज्यतेऽर्थाप्त्यनाप्तिषु ॥ ८७ ॥

वृत्तिः-बुद्धिश्च शब्दश्च तयोः प्रामाण्यमर्थप्रतिपादकत्वं बाह्यार्थे सति भवत्यसत्यविद्यमाने च न भवति। सत्यमवितथमनृतं वितथं तयोर्व्यवस्था अर्थस्याप्त्यनाप्तिषु ग्रहणाग्रहणेषु सत्सु युज्यते नान्यथा। वचनस्य तदा सत्यता भवति यदा बाह्यार्थे तादृग्भूतं प्रापयति। अन्यथाऽसत्यं ॥ ८७ ॥

तस्य बाह्यार्थस्य कथं प्राप्तिर्भवतीति पृष्टे कश्चिदाह दैवादेव, कश्चित्पुनः पौरुषादेवैतत्पक्षद्वयं विघटयन्नाह–

अष्टशती-स्वपरप्रतिपत्त्यर्थं साधनं बुद्धिशब्दात्मकं स्वसंवित्त्यैव परप्रतिपादनायोगात्। तस्य च सति बहिरर्थे प्रमाणत्वमर्थप्राप्तितः सिद्धयेत्। असति प्रमाणाभासत्वं—अर्थानाप्तित इति। तदेवं परमार्थसन् बहिरर्थः साधनदूषणप्रयोगात्। अन्यथा स्वप्नेतराविशेषात् किं किं न साधितं दूषितं चेति कुतः संतानांतरमन्यद्वा। तैमिरिकद्व्याद्विचंद्रदर्शनवत् भ्रांतः सर्वो व्यवहार इत्यत्रापि तत्त्वज्ञानं शरणं। अन्यथा बहिरर्थवदभिसंहितस्यापि निराकरणापत्तेस्तथा परमाण्वादिदूषणेऽपि प्रतिपत्तव्यं-अन्यथा तत्कृतमकृतं स्यादिति सर्वत्र योज्यं। तदिमे विज्ञानसंताना: संति न संतीति तत्त्वाप्रतिपत्तेः दृष्टापह्नुतिरनिबंधनैव अदृश्येनात्मना कथंचिददृश्यानामपि परमाणूनां बहिरपि समवस्थानविप्रतिषेधाभावात् अंतर्ज्ञेयवत्। तत्र पूर्वादिदिग्भागभेदेन षडंशादिकल्पनया वृत्तिविकल्पेन वा परपक्षोपालंभे स्वपक्षाक्षेपात्, कथंचिद्विरोधपरिहारस्य पुनरायाशयतामप्यशक्तेः तत्साक्षात्परंपरया वा विमत्यधिकरणभावापन्नं ज्ञानं स्वरूपव्यतिरिक्तार्थावलंबनं ग्राह्यग्राहकाकारत्वात् संतानांतरसिद्धवत्। न हि व्यापारव्याहारनिर्भासोऽपि विप्लुतो नास्ति तदन्यत्रापि वासनाभेदो गम्यते न संतानांतरं ॥ ८७ ॥

इत्याप्तमीमांसाभाष्ये सप्तमः परिच्छेदः।

दैवादेवार्थसिद्धिश्चेद्दैवं पौरुषतः कथं।
दैवतश्चेदनिर्मोक्षः पौरुषं निष्फलं भवेत् ॥ ८८ ॥

वृत्तिः–अर्थस्य कार्यस्य प्रशस्ताप्रशस्तशरीरेंद्रियादेस्तथा ज्ञानसुखादेरज्ञानदुःखादेर्वा सिद्धिर्निष्पत्तिर्यदि दैवादेव सर्वथा स्यात् तदैवं कर्माख्यं पौरुषान्मनोवाक्कायव्यापारलक्षणाच्छुभाशुभरागादिप्रायात्पुरुषकारात्तर्हि कथं स्यात्। अथ दैवांतरादेव दैवं स्यादित्यत्रोच्यते। दैवतश्चेद्यदि दैवादेव दैवं स्यात्तदानीमनिर्मोक्षोऽसिद्धिः स्यात्। दैवस्य कारणभूतस्य कार्यभूतस्य च सततं संततितो विच्छेदं प्रत्युपायासंभवात्। तदा दानशीलप्रव्रज्यार्थः कृष्याद्यर्थश्च पुरुषकारोऽप्यनर्थः स्यात् ॥ ८८ ॥

अष्टशती-योग्यतापूर्वकर्मता वा दैवमुभयमदृष्टं, पौरुषं पुनरिह चेष्टितं दृष्टं ताभ्यामर्थसिद्धिः तदन्यतरापायेऽघटनात्। पौरुषमात्रे अर्थादर्शनात् दैवमात्रे वा समीहानर्थक्यप्रसंगात् ॥ ८८ ॥

पौरुषादेव सिद्धिश्चेत् पौरुषं दैवतः कथं।
पौरुषाच्चेदमोघं स्यात् सर्वप्राणिषु पौरुषं ॥ ८९ ॥

वृत्तिः–अथ पौरुषादेव सिद्धिश्चेत् सर्वथा यदि पौरुषमात्रादेवार्थसिद्धिः स्यात्। तत्पौरुषं दैवाद्दैव-

प्रामाण्यात्कथमफलं स्यात् ? । तथाहि समाने हि समानानां केचिदर्थेषु युज्यंते कोचिन्न प्रसिद्धमेतत् । अन्यथा दैवमंतरेण पौरुषादेव पौरुषस्य प्रवृत्तौ सत्यां सर्वप्राणिषु पौरुषममोघमेव सफलमेव स्यात् दैवहीनानामपि तद्भवति ॥ ८९ ॥

उभयैकांतेऽपि न युक्तं—

अष्टशती-तद्धि पौरुषं विना दैवसंपदा न स्यात् तदुक्तं—

तादृशी जायते बुद्धिर्व्यवसायश्च तादृशः ।
सहायास्तादृशाः संति यादृशी भवितव्यता ॥ १ ॥

इति तत्सर्वं पौरुषापादितमिति चेत् तद्व्यभिचारदर्शिनो न वै श्रद्दधीरन् ॥ ८९ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ९० ॥

वृत्तिः—उभयदोषप्रसंगात् । अवाच्यत्वदोषाच्च ॥ ९० ॥

दैवात्केवलात्पौरुषाच्च केवलादर्थसिद्धिर्यदि न भवति कथं तर्हि स्यादत आह—

अष्टशती-दैवेतरयोः सहैकांताभ्युपगमे व्याघातात्, अवाच्यतायां च स्ववचनविरोधात् स्याद्वादनीतिः॥९०॥

अबुद्धिपूर्वापेक्षायामिष्टानिष्टं स्वदैवतः ।
बुद्धिपूर्वव्यपेक्षायामिष्टानिष्टं स्वपौरुषात् ॥ ९१ ॥

वृत्तिः—बुद्धिर्विचारः पूर्वं प्रथमं कारणं यस्याः सा तथा न बुद्धिपूर्वा अबुद्धिपूर्वा सा चासावपेक्षा च आलोचनं च सा तथा तस्यामतर्कितोपस्थितन्यायेनेत्यर्थः । इष्टमभिलषितं सुखादि अनिष्टमनभिलषितं दुःखादि । स्वदैवतः स्वपुण्यपापफलात्पूर्वजन्मनिबद्धकर्मणः । यद्यपि पौरुषमात्रं विद्यते तथापि मुख्याभावो विवक्षितो नात्यंताभावः । तथा बुद्धिपूर्वव्यपेक्षायां विचारपूर्वकत्वेनानुष्ठानादिष्टमनिष्टं च स्वपौरुषात्स्वकीयपुरुषकारात् । अत्रापि दैवमप्रधानत्वेन विवक्षितं नात्यंताभावत्वेन । परस्परापेक्षयैव कार्यसिद्धिर्यतो देव आत्मा तस्य कर्म दैवमिति ॥ ९१ ॥

ननु परदुःखे पापं तस्यैव सुखे पुण्यं स्वदुःखात्पुण्यं स्वसुखात्पापमित्येवं कैश्चिदभाणि न दैवादिति तन्मतनिराकरणायाह—

अष्टशती—अतर्कितोपस्थितमनुकूलं प्रतिकूलं वा दैवकृतं तद्विपरीतं हि पौरुषापादितं । अपेक्षाकृतत्वात्तद्व्यवस्थायाः ॥ ९१ ॥

इत्याप्तमीमांसाभाष्ये अष्टमः परिच्छेदः ।

पापं ध्रुवं परे दुःखात् पुण्यं च सुखतो यदि ।
अचेतनाकषायौ च बध्येयातां निमित्ततः ॥ ९२ ॥

वृत्तिः—परेऽन्यस्मिन् प्राणिनि दुःखमात्राद्यदि पापं स्यात् । तस्मिन्नेव सुखमात्राच्च पुण्यं यदि स्यात् । तदानीमचेतनो विषशस्त्रादिरकषायो वीतरागः तावपि बध्येयातां कर्मबंधस्य कर्तारौ भवतः । निमित्तत्वात् । प्रत्ययमंतरेणापि भावप्रधानत्वान्निर्देशस्य ॥ ९२ ॥

तथा—

---

१ । विवक्षायामित्यपि पाठः ।

अष्टशती—परत्र सुखदुःखोत्पादनात् पुण्यपापबंधौ स्यातां कथमचेतना न बध्येरन् ? वीतरागो वा ? तन्निमित्तत्वात् ॥ ९२ ॥

पुण्यं ध्रुवं स्वतो दुःखात्पापं च सुखतो यदि ।
वीतरागो मुनिर्विद्वांस्ताभ्यां युंज्यान्निमित्ततः ॥ ९३ ॥

वृत्तिः—स्वस्मिन् दुःखात् ध्रुवं निश्चितं पुण्यं यदि स्यात्तस्मिन्नेवात्मनि सुखाद्धेतोर्ध्रुवं पापं च यदि स्यात् । ततः किं स्यात् ? ताभ्यां वीतरागो मुनिर्युंज्याद्बद्धो भवेत् । कुतः ? निमित्तत्वात् ॥ ९३ ॥

अथोभयैकांतस्तद्वयादिष्यते तत्रापि दोष एव विरोधात् । नाप्यवाच्यत्वं वचनविरोधात्—

अष्टशती—आत्मसुखदुःखाभ्यां पापेतरैकांतकृतांते पुनरकषायस्यापि ध्रुवमेव बंधःस्यात् ततो न कश्चिन्मोक्तुमर्हति तदुभयाभावसंभवात् ॥ ९३ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ९४ ॥

वृत्तिः—सुगमं ॥ ९४ ॥

कथं तर्ह्यत आह—

अष्टशती—प्रस्तुतैकांतद्वयासिद्धांते व्याहतेःअनभिधेयतायां-अनभिधेयाभिधानविरोधात् कथं चिदेवेति युक्तं ।

विशुद्धिसंक्लेशांगं चेत् स्वपरस्थं सुखासुखं ।
पुण्यपापास्रवौ युक्तौ न चेद्व्यर्थस्तवार्हतः ॥ ९५ ॥

वृत्तिः—स्व आत्मा परोऽन्यस्तयोस्तिष्ठतीति स्वपरस्थं सुखं चासुखं च सुखासुखं जीवप्रदेशाह्लादनानाह्लादनं । विशुद्धिः प्रमोदादिशुभपरिणामः । यद्यपि निरवशेषरागादिविरहलक्षणायां विशुद्धौ विशुद्धिशब्दो वर्तते तथापि कुशलशब्दवत् शुभपरिणामादौ वर्तमानो विशुद्धिशब्दो गृह्यते । संक्लेशः—आर्तरौद्रध्याने तयोरंगं कारणं विशुद्धिसंक्लेशांगं—चेद्यदि स्वपरस्थं सुखासुखं विशुद्धिसंक्लेशालंबनं यदि भवति तदा पुण्यं च पापं च तयोरास्रवौ युक्तौ । न चेदेवं यद्येवं न स्यात् । पुण्यास्रवः पापास्रवश्च व्यर्थो निष्फलः । अर्हतो वीतरागस्य तवैव वा शुष्ककुड्यनिपतितचूर्णमुष्टिवत् बंधाभावात् । एतेन मस्करिपूरणमतं निराकृतं भवति । सिद्धेषु संक्लेशकारणाभावात् ॥ ९५ ॥

अथ पुण्यपापास्रवकारणमज्ञानमिष्यते चेत्तन्मतनिराकरणायाह—

अष्टशती—आत्मनः परस्य वा सुखदुःखयोर्विशुद्धिसंक्लेशांगयोरेव पुण्यपापास्रवहेतुत्वं नचान्यथा अतिप्रसंगात् । आर्तरौद्रध्यानपरिणामः संक्लेशः तदभावो विशुद्धिः-आत्मनः स्वात्मन्यवस्थानं ॥ ९५ ॥

इत्याप्तमीमांसाभाष्ये नवमः परिच्छेदः ।

अज्ञानाच्चेद्ध्रुवो बंधो ज्ञेयानंत्यान्न केवली ।
ज्ञानस्तोकाद्विमोक्षश्चेदज्ञाद्बहुतोऽन्यथा ॥ ९६ ॥

वृत्तिः—यद्यज्ञानाज्जाड्यस्वरूपाद्बंधो ध्रुवो न केवली मुक्तः । कुतः ज्ञेयानंत्यात्प्रमेयस्यानंत्यं यतः । अथ कदाचित् ज्ञानस्तोकाद्बोधनिर्हासान्मोक्षोऽभ्युपगम्यते चेद्बहुतो विपुलादज्ञानादन्यथाऽन्येन प्रकारेणा-

तिशयेन विमोक्षः स्यादिति संबंधः । अथवा प्रागुक्तान्मोक्षप्रकारादन्येन प्रकारेणापि सह जन्मनो योगः स्यात् । तथा च सति न बन्धो नापि मोक्षस्तस्य विचाराक्षमत्वात् ॥ ९६ ॥

अष्टशती-यदि बंधोऽयमविज्ञानात् नेदानीं कश्चिन्मुच्येत सर्वस्यैव क्वचिदज्ञानोपपत्तेर्ज्ञेयानंत्यात् । यदि पुनर्ज्ञाननिर्ह्रासाद्ब्रह्मप्राप्तिः-अज्ञानात्सुतरां प्रसज्येत । दुःखनिवृत्तेरिव सुखप्राप्तिः ॥ ९६ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ९७ ॥

वृत्तिः-उभयैकांतावक्तव्यमपि दुष्टं विरोधात् ॥

कथं तर्हि तौ स्यातामत आह—

अष्टशती-नहि सर्वात्मनैकस्यैकदा ज्ञानस्तोकान्मोक्षो बहुतराज्ञानाद्बंध इत्येकांतयोरविरोधः स्याद्वादन्यायविद्विषां सिद्ध्यति येन तदुभयैकात्म्यं स्यात् ॥ ९७ ॥

अज्ञानान्मोहिनो[1] बंधो नाज्ञानाद्वीतमोहतः ।
ज्ञानस्तोकाच्च मोक्षः स्यादमोहान्मोहिनोऽन्यथा[2] ॥ ९८ ॥

वृत्तिः-ज्ञानात्पुनरपि किंविशिष्टात् मोहतो मिथ्यात्वरूपाद्बंधो भवति विनष्टमिथ्यात्वरूपादज्ञानात्पुनर्न बंधो भवति ज्ञानस्तोकादपि मोक्षः स्याद्यद्यमोहाद्भवेत् यदि पुनर्मोहितः स्यात्तस्य मोक्षाभाव एव ॥९८॥

अथ कदाचिन्मनुष्ये न दैवान्नापि पौरुषान्न ज्ञानान्नाप्यज्ञानात् किं तु ईश्वरप्रेरणादित्यस्य मतस्य निराकरणायाह—अथवा कामादीनां कर्मणश्च वैचित्र्यमनादित्वं च दर्शयितुमाह—

अष्टशती-मोहनीयकर्मप्रकृतिलक्षणादज्ञानाद् युक्तः कर्मबंधः ततोऽन्यतोऽपि बंधाभ्युपगमेऽतिप्रसंगात् । तथैव बुद्धेरपकर्षात् मोहनीयपरिक्षयलक्षणान्मोक्षमिति । विपर्ययेऽपि विपर्यासादित्यधिगंतव्यं ॥ ९८ ॥

कामादिप्रभवश्चित्रः कर्मबंधानुरूपतः ।
तच्च कर्म स्वहेतुभ्यो जीवास्ते शुद्ध्यशुद्धितः ॥ ९९ ॥

वृत्तिः-कामादीनां रागादीनां प्रभव उत्पादः कार्यरूपश्चित्रो नानाप्रकारः । कर्मबन्धानुरूपतः ज्ञानावरणादिकर्मणः कारणाद्भवति तच्च कर्म ज्ञानावरणादिकं स्वहेतुभ्यो भवति । कुत एतत् ? अनादिर्बंधबंधहेतुसंतानो बीजांकुरवत् न पुनरीश्वरादेस्तस्यावस्तुत्वात् विरागाक्षमत्वेन । न तर्हि केषांचिन्मुक्तिरन्येषां संसारश्च कर्मबंधनिमित्तविशेषादिति चेदाह— ते भगवतोऽर्हतो जीवा द्विप्रकाराः संसारिणः संति । कुतः शुद्ध्यशुद्धितो भव्याभव्यशक्तेः । अत एव न सर्वेषां मोक्षः । एतेनान्यदपि मतांतरं निराकृतं वेदितव्यं ॥९९॥

शुद्ध्यशुद्धिस्वरूपप्रतिपादनायाह—

अष्टशती—संसारोऽयं नैकस्वभावेश्वरकृतः तत्कार्यसुखदुखादिवैचित्र्यात् । न हि कारणस्यैकरूपत्वे कार्यनानात्वं युक्तं शालिबीजवत् । अपरिणामिनः सर्वथार्थक्रियासंभवात् तल्लक्षणत्वाच्च वस्तुनः सद्भावमेव तावन्न संभावयामः । तत्र कालदेशावस्थास्वभावभिन्नानां तनुकरणभुवनादीनां किलायं कर्तेति महाचित्रं एतेनेश्वरेच्छा प्रत्युक्ता । नचैतेनास्याः संबंधः तत्कृतोपकारानपेक्षणात् ततो व्यपदेशोऽपि मा भूत् अभिसंधेरनित्यत्वेऽपि समानः प्रसंगः । सकृदुत्पत्त्यादिप्रसंगाद्विचित्रत्वानुपपत्तेरिति । तयोरेकरूपत्वेऽपि कर्मवैचित्र्यात्कामादिप्रभववैचित्र्यमिति चेत् ? युक्तमेतत् । किंतु नेश्वरेच्छाभ्यां किंचित्तावतार्थपरिसमाप्तेः । एतेन विरम्य प्रवृत्तिसन्निवेशविशेषादिभ्यः पृथिव्यादेर्बुद्धिमत्कारणपूर्वकत्वज्ञानेनेश्वरप्रमाणं प्रत्युक्तं । प्राक्काय-

---

१ । मोहिनः इत्यपि पाठः २ । पक्षेपि मोहिन इति पाठः ।

करणोत्पत्तेरात्मनो धर्माधर्मयोश्च स्वयमचेतनत्वात् विचित्रोपभोगयोग्यतनुकरणादिसंपादनकौशलासंभवात। तन्निमित्तमात्मांतरं मृत्पिंडादिकुलालवदिति चेन्न तस्यापि वितनुकरणस्य तत्कृतेतरसंभवात। तादृशोऽपि निमित्तभावे कर्मणामचेतनत्वेऽपि तन्निमित्तत्वमविप्रतिषिद्धं सर्वथा दृष्टांतव्यतिक्रमात्। स्थित्वा प्रवर्तमानार्थक्रियादिचेतनाधिष्ठानादिति नियमे पुनरीश्वरादेरपि माभूत्। नायं प्रसंगो बुद्धिमत्त्वादितिचेत्? तत एव तर्हि प्रहीणतनुकरणादयः प्राणिनो माभूवन्। कर्मणां वैचित्र्यादिति चेत् तेषामीश्वरज्ञाननिमित्तत्वे समानः प्रसंगः। तदनिमित्तत्वे तनुकरणादेरपि तन्निमित्तत्वं माभूद्विशेषाभावात्। अर्थक्रियादेरपि ताभ्यामनैकांतिकत्वं। ततः कर्मबंधविशेषवशात् चित्राः कामादयः ततः कर्मवैचित्र्यं। नहि भावस्वभावोपलंभः करणीयः अन्यत्रापि तत्प्रसंगनिवृत्तेः। न तर्हि केषांचिन्मुक्तिरितरेषां संसारश्च। कर्मबंधनिमित्तविशेषादिति चेन्न तेषां शुद्धयशुद्धितः प्रतिमुक्तीतरसंभवात्-आत्मनां ॥ ९९ ॥

शुद्धयशुद्धी पुनः शक्ती ते पाक्यापाक्यशक्तिवत्।
साद्यनादी तयोर्व्यक्ती स्वभावोऽतर्कगोचरः ॥ १०० ॥

वृत्तिः-शुद्धयशुद्धी ये शक्ती भव्याभव्यत्वरूपे ते अनादितत्त्वार्थश्रद्धानाश्रद्धानयोग्यके कटुकेतरमुद्गपाक्यापाक्यशक्तिवत् तयोर्भव्यत्वाभव्यत्वशक्त्योर्व्यक्ती तत्त्वार्थश्रद्धानप्रियधर्मत्वादिपरिणत्यपरिणती साद्यनादी। कुतोऽयं शक्तिभेदोऽतर्कगोचरः स्वभावो यतः ॥ १०० ॥

एवं तावत्प्रमाणपरतन्त्रप्रमेयविचारः कृतः। अधुना प्रमाणत्वनिरूपणार्थमाह—

अष्टशती—भव्येतरस्वभावो तेषां सामर्थ्यासामर्थ्ये माषादिपाक्यापरशक्तिवत्। शक्तेः प्रादुर्भावापेक्षया सादित्वमेवमभिसंधिनानात्वं शुद्धयशुद्धिशक्त्योरिति भेदमाचार्यः प्राह। ततोऽन्यत्रापि साद्यनादी प्रकृतशक्त्योर्व्यक्ती। कुतः शक्तिप्रतिनियम इति चेत्? न हि भावस्वभावाः पर्यनुयोक्तव्याः ॥ १०० ॥

तत्त्वज्ञानं प्रमाणं ते युगपत्सर्वभासनं।
क्रमभावि च यज्ज्ञानं स्याद्वादनयसंस्कृतं ॥ १०१ ॥

वृत्तिः-तत्त्वज्ञानं परार्थबोधः पुनरपि कथंभूतं युगपत्सर्वार्थमवभासत इति युगपत्सर्वभासनं अक्रमेण परिच्छेदात्मकमित्यर्थः तत्प्रमाणमेव। क्रमभावि च तज्ज्ञानं छद्मस्थीयं चक्षुरादिकं चकारादक्रमभावि च दीर्घशष्कुल्यादिभक्षणे संभवात्। सर्वथा सदसदेकानेकनित्यानित्यादिसकलैकांतप्रत्यनीकानेकांततत्त्वविषयः स्याद्वादो जातियुक्तिनिबंधनो वितर्को नयस्ताभ्यां संस्कृतं प्रमाणगोचरं नीतं तदपि प्रमाणं स्याद्वादनयसंस्कृतं यतस्ते तव ॥ १०१ ॥

प्रमाणफलं दर्शयन्नाह—

अष्टशती-बुद्धेरनेकांतात् येनाकारेण तत्त्वपरिच्छेदः तदपेक्षया प्रामाण्यं। ततः प्रत्यक्षतदाभासयोरपि प्रायशः संकीर्णा प्रामाण्येतरस्थितिरुन्नेतव्या। प्रसिद्धानुपहतेंद्रियदृष्टेरपि चंद्रार्कादिषु देशप्रत्यासत्त्याद्यभूताकारावभासनात्। तथोपहताक्षादेरपि संख्यादिविसंवादेऽपि चंद्रादिष्वभावतत्त्वोपलंभात्। तत्प्रकर्षापेक्षया व्यवदेशव्यवस्था गंधद्रव्यादिवत्। तथानुमानादेरपि कथंचिन्मिथ्याप्रतिभासेऽपि तत्त्वप्रतिपत्त्यैव प्रामाण्यं। एकांतकल्पनायां तु नांतर्बहिस्तत्त्वसंवेदनं स्वयमद्वयादेर्द्वयादिप्रतिभासमानात् रूपादि स्वलक्षणानां च तथैवादर्शनात् यथा व्यावर्ण्यंते। तद्विशेषोपलंभाभ्युपगमेऽपि तद्व्यवसायवैकल्ये क्वचिद्धर्माधर्मसंवेदनवत् परीक्षत्वोपपत्तेः। विकल्पानामतत्त्वविषयत्वात् कुतस्तत्त्वप्रतिपत्तिः? मणिप्रदीपप्रभादृष्टांतोऽपि स्वपक्षघाती मणिप्रभादर्शनस्यापि संवादकत्वेन प्रामाण्यप्राप्त्या प्रमाणांतर्भावविघटनात्। न हि प्रत्यक्षं स्वविषये विसंवादनात् शुक्तिकादर्शनवद्रजतभ्रांतौ। नापि लैंगिकं लिंगलिंगिसंबधाप्रतिपत्तेः-अन्यथा दृष्टांतेतरयोरेकत्वात्। किं केन कृतं स्यात्। कादाचित्कार्थप्राप्तेरेकादेरपि संभवात्।

न हि मिथ्याज्ञानस्य संवादनैकांतः । तथा न लैंगिकं सर्वथैवाविसंवादकत्वात् । तस्मात्सूक्तं तत्त्वज्ञानमेव प्रमाणं । कारणस्य सामिग्रीभेदात्प्रतिभासभेदेऽपि इति । प्रमाणमेव वा तत्त्वज्ञानं । ततः स्वलक्षणदर्शनानंतरभाविनस्तत्त्वव्यवसायस्य प्रमाणतोपपत्तेः प्रत्यक्षमनुमानमिति प्रमाणे एवेत्यधारणं प्रत्याचष्टे अनधिगतार्थाधिगमाभावात्, तदप्रमाणत्वे लैंगिकस्यापि माभूद्विशेषाभावात् । अनधिगतस्वलक्षणाव्यवसायात् अनुमितेरतिशयकल्पनायां प्रकृतस्यापि न वै प्रामाण्यं प्रतिषेध्यं—अनिर्णीतनिर्णयात्मकत्वात् क्षणभंगानुमानवत् । ध्वनेरखंडशः श्रवणाधिगमोऽपि प्राथमकल्पिकस्तत्त्वनिर्णीतिरेव । तदत्यये दृष्टेरपि विसंवादकत्वेन प्रामाण्यानुपपत्तेरदर्शनातिशायनात् । तदर्शनाभावेऽपि तत्त्वनिश्चये तदन्यसमारोपव्यच्छेदलक्षणप्रमाणलक्षणांगीकरणात् । क्वचित्कुतश्चिद्धूमकेतुलैंगिकवन्निर्णीतार्थमात्रस्मृतेरधिगतार्थाधिगमात् प्रामाण्यं माभूत्। प्रमितिविशेषाभावात्, प्रकृतनिर्णयस्य प्रामाण्ये हि न किंचिदतिप्रसज्यते निर्णीतेऽपि कथंचिदतिशायनात् । प्रत्यभिज्ञानं प्रमाणं व्यवसायातिशयोपपत्तेः तत्सामर्थ्याधीनत्वात् प्रमाणत्वसिद्धेः, अन्यथा हि विसंवादः स्यात् लिंगालिंगिसंबंधज्ञानं प्रमाणमनिश्चितनिश्चयादनुमानवत् । सत्त्वक्षणिकत्वयोर्धूमतत्कारणयोर्वा साकल्येन व्याप्तिप्रतिपत्तौ न प्रत्यक्षत्वमुत्सहते सन्निहितार्थानुकारित्वात् अपरीक्षाक्षमत्वाच्च । नानुमानमनवस्थानुषंगात् । सूदूरमपि गत्वा तदुभयव्यतिरिक्तं व्यवस्थानिमित्तमभ्युपगंतव्यं । उपमानादिकं प्रमाणांतरभावमिच्छतां तत्त्वनिर्णयप्रत्यवमर्शप्रतिबंधाधिगमप्रमाणत्वप्रतिषेधः प्रायशो वक्तुर्जडिमानमाविष्करोति इति प्रत्यक्षं परोक्षमित्येद्वैतयं प्रमाणं अर्थाप्त्यादेरनुमानव्यतिरेकेऽपि परोक्षेऽतर्भावात् । तत्र सकलज्ञानावरणपरिक्षयविजृंभितं केवलज्ञानं युगपत्सर्वार्थविषयं । तथाचोक्तं 'सर्वद्रव्यपर्यायेषु केवलस्य' इति । तज्ज्ञानदर्शनयोः क्रमवृत्तौ हि सर्वज्ञत्वं कादाचित्कं स्यात् । कुतस्तत्सिद्धिरिति चेत्? सामान्यविशेषविषययोर्विगतावरणयोरयुगपत्प्रतिभासायोगात् प्रतिबंधांतराभावात् । शेषं सर्वं क्रमवृत्ति प्रकारांतरासंभवात् । चक्षुरादिज्ञानपंचकस्यापि परस्परव्यवधानेऽपि विच्छेदानुपलक्षणं क्षणक्षयवत् । यौगपद्ये हि संतानभेदात्परस्परपरामर्शाभावः संतानांतरवत् । मानसप्रत्यक्षेऽपि चक्षुरादिज्ञानानंतरप्रत्ययोद्भवेन कश्चिद्विशेषः क्रमवृत्तौ व्यवधानप्रतिभासविकल्पप्रतिपत्तेरसंभवात् । यौगपद्ये हि स्पर्शादिप्रत्यवमर्शविरोधः पुरुषांतरवद्विषयस्यानेकांतात्मकत्वात्। मतिज्ञानादि स्याद्वादनयलक्षितं प्रतिपत्तव्यं ॥ १०१ ॥

उपेक्षा फलमाद्यस्य शेषस्यादानहानधीः ।
पूर्वं वाऽज्ञाननाशो वा सर्वस्यास्य स्वगोचरे ॥ १०२ ॥

वृत्तिः—आद्यस्य प्रमाणस्य केवलज्ञानस्य फलमुपेक्षा रागमोहाभावः । शेषस्य प्रमाणस्य छद्मस्थीयज्ञानस्य, आदानं ग्रहणं हानं त्यागस्तयोर्धीर्बुद्धिः तत्फलं । पूर्वं वा उपेक्षा वेत्यर्थः । सामान्यापेक्षायां नपुंसकलिंगता । पूर्वा वेति पाठांतरं । वा अज्ञाननाशः फलं ज्ञानतेत्यर्थः । सर्वस्यास्य मत्यादिभेदभिन्नस्य हिताहितभेदभिन्ने स्वगोचरे स्वविषये वर्तमानस्यौत्सर्गिकं फलमज्ञाननाश इत्युक्तं ॥ १०२ ॥

प्रस्तुतस्याद्वादाख्यपरार्थसाधनसमर्थनार्थमाह—

अष्टशती—सिद्धप्रयोजनत्वात् केवलिनां सर्वत्रोपेक्षा । करुणावतः परदुःखजिहासोः कथमुपेक्षा तदभावे कथं वाप्तिः ? इति चेत् स्वदुःखनिवर्तनवदकरुणयापि वृत्तेरन्यदुःखनिराचिकीर्षायां । दयालोरेवात्मदुःखनिवर्तनादसमाधिरिति चेत्? न वै प्रदीपः कृपालुतया आत्मानं परं वा तमसा निवर्तयति इति । कल्पयित्वापि कृपालुतां तत्करणस्य स्वभावसामर्थ्यं मृग्यं। एवं हि परंपरापरिश्रमं परिहरेत्। मत्यादेः साक्षात्फलं स्वार्थव्यामोहविच्छेदः तदभावे दर्शनस्यापि सन्निकर्षाविशेषात् । क्षणपरिणामोपलंभवदविसंवादकत्वासंभवात् । परंपरया हानोपादानसंविप्तिः । तथाहि—करणस्य क्रियायाश्च कथंचिदेकत्वं प्रदीपतमोविगमवत् । नानात्वं च परश्वादिवत् । तस्माद्ग्राह्यसंविदाकारयोः प्रमाणफलव्यवस्थायामपि विसंवादनिराक

रणे तदज्ञस्येव विषदृष्टिः प्रमाणत्वं न प्रतिपत्तुमर्हति । तावतैव प्रमाणत्वे क्षणिकत्वाद्यनुमानं-अधिगतार्थाधिगमलक्षणत्वान्न वै प्रमाणं ॥ १०२ ॥

वाक्येष्वनेकांतद्योती गम्यं प्रति विशेषकः ।
स्यान्निपातोऽर्थयोगित्वात्तव केवलिनामपि ॥ १०३ ॥

वृत्तिः-पदानां परस्परापेक्षाणां निरपेक्षाः समुदाया वाक्यानि तेषु वाक्येष्वनेकांतं द्योतयति प्रकटयतीति अनेकांतद्योती । स्याच्छब्दो निपातोऽव्ययं । गम्यमभिधेयमस्ति घट इत्यादिवाक्येऽस्तित्वादि तत्प्रति विशेषकः समर्थकः । अथवा गम्यं हेयादेयभेदभिन्नं वस्तु यथा यदवस्थितं तथैव तस्य विशेषकः । अर्थस्य तत्तदात्मकस्य योगित्वं घटनं तस्मादन्येषां पुनर्धर्माणां गुणीभूतत्वात् । तव भवत एतदुक्तं केवलिनां श्रुतकेवलिनां च अपिशब्दात्तच्छिष्यप्रशिष्याणां च नान्येषां तथाभूतस्य वस्तुभावात् ॥ १०३ ॥

पुनरपि तदेव समर्थयति—

अष्टशती-पदानां परस्परापेक्षणां निरपेक्षः समुदायो न तर्हि तदानीमिदं भवति-यथा यत्सत्तत्सर्वं परिणामि यथा घटः संश्च शब्दः, तस्मात्परिणामित्याकांक्षणात् । प्रतिपत्तुर्धर्मोऽयं वाक्येष्वध्यारोप्यते सचेत्प्रतिपत्ता तावतार्थं प्रत्येति किमिति शेषमाकांक्षति । प्रकरणादिना वाक्यकल्पनाप्यर्थप्रतिपत्तौ न वा प्राथमकल्पिकवाक्यलक्षणपरिहारः सत्यभामादिपदवत् । सदसन्नित्यानित्यादिसर्वथैकांतप्रतिक्षेपलक्षणो नैकांतः । क्वचित्प्रयुज्यमानः स्याच्छब्दः तद्विशेषणतया प्रकृतार्थतत्त्वमनवयवेन सूचयति। प्रायशो निपातानां तत्त्वभावत्वात् एवकारादिवत् । न हि केवलज्ञानवदखिलमक्रममवगाहते वाचः क्रमवृत्तित्वात् तद्बुद्धेरपि तथाभावात् ॥ १०३ ॥

स्याद्वादः सर्वथैकांतत्यागात्किंवृत्तचिद्विधिः ।
सप्तभंगनयापेक्षो हेयादेयविशेषकः ॥ १०४ ॥

वृत्तिः-स्याद्वादोऽर्थप्रकरणादीनां घटादिशब्दार्थविशेषस्थापनहेतूनामनुकूलः । कुतः सर्वथैकांतत्यागात्तेषामर्थप्रकरणादीनां प्रतिकूलस्यैकांतस्य त्यागात् । अथ कथं प्रकारः स्याद्वादः किंवृत्तचिद्विधिः किंमो वृत्तं किं निष्पन्नं वृत्तं किंवृत्तं च तच्चित्र किंवृत्तचित् तदेव विधिः प्रकारो यस्य कथंचित् कुतश्चिदित्यादि । सप्तभंगाश्च ते नयाश्च तानपेक्षत इति स्यादस्ति स्यान्नास्त्यादि । हेयादेययोर्विशेषकः गुणमुख्यकल्पनया ॥१०४॥

स्याद्वादकेवलज्ञानयोः कथंचित्सामान्यं दर्शयन्नाह—

अष्टशती-कथंचिदित्यादि किं वृत्तचिद्विधिः स्याद्वादपर्यायः सोऽयमनेकांतमभिप्रेत्य सप्तभंगनयापेक्षः स्वभावपरभावाभ्यां सदसदादिव्यवस्थां प्रतिपादयति । सप्तभंगी प्रोक्ता द्रव्यार्थिकपर्यायार्थिकप्रविभागवशान्नैगमादयः शब्दार्थनया बहुविकल्पा मूलनयद्वयशुद्धयशुद्धिभ्यां ॥ १०४ ॥

स्याद्वादकेवलज्ञाने सर्वतत्त्वप्रकाशने ।
भेदः साक्षादसाक्षाच्च ह्यवस्त्वन्यतमं भवेत् ॥ १०५ ॥

वृत्तिः—सर्वाणि च तानि तत्त्वानि च जीवाजीवादीनि तानि प्रकाशत इति सर्वतत्त्वप्रकाशने के ते ? द्वे स्याद्वादश्च केवलज्ञानं च ते द्वे प्रमाणे । तयोर्मध्येऽन्यतमं परैः परिकल्पितमवस्तु भवेद्यतः कथं तयोर्भेदः साक्षात्प्रत्यक्षादसाक्षादप्रत्यक्षात् ॥ १०५ ॥

प्रमाणं चर्चितमथ को नयो नामेत्याह—

अष्टशती-स्याद्वादकेवलज्ञाने इति निर्देशात् तयोरभ्यर्हितत्वान्नियमं दर्शयति परस्परहेतुकत्वादभ्यर्हिते वा पूर्वनिपातेऽव्यभिचारं सूचयति । कथं पुनः स्याद्वादः सर्वतत्त्वप्रकाशनो यावता "मतिश्रुतयोर्निबंधो

द्रव्येष्वसर्वपर्यायेषु" । जीवादयः सप्तपदार्थास्तत्त्वं तत्प्रतिपादनाविशेषात् । तथा हि भेदः साक्षादसाक्षाच्चेति साक्षात्कृतेरेव सर्वद्रव्यपर्यायान् परिच्छिनत्ति नान्यत इति यावत् ॥ १०५ ॥

सधर्मणैव साध्यस्य साधर्म्यादविरोधतः ।
स्याद्वादप्रविभक्तार्थविशेषव्यंजको नयः ॥ १०६ ॥

वृत्तिः— समानो गुणो यस्य स सधर्मा तेन सधर्मणैव एवकाराद्विपक्षनिराकरणं साध्यस्यानित्यत्वादेः शक्याभिप्रेताप्रसिद्धस्य । सधर्मणो भावः साधर्म्यं तस्मात्साधर्म्यात् । स्याद्वादः श्रुतज्ञानं तेन प्रविभक्तो विषयीकृतोऽर्थस्तस्य विशेषो नित्यत्वादिस्तद्व्यंजकः प्रकटको द्योतको नयो युक्तितोऽर्थपरिग्रहः । इत्यनेनान्वयव्यतिरेकपक्षधर्मा उक्ताः । अविरोधादित्यनेनान्यथानुपपत्त्येकलक्षणो हेतुः प्रदर्शितः । किमुक्तं भवति— अंतर्व्याप्तिमंतरेण त्रिलक्षणो हेतुर्न गमक इति । अथ को नयप्रमाणयोर्विशेषः ? अनेकांतप्रतिपत्तिः प्रमाणं, एकधर्मप्रतिपत्तिर्नयः ॥

तद्विषयस्य द्रव्यस्य स्वरूपप्रतिपादनार्थमाह—

अष्टशती-सपक्षेणैव साध्यस्य साधर्म्यादित्यनेन हेतोस्त्रैलक्षण्यमविरोधात् इत्यन्यथानुपपत्तिं च दर्शयता केवलस्य त्रिलक्षणस्यासाधनत्वमुक्तं तत्पुत्रत्वादिवत् । एकलक्षणस्य तु गमकत्वं "नित्यत्वैकांतपक्षेऽपि विक्रिया नोपपद्यत इति" बहुलमन्यथानुपपत्तेरेव समाश्रयणात् । यत्रार्थक्रिया न संभवति तन्न वस्तु यथा विनाशैकांतः तथा च नित्यत्वेऽपि क्रमयौपद्याभ्यामर्थक्रिया न संभवति नापरं प्रकारांतरं—इति त्रिलक्षणयोगेऽपि प्रधानमेकलणं तत्रैव साधनसामर्थ्यपरिनिष्ठितेः । तदेव प्रतिबंधः पूर्ववद्गीतसंयोग्यादिसकलहेतुप्रतिष्ठापकं । ततः स्याद्वादेत्यादिनानुमितमनेकांतात्मकमर्थतत्त्वमादर्शयति । तस्य विशेषो नित्यत्वादिः पृथक् पृथक्त्वस्य प्रतिपादको नयः । तथा चोक्तं—

अर्थस्यानेकरूपस्य धीः प्रमाणं तदंशधीः
नयः धर्मांतरापेक्षी दुर्णयस्तन्निराकृतिः ॥ १ ।

तदनेकांतप्रतिपत्तिः प्रमाणं । एकधर्मप्रतिपत्तिर्नयः । तत्प्रत्यनीकप्रातिक्षेपो दुर्णयः केवलं विपक्षविरोधदर्शनेन स्वपक्षाभिनिवेशनात् ॥ १०६ ॥

नयोपनयैकांतानां त्रिकालानां समुच्चयः ।
अविभ्राट् भावसंबंधो द्रव्यमेकमनेकधा ॥ १०७ ॥

वृत्तिः—नया नैगमादयः सप्त उपनयास्तद्भेदोपभेदार्थपर्यायास्त एवैकांताः प्रधानधर्मास्तदग्राह्यत्वात्तद्व्यपदेशः । त्रयः काला विषयो येषां ते तथाभूतास्तेषां समुच्चय एकस्मिन्नवस्थानम् । अविभ्राट् अपृथक् भावसंबंधः सत्तासंबंधो यस्य स तथाभूतस्तद्द्रव्यमेकमभेदापेक्षया पुनरनेकप्रकारं ॥ १०७ ॥

तदर्थं चोद्य परिहारायाह—

अष्टशती-उक्तलक्षणो द्रव्यपर्यायस्थानः संग्रहादिर्नयः । तच्छाखाप्रशाखात्मोपनयः । तदेकांतात्मनां विपक्षापेक्षालक्षणानां त्रिकाललक्षणानां त्रिकालविषयाणां समितिर्द्रव्यं । ततस्तेषामपोद्धारात् गुणगुण्यादिवत् ॥ १०७ ॥

मिथ्यासमूहो मिथ्या चेन्न मिथ्यैकांतताऽस्ति नः ।
निरपेक्षा नया मिथ्या सापेक्षा वस्तु तेऽर्थकृत् ॥ १०८ ॥

वृत्तिः—नित्यानित्यास्तित्वादीनां मिथ्याधर्माणां योऽयं समूहः समुदायः स मिथ्याऽसत्यरूप इति चेदेवं भवतोऽभिप्रायः । मिथ्येत्येकांतः संग्रहस्तस्य भावो मिथ्यैकांतता सा नोऽस्माकं नास्ति न विद्यते ।

कुतः? यतो निरपेक्षा नयाः मिथ्या परस्परमपेक्षा घटना तस्या निर्गताः पृथग्भूता धर्मा व्यलीकाः। सापेक्षाः परस्परसंबद्धास्ते नया वस्तु परमार्थतत्त्वं यतोऽर्थकृत् क्रमाक्रमाभ्यामर्थकारित्वादतो न चोद्यस्यावतारः।

पुनरपि तमर्थं समर्थयन्नाह—

अष्टशती-सुनयदुर्णययोर्यथास्माभिर्लक्षणं व्याख्यातं तथा न प्रबोध्यं न परिहारः। तथाहि-निरपेक्षत्वं प्रत्यनीकधर्मस्य निराकृतिः। सापेक्षत्वमुपेक्षा अन्यथा प्रमाणनयाविशेषप्रसंगात्। धर्मांतरादानोपेक्षाहानिलक्षणत्वात् प्रमाणनयदुर्णयाणां प्रकारांतरासंभवाच्च। तदतत्स्वभावप्रतिपत्तेस्तत्प्रतिपत्तिरन्यनिराकृतिश्चेति विश्वोपसंहृतिः॥ १०८॥

नियम्यतेऽर्थो वाक्येन विधिना वारणेन वा।
तथाऽन्यथा च सोऽवश्यमविशेष्यत्वमन्यथा॥ १०९॥

वृत्तिः-वाक्येन, अस्ति घटो नास्ति वेति विधिप्रतिषेधरूपेणार्थो नियम्यते नियंत्र्यते विशेषविषयं नीयते तस्मात्सोऽर्थस्तथा च तदतदात्मक इत्यभ्युपगंतव्यः। यदि पुनरन्यथान्येन प्रकारेणैकांतरूपेणाभ्युपगम्यते तदानीमविशेष्यत्वमवस्तुत्वं स्यादेकधर्मात्मकांतत्वेन वस्त्वस्ति यतः।

वाक् द्विविषया न भवतीत्यस्य निराकरणायाह—

अष्टशती–यत्सत् तत्सर्वमनेकांतात्मकं वस्तुतत्त्वं सर्वथा तदर्थक्रियाकरित्वात्। स्वविषयाकारसंवित्तिवत्। न किंचिदेकांतं वस्तुतत्त्वं सर्वथा तदर्थक्रियासंभवात् गगनकुसुमादिवत्। नास्ति सदेकांतः सर्वव्यापारविरोधप्रसंगात् असदेकांतवदिति विधिना प्रतिषेधेन वा वस्तुतत्त्वं नियम्यते। अन्यथा तद्विशिष्टमर्थतत्त्वं न स्यात् इत्यनेन विधिप्रतिषेधयोर्गुणप्रधानभावेन सदसदादिवाक्येषु वृत्तिरिति लक्षयति॥ १०९॥

तदतद्वस्तु वागेषा तदेवेत्यनुशासति।
न सत्या स्यान्मृषावाक्यैः कथं तत्त्वार्थदेशना॥ ११०॥

वृत्तिः–एषा वागेतद्वचनं सर्वाभ्युपगतं तच्चातच्च तदतत् अस्तित्वनास्तित्वात्मकं वस्तुतत्त्वं तदेव तादृग्भूतमेव नैकांतात्मकमेवेत्येवमनुशासति कथयति प्रतिपादयति। यदि न सत्या सद्भूता स्याद्भवेत्। एवं सति मृषा वाक्यानि असत्यरूपाणि वाक्यानि स्युः। तथा सति तत्त्वार्थस्य परमार्थस्य प्रमाणहेतुफलप्रतिपादकस्य येयं देशना कथनं परप्रतिपादनं कथं स्यात्? किं तु न भवेदेव। तथा च विशीर्णं प्रमाणादिलक्षणं वर्त्म। तस्माद्यत्सत्तदनेकांतात्मकं हेतुज्ञानं प्रमाणवदिति वचनस्य प्रमाण्यमेषितव्यं॥ ११०॥

पुनरपि वचोलक्षणमाह—

अष्टशती–प्रत्यक्षादिप्रमाणविषयभूतं विरुद्धधर्माध्यासलक्षणं वाऽविरुद्धं वस्तु। तदेवेत्येकांतेन प्रतिपादयंती मिथ्यैव भारती कथमनयार्थदेशनं? इत्येकांतवाक्यार्थानुपपत्तिरालक्ष्यते॥ ११०॥

वाक्स्वभावोऽन्यवागर्थप्रतिषेधनिरंकुशः।
आह च स्वार्थसामान्यं तादृग्वाच्यं खपुष्पवत्॥ १११॥

वृत्तिः–वाचः स्वभाव आत्मीयं रूपमन्येषां वाच्यत्वेनाभिप्रेततराणां वाग्वचनं तस्या अर्थस्तस्य प्रतिषेधो निराकरणं तस्मिन् निरंकुशः समर्थो घटशब्दः पटादीनां निराकरणं करोति स्वार्थं च प्रतिपादयति अतोऽनेकांतः, यदि पुनः सर्वथा स्वस्य ज्ञानार्थस्य बाह्यार्थस्य सामान्यं परापररूपमपोहं चार्वाक आह आचष्ट इत्यभ्युपगमः स्यात् तादृग्वाच्यं विशेषरहितं सामान्यं खपुष्पवत् गगनकुसुमसमानमतो न किंचित्स्याद्॥१११॥

ननु सामान्यमेव वाचोऽर्थो यदुत विशेषे वर्तते सामान्येऽर्थक्रियाभावादिति संसर्गबोधमतं तन्निराकरणार्थमाह—

अष्टशती—वाचः स्वभावोऽयं येन स्वार्थसामान्यं प्रतिपादयंती तदपरं निराकरोति । अन्यतरापाये ऽनुक्तानतिशायनात् । इदं तदानेयं तद्यावान् प्रतीयेत तदर्थः । कूर्मरोमादिवत् नच सामान्यं विशेषपरिहारेण क्वचिदुपलभामहे । अनुपलभमानाश्च कथं स्वात्मानं परं वा तथाभिनिवेशेन विप्रलभामहे ? ॥१११॥

सामान्यवाग्विशेषे चेन्न शब्दार्था मृषा हि सा ।
अभिप्रेतविशेषाप्तेः स्यात्कारः सत्यलांछनः ॥ ११२ ॥

वृत्तिः—सामान्यसंबंधिनी वाक् विशेषे वर्तते—विशेषमाचष्टे तत्त्वार्थक्रियाभावात् चेदेवं भवतोऽभिप्रायः ? तर्हि शब्दस्यार्थोऽभिधेयः कुतः ? तादृग्भूता वाक् मृषा व्यलीका सा । यस्मान्न ह्यन्यस्य वाचकोऽन्यमाह । घटशब्दः पटार्थस्य न कदाचिदपि प्रतिपादकः । नाप्यपोहोऽस्यार्थः, अपोहो हि परव्यावृत्तिः सा च तुच्छा ततो भेदक्षाणिकैकांतपक्षे न वाच्यं नापि वाचको नानुमानं नाप्यागमः सर्वाभावोऽतः स्यात्कारः स्याद्वादः सत्यलांछनः सत्यभूतोऽभिप्रेतविशेषस्याप्तेर्निमित्तमिष्टार्थप्राप्तिहेतोराश्रयणीयः सर्वदोषकलंकातीतत्वात् ।

तस्यैव स्वरूपमाह—

अष्टशती—अस्तीति केवलमभावव्यवच्छेदादपोहमाहेति चेत् ? कः पुनरपोहः ? परतो व्यावृत्तिरभावः । कथमेवं सत्यभावं प्रतिपादयति भावं न प्रतिपादयतीत्येवमनुक्तसमं न स्यात् । तद्विकल्पो मिथ्याभिनिवेशवशादिति चेन्न चैतत्तस्य प्रतिपादकं मिथ्याविकल्पहेतुत्वाद् व्यलीकवचनवत् । ततः स्याद्वाद एव सत्यलांछनो न वादांतरमित्यनुशाययति ॥ ११२ ॥

विधेयमीप्सितार्थांगं प्रतिषेध्याविरोधि यत् ।
तथैवादेयहेयत्वमिति स्याद्वादसंस्थितिः ॥ ११३ ॥

वृत्तिः—विधेयमस्तीत्यादि प्रतिषेध्यस्य नास्तित्वादेरविरोधेनाविरुद्धं यत्तदीप्सितार्थस्याभिप्रेतकार्यस्यांगं कारणं । तथैवादेयं वस्तु हेयात्त्याज्यादविरुद्धं । इत्यनेन प्रकारेण स्याद्वादस्य संस्थितिः सर्वप्रमाणैरविरुद्धा सिद्धिरिति प्रमाणहेतुदृष्टांताभासाः परवादिपरिकल्पितप्रमाणहेतुदृष्टांता वेदितव्याः । कुतः ? तल्लक्षणाभावात् । वस्त्वपि तैर्यत्परिकल्पितं तदपि नास्ति लक्षणाभावात् । तस्माद्यदनेकांतात्मकं तत्सत्यं लक्षणयोगादिति ।

शास्त्रार्थोपसंहारकारिकामाह—

अष्टशती—अस्तीत्यादि विधेयमभिप्रेत्य विधानात् नास्तित्वादिभिरविरुद्धं विधिप्रतिषेधयोरन्योन्याविनाभावलक्षणत्वात् स्वार्थज्ञानवत् । तद्विधेयप्रतिषेध्यात्मविशेषात् स्याद्वादः प्रक्रियते सप्तभंगीसमाश्रयात् ॥ ११३ ॥

इतीयमाप्तमीमांसा विहिता हितमिच्छता ।
सम्यङ्मिथ्योपदेशार्थविशेषप्रतिपत्तये ॥ ११४ ॥

वृत्तिः—इत्यनेन प्रकारेणेयं प्रत्यक्षतश्च योऽयमुपदेशस्तस्यार्थः स्वरूपं तस्य विशेषो याथात्म्यं तस्य प्रतिपत्तिरवगमस्तस्यै सम्यगुपदेशोऽयं मिथ्येति सर्वज्ञेन ज्ञायते यस्मात् ।

कृतकृत्यो निर्व्यूढतत्त्वप्रतिज्ञ आचार्यः श्रीमत्समंतभद्रकेसरी प्रमाणनयतीक्ष्णनखरदंष्ट्राविदारितप्रवादिकुनयमदविह्वलकुंभिकुंभस्थलपाटनपटुरिदमाह—

अष्टशती–इति स्वोक्तपरिच्छेदविहितेयमाप्तमीमांसा सर्वज्ञविशेषपरीक्षानिःश्रेयसकामिनां । अभव्यानां तदनुपयोगात् । तत्त्वेतरपरीक्षां प्रति भव्यानामेव हि नियताधिकृतिः ॥ ११४ ॥

श्रीवर्द्धमानमकलंकमनिंद्यवंद्य—
पादारविंदयुगलं प्रणिपत्य मूर्ध्ना
भव्यैकलोकनयनं परिपालयंतं—
स्याद्वादवर्त्म परिणौमि समंतभद्रं ॥ १ ॥

इत्यष्टशती समाप्ता ।

जयति जगति क्लेशावेशप्रपंचहिमांशुमान्
विहतविषमैकांतध्वांतप्रमाणनयांशुमान् ।
यतिपतिरजो यस्याधृष्टान्मतांबुनिधेर्लवान्
स्वमतमतयस्तीर्थ्या नाना परे समुपासते ॥ ११५ ॥

वृत्तिः—यस्य भट्टारकस्य मतांबुधेरागमोदधेर्लवान् कणान् अधृष्टानखरीकृतान् परे नाना तीर्थ्याः प्रवादिनः सुगतादयः स्वमते मतिर्येषां ते स्वमतमतयः कृतात्मबुद्धयः समुपासते सेवंते सोऽजो जातिजरामरणरहितो यतिपतिः प्रधानस्वामी जयति त्रैलोक्यस्वामित्वं करोति बाह्याभ्यंतरशत्रून् निहत्य जयति लोके। पुनरपि किंविशिष्टः ? क्लेशस्य दुःखस्य आवेशः कदर्थना तस्य प्रपंचो विस्तारः स एव हिमं प्रालेयः तस्यांशुमानादित्यः । एकांत एव ध्वांतं तमः विषमं च तदेकांतध्वांतं च विषमैकांतध्वांतं प्रमाणं च नयाश्च प्रमाणनया उक्तलक्षणा विहतं निराकृतं विषमैकांतध्वांतं यैस्ते तथाभूतास्ते च ते प्रमाणनयाश्च त एवांशवः किरणास्ते विद्यंते यस्य स तथाभूत इति यतिपतेर्विशेषणं ॥ ॥ ११५ ॥

श्रीमत्समंतभद्राचार्यस्य त्रिभुवनलब्धजयपताकस्य प्रमाणनयचक्षुषः स्याद्वादशरीरस्य देवागमाख्याकृतेः संक्षेपभूतं विवरणं कृतं श्रुतविस्मरणशीलेन वसुनंदिना जडमतिनाऽऽत्मोपकाराय ।

समंतभद्रदेवाय परमार्थविकल्पिने ।
समंतभद्रदेवाय नमोऽस्तु परमात्मने ॥ १ ॥
सुखाप्त जायते लोके वसुनंदिसमागमः ।
तस्मात् निषेव्यतां भव्यैर्वसुनंदिसमागमः ॥ २ ॥

इति श्रीवसुनंद्याचार्यकृता देवागमवृतिः समाप्ताः ।

समाप्तोऽयं ग्रंथः ।

---

१ नैतत्पद्यस्याष्टशत्युपलब्धा ।



सनातनजैनग्रंथमाला

९

स्याद्वादपतिश्रीविद्यानंदस्वामिविरचिता-

प्रमाणपरीक्षा ।

जयंति निर्जिताशेषसर्वथैकांतनीतयः ।
सत्यवाक्याधिपाः शश्वद्विद्यानंदा जिनेश्वराः ॥ १ ॥

अथ प्रमाण-परीक्षा—तत्र प्रमाणलक्षणं परीक्ष्यते—

'सम्यग्ज्ञानं प्रमाणं प्रमाणत्वान्यथानुपपत्तेः । सन्निकर्षादिरज्ञानमपि प्रमाणं स्वार्थप्रमितौ साधकतमत्वात् ? इति नाशंकनीयं । तस्य स्वप्रमितौ साधकतमत्वासंभावात् । न ह्यचेतनोऽर्थः स्वप्रमितौ करणं पटादिवत् । सोऽर्थप्रमितौ करणमित्यप्यनालोचितवचनं नैयायिकानां स्वप्रमितावसाधकतमस्यार्थप्रमितौ साधकतमत्वानुपपत्तेः । तथाहि— न सन्निकर्षादिरर्थप्रमितौ साधकतमः स्वप्रमितावसाधकतमत्वात्पटवत् । प्रदीपादिभिर्व्यभिचारः साधनस्य ? इति न मंतव्यं । तेषामर्थपरिच्छित्तावकरणत्वात् । तत्र नयनमनसोरेव करणतया स्वयमभिमतत्वात् । प्रदीपादीनां तत्सहकारितयोपचारस्तः करणव्यवहारानुसरणात् । न चोपचारतोऽर्थप्रकाशन एव प्रदीपादिः करणं न पुनः स्वप्रकाशन इति मन्यमानो निर्मलमना मनीषिभिः, अनुमन्यते । नयानादेः-अर्थसंवेदनमिव प्रदीपादिसंवेदनमप्युपजनयतः प्रदीपादीनां सहकारित्वाविशेषात् । तेषामर्थप्रकाशनवत् स्वप्रकाशनेऽपि करणतोपचारव्यवस्थितेः । नयनादिना-अनेकांत इत्यपि न मननीयं तस्याप्युपकरणरूपस्याचेतनस्वभावस्यार्थप्रतिपत्तौ करणतोपचारात् । परमार्थतो भावेंद्रियस्यैव-अर्थग्रहणशक्तिलक्षणस्य साधकतमतया करणताध्यवसनात् । न चैतदसिद्धं विशुद्धधिषणजनमनसि युक्तियुक्ततया परिवर्तमानत्वात् । तथाहि—

'यदसन्निधाने कारकांतरसन्निधानेऽपि यन्नोपपद्यते तत् तत्करणकं । यथा कुठारासन्निधाने काष्ठछेदनमनुत्पद्यमानं कुठारकरणकं । नोत्पद्यते च भावेंद्रियासमवधानेऽर्थसंवेदनमुपकरणसद्भावेऽपि, इति तद्भावेंद्रियकरणकं । बहिःकरणसन्निकर्षाधीनतायां हि पदार्थसंवेदनस्य, नयनसन्निकर्षात् कलश इव नभसि नायनसंवेदनोदयः कुतो न भवेत् ? । न हि नयननभसोरन्यतरकर्मजः संयोगो न विद्यते एवेति वक्तुं युक्तं सकलमूर्तिमद्द्रव्यसंयोगान्नभसि सर्वगतत्वसाधनविरोधात् । न च नयनममूर्तिमदेव ? तस्य परैर्भौतिकतयोपगतत्वात् । पौद्गलिकतयास्माभिरुपकरणस्याभिमतत्वात् । ननु नभसि नयनसन्निकर्षस्य योग्यताविरहान्न संवेदननिमित्तता ? इत्यपि न साधीयः तद्योग्यताया एव साधकतमत्वानुषंगात् । का चेयं सन्निकर्षस्य योग्यता नाम ? विशिष्टा शक्तिरिति चेत् ? सा तर्हि सहकारिसन्निधिलक्षणा अनुमंतव्या ।

'सहकारिसांनिध्यं शक्तिः' इत्युद्योतकरवचनात् । सहकारिकारणं च द्रव्यं गुणः कर्मादि वा स्यात्? न तावदात्मद्रव्यं सहकारि तत्सन्निधानस्य नयननभःसन्निकर्षेऽपि समानत्वात् । एतेन कालद्रव्यं दिग्द्रव्यं च सहकारि निराकृतं तत्सान्निध्यस्यापि सर्वसाधरणत्वात् । मनोद्रव्यं सहकारि इत्यपि न संगतं तत्सन्निधेरपि समानत्वात् । कदाचित्तद्गतमनसः पुरुषस्याक्षार्थसन्निकर्षस्य संभवात् । एतेन आत्मा मनसा युज्यते, मन इंद्रियेण, इंद्रियमर्थेनेति चतुष्टयसन्निकर्षोऽर्थप्रमितौ साधकतम इति सामिग्रीप्रमाणवादो दूषितः-तत्सामिग्र्याश्च नभसि सद्भावात् । कालादिनिमित्तकारणसामिग्रीवत् । यदि पुनस्तेजोद्रव्यं सहकारि तत्सन्निधानात् चाक्षुषादिज्ञानप्रभवादिति मतं तदापि न विशेषः घटादाविव गगनेऽपि लोचनसन्निकर्षस्यालोकसन्निधिप्रसिद्धेः संवेदनानुषंगस्य दुर्निवारत्वात् । अथादृष्टविशेषो गुणः सहकारी तत्सान्निध्यं संयुक्तसमवायेन, चक्षुषा संयुक्ते पुरुषे त्वदृष्टविशेषस्य समवायात् इति मन्यध्वं तर्हि कदाचिन्नभसि नायनंसवेदनोदयः कुतो न भवेत्? । सर्वदा सर्वस्य तत्रादृष्टविशेषस्य सहकारिणोऽसन्निधानात् इति चेत्? कथमेवमीश्वरस्य नभसि चक्षुषा ज्ञानं श्रोत्रादिभिरिव घटते ? समाधिविशेषोपजनितधर्मविशेषानुगृहीतेन मनसा गगनाद्यशेषपदार्थसंवेदनोदये तु महेश्वरस्य बहिःकरणमनर्थकतामियात् । फलासंभवात् । बहिःकरणरहितस्य च नांतःकरणमुपपद्येत परनिर्वृत्तात्मवत् । ततः कथमंतःकरणेन धर्मादिग्रहणं मनसोऽसंभवे च न समाधिविशेषस्तदुपजनितधर्मविशेषो वा घटामट्याव्यते तस्यात्मांतःकरणसंयोगनिबंधनात् ।

स्यान्मतं शिशिरराश्मिशेखरस्य समाधिविशेषसंततिर्धर्मविशेषसंततिश्च सर्वार्थज्ञानसंततिहेतुरनाद्यपर्यवसाना, सततमेनोमलैरस्पृष्टत्वात् । तस्य संसारिसादिमुक्तिविलक्षणत्वात् सर्वथा मुक्ततयैव प्रसिद्धत्वात् इति तदप्यसमीचीनं एवमीश्वरस्यापि एनोमलविलयादेरेवार्थसंवेदनोद्भवप्रसक्तेः । सततमेनोमलाभावो हि यथा सततमर्थज्ञानसंतानहेतुरुररीक्रियते तथा कादाचित्कैनोमलाभावः कदाचिदर्थप्रमितिनिमित्तयुक्तमुत्पश्यामः तस्यैव सन्निकर्षसहकारितोपपत्तेः । तत्सान्निध्यस्यैव च सन्निकर्षशक्तिरूपत्वसिद्धेः । तद्भावादेव च नयनसन्निकर्षेऽपि नभसि संवेदनानुत्पत्तिघटनात् । तत्र विशिष्टधर्मोऽपि न पापमलापायादपरः प्रतिपद्यते भावांतरस्वभावत्वादभावस्य, निःस्वभावस्य सकलप्रमाणगोचरातिक्रांतत्वेन व्यवस्थापयितुमशक्यत्वात् इति पुरुषगुणविशेषसद्भाव एव पापमलाभावो विभाव्यते । स चात्मविशुद्धिविशेषो ज्ञानावरणवीर्यांतरायक्षयोपशमभेदः स्वार्थप्रमितौ शक्तिर्योग्यतेति च स्याद्वादवेदिभिरभिधीयते । प्रमातुरुपलब्धिलक्षणप्राप्तापि नातोर्थांतरभावमनुभवति पुंसः संवेदनावरणवीर्यांतरायलक्षणपापमलापगमविरहे क्वचिदुपलब्धिलक्षणप्राप्ततानुपलब्धेः, नयनोन्मीलनादिकर्मणो दृश्यादृश्ययोः साधारणत्वात् प्रद्योतादिकरणसाकल्यवत् । एतेन नयनोन्मीलनादिकर्मसन्निकर्षसहकारिविषयगतं चोपलभ्यत्वसामान्यमिति प्रत्याख्यातं तत्सन्निधाने सत्यपि क्वचित्कस्यचित् प्रमित्यनुपपत्तेः कालाकाशादिवत् । न हि तत्रोपलभ्यत्वसामान्यमसंभाव्यं योगिनोऽप्यनुपलब्धिप्रसंगात् । अस्मादृशापेक्षयोपलभ्यत्वसामान्यमन्यदेव योगीश्वरापेक्षादुपलभ्यतासामान्यादिति चेत्? तत्किमन्यत्? अन्यत्र योग्यताविशेषात् । प्रतिपुरुषं भेदमास्तिघ्नुवानादिति(?) स एव प्रमातुः प्रमित्युपजनने साधकतमोऽनुमंतव्यः सन्निकर्षादौ सत्यपि क्वचित्संविदुपजननाभावविभावनात् । स च योग्यताविशेषः स्वार्थग्रहणशक्तिः । आत्मनो भावकरणं ज्ञानमेव फलरूपत्वात् स्वार्थज्ञानात्कथंचिदभिन्नत्वात् सर्वथापि ततो भेदे नात्मस्वभावत्वोपपत्तेः । न चैवमुपगंतुं युक्तं? आत्मन एवोभयनिमित्तवशात्तथापरिणमात् । आत्मनो हि जानात्यनेनेति करणसाधनात् भेदोपवर्णनं कथं चिदभिन्नकर्तृकस्य करणस्य प्रसिद्धेः अग्निरौष्ण्येन दहतीधनमिति यथा । स्वातंत्र्यविवक्षायां तु जानातीति ज्ञानमात्मैव, कर्तृसाधनत्वात्तदात्मज्ञानयोरभेदप्राधान्यात् आत्मन एव स्वार्थग्रहणपरिणाममापन्नस्य ज्ञानव्यपदेशसिद्धेः औष्ण्यपरिणाममापन्नस्याग्नेरौष्ण्यव्यपदेशवत् । तेन ज्ञानात्मा ज्ञानात्मना ज्ञेयं जानाति इति व्यवहारस्य प्रतीतिसिद्धत्वात् । यथा च

ज्ञानात्मैव प्रमाता स्यात्, अज्ञानात्मनः खादेः प्रमातृत्वायोगात् तथा ज्ञानात्मैव प्रमाणं स्वार्थप्रमितौ ज्ञानक्रियात्मिकायां करणत्वात् । अज्ञानात्मनस्तत्र साधकतमत्वाघटनान्नाज्ञानं प्रमाणं, अन्यत्रोपचारतः । ततो नाज्ञानेन इंद्रियसन्निकर्षलिंगशब्दादिना साधनस्य व्यभिचारः । नापि व्यतिरेकासिद्धिः सम्यग्ज्ञानत्वस्य साध्यस्य निवृत्तौ प्रमाणत्वस्य साधनस्य पटादौ विनिवृत्तिविनिश्चयात् । केवलव्यतिरेकिणोऽपि साधनस्य समर्थनात् । ततः सूक्तं सम्यग्ज्ञानमेव प्रमाणमज्ञानस्य प्रमाणत्वायोगान्मिथ्याज्ञानवदिति ।

किं पुनः सम्यग्ज्ञानं ? अभिधीयते–स्वार्थव्यवसायात्मकं सम्यग्ज्ञानं सम्यग्ज्ञानत्वात् । यत्तु न स्वार्थव्यवसायात्मकं तन्न सम्यग्ज्ञानं यथा संशयविपर्यासानध्यवसायाः । सम्यग्ज्ञानं च विवादापन्नं तस्मात्स्वार्थव्यवसायात्मकमिति सुनिश्चितान्यथानुपपत्तिनियमनिश्चयलक्षणो हेतुः प्रसिद्ध एव सम्यगवबोधादीनां साध्यधर्मिणि सद्भावात् । स्वसंवेदनेंद्रियमनोयोगिप्रत्यक्षैः सम्यग्ज्ञानैः–अव्यवसायात्मकैर्व्यभिचारी हेतुः? इति स्वमनोरथमात्रं सौगतस्य तेषां सम्यग्ज्ञानत्वविरोधात् । सम्यग्ज्ञानत्वं ह्यविसंवादकत्वेन व्याप्तं तदभावे तदसंभवात् । तदपि प्रवर्तकत्वेन व्याप्तं तदभावे तदसंभवात् । तदप्यर्थप्रापकत्वेन अर्थप्रापकस्याविसंवादित्वात् । निर्विषयज्ञानवत् । तदपि प्रवर्तकत्वेन व्याप्तं अप्रवर्तकस्यार्थाप्रत्यायकत्वात् । तद्वत् प्रवर्तकत्वमपि विश्वविषयोपदर्शकत्वेन व्याप्तं स्वविषयमुपदर्शयतः प्रवर्तकव्यवहारविषयत्वसिद्धेः । न हि पुरुषं हस्ते गृहीत्वा ज्ञानं प्रवर्तयति । स्वविषयं रूपं दर्शयत् प्रवर्तकमुच्यते अर्थप्रापकं च इत्यविसंवादकं सम्यग्वेदकं प्रमाणं तद्विपरीतस्य मिथ्याज्ञानत्वप्रसिद्धेः संशयवदिति धर्मोत्तरमतं । तत्राव्यवसायात्मकस्य चतुर्विधस्यापि समक्षस्य सम्यग्वेदनत्वं न व्यवतिष्ठते तस्य स्वविषयोपदर्शकत्वाऽसिद्धेः । तत्सिद्धौ वा नीलादाविव क्षणक्षयादावपि तदुपदर्शकत्वप्रसक्तेः । ततो यदव्यवसायात्मकं ज्ञानं न तत्स्वविषयोपदर्शकं यथा गच्छतः तृणस्पर्शसंवेदनं । अध्यवसायि प्रसिद्धमव्यवसायात्मकं च सौगताभिमतदर्शनमिति व्यापकानुपलब्धिः सिद्धा । व्यवसायात्मकस्य व्यापकस्याभावे तद्व्याप्यत्वस्य स्वविषयोपदर्शकत्वस्याननुभवात् ।

स्यादाकूतं–– तेन व्यवसायात्मकत्वेन स्वविषयोपदर्शकत्वस्य व्याप्तिः सिद्धिमधिवसति तस्य व्यवसायजनकत्वेन व्याप्तत्वात् । नीलधवलादौ व्यवसायजननादर्शनस्य तदुपदर्शकत्वव्यवस्थितेः । क्षणक्षयस्वर्गप्रापणशक्त्यादौ व्यवसायाजनकत्वात् तदनुपदर्शकत्वव्यवस्थानात् । गच्छत्तृणस्पर्शसंवेदनस्यापि तत एव स्वविषयोपदर्शकत्वाभावसिद्धेः मिथ्याज्ञानत्वव्यवहारात् अन्यथानध्यवसायित्वाघटनात् इति ? तदेतदविचारितरमणीयं ताथागतस्य व्यवसायो हि दर्शजन्यः । स किं दर्शनविषयस्योपदर्शकोऽनुपदर्शको वा ? इति विचार्यते– यद्युपदर्शकस्तदा स एव तत्र प्रवर्तकः प्रापकश्च स्यात् संवादकत्वात् सम्यक्संवेदनवत् । न तु तन्निमित्तं दर्शनं सन्निकर्षादिवत् । अथानुपदर्शकः ? कथं दर्शनं तज्जननात् स्वविषयोपदर्शकं ? अतिप्रसंगात् । संशयविपर्यासकारणस्यापि स्वविषयोपदर्शकत्वापत्तेः । दर्शनाविषयसामान्याध्यवसायित्वाद्विकल्पतज्जनकं दर्शनं स्वविषयोपदर्शकमिति च न चेतसि स्थापनीयं दर्शनविषयसामान्यस्यान्यापोहलक्षणस्यावस्तुत्वात् । तद्विषयव्यवसायजनकस्य वस्तूपदर्शकत्वविरोधात् । दृश्यसामान्ययोरेकत्वाध्यवसायाद्वस्तूपदर्शक एव व्यवसाय इत्यपि मिथ्या तयोरेकत्वाध्यवसायासंभवात् । तदेकत्वं हि दर्शनमध्यवस्यति तत्पृष्ठजो व्यवसायो वा ज्ञानांतरं वा ? न तावद्दर्शनं तस्य विकल्पाविषयत्वात् । नापि तत्पृष्ठजो व्यवसायः तस्य दृश्यागोचरत्वात् । तदुभयविषयं ज्ञानांतरं तु निर्विकल्पकं विकल्पात्मकं वा ? न तावन्निर्विकल्पकं तस्य दृश्यविकल्प्यद्वयविषयत्वविरोधात् । नापि विकल्पात्मकं तत एव । नच तद्द्वयाविषयं संवेदनं तदुभयैकत्वमध्यवसातुं समर्थं । तथाहि– यद्यन्न विषयी कुरुते न तत्तदेकत्वमध्यवस्यति यथा रससंवेदनं स्पर्शरूपोभयं । न विषयी कुरुते च दृश्यविकल्प्योभयं किंचित्संवेदनं, इति न कुताश्चिद्दृश्यविकल्प्ययोरेकत्वाध्यवसायः सिद्धयेत् ततो न व्यवसायो वस्तूपदर्शकः स्यात् । नापि तदुपजननादर्शनं स्वविषयवस्तूपदर्शकं योगिप्रत्यक्षस्य विधूतकल्पनाजालस्य सर्वदा वस्तुविकल्पाजनकत्वात् तदुपदर्शकत्वविरोधात् । स्वसंवेदनमपि न तस्य स्वरूपोप-

दर्शकं तद्विकल्पानुत्पादकत्वात् इति कुतः स्वरूपस्य स्वतो गतिरवतिष्ठेत ?। किं च दर्शनपृष्ठभाविनो विकल्पस्य स्वसंवेदनबलात्सिद्धौ तत्स्वसंवेदनं कुतः प्रमाणं स्यात् ?। तद्यदि स्वरूपोपदर्शनादेव प्रमाणमास्थीयते ? तदा स्वर्गप्रापणशक्त्यादावपि प्रमाणतामास्कंदेत्। तत् स्वसंविदाकार एव प्रमाणं तद्व्यवसाय जननात्-न पुनरन्यत्रेति परिकल्पनायां तद्व्यवसायस्वसंवेदनस्यापि व्यवसायांतरोपजननात् स्वरूपोपदर्शनेन भवितव्यमित्यनवस्थानात्, नाद्यव्यवसायस्वसंवेदनस्य प्रामाण्यं। तदप्रामाण्ये च न तत एव व्यवसायसिद्धिः। तदसिद्धौ च न तज्जननाद्दर्शनस्य स्वविषयोपदर्शकत्वं। तदभावे च न तस्य प्रवर्तकत्वं। अप्रवर्तकस्य नार्थप्राप्तिनिमित्तत्वं। तदसंभवे च नाविसंवादकत्वं तद्विरहे च न सम्यग्ज्ञानत्वं स्वसंवेदनेंद्रियमनोयोगिज्ञानानामिति न तैर्व्यभिचारः साधनस्य संभवति।

स्यान्मतं—अर्थसामर्थ्यादुत्पत्तिः—अर्थसारूप्यं च दर्शनस्य स्वविषयोपदर्शकत्वं तच्च सकलसमक्षवेदनानामव्यवसायात्मकत्वेऽपि संभवत्प्रवर्तकत्वमर्थप्रापकत्वमविसंवादकत्वं सम्यग्ज्ञानलक्षणमिति तैः समीचीनैर्न्यभिचार एव हेतोरिति ? तदपि दुर्घटमेव क्षणक्षयादावपि तदुपदेशकत्वप्रसंगात्। तत्राक्षणिकत्वादिसमारोपानुप्रवेशादयोगिनः प्रतिपत्तुर्नोपदेशकत्वमवतिष्ठते। योगिनस्तु समारोपासंभवात् क्षणक्षयादावपि दर्शनं तदुपदेशकमेवेति समाधानमपि न धीमद्धृतिकरं नीलादावप्ययोगिनस्तद्विपरीतसमारोपप्रसक्तेः। कथमन्यथा विरुद्धधर्माध्यासात्तदर्शनभेदो न भवेत् ? न हि—अभिन्नमेकदर्शनं क्वचित्समारोपाक्रांतं क्वचिन्नेति वक्तुं युक्तं। ततो यद्यत्र विपरीतसमारोपविरुद्धं तत्तत्र निश्चायात्मकं यथानुमेयेऽर्थेऽनुमानज्ञानं। विपरीतसमारोपविरुद्धं च नीलादौ दर्शनमिति व्यवसायात्मकमेव बुद्ध्यामहे। निश्चयहेतुत्वाद्दर्शनं नीलादौ विपरीतसमारोपविरुद्धं न पुनर्निश्चयात्मकत्वात् ततोऽन्यथानुपपत्तिः साधनस्यानिश्चितेति मामंस्थाः योगिप्रत्यक्षेऽस्य विपरीतसमारोपस्य प्रसंगात् तेन तस्याविरोधात्। परेषां तु तस्यापि निश्चयात्मकत्वात्तेन विरोधः सिद्ध एव। तथा निश्चयहेतुना दर्शनेन विरुद्धं प्रतिपादयतः स्वमतविरोधः स्यात्। निश्चयारोपमनसोर्बाध्यबाधकभाव इति धर्मकीर्तेरभिमतत्वात् दर्शनारोपयोर्विरोधाभावासिद्धेः। ननु चार्थदर्शनस्य निश्चयात्मकत्वे साध्ये प्रत्यक्षविरोधः संहृतसकलविकल्पदशायां रूपादिदर्शनस्यानिश्चयात्मकस्यानुभवात्। तदुक्तं—

संहृत्य सर्वताश्चिंतां स्तिमितेनांतरात्मना।
स्थितोऽपि चक्षुषा रूपमीक्षते साक्षजा मतिः॥ १॥ इति।

तथानुमानविरोधोऽपि व्युच्छित्तचिंतावस्थायां—इंद्रियादर्थगतौ कल्पनानुपलब्धेः। तत्र कल्पनासद्भावे पुनस्तत्स्मृतिप्रसंगः तदा विकल्पितकल्पनावत्—तदप्युक्तं—

पुनर्विकल्पयन् किंचिदासीन्मे कल्पनेदृशी।
इति वेत्ति न पूर्वोक्तावस्थायामिंद्रियाद्गतौ॥ १॥—इति

तदेतदपि धर्मकीर्तेरपरीक्षिताभिधानं प्रत्यक्षतो निर्विकल्पदर्शनाप्रसिद्धत्वात्। संहृतसकलविकल्पावस्था ह्यश्वं विकल्पयतो गोदर्शनावस्था। न च तदा गोदर्शनमव्यवसायात्मकं पुनः स्मरणाभावप्रसंगात्। तस्य संस्कारकारणत्वविरोधात् क्षणिकत्वादिवत्। व्यवसायात्मन एव दर्शनात्। संस्कारस्य स्मरणस्य च संभवात् अन्यतस्तदनुपपत्तेः। ददुक्तं—

व्यवसायात्मनो दृष्टेः संस्कारः स्मृतिरेव वा।
दृष्टे दृष्टसजातीये नान्यथा क्षणिकादिवत्॥ १॥

अथ मतं—अभ्यासप्रकरणबुद्धिपाटवार्थित्वेभ्यो निर्विकल्पकादपि दर्शनान्नीलादौ संस्कारः स्मरणं चोत्पद्यते न पुनः क्षणिकादौ तदभावात्। व्यवसायात्मनोऽपि प्रत्यक्षात्तत एव संस्कारस्मरणोपपत्तेः। तेषामभावे निश्चितेऽपि वस्तुनि नियमेन संस्कारादेरभावात् तेषां व्यवसायात्मकसमक्षवादिनोऽपि नियमतो-

ऽभ्युपगमनीयत्वात् इति ? तदपि फल्गुप्रायं भूयोदर्शनलक्षणस्याभ्यासस्य क्षणक्षयादौ सुतरां सद्भावात् । पुनपुनर्विकल्पोत्पादरूपस्य चाभ्यासस्य परं प्रत्यसिद्धत्वात् तत्रैव विवदात् । क्षणिकाक्षणिकविचारणायां क्षणिकप्रकरणस्यापि भावात् । बुद्धिपाटवं तु नीलादौ क्षणक्षयादौ च समानं तद्दर्शनस्यानंशत्वात् । तत्र पाटवापाटवयोर्भेदे तद्बुद्धेरपि भेदापत्तेः, विरुद्धधर्माध्यासात् । तथाविधतद्वासनाख्यकर्मवशाद्बुद्धेः पटवापाटवे स्यातां, इत्यप्यनेनापास्तं तत्कर्मसद्भावयोरपि विरुद्धधर्मयोरनंशबुद्धावेकस्यामसंभवात् । यत्पुनरर्थित्वं जिज्ञासितत्वं तत्क्षणिकवादिनः क्षणिकत्वेऽस्त्येव नीलादिवत् । यत्पुनरभिलषितृत्वमर्थित्वं तन्न व्यवसायजननिबंधनं क्वचिदनभिलषितेऽपि वस्तुनि कस्य चिदुदासीनस्य स्मरणप्रतीतेः—इति नाभ्यासादिभ्यः क्वचिदेव संस्कारजननं—अनंशज्ञानज्ञेयवादिनो घटते । परस्य तु बहिरंतरनेकात्मकतत्त्ववादिनो न किंचिदनुपपन्नं सर्वथैकत्र व्यवसायाव्यवसाययोः, अवायानवायाख्ययोः, संस्कारासंस्कारयोः, धारणेतराभिधानयोः, स्मरणास्मरणयोश्चानभ्युपगमात् । तद्भेदात्कथंचिद्बोधबोध्ययोर्भेदप्रसिद्धेः ।

सौगतस्यापि व्यावृत्तिभेदाद्भेदोपगमाददोषोयं तथाहि—नीलत्वमनीलत्वव्यावृत्तिः,क्षणिकत्वमक्षणिकत्वव्यावृत्तिरुच्यते तत्रानीलव्यावृत्तौ नीलव्यवसायस्तद्वासनाप्रबोधादुत्पन्नो न पुनरक्षणिकव्यावृत्तौ क्षणिकव्यवसायस्तत्र तद्वासनाप्रबोधाभावात् । न चानयोर्व्यावृत्त्योरभेदः संभवति व्यावर्त्यमानयोरभेदप्रसंगात् । न च तद्भेदाद्वस्तुनो भेदः तस्य निरंशत्वात् अन्यथा अनवस्थाप्रसंगात् इति परे मन्यंते तेपि न सत्यवादिनः स्वभावभेदाभावे वस्तुनो व्यावृत्तिभेदासंभवात् । नीलस्वलक्षणं हि येन स्वभावेनानीलाद्व्यावृत्तं तेनैव यद्यक्षणिकाद्व्यावर्तेत तदा नीलाक्षणिकयोरेकत्वापत्तेस्तद्व्यावृत्त्योरेकत्वप्रसंगः । स्वभावांतरेण तत्ततो व्यावृत्तमिति वचने तु सिद्धः स्वलक्षस्य स्वभावभेदः कथं निराक्रियते ? । यदि पुनः स्वभावभेदोऽपि वस्तुनो तत्स्वभावव्यावृत्त्या कल्पित एवेति मतं ? तदा परिकल्पितस्वभावांतरकल्पनायामनवस्थानुषज्येत । तथाहि—अनीलस्वभावान्यव्यावृत्तिरपि स्वभावांतरेण अन्यव्यावृत्तिरूपेण वक्तव्या । सापि तदन्यव्यावृत्तिस्वभावांतरेण तथाविधेनेति न क्वचिद् व्यवतिष्ठते ।

कश्चिदाह—तत एव सकलविकल्पवाग्गोचरातीतं वस्तु विकल्पशब्दानां विषयस्यान्यव्यावृत्तिरूपस्य अनाद्यविद्योपकल्पितस्य सर्वथा विचाराऽसहत्वात् । विचारसहत्वे वा तदवस्तुत्वविरोधात् इति सोपि न सम्यग्वादी दर्शनविषयस्याप्यवस्तुत्वप्रसंगात् तस्यापि शब्दविकल्पविषयवत् विचारासहत्वाविरोधात् । तथाहि—नीलस्वलक्षणं सुगतेतरजनदर्शनविषयतामुपगच्छत् किमेकेन स्वभावेन नानास्वभावेन वा दृश्यं स्यात् ? तद्यद्येकेन स्वभावेन तदा यदेव सुगतदृश्यत्वं तदेवेतरजनदृश्यत्वमित्यायातं अशेषस्य जगतः सुगतत्वं । यच्चेतरजनदृश्यत्वं तदेव सुगतदृश्यत्वमिति सकलस्य सुगतस्येतरजनत्वापत्तेः सुगतरहितमखिलं स्यात् । अथैतस्माद्दोषाद्भिन्यता नानास्वभावेन सुगतेतरजनदृश्यत्वं प्रतिपाद्यते तदा नीलस्वलक्षणस्य दृश्यस्वभावभेदः कथमपह्नुयेत ? न च दृश्यं रूपमनेकं कल्पितमिति शक्यं वक्तुं दृश्यस्य कल्पितत्वविरोधात्। अथ मन्येथाः स्वलक्षणस्य दृश्यत्वं स्वाकारार्पकत्वव्यावृत्तिरूपं नानादृष्टद्रव्यपेक्षयाऽनेकं घटामटल्येव तदभावे नानादृष्टदर्शनविषयतां स्वलक्षणं नास्कंदेत् । न च परमार्थतो दर्शनं दृश्यविषयं सर्वज्ञानां स्वरूपमात्रपर्यवसितत्वात् । उपचारादेव बहिर्विषयताव्यवहारात् इति तदप्यसत् वस्तुनः स्वाकारार्पकत्वस्यापि पूर्वपर्यनुयोगानतिक्रमात् । तद्धि स्वलक्षणं येन स्वभावेन सुगतदर्शनाय स्वाकारमर्पयति तेनैवेतरजनदर्शनाय स्वभावांतरेण वा ? यदि तेनैव तदा तदेव सुगतेतरजनदर्शनैकत्वमापनीपद्यते तथा च सर्वस्य सुगतत्वं इतरजनत्वं वा दुर्निवारतामाचनीस्कंद्यते । स्वभावांतरेण स्वाकारार्पकत्वे स एव वास्तवः स्वभावभेदः स्वलक्षणस्याक्षुण्णतया कथं प्रतिक्षिप्यते ? । यत्पुनः स्वाकारार्पकत्वमपि न वस्तुनः परमार्थपथप्रस्थायि समवस्थाप्यते स्वरूपमात्रविषयत्वात् सकलसंवेदनानामिति मतं तदपि

दुरुपपादमेव तेषां वैयर्थ्यप्रसंगात्। ज्ञानं हि ज्ञेयप्रसिद्ध्यर्थं प्रेक्षावतामन्विष्यते प्रकाश्यप्रसिद्ध्यर्थं प्रदीपादिवत्। न पुनः स्वरूपप्रसिद्ध्यर्थं प्रदीपवदेवेति। बहिरर्थाविषयत्वे सकलसंवेदनानां कथमिव वैयर्थ्यं न स्यात्? निर्विषयस्वप्नादिसंवेदनानामपि सार्थकत्वप्रसंगात् स्वरूपप्रकाशनस्य प्रयोजनस्य सर्वत्र भावात्। किं च सुगतसंवेदनस्यापि स्वरूपमात्रपर्यवसितायां कथमिव सुगतः सर्वदर्शीष्यते पृथग्जनवत्। पृथग्जनो वा कथं न सर्वदर्शी सुगतवदनुमन्येत? स्वरूपमात्रपर्यवसितायाः तत्संवेदनेऽपि सद्भावात्। यदि पुनर्वास्तवत्वं सकलवेदित्वं तथागतस्योररीक्रियते संवृत्त्या तस्य व्यवहारिभिः संव्यवहरणात् तदव्यहरणे तद्वचनस्य सत्यताव्यवहारानुपपत्तेः सकलज्ञानरहितपुरुषोपदेशाद्विप्रलंभनशंकनप्रसंगात्। तदुक्तं—

ज्ञानवान् मृग्यते कश्चित्तदुक्तप्रतिपत्तये।
अज्ञोपदेशकरणे विप्रलंभनशंकिभिः॥ १॥ इति

प्रतिपद्येत तथापि सुगतेतरव्यवहारसिद्धिः· सुगतवदितरजनस्यापि संवृत्त्या सकलवेदित्वकल्पनानुषंगात्। सकलपदार्थेभ्यः सुगतस्य संवेदनोदयात् सकलार्थज्ञता युक्ता कल्पयितुं न पुनरितरजनस्य प्रतिनियतपदार्थादेव तद्वेदनोत्पत्तेरिति चेत्? न सुगतज्ञानस्यापि सकलपदार्थजन्यत्वासिद्धेः। समसमयवर्तिपदार्थजन्यत्वासंभवात्। यदि पुनरनाद्यतीतपदार्थेभ्यो भविष्यदनंतार्थेभ्यः सांप्रतिकार्थेभ्यश्च सकलेभ्यः सुगतसंवेदनस्योत्पत्तिः अखिलाविद्यातृष्णाविनाशादुपपद्यत एव अस्मदादिसंवेदनाद्विशिष्टत्वात्तस्येति मतं? तदा किमेकेन स्वभावेन कालत्रयवर्तिपदार्थैः सुगतविज्ञानमुत्पद्यते नानास्वभावैर्वा? यद्येकेन स्वभावेन, एकेनार्थेन सुगतज्ञानमुपजन्यते तेनैव सकलपदार्थैः तदा सकलपदार्थानामेकरूपतापत्तिः। सुगतविज्ञानस्य वा तदेकपदार्थजन्यत्वसिद्धिरिति नेतरजनसंवेदनात्तस्य विशेषः सिद्ध्येत्। अथान्येन स्वभावेनैकार्थः सुगतज्ञानमुपजनयति पदार्थांतराणि तु स्वभावांतरैस्तदुपजनयंति इति मतिर्भवतां तर्हि सुगतज्ञानमनंतस्वभावमेकमायातं। तद्वत्सकलं वस्तु कथमनंतात्मकतां न स्वीकुर्यादिति चिंतनीयं। एकस्यानेकस्वभावत्वविरोधान्नैकमनेकात्मकमिति चेत्? कथमिदानीं सुगतविज्ञानमेकपदार्थजन्यं नानारूपतां बिभर्ति?। यदि पुनरतज्जन्यरूपव्यावृत्त्या तज्जन्यरूपपरिकल्पनान्न तत्त्वतः सुगतसंवेदनमनेकरूपताक्रांतमित्याकूतं? तदा न परमार्थतः सुद्रोदनितनयविज्ञानमखिलपदार्थजन्यं, इति कुतः पृथग्जनसंवेदनादस्य विशेषः समवतिष्ठते?। ततः सुगतविज्ञानदृश्यतामितरजनविज्ञानविषयतां च एकस्य नीलादिस्वलक्षणस्यानेकाकारामपि स्वयमुररीकुर्वता नीलस्वलक्षणकादिरूपतापि दृश्यादृश्यत्वलक्षणा स्वीकर्तव्या, तथा च नीलादौ दर्शनमन्यद्व्यवसायात्मकं संस्कारस्मरणकारणं तद्विपरीदर्शनादवबोद्धव्यं, इति न प्रत्यक्षप्रसिद्धं निर्व्यवसायात्मकत्वमध्यक्षज्ञानस्य। नाप्यनुमानप्रसिद्धं गोदर्शनसमयेऽश्वकल्पनावत् गोदर्शनस्यापि व्यवसायात्मकत्वोपपत्तेः। पुनर्विकल्पयतः तदनुस्मरणस्यान्यथानुपपत्तेः। तथा हि यन्निर्व्यवसायात्मकं ज्ञानं तन्नोत्तरकालमनुस्मरणजननसमर्थं यथा पराभिमतं स्वर्गप्रापणशक्त्यादिदर्शनं तथा चाश्वविकल्पकाले गोदर्शनमिति तदनुस्मरणजननसमर्थं न स्यात् भवति च पुनर्विकल्पयतस्तदनुस्मरणं तस्माद्व्यवसायात्मकमिति निश्चयः। तदेवं व्यवसायात्मकत्वे साध्ये सम्यग्ज्ञानं साधनं न व्यभिचरति कस्य चिदपि सम्यग्ज्ञानस्याव्यवसायात्मकत्वप्रमाणबाधितत्वादिति स्थितं।

ये त्वाहुः—स्वार्थव्यवसायात्मकत्वे साध्ये सम्यग्ज्ञानस्य हेतोर्न प्रयोजकत्वं सर्वस्य सम्यग्ज्ञानस्यार्थव्यवसाययमंतरेणैव सम्यग्ज्ञानत्वसिद्धेः। तथा हि—विवादाध्यासितं सम्यग्ज्ञानं नार्थव्यवसायात्मकं ज्ञानत्वात्, स्वव्यवसायात्मकत्वात्। यद्ज्ञानं स्वव्यवसायात्मकं वा तन्नार्थव्यवसायात्मकं यथा स्वप्नादिज्ञानं तथा च विपदावनं ज्ञानं जिनपतिमतानुसारिभिः, अभ्यनुज्ञातं तस्मान्नार्थव्यवसायात्मकमिति तेपि न प्रातीति-

कत्वादिनः जागृदशाभाविनः समीचीनविज्ञानस्यार्थव्यवसायात्मकत्वप्रतीतेः । तस्यार्थाव्यवसायात्मकत्वे-ततोऽर्थे प्रवृत्त्यभावप्रसंगात् । प्रतीयते च सम्यग्ज्ञानादर्थे प्रवृत्तिरविसंवादिनी तस्मादर्थव्यवसायात्मकं तदर्थे प्रवृत्त्यन्यथानुपपत्तेः । मिथ्याज्ञानादप्यर्थे प्रवृत्तिदर्शनादनेकांतः ? इति चेन्न तस्याः प्रवृत्त्याभास-त्वात्, व्यवसितार्थप्राप्तिनिमित्तत्वाभावात् । व्यवसितमर्थं प्रापयितुं समर्था हि सम्यक् प्रवृत्तिः सा च मिथ्या-ज्ञानान्नोपपद्यत इति न व्यभिचारः । यच्चार्थव्यवसायात्मकत्वनिराकरणप्रवणमनुमानं तत्स्वार्थं व्यवस्यति वा न वा ? प्रथमविकल्पे तेनैवानैकांतिकं साधनमापद्येत तस्य ज्ञानत्वे स्वव्यवसायात्मकत्वेऽपि स्वसाध्यार्थ-व्यवसायात्मकत्वसिद्धेः । द्वितीयविकल्पेऽपि नातोऽनुमानादिष्टसिद्धिः स्वसाध्यार्थव्यवसायात्मकत्वात् अनु-मानाभासवत् । ततः किं बहुना सर्वस्य किंचिदिष्टं साधयतः स्वयमनिष्टं वा दूषयतः कुतश्चित्प्रमाणात् तस्यार्थव्यवसायात्मकत्वाभ्यनुज्ञानमवश्यंभावि तस्यार्थाव्यवसायात्मकत्वे स्वेष्टानिष्टसाधनदूषणानुपपत्तेः । पर-प्रसिद्ध्यार्थव्यवसायिनः प्रमाणस्याभ्यनुज्ञानाददोष इति चेत् ? तर्हि परं प्रतिपाद्यसे वा न वा ? यदि न प्रतिपाद्यसे कथं परप्रसिद्ध्या क्वचिदभ्युनुज्ञानं ? तं न प्रतिपाद्यसे तत्प्रसिद्ध्या च किंचिदभ्यनुजानासीति कथमनुन्मत्तः ? । अथ परं प्रतिपाद्यसे तर्हि यतः प्रमाणात्तत्प्रतिपत्तिः तत्स्वकीयार्थव्यवसायात्मकं सिद्धं तस्याव्यसायात्मकत्वे तेन परप्रतिपत्तेरयोगात् । यदि पुनः पराभ्युपगमांतरात्परप्रतिपत्तिरिति मतं तदाप्य-निवृत्तः पर्यनुयोगः तस्यापि पराभ्युपगमांतरस्य प्रतिपत्त्यप्रतिपत्तिपूर्वकत्वे पूर्वोक्तदूषणानतिक्रमात् ।

स्यान्मतं न बहिरर्थाः परमार्थतः संति तत्प्रत्ययानां निरालंबनत्वात् स्वप्नप्रत्ययवत् सतानांतरवि-ज्ञानानामपि असत्त्वात् । तत्र स्वरूपमात्रव्यवसायात्मकमेव विज्ञानमिति तदप्यसारं तथाहि—सर्वप्रत्य-यानां निरालंबनत्वं न तावत्प्रत्यक्षतः सिद्ध्यति तस्य तद्विषयत्वात् । विवादापन्नाः प्रत्यया निरालंबना एव प्रत्ययत्वात् स्वप्नेंद्रजालादिवदिति अनुमानान्निरालंबनत्वसिद्धिरित्यपि मिथ्या स्वसंतानप्रत्ययेन व्यभिचारात् । तस्यापि संतानांतरप्रत्ययवत्पक्षीकरणे किमिदमनुमानज्ञानं स्वसाध्यार्थालंबनं निरालंबनं वा ? प्रथमपक्षे तेनैवा-नैकांतिकत्वं प्रत्ययत्वं । द्वितीयकल्पनायां नातो निरालंबनत्वसिद्धिः । परब्रह्मस्वरूपसिद्धिरेव सकलभेदप्रत्ययानां निरालंबनत्वसिद्धिः ? इत्यपि न व्यवतिष्ठते परब्रह्मण एवाप्रसिद्धेः । तद्धि स्वतो वा सिद्ध्येत् परतो वा ? न तावत्स्वत एव विप्रतिपत्त्यभावप्रसंगात् । परतश्चेदनुमानादागमाद्वा ? यद्यनुमानात् किमत्रानुमानमित्यभि-धीयतां । विवादापन्नोऽर्थः प्रतिभासांतः प्रविष्ट एव प्रतिभासमानत्वात् । यो यः प्रतिभासमानः स स प्रति-भासांतःप्रविष्ट एव दृष्टः यथा प्रतिभासस्यात्मा प्रतिभासमानश्च सकलोऽर्थश्चेतनाचेतनात्मको विवादापन्नः तस्मात्प्रतिभासांतःप्रविष्ट एवेत्यनुमानं न सम्यक् धर्मि-हेतु-दृष्टांतानां प्रतिभासांतःप्रविष्टत्वे साध्यांतःपाति-त्वेन अनुमानोत्थानायोगात् । प्रतिभासांतः प्रविष्टत्वाभावे तैरेवेति हेतोर्व्यभिचारात् । यदि पुनरनाद्यवि-द्यावासनाबलाद्धर्मि-हेतु-दृष्टांताः प्रतिभासबहिर्भूता इव निश्चीयंते प्रतिपाद्यप्रतिपादकसभ्यसभापतिजनवत् । ततोऽनुमानमपि संभवत्येव सकलानाद्यविद्याविलासविलये तु प्रतिभासांतःप्रविष्टमाखिलं प्रतिभासमेवेति विप्र-तिपत्त्यसंभवात् । प्रतिपाद्यप्रतिपादकभावाभावात् साध्यसाधनभावानुपपत्तेर्न किंचिदनुमानोपन्यासफलं । स्व-यमनुभूयमाने परब्रह्मणि प्रतिभासात्मनि देशकालाकारावच्छिन्नस्वरूपे निर्व्यभिचारे सकलकालावस्थाव्यापि-नि—अनुमानाप्रयोगात् इति समभिधीयते तदा साप्यनाद्यविद्या यदि प्रतिभासांतःप्रविष्टा तदाविद्यैव कथमसंतं धर्मिदृष्टांतादिभेदमुपदर्शयेत् । अथ प्रतिभासबहिर्भूतास्तदा साऽप्रतिभासमाना प्रतिभासमाना वा ? न ताव-दप्रतिभासमाना भेदे प्रतिभासरूपत्वात् तस्या' । प्रतिभासमाना चेत् तयैव हेतोर्व्यभिचारः प्रतिभास-बहिर्भूतत्वेऽपि तस्याः प्रतिभासमानत्वात् ।

स्यादाकूतं —न प्रतिभासमाना नाप्रतिभासमाना न प्रतिभासबहिर्भूता नापि प्रतिभासांतःप्रविष्टा नैका नचानेका न नित्या नाप्यनित्या न व्यभिचारिणी नाप्यव्यभिचारिणी सर्वथा विचार्यमाणायोगात् । सकलविचारातिक्रांतस्वरूपैव रूपांतराभावात् अविद्याया नीरूपतालक्षणत्वात् इति । तदेतदप्यविद्याविजृंभितमेव तथाविधनीरूपतास्वभावायाः केन चिदविद्यायाः कथंचिदप्रतिभासमानायाः वक्तुमशक्तेः । प्रतिभासमानायास्तु तथावचने कथमसौ सर्वथा नीरूपा स्यात् ! येन स्वरूपेण यः प्रतिभासते तस्यैव

तद्रूपत्वात्। तथा सकलविचारातिक्रांततया किमसौ विचारगोचरा अविचारगोचरा वा स्यात्? प्रथमकल्पनायां सकलविचारातिक्रांततया विचारानतिक्रांतत्वाभ्युपगमव्याघातः। द्वितीयकल्पनायां न सकलविचारातिक्रांतता व्यवतिष्ठते सकलविचारातिक्रांततायामपि तस्यास्तया व्यवस्थाने सर्वथैकानेकरूपतायां अपि व्यवस्थानप्रसंगात्। तस्मात्सत्स्वभावैवाविद्याभ्युपगंतव्या विद्यावत्। तथा च विद्याऽविद्याद्वैतप्रसिद्धेः कुतः परमब्रह्मणोऽनुमानात्सिद्धिः?। एतेनोपनिषद्वाक्यात्परमपुरुषसिद्धिः प्रत्याख्याता। सर्वं वै खल्विदं ब्रह्मेत्यादिवाक्यस्य परमात्मनोऽर्थांतरभावे द्वैतप्रसक्तेरविशेषात्। तस्यानाद्यविद्यात्मकत्वेऽपि पूर्वोदितदूषणप्रसंगात् ततो न परमपुरुषाद्वैतासिद्धिः स्वतः परतो वा येन सम्यग्ज्ञानं स्वव्यवसायात्मकमेव न पुनरर्थव्यवसायात्मकं—अर्थाभावादिति वदन् अवधेयवचनः स्यात्।

यत्तु स्वप्नज्ञानं स्वव्यवसायात्मकमेवेत्युक्तं तदपि न संगतं तस्य साक्षात्परंपरया वार्थव्यवसायात्मकत्वाघटनात्। द्विविधो हि स्वप्नः सत्योऽसत्यश्च तत्र सत्यो देवताकृतः स्यात् धर्माधर्मकृतो वा कस्यचित्साक्षादव्यवसायात्मकः प्रसिद्धः स्वप्नदशायां यदेशकालाकारतयार्थः प्रतिपन्नः पुनर्जागृद्दशायामपि तद्देशकालाकारतयैव तस्य व्यवसीयमानत्वात्। काश्चित्सत्यः स्वप्नः परंपरयार्थ-व्यवसायी स्वप्नाध्यायनिगदितार्थप्रापकत्वात्। तदुक्तं—

यस्तु पश्यति रौद्र्यंते राजानं कुजरं हयं।
सुवर्णं वृषभं गां च कुटुंबं तस्य वर्धते॥ १॥

इति कुटुंबवर्धनाविनाभाविनः स्वप्ने राजादिदर्शनस्य कथमर्थनिश्चायकता न स्यात्? पावकाविनाभाविधूमदर्शनवत्। दृष्टार्थाव्यवसायात्मकत्वान्न स्वप्नबोधोऽर्थव्यवसायी इति वचने लैंगिकोऽपि बोधोऽर्थव्यवसायी माभूत। तत एव तद्वत्। अनुमानबाधोऽनुमितार्थव्यवसायी संभवतीति वचने स्वप्नागमगम्यार्थव्यवसायी स्वप्नबोधोऽपि कथं नाभ्यनुज्ञायते?। कदाचिद्व्यभिचारदर्शनान्नैवमभ्युपगमः कर्तुं सुशक्य इति चेन्न देशकालाकारविशेषं यथार्थागमोदितमपेक्ष्यमाणस्य क्वचित्कदाचित्कथंचिद्व्यभिचाराभावात्। तदपेक्षाविकलस्तु न समीचीनः स्वप्नः तस्य स्वप्नाभासत्वात्। प्रतिपत्तुरपराधाच्च व्यभिचारः संभाव्यते न पुनरनपराधात् यथा चाधूमः धूमबुद्ध्या प्रतिपद्यमानस्य ततः पावकानुमानं व्यभिचारीति प्रतिपत्तुरेवापराधो न धूमस्य धीमद्भिरभिधीयते। तथैवास्वप्नं स्वप्नबुद्ध्याध्यवस्य ततस्तद्विषयाध्यवसायो न व्यभिचरतीति न स्वप्नागमस्यापराधः प्रतिपत्तेरेवापराधात्। यः पुनरसत्यः स्वप्नः पित्ताद्युद्रेकजनितः स किमर्थसामान्यं व्यभिचरति अर्थविशेषं वा? न तावदर्थसामान्यं देशकालाकारविशेषाणामेव व्यभिचारात् सर्वत्र सर्वदा सर्वथार्थसामान्यस्य सद्भावात्। तदभावेऽर्थविशेषेषु संशयविपर्यासस्वप्नप्रायथार्थज्ञानानामनुत्पत्तेः न हि किंचिद् ज्ञानं सत्तामात्रं व्यभिचरति. तस्यानुत्पत्तिप्रसक्तेः ततोऽसत्यस्वप्नस्याप्यर्थसामान्यव्यवसायात्मकत्वसिद्धेः न किंचिद् ज्ञानमर्थाव्यवसायात्मकं। विशेषं तु यत एव व्यभिचरति तत एव असत्यः कथमन्यथा सत्येतरव्यवस्थितिः स्यात्? तस्याः स्वार्थविशेषप्राप्त्यप्राप्तिनिमित्तत्वादित्यलं प्रसंगेन स्वव्यवसायात्मकत्ववत् सम्यग्ज्ञानस्यार्थव्यवसायात्मकत्वप्रसिद्धेः।

अत्रापरः प्राह—सम्यग्ज्ञानमर्थव्यवसायात्मकमेव न स्वव्यवसायात्मकं स्वात्मनि क्रियाविरोधात् एकस्य ज्ञानस्यानेकाकारानुपपत्तेः। न हि ज्ञानमेकमाकारं कर्मतामापन्नं व्यवस्यति कर्मात्मनाकारेणेति वक्तुं युक्तं ताभ्यां कर्मकरणाकाराभ्यां ज्ञानस्याभेदे भेदप्रसंगात्। न हि भिन्नाभ्यां ताभ्यामभिन्नमेकं नाम अतिप्रसंगात्। तयोर्वाकारयोर्ज्ञानादभेदे भेदप्रसंगात् नहयभिन्नादभिन्नयोर्भेदःसंभाव्यते अतिप्रसंगात्। एवं ताभ्यां विज्ञानस्य भेदोपगमे न विज्ञानमात्मनात्मानं व्यवस्यति परात्मना परात्मन एव व्यवसायात् तौ चाकारौ यदि ज्ञानस्यात्मानौ तदा ज्ञानं व्यवस्यति वा न वा? प्रथमपक्षे किमेकेनाकारांतरेण द्वाभ्यां वाऽकारांतराभ्यां तत्तौ व्यवस्येत। न तावदेकेनाकारांतरेण विरोधात्। द्वाभ्यां व्यवस्यति इति चेत् तयोरप्याकारांतरयोर्ज्ञानादभेदो भेदो वा स्यात्

१ स्वप्नांते इति पाठांतरं। २ अर्थव्यवसायः पाठांतरं।

इत्यनिवृत्ताः पर्यनुयोगः—अनवस्था च महीयसी । कथंचिद्भेदः कथंचिदभेदः इत्युभयपक्षालंबनमपि अनेनैवापास्तं पक्षद्वयनिक्षिप्तदोषानुषंगात् पक्षांतराऽसंभवाच्चेति सोऽपि न न्यायकुशलः प्रतीत्यतिलंघनात् । लोके हि ज्ञानस्य स्वव्यवसायिन एवार्थव्यवसायित्वेन प्रतीतिः सिद्धा । नचेयं मिथ्या बाधकाभावात् । स्वात्मनि क्रियाविरोधो बाधक इति चेत् का पुनःक्रिया ? किमुत्पत्तिर्ज्ञप्तिर्वा ? यद्युत्पत्तिः सा स्वात्मनि विरुध्यतां । न हि वयमभ्युनुजानीमहे ज्ञानमात्मानमुत्पादयति इति ।

नैकं स्वस्मात्प्रजायते

इति समंतभद्रस्वामिभिरभिधानात् । अथ ज्ञप्तिः क्रिया सा स्वात्मनि विरुद्धा तदात्मनैव ज्ञानस्य स्वकारणकलापादुत्पादात् । प्रकाशात्मनैव प्रकाशस्य प्रदीपादेः । न हि स्वकारणसामग्रीतः प्रदीपादिप्रकाशः समुपजायमानः स्वप्रकाशात्मना नोत्पद्यत इति प्रातीतिकं तत्स्वरूपप्रकाशेन प्रकाशांतरापेक्षाप्रसंगात् । नचायं प्रदीपाद्यालोकः कलशादिज्ञानं स्वरूपज्ञानं च चक्षुषोजनयतः सहकारित्वं नात्मसात्करुते येन स्वप्रकाशको न स्यात् । चक्षुषः सहकारित्वं हि प्रदीपादेः प्रकाशत्वं तच्च कलशादाविव स्वात्मन्यपि दीपादेर्विद्यत एवेति सिद्धा स्वात्मनि प्रकाशनक्रिया । तद्वद्विज्ञानस्यार्थप्रकाशनमिव स्वप्रकाशनमप्यविरुद्धमवबुध्यतां । एतेन 'ज्ञानं न स्वप्रकाशकं, अर्थप्रकाशकत्वादित्यनुमानमपास्तं प्रदीपादिना हेतोरनेकांतात् । प्रदीपादिः-उपचारात् प्रकाशको न परमार्थत इति तेनाव्यभिचारे चक्षुरादेरपि परमार्थतोऽर्थाऽप्रकाशकत्वात् साधनशून्यो दृष्टांतः ज्ञानस्यैव परमार्थतोऽर्थप्रकाशत्वोपपत्तेः । ततो 'ज्ञानं स्वप्रकाशकं, अर्थप्रकाशकत्वात् यत्तु न स्वप्रकाशकं तन्नार्थप्रकाशकं दृष्टं यथा कुड्यादिकं । अर्थप्रकाशकं च ज्ञानं तस्मात्स्वप्रकाशकमिति केवलव्यतिरेक्यनुमानमविनाभावनियमनिश्चयलक्षणाद्धेतोरुत्पद्यमानं निरवद्यमेवेति बुध्यामहे । चक्षुरादिभिः परमार्थतोऽर्थप्रकाशकत्वासिद्धेस्तेन साधनस्यानेकांतिकतानुपपत्तेः । कुड्यादेरपि स्वाविनाभाविपदार्थांतरप्रकाशकत्वाद्धूमादिवत् साधनाव्यतिरेको दृष्टांत इत्यपि समुत्सारितमनेन तस्याप्युपचारादर्थप्रकाशकत्वसिद्धेः अन्यथा तज्जनितविज्ञानवैयर्थ्यापत्तेः । यत्पुर्ज्ञानमात्मानमात्मना जानातीति कर्मकरणाकारद्वयपरिकल्पनायामनवस्थादिदोषानुषंगो बाधक इति मतं तदपि न सुंदरतरं तथाप्रतीतिसिद्धत्वात् । जात्यंतरत्वादाकारवतोर्भेदाभेदं प्रत्यनेकांतात् । कर्मकरणाकारयोर्ज्ञानांत् कथंचिदभेदः कथंचिद्भेदः इति नैकांतेन भेदाभेदपक्षोपक्षिप्तदोषोपनिपातः स्याद्वादिनां संलक्ष्यते । नच कथंचिदित्यंधपदमात्रं ज्ञानात्मना तदभेदस्य कथंचिदभेदशब्देनाभिधानात् । कर्मकरणात्मना च भेद इति कथंचिद्भेदध्वनिना दर्शितत्वात् । तथा च ज्ञानात्मना तदभेद इति ज्ञानभेदाभेदस्ततो भिन्नस्य ज्ञानात्मनोऽप्रतीतेः । कर्मकरणाकारतया च भेद इति कर्मकरणाकारावेव भेदस्य द्रव्यव्यतिरिक्तस्याकारस्याप्रतीयमानत्वात् इति । येनात्मना ज्ञानात् कर्मकरणाकारयोरभेदो येन च भेदस्तौ ज्ञानात्मिकमभिन्नौ भिन्नौ वा इति न पर्यनुयोगस्यावकाशोऽस्ति ययाऽनवस्था महीयसी संप्रसज्येत । नच भिन्नाभ्यामेव कर्मकरणाभ्यां भवितव्यमिति नियमोऽस्ति करणस्य भिन्नकर्तृकस्यापि दर्शनात् भिन्नकर्तृकरणवत् । यथैव हि देवदत्तः परशुना छिनत्ति काष्ठमित्यत्र देवदत्तात्कर्तुर्भिन्नं परशुलक्षणं करणमुपलभ्यते । तथाग्निर्दहति दहनात्मनेत्यत्राग्नेः कर्तुर्दहनात्मलक्षणं करणमभिन्नमुपलभ्यत एवं दहनात्माप्युष्णलक्षणः स चाग्नेर्गुणिनो भिन्न एवेति न मंतव्यं सर्वथा तयोर्विरोधे गुणगुणीभावविरोधात् सह्यविंध्यवत् । गुणिनि गुणस्य समवायात् तयोस्तद्भाव इत्यपि न सत्यं समवायस्य कथंचिदविश्वग्भावात् अन्यस्य विचारासहत्वात् । सामिल्येकीभावेनावायनमवगमनं हि समवायः तच्च समवायनं कर्मस्थं समवेयमानत्वं समवायितादात्म्यं प्रतीयते, कर्तृस्थं पुनः समवायनं समवायकत्वं प्रमातुस्तादात्म्येन समवायिनोर्ग्राहकत्वं न चान्या गतिरस्ति क्रियायाः कर्तृकर्मस्थतयैव प्रतिपादनात् तत्र—

कर्मस्था क्रिया कर्मणोऽनन्या कर्तृस्था कर्तुरनन्या

इति वचनात् । ततो नाभिन्नकर्तृकं करणमप्रसिद्धं । नापि कर्म तस्यापि भिन्नकर्तृकस्येवाभिन्नकर्तृकस्यापि प्रतीतेः । यथैव हि कटं करोतीत्यत्र कर्तुर्भिन्नं कर्मानुमन्यते । तथा प्रदीपः प्रकाशयत्यात्मानमि-

त्यत्र कर्तुरभिन्नं कर्म संप्रतीयत एव। न हि प्रदीपात्मा प्रदीपाद्भिन्न एव प्रदीपस्याप्रदीपत्वप्रसंगात् घटवत्। प्रदीपे प्रदीपात्मनोभिन्नस्यापि समवायात् प्रदीपत्वसिद्धिरितिचेत् न अप्रदीपेऽपि घटादौ तत्समवायप्रसंगात्। प्रत्यासत्तिविशेषात्प्रदीपात्मनः प्रदीप एव समवायो नान्यत्रेति चेत्? स प्रत्यासत्तिविशेषोऽत्र कोऽन्यत्र कथंचित्तादात्म्यात्? ततः प्रदीपादभिन्न एव प्रदीपात्मा कर्मेति सिद्धमभिन्नकर्तृकं कर्म। तथा च ज्ञानात्मात्मानमात्मना जानातीति न स्वात्मनि ज्ञप्तिलक्षणायाः क्रियाया विरोधः सिद्धः, यतः स्वव्यवसायात्मकं ज्ञानं न स्यात्।

स्यान्मतं—अर्थज्ञानं ज्ञानांतरवेद्यं प्रमेयत्वात् घटादिवदित्यनुमानं स्वार्थव्यवसायात्मकत्वप्रतीतेर्बाधकमिति तदपि फल्गुप्रायं महेश्वरार्थज्ञानेन हेतोर्व्यभिचारात्। तस्य ज्ञानांतरावेद्यत्वेऽपि प्रमेयत्वात्। यदि पुनरीश्वरार्थज्ञानमपि ज्ञानांतरप्रत्यक्षं-असंवेद्यत्वात् इति मितिस्तदा तदप्यर्थज्ञानज्ञानमीश्वरस्य प्रत्यक्षमप्रत्यक्षं वा? यदि प्रत्यक्षं तदा स्वतो ज्ञानांतराद्वा?। स्वतश्चेत् प्रथममप्यर्थज्ञानं स्वतः प्रत्यक्षमस्तु किं विज्ञानांतरेण?। यदि तु ज्ञानांतरात्प्रत्यक्षं तदपीष्यते तदा तदपि ज्ञानांतरं किमीश्वरस्य प्रत्यक्षमप्रत्यक्षं वेति स एव पर्यनुयोगो ऽनवस्थानं च दुःशक्यं परिहर्तुं। यदि पुनरप्रत्यक्षमेवेश्वरार्थज्ञानज्ञानं तदेश्वरस्य सर्वज्ञत्वविरोधः स्वज्ञानस्याप्रत्यक्षत्वात्। तदप्रत्यक्षत्वे च प्रथमार्थज्ञानमपि न तेन प्रत्यक्षं स्वयमप्रत्यक्षेण ज्ञानांतरेण तस्यार्थज्ञानस्य साक्षात्करणविरोधात्। कथमन्यथा आत्मांतरज्ञानेनापि कस्यचित्साक्षात्करणं न स्यात्। तथा चानीश्वरस्यापि सकलस्य प्राणिनः स्वयमप्रत्यक्षेणापीश्वरज्ञानेन सर्वविषयेण सर्वार्थसाक्षात्करणं संगच्छेत ततः सर्वस्य सर्वार्थवेदित्वासिद्धेः-ईश्वरानीश्वरविभागाभावो भूयते। यदा चार्थज्ञानमपि प्रथमीश्वरस्याप्रत्यक्षमेव कक्षीक्रियते तदा तेनापि स्वयमप्रत्यक्षेण महेश्वरस्य सकलोऽर्थः प्रत्यक्षं कथं समर्थ्येत तेन सकलप्राणिगणस्य सर्वार्थसाक्षात्करणप्रसंगस्य तदवस्थत्वात्। तदनेन वादिना महेश्वरस्यापि किंचिज्ज्ञत्वं सर्वस्य वा सर्वज्ञत्वमनुज्ञातव्यं न्यायबलायातत्वात्। तथाभ्यनुज्ञाने वा नैयायिकस्य नैयायिकत्वविरोधः केनास्य वार्येत। यदि पुनरीश्वरस्य ज्ञानं सकलार्थवदात्मानमपि साक्षात्कुरुते नित्यैकरूपत्वात्, क्रमभाव्यनेकानित्यज्ञानोपगमे महेश्वरस्य सकृत्सर्वार्थसाक्षात्करणविधानात् सर्वज्ञत्वाव्यवस्थितेरिति मतं तदा कथमनेनैवानैकांतिको हेतुर्न स्यात्। स्यान्मतिरेषा. युष्माकमस्मदादिज्ञानापेक्षयार्थज्ञानस्य ज्ञानांतरवेद्यत्वं प्रमेयत्वेन हेतुना साध्यते ततो नेश्वरज्ञानेन व्यभिचारः तस्यास्मदादिज्ञानाद्विशिष्टत्वात्। न हि विशिष्टे दृष्टं धर्ममविशिष्टेऽपि घटयन् प्रेक्षावत्तां लभते इति सापि न परीक्षासहा ज्ञानांतरस्यापि प्रज्ञानेन वेद्यत्वेऽनवस्थानुषंगात्। तस्य ज्ञानांतरेण वेद्यत्वे तेनैव हेतोर्व्यभिचारः। न च तदप्रमेयमेव सर्वस्येति वक्तुं शक्यं प्रतिपत्तुः प्रमाणबलात्तद्व्यवस्थानविरोधात्। सर्वज्ञज्ञानेनापि तस्याप्रमेयत्वे सर्वज्ञस्य सर्वज्ञताव्याघातात्। ततोऽस्मदादिज्ञानापेक्षयापि न ज्ञानं ज्ञानांतरप्रत्यक्षं प्रमेयत्वाद्धेतोः साधयितुं शक्यं, ज्ञानस्य स्वार्थव्यवसायात्मनः प्रत्यक्षसिद्धत्वाच्च। प्रत्यक्षबाधितपक्षतया हेतोः कालात्ययापदिष्टत्वप्रसंगाच्च। एतेनार्थज्ञानेन ज्ञानांतरवेद्ये साध्ये कालत्रयत्रिलोकवर्तिपुरुषपरिषत्संप्रयुक्तसकलहेतुनिकरस्य कालात्ययापदिष्टत्वं व्यख्यातं। तदनेन यदुक्तमेकात्मसमवेतानंतरविज्ञानग्राह्यमर्थज्ञानमिति तत्समुत्सारितं।

योऽप्याह न स्वार्थव्यवसायात्मकं ज्ञानं परोक्षत्वात् अर्थस्यैव प्रत्यक्षत्वात्। अप्रत्यक्षा नो बुद्धिः प्रत्यक्षोऽर्थः। स हि बहिर्देशसंबद्धः प्रत्यक्षमनुभूयते। ज्ञाते त्वर्थे अनुमानादवगच्छति बुद्धिरिति सावरभाष्ये श्रवणात्। तथा ज्ञानस्यार्थवत् प्रत्यक्षत्वे कर्मत्वप्रसंगात् ज्ञानांतरस्य करणस्यावश्यं परिकल्पनीयत्वात्। तस्य चाप्रत्यक्षत्वे प्रथमे कोऽपरितोषः?। प्रत्यक्षत्वे तस्यापि पूर्ववत्कर्मतापत्तेः करणात्मनोऽन्यविज्ञानस्य परिकल्पनायामनवस्थाया दुर्निवारत्वात्। तथैकस्य ज्ञानस्य कर्मकरणद्व्याकारप्रतीतिविरोधाच्च न ज्ञानं प्रत्यक्षं परीक्षकैरनुमंतव्यमिति सोऽपि न यथार्थमीमांसकतामनुसर्तुमुत्सहते ज्ञानस्याप्रत्यक्षत्वे सर्वार्थस्य प्रत्यक्षत्वविरोधात्। संतानांतरज्ञानेनापि सर्वस्यार्थस्य प्रत्यक्षत्वप्रसंगात्। तथा च न कस्यचित्कदाचिदर्थप्रत्यक्षः स्यात्।

स्यादाकूतं भवतां यस्यात्मनोऽर्थे परिच्छित्तिः प्रादुर्भवति तस्य ज्ञानेन सोऽर्थः प्रतीयते न सर्वस्य ज्ञानेन सर्वोऽर्थः प्रत्यक्षः सर्वस्य प्रमातुः सर्वत्रार्थे परिच्छित्तेरसंभवात् इति तदपि स्वगृहमान्यं मीमांसकानां क्वचिदर्थपरिच्छित्तेः प्रत्यक्षत्वाप्रत्यक्षत्वविकल्पानतिक्रमात् । सा हि न तावत्प्रत्यक्षा ज्ञानधर्मकत्वात् । कर्मत्वेनाप्रतीतिश्च करणज्ञानवेत् । तस्याः कर्मत्वेनाप्रतीतावपि क्रियात्वेन प्रतीतेः । प्रत्यक्षत्वे करण ज्ञानस्य कर्मत्वेनाप्रतीयमानस्यापि करणत्वेन प्रतीयमानत्वात् । प्रत्यक्षत्वमस्तु करणत्वेन प्रतीयमानं करणज्ञानं करणमेव स्यात् । न प्रत्यक्षं कर्मलक्षणमिति चेत् तर्हि पदार्थपरिच्छित्तिरपि क्रियात्वेन प्रतिभासमाना क्रियेव स्यात् न प्रत्यक्षा कर्मत्वाभावादिति प्रतिपत्तव्यं । यदि पुनरर्थधर्मत्वादर्थपरिच्छित्तेः प्रत्यक्षतेष्यते तदा सार्थप्राकट्यमुच्यते । न चैतदर्थग्रहणविज्ञानस्य प्राकट्याभावे घटामटति अतिप्रसंगात् । न ह्यप्रकटेऽर्थज्ञाने संतानांतरवर्तिनिकरस्य चिदर्थस्य प्राकट्यं घटते प्रमातुरात्मनः स्वयं प्रकाशमानस्य प्रत्यक्षस्यार्थ परिच्छेदकस्य प्राकाट्यादर्थे प्राकट्यं परिच्छित्तिलक्षणं संलक्ष्यते । परिच्छित्तेः परिच्छेदकस्वरूपायाः कर्तृस्थायाः क्रियाया कर्तृधर्मत्वादुपचारादर्थधर्मत्ववचनात् परिच्छिद्यमानतारूपायाः परिच्छित्तेः कर्मस्थायाः क्रियाया एव परमार्थतोऽर्थधर्मत्वसिद्धेः । करणज्ञानधर्मतानुच्छित्तेर्नेष्यते एव चक्षुषा रूपं पश्यति देवदत्त इत्यत्र चक्षुषः प्राकट्याभावेऽपि अर्थप्राकट्यं सुघटमेव लोकेऽतींद्रियस्यापि करणत्वसिद्धेः इति केचित् समभ्यमंसत मीमांसकाः, तेऽप्यंधसर्पविलप्रवेशन्यायेन स्याद्वादिमतमेवानुप्रविशंति, स्याद्वादिभिरपि स्वार्थपरिच्छेदकस्य प्रत्यक्षस्यात्मनः कर्तृसाधनज्ञानशब्देनाभिधानात् । स्वार्थज्ञानपरिणतस्यात्मन एव स्वतंत्रस्य ज्ञानत्वोपपत्तेः, स हि जानातीति ज्ञानमिति व्यपदिश्यते । तद्धर्मस्तु परिच्छित्तिः फलज्ञानं कथंचित्प्रमाणाद्भिन्नमभिधीयते । यत्तु परोक्षमतींद्रियतया करणज्ञानं परैरुक्तं तदपि स्याद्वादिभिर्भावेंद्रियतया करणमुपपयोगलक्षणं प्रोच्यते ' **लब्ध्युपयोगौ भावेंद्रियं** ' इति वचनात् । तत्रार्थग्रहणशक्तिर्लब्धिः । अर्थग्रहणव्यापार उपयोगः इति व्याख्यानात् केवलं तस्य कथंचिदात्मनोऽनर्थांतरभावादात्मतया प्रत्यक्षत्वोपपत्तेः अप्रत्यक्षतैकांतो निरस्यते इति प्रातीतिकं परीक्षकैरनुमंतव्यं । ये तु मन्यंते नात्मा प्रत्यक्षः कर्मत्वेनाप्रतीयमानत्वात् करणज्ञानवदिति तेषां फलज्ञानहेतोर्व्यभिचारः कर्मत्वेनाप्रतीयमानस्यापि फलज्ञानस्य प्राभाकरैः प्रत्यक्षत्ववचनात् । तस्य क्रियात्वेन प्रतिभासमानात् प्रत्यक्षत्वे प्रमातुरप्यात्मनः कर्तृत्वेन प्रतिभासमानत्वात् प्रत्यक्षत्वमस्तु । तच्च फलज्ञानं–आत्मनोऽर्थांतरभूतमनर्थांतरभूतमुभयं वा ? न तावत्सर्वथार्थांतरभूतमनर्थांतरभूतं वा मतांतरप्रवेशानुषंगात् । नाप्युभयं पक्षद्वयनिगदितदूषणानुषक्तेः । कथंचिदनर्थांतरत्वे तु फलज्ञानादात्मनः कथंचित्प्रत्यक्षत्वमनिवार्यं प्रत्यक्षादभिन्नस्य कथंचिदप्रत्यक्षत्वैकांतविरोधात् । एतेनाप्रत्यक्ष एवात्मेति प्रभाकरमतमपास्तं । यस्य तु करणज्ञानवत्फलज्ञानमपि परोक्षं पुरुषः प्रत्यक्ष इति मतं तस्यापि पुरुषात्प्रत्यक्षात् कथंचिदभिन्नस्य फलज्ञानस्य करणज्ञानस्य च प्रत्यक्षतापत्तिः कथंचित्कथमपाक्रियते ? ततो न भट्टमतमपि विचारणां प्रांचति इति स्वव्यवसायात्मकं सम्यग्ज्ञानं, अर्थपरिच्छित्तिनिमित्तत्वात् आत्मवदिति व्यवतिष्ठते । नेत्रालोकादिभिर्व्यभिचारः साधनस्येति न मंतव्यं तेषामुपचारतोऽर्थपरिच्छित्तिनिमित्तत्ववचनात्, परमार्थतः प्रमातुः प्रमाणस्य च तन्निमित्तत्वघटनात् ।

अत्रापरः कपिलमतानुसारी प्राह–न सम्यग्ज्ञानं स्वव्यवसायात्मकं, अचेतनत्वात् घटादिवत् न तच्चेतनमनित्यत्वात् । तद्वदनित्यं चोत्पत्तिनिमित्तत्वात् विद्युदादिवत् । यत्तु स्वसंवेद्यं तच्चेतनं नित्यमनुत्पत्तिधर्मकं च सिद्धं यथा पुरुषतत्त्वमिति सोऽपि न न्यायवेदी व्यभिचारिसाधनाभिधानात् । उत्पत्तिमत्त्वं हि तावदनित्यतां व्यभिचरति निर्वाणस्यानंतस्याप्युत्पत्तिमत्त्वात् । तथैवानित्यत्वमचेतनत्वं व्यभिचरति पुरुषभोगस्य कादाचित्कत्वस्य बुद्ध्यध्यवसितार्थापेक्षस्य चेतनत्वेऽप्यनित्यत्वसमर्थनात् । अचेतनत्वं तु सम्यग्ज्ञानस्याशुद्धमेव तस्मादचेतनाद्विवेकख्यातिविरोधात् । चेतनसंसर्गाच्चेतनं ज्ञानमित्यपि वार्तं शरीरादेरपि चेतनत्वसंगात् । ज्ञानस्य चेतनसंसर्गो विशिष्ट इति चेत् स कोऽन्यः कथंचित्तादात्म्यात् । ततश्चेतनात्मकमेव ज्ञानमनुमंतव्यमित्यचेतनमसिद्धं ।

यदप्यभ्यधायि सांख्यैः-ज्ञानमचेतनं प्रधानपरिणामत्वात् महाभूतवदिति तदपि न श्रेयः पक्षस्य स्वसंवेदनप्रत्यक्षबाधितत्वात् । प्रतिवादिनः कालात्ययापदिष्टत्वाच्च साधनस्य । तथानुमानबाधितः पक्षः परं प्रति चेतनं ज्ञानं स्वसंवेद्यत्वात् पुरुषवत् । यत्तु न चेतनं न तत्स्वसंवेद्यं यथा कलशादीति व्यतिरेकनिश्चयात् नेदमनुमानमगमकं । ज्ञानस्य स्वसंवेद्यत्वमसिद्धं ? इति चेन्न तस्यास्वसंवेद्यत्वे अर्थसंवेदनविरोधादित्युक्तप्रायं । एतेन न स्वसंवेद्यं विज्ञानं कायाकारपरिणतभूतपरिणामत्वात् पित्तादिवदिति वदंश्चार्वाकः प्रतिक्षिप्तः । न चेदं साधनं सिद्धं भूतविशेषपरिणामत्वासिद्धेः संवेदनस्य बाह्येंद्रियप्रत्यक्षत्वप्रसंगात् गंधादिवत् । सूक्ष्मभूतविशेषपरिणामत्वात् न बाह्येंद्रियप्रत्यक्षं ज्ञानमिति चेत् स तर्हि सूक्ष्मविशेषः स्पर्शादिभिः परिवर्जितः स्वयमस्पर्शादिमान् संवेदनोपादानहेतुः सर्वदा बाह्येंद्रियाविषयः कथमात्मैव नामांतरेण निगदितो न भवेत् । तस्य ततोऽन्यत्वे भूतचतुष्टयाविलक्षणत्वात् तत्त्वांतरापत्तिरदृष्टपरिकल्पना च प्रसज्येत तथात्मनः प्रमाणासिद्धत्वात् तत्परिणामस्यैव ज्ञानस्य घटनात् । तत इदं व्यवतिष्ठते स्वव्यवसायात्मकं सम्यग्ज्ञानं चेतनात्मपरिणामत्वे सत्यर्थपरिच्छेदकत्वात् यत्तु न स्वव्यवसायात्मकं न तत्तथा यथा घटः तथा च सम्यग्ज्ञानं तस्मात्स्वव्यवसायात्मकं इति सम्यग्ज्ञानलक्षणं प्रमाणसिद्धं ।

ननु प्रमाणतत्त्वस्य प्रमेयतत्त्ववदुपप्लुतत्वात् न तत्त्वतः किंचित्प्रमाणं संभवति इति कस्य लक्षणमभिधीयते लक्ष्यानुवादपूर्वकत्वाल्लक्षणाभिधानस्य । प्रसिद्धं लक्ष्यमनूद्य लक्षणं विधीयत इति लक्ष्यलक्षणभाववादिभिरभ्युपगमात् इति केचिदमंसत तेषां तत्त्वोपप्लवमात्रमिष्टं साधयितुं तदा साधनमभ्युपगंतव्यं । तच्च प्रमाणमेव भवति तथा चेदमभिधीयते-तत्त्वोपप्लववादिनोऽप्यस्ति प्रमाणं, इष्टसाधनान्यथानुपपत्तेः । प्रमाणाभावेऽपीष्टसिद्धौ सर्वं सर्वस्य यथेष्टं सिद्ध्येत् इत्यनुपप्लुततत्त्वसिद्धिरपि किं न स्यात् सर्वथा विशेषाभावात् ।

स्यादाकूतं न स्वेष्टं विधिप्राधान्येन साध्यते येन तत्त्वोपप्लवं साधयतः प्रमाणसिद्धिः प्रसज्येत । किं तर्हि ? पराभ्युपगतप्रमाणादितत्त्वनिराकरणसामर्थ्यात् परीक्षकजनयतस्तत्त्वोपप्लवमनुसरति गत्यंतराभावात् । तथाहि—प्रमाणत्वं कस्य चित्किमदुष्टकारणजन्यत्वेन बाधारहितत्वेन वा प्रवृत्तिसामर्थ्येन वा अर्थक्रियाप्राप्तिनिमित्तत्वेन वा व्यवतिष्ठते ? न तावददुष्टजन्यत्वेन तस्य प्रत्यक्षतो गृहीतुमशक्तेः करणकुशलादेरपि प्रमाणकारणत्वात् । तस्य चातींद्रियत्वोपगमात् । न चानुमानमदुष्टं कारणमुन्नेतुं समर्थं तदविनाभाविलिंगाभावात् । सत्यज्ञानं लिंगमिति चेन्न परस्पराश्रयणात् । सति ज्ञानस्य सत्यत्वे तत्कारणस्यादुष्टत्वनिश्चयात् । तस्मिन्सति ज्ञानस्य सत्यत्वसिद्धेः । यदि पुनर्बाधारहितत्वेन संवेदनस्य प्रामाण्यं साध्यते तदा किं कदाचित्कचिद्बाधकानुत्पत्त्या तत्सिद्धिराहोस्वित् सर्वत्र सर्वदा सर्वस्य प्रतिपत्तुर्बाधकानुत्पत्तेरिति पक्षद्वयमवतरति । प्रथमपक्षे मरीचिकाचक्रे सालिलसंवेदनमपि प्रमाणमासज्यते दूरस्थितस्य तत्संवेदनकाले कस्य चित्प्रतिपत्तुर्बाधकानुत्पत्तेः । द्वितीयपक्षे तु सकलदेशकालपुरुषाणां बोधकानुत्पत्तेः-कथमसर्वविदोऽवबोद्धुं शक्येत तत्तत्प्रतिपत्तुः सर्ववेदित्वप्रसंगात् । यदि पुनः प्रवृत्तिसामर्थ्येन ज्ञानस्य प्रामाण्यमुन्नीयते तदा प्रमाणेनार्थमुपलब्धवतस्तदर्थे प्रवृत्तिर्यदीष्यते तदेशोपसर्पणलक्षणा तस्याः सामर्थ्यं च फलेनाभिसंबंधः सजातीयज्ञानोत्पत्तिर्वा तदेतराश्रयदोषो दुरुत्तरः स्यात् । सति संवेदनप्रमाणत्वनिश्चये तेनार्थप्रतिपत्तौ प्रवृत्तेः । तत्सामर्थ्यस्य च घटनात् प्रवृत्तिसामर्थ्यस्य निश्चये च तेनार्थसंवेदनस्य प्रमाणत्वनिर्णीतेः प्रकारांतरासंभवात् । अथार्थक्रियानिमित्तत्वेन संवेदनं प्रमाणतामास्कंदति तदा कुतस्तस्य तन्निश्चयः स्यात् ? । प्रतिपत्तुरर्थक्रियाज्ञानादिति चेत् कुतस्तस्य प्रमाणत्वासिद्धिः ? । परमार्थक्रियाज्ञानांतराच्चेत् कथमनवस्था न भवेत् ? । अथाद्यसंवेदनादेवार्थक्रियाज्ञानस्य प्रामाण्यं मन्यते तदा परस्पराश्रयदोषः । सत्यर्थक्रियाज्ञानस्य प्रमाणत्वनिश्चये तद्बलादाद्यसंवेदनस्यार्थक्रियाप्राप्तिनिमित्तत्वेन प्रामाण्यनिश्चयस्तत्प्रामाण्यनिश्चयाच्च अर्थक्रियासंवेदनस्य प्रमाणतासिद्धिः कारणांतराभावात् । ततो न प्रमाणत्वं विचार्यमाणं वा व्यवतिष्ठते तदवस्थानाभावे च न प्रमेयत्वसिद्धिः इति तदेतत्सकलं प्रलापमात्रं पराभिमतप्रमाणतत्त्वनिराकरणस्य स्वयमिष्टस्य प्रमाणमंतरेण सिद्ध्ययोगात् तस्य स्वयमिष्टत्वे साधनानुपपत्तेः परपर्यनुयोगमात्रस्य करणाददोषोऽयं ।

परपर्यनुयोगपराणि हि बृहस्पतेः सूत्राणि

इति वचनात् सर्वत्र स्वातंत्र्याभावादित्येतदपि यत्किंचन भाषणमेव । किमदुष्टकारणजन्यत्वेन प्रामाण्यं साध्यते बाधारहितत्वेनेवेत्यादि पक्षाणां क्वचिन्निर्णयाभावे संदेहाभावात् परपर्यनुयोगायोगात् ।

स्यादाकूतं पराभ्युपगमात् तन्निश्चयसिद्धेः संशयोत्पत्तेर्युक्तः प्रश्नः, तथाहि–मीमांसकाभ्युपगमात् तावददुष्टकारणजन्यत्वं बाधावर्जितत्वं च निर्णीतं निश्चितत्वापूर्वार्थत्वलोकसम्मतत्ववत् । तदुक्तं—

तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितं ।
अदुष्टकारणारब्धं प्रमाणं लोकसम्मतं ॥ १ ॥ इति

तथा प्रवृत्तिसामर्थ्यमपि नैयायिकाभ्युपगमान्निर्णीतं–

प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणं

इति वचनात् । तथार्थक्रियाप्राप्तिनिमित्तत्वमविसंवादित्वलक्षणं सौगताभ्युपगमान्निर्णीतमेव प्रमाणमविसंवादिज्ञानं अर्थक्रियास्थितिः अविसंवादनं शब्दोऽप्यभिप्रायनिवेदनादिति वचनात् । तादिदानीं चार्वाकमतानुसारेण संदिह्य पर्यनुयुज्यमानं न किंचिदुपालंभमर्हति इति तदेतदपि न व्यवस्थां प्रतिपद्यते पराभ्युपगमस्य प्रमाणाप्रमाणपूर्वकत्वे संशयाप्रवृत्तेः तथाहि यदि परेषामभ्युपगमः प्रमाणपूर्वकः तदा कथं संदेहः ? प्रमाणपूर्वकस्य निर्णीतत्वात् । निर्णीतेः संशयविरोधात् । अथाप्रमाणपूर्वकः तथापि न संदेहः प्रवर्तते तस्य क्वचित्कदाचित्कथंचित् निर्णयपूर्वकत्वात् । तन्निर्णयस्यापि प्रमाणपूर्वकत्वात् । प्रमाणाभावे प्रमाण्यनिश्चयात् तन्निश्चयनिबंधनस्य च प्रमाणांतरस्याभ्यस्तविषयत्वे सर्वथा तदनुपपत्तेरित्यलं प्रसंगेन सर्वस्येष्टस्य संसिद्धेः प्रमाणप्रसिद्धेरबाधनात् अन्यथातिप्रसंगसमर्थनादिति । एतेन सर्वथा शून्यं संविदद्वैतं पुरुषाद्वैतं शब्दाद्वैतं वा समाश्रित्य प्रमाणप्रमेयभागं निराकुर्वाणाः प्रत्याख्याताः स्वयमाश्रितस्य सर्वथा शून्यस्य संविदद्वैतादेर्वा कथंचिदिष्टत्वे प्रमाणसंसिद्धेर्व्यवस्थापनात् । तस्याप्यनिष्टत्वे तद्वादित्वविरोधात् । प्रलापमात्रानुसरणापत्तेः परीक्षकत्वव्याघातात् इति । तदेवं प्रमाणतत्त्वनिर्णीतौ प्रमेयतत्त्वासिद्धिर्निर्बाधा व्यवतिष्ठत एव ।

ननु चैव प्रमाणसिद्धमपि किं स्वतः प्रमाण्यमात्मसात्कुर्वीति परतो वा ? न तावत्स्वतः सर्वत्र सर्वदा सर्वस्य तद्विप्रतिपत्त्यभावप्रसंगात् । नापि परतः–अनवस्थानुषंगात् परापरप्रमाणान्वेषणात् क्वचिदवस्थितेरयोगात् । प्रथमप्रमाणाद्द्वितीयस्य प्रामाण्यसाधने द्वितीयाच्च प्रथमस्य परस्पराश्रयणापत्तेः प्रकारांतराभावादिति केचित्तेऽप्यसमीक्षितवचसः संलक्ष्यंते स्वयमभ्यस्तविषये प्रमाणस्य स्वतः प्रामाण्यसिद्धेः सकलविप्रतिपत्तीनामपि प्रतिपत्तुरभावात् अन्यथा तस्य प्रमेये निस्संशयं प्रवृत्त्ययोगात् । तथानभ्यस्तविषये परतः प्रमाणस्य प्रामाण्यनिश्चयात् तन्निश्चयनिमित्तस्य च प्रमाणांतरस्याभ्यस्तविषयत्वे स्वतः प्रमाणत्वसिद्धेः अनवस्थापरस्पराश्रयणयोरनवकाशात् । तस्याप्यनभ्यस्तविषयत्वे परतः प्रमाणादभ्यस्तविषयात् स्वतःसिद्धप्रामाण्यात् प्रमाणत्वनिश्चयात् सूदरमपि गत्वा कस्यचिदभ्यस्तविषयस्य प्रमाणस्यावश्यंभावित्वात् अन्यथा प्रमाणतदाभासव्यवस्थानुपपत्तेः तदभावव्यवस्थानुपपत्तिवत् । कुतः पुनः प्रतिपत्तुः क्वचिद्विषयेऽभ्यासः क्वचिदनभ्यासः स्यात् ? इति चेत् तत्प्रतिबंधकदशाविशेषविगमाभ्यां क्वचिदभ्यासानभ्यासौ स्यातां इति ब्रूमेह परिदृष्टकारणव्यभिचाराददृष्टस्य कारणस्य सिद्धेः तन्नः कर्म ज्ञानावरणवीर्यांतरायाख्यं सिद्धं तस्य क्षयोपशमाद्क्वचित् क्वचिदभ्यासज्ञानं तत्क्षयोपशमाभावे वा ऽनभ्यासज्ञानमिति सुव्यवस्थितं प्रमाणस्य प्रमाण्यं सुनिश्चितासंभवद्बाधकप्रमाणत्वात् स्वयमिष्टवस्तुवत् सर्वत्रेष्टसिद्धेस्तन्मात्रनिबंधनत्वादन्यथा सर्वस्य तत्त्वपरीक्षायामनधिकारादिति स्थितमेतत्--

प्रामाणादिष्टसंसिद्धिरन्यथातिप्रसंगतः ।
प्रामाण्यं तु स्वतःसिद्धमभ्यासात्परतोऽन्यथा ॥ १ ॥ इति

एवं प्रमाणलक्षणं व्यवसायात्मकं सम्यग्ज्ञानं परीक्षितं तत्प्रत्यक्षं परीक्षं वेति संक्षेपाद् द्वितयमेव व्यवतिष्ठते

सकलप्रमाणानामत्रैवांतर्भावादिति विभावनात्। परपरिकल्पितैकद्वित्र्यादिप्रमाणसंख्यानियमे तदघटनात्। तथाहि-येषां प्रत्यक्षमेकमेव प्रमाणं न तेषामनुमानादिप्रमाणांतरस्यांतर्भावः संभवति तद्विलक्षणत्वात्। प्रत्यक्षपूर्वकत्वादनुमानादेः प्रत्यक्षभावः इत्ययुक्तं प्रत्यक्षस्यापि क्वचिदनुमानपूर्वकत्वादनुमानादिश्वंतर्भावप्रसंगात्। यथैव हि धर्मिहेतुदृष्टांतप्रत्यक्षपूर्वकमनुमानं श्रोत्रप्रत्ययपूर्वकं च शाब्दं। सादृश्यानन्यथाभावनिषेध्याधारवस्तुग्राहि प्रत्यक्षपूर्वकाणि चोपमानार्थापत्त्यभावप्रमाणानि तथा-अनुमानेन कृशानुं निश्चित्य तत्र प्रवर्तमानस्य प्रत्यक्षमनुमानपूर्वकं रूपाद्रसं संप्रतिपद्य रसे रासनसमक्षवत्। शब्दाच्च मृष्टं पानकमवगम्य तत्र प्रवृत्तौ प्रत्यक्षं शाब्दपूर्वकं। क्षीरस्य संतर्पणशक्तिमर्थापत्त्याधिगम्य क्षीरे प्रवृत्तस्य तदात्मके प्रत्यक्षमर्थापत्तिपूर्वकं। गोसादृश्याद्गवयमवसाय तं व्यवहरतः प्रत्यक्षनुमानपूर्वकं। गृहे सर्पाभावमभावप्रमाणाद्विभाव्य प्रविशतः प्रत्यक्षमभावपूर्वकं प्रतीयते एव ततः प्रत्यक्षमेव गौणत्वादप्रमाणं न पुनरनुमानादिकं तस्यागौणत्वादिति शुष्के पतिष्यामि इति जातः पातः कर्दमे।

स्यादाकूतं न प्रत्यक्षं-अनुमानागमार्थापत्त्युपमानाभावसामग्रीपूर्वकं तदभावेऽपि चक्षुरादिसामग्रीमात्रात्तस्य प्रसूतेः प्रसिद्धत्वात्। तदभाव एव अभावनियमादिति तदप्यसत् लैंगिकादीनामपि प्रत्यक्षपूर्वकत्वाभावात्। लिंगशब्दानन्यथाभावसादृश्यप्रतियोगिस्मरणादिसामग्रीसद्भाव एव भावात्। सत्यपि प्रत्यक्षे स्वसामग्र्यभावेऽनुमानादीनामभावात्। ततः किं बहुनोक्तेन प्रतिनियतसामग्रीप्रभवतया प्रमाणभेदमभिमन्यमाने प्रत्यक्षवदनुमानादीनामपि अगौणत्वमनुमंतव्यं प्रतिनियतस्वविषयव्यवस्थायां परापेक्षाविरहात्। यथैव हि प्रत्यक्षं साक्षात्स्वार्थं परिच्छित्तौ नानुमानाद्यपेक्षं तथानुमानमनुमेयनिर्णीतौ न प्रत्यक्षापेक्षमुत्प्रेक्षते प्रत्यक्षस्य धर्मिहेतुदृष्टांतग्रहणमात्रे पर्यवसितत्वात्। नापि शाब्दं शब्दप्रतिपाद्येऽर्थे प्रत्यक्षमनुमानं चापेक्षते तयोः शब्दश्रवणमात्रे शब्दार्थसंबंधानुमात्रे व्यापारात्। नत्वर्थापत्तिः प्रत्यक्षमनुमानमागमं चापेक्षते अभावोपमानवत्। तस्याश्च प्रत्यक्षादिप्रमाणप्रमितार्थाविनाभाविन्यदृष्टेऽर्थे निर्णयनिबंधनत्वात्। प्रत्यक्षादीनामर्थापत्त्युत्थापकपदार्थनिश्चयमात्रे व्यावृत्तत्वात्। नचोपमानं प्रत्यक्षादीन्यपेक्षते तस्योपमेयेऽर्थे निश्चयकारणे प्रत्यक्षादि निरपेक्षत्वात्। प्रत्यक्षादेः सादृश्यप्रतिपत्तिमात्रेऽनधिकारात्। नचाभावप्रमाणं प्रत्यक्षादिसापेक्षं निषेध्याधारवस्तुग्रहणे तस्य सामर्थ्यात्। परंपरयानुमानादीनां प्रत्यक्षपूर्वकत्वं प्रत्यक्षस्याप्यनुमानादिपूर्वकत्वं दुःशक्यं परिहर्तुं। कथं चायं प्रत्यक्षं प्रमाणं व्यवस्थापयेत् स्वत एवेति चेत् किमात्मसंबंधि सर्वसंबंधि वा? प्रथमकल्पनायां न सकलदेशकालपुरुषपरिषत्प्रत्यक्षं प्रमाणं सिद्ध्येत्। द्वितीयकल्पनायामपि न स्वप्रत्यक्षात्सकलपरप्रत्यक्षाणां प्रामाण्यं साधयितुमीशः तेषामनींद्रियत्वात् क्वादिप्रत्यक्षागोचरत्वात्। यदि पुनः सकलपुरुषप्रत्यक्षाणि स्वस्मिन् स्वस्मिन् विषये स्वतः प्रामाण्यमनुभवंति इति मतं तदा कुतस्तत्सिद्धिः?। विवादाध्यासितानि सकलदेशकालवर्तिपुरुषप्रत्यक्षाणि स्वतः प्रामाण्यमापद्यंते प्रत्यक्षत्वात् यद्यत्प्रत्यक्षं तत्तत्स्वतः प्रामाण्यमापद्यमानं सिद्धं यथा मत्प्रत्यक्षं प्रत्यक्षाणि च विवादाध्यासितानि तस्मात्स्वतः प्रामाण्यमापद्यंते सकलप्रत्यक्षाणां स्वतःप्रामण्यसाधने सिद्धमनुमानं प्रत्यक्षत्वेन स्वभावहेतुना प्रत्यक्षस्य स्वतः प्रामाण्यसाधनात्। शिंशुपात्वेन वनस्पतेः वृक्षत्वसाधनवत्। प्रतिपाद्यबुद्ध्या तथानुमानवचनाद्दोष इति चेत्? प्रतिपाद्यबुद्धिं प्रतिपद्य अप्रतिपद्य वा तयानुमानप्रयोगः स्यात्? न तावदप्रतिपद्य अतिप्रसंगात्। प्रतिपद्य तद्बुद्धितयानुमानप्रयोगे कुतस्तत्प्रतिपत्तिः? व्यवहारादिकार्यविशेषादिति चेत् सिद्धं कार्यात्कारणानुमानं धूमात्पावकानुमानवत्। यदि पुनर्लोकव्यवहारात् प्रतिपद्यत एवानुमानं लौकायतिकैः परलोकादेवानुमानस्य निराकरणात् तस्याभावादिति मतं तदापि कुतः परलोकाद्यभावप्रतिपत्तिः न तावत्प्रत्यक्षात् तस्य तदगोचरत्वात् नास्ति परलोकादिः अनुपलब्धेः खपुष्पवदिति तदभावसाधनेऽनुपलब्धिलक्षणमनुमानमायातं। तदुक्तं धर्मकीर्तिना—

प्रमाणेतरसामान्यस्थितेरन्यधियोगतेः।
प्रमाणांतरसद्भावः प्रतिषेधाच्च कस्यचित्॥ १॥ इति

ततः प्रत्यक्षमनुमानमिति द्वे एव प्रमाणे प्रमेयद्वैविध्यात् । न ह्याभ्यामर्थं परिच्छिद्य प्रवर्तमानोऽर्थ क्रियायां विसंवाद्यत इति प्रमाणसंख्यानियमं सौगताः प्रतिपद्यंते तेषामागमोपमानादीनां प्रमाणभेदानामसंग्रह एव तेषां प्रत्यक्षानुमानयोरंतर्भावायितुमशक्तेः ।

स्यान्मतिरेषा भवतां तदर्थस्य द्वैविध्यात् द्वयोरंतर्भावः स्यात् । द्विविधो ह्यर्थः प्रत्यक्षः परोक्षश्च । तत्र प्रत्यक्षविषयः साक्षात्क्रियमाणः प्रत्यक्षः । परोक्षः पुनरसाक्षात्परिच्छिद्यमानोऽनुमेयत्वादनुमानविषयः स हि पदार्थांतरात्साक्षात्क्रियमाणात् प्रतिपद्यते तच्च पदार्थांतरं तेन परोक्षेणार्थेन सबद्धं प्रत्याययितुं समर्थं नासंबद्धं गवादेरप्यश्वादेः प्रतीतिप्रसंगात् । संबद्धं चार्थांतरं लिंगमेव शब्दादि तज्जनितं च ज्ञानमनुमानमेव ततो न परोक्षेऽर्थेऽनुमानादन्यत्प्रमाणमस्ति शब्दोपमानादीनामपि तथानुमानत्वसिद्धेः । अन्यथा ततोऽर्थप्रतिपत्तौ अतिप्रसंगात् इति तदेतदपि न परीक्षाक्षमं प्रत्यक्षस्यापि तथानुमानत्वप्रसंगात् । प्रत्यक्षमपि हि स्वविषये संबद्धं तत्प्रत्यायनसमर्थं । तत्रासंबद्धस्यापि तत्प्रत्यायनसामर्थ्ये सर्वप्रत्यक्षं सर्वस्य नुः सर्वार्थप्रत्यायनसमर्थं स्यादिति कथमतिप्रसंगो न स्यात् ? । यदि पुनः संबंधाधीनत्वाविशेषेऽपि प्रत्यक्षपरोक्षार्थ प्रतिपत्तेः साक्षादसाक्षात्प्रतिभासभेदात् भेदोऽभ्युपगम्यते प्रमाणांतरत्वेन तर्देंद्रियस्वसंवेदनमानसयोगिप्रत्यक्षाणामपि प्रमाणांतरत्वानुषंगः प्रतिभासभेदाविशेषात् । न हि यादृशः प्रतिभासो योगिप्रत्यक्षस्य विशदतमस्तादृशोऽक्षज्ञानस्यास्ति स्वसंवेदनस्य मनोविज्ञानस्य वा ? यथाभूतश्च स्वसंवेदनप्रत्यक्षांतर्मुखो विशदतरः न तथाभूतोऽक्षज्ञानस्य । यादृशश्चाक्षज्ञानस्य बहिर्मुखः स्फुटः प्रतिभासो न तादृशो मनोविज्ञानस्येति कथं प्रमाणांतरता न भवेत् ? अथ प्रतिभासविशेषेऽपि तच्चतुर्विधमपि प्रत्यक्षमेव न प्रमाणांतरं तर्हि प्रत्यक्षानुमानयोः प्रतिभासभेदेपि स्वावषियसबंधावशेषात्व प्रमाणांतरत्वं माभूत् । यदि पुनः स्वविषयसंबद्धत्वाविशेषेऽपि प्रत्यक्षानुमानयोः सामग्रीभेदात् प्रमाणांतरत्वमुररीक्रियते तदा शाब्दोपमानादीनामपि तत एव प्रमाणांतरत्वमुररीक्रियतां । यथैव हि अक्षादिसामग्रीतः प्रत्यक्षं, लिंगसामग्रीतोऽनुमानं प्रभवतीति तयोः सामिग्रीभेदः । तथागमः शब्दसामिग्रीतः प्रभवति । उपमानं सादृश्यसामग्रीतः । अर्थापत्तिश्च परोक्षार्थाविनाभूतार्थमात्रसामग्र्याः । प्रतिषेध्याधारवस्तुग्रहणप्रतिषेध्यस्मरणसामग्र्याश्चाभाव इति प्रसिद्धः शाब्दादीनामपि सामग्रीभेदः । तत एवाक्षज्ञानादिप्रत्यक्षचतुष्टयस्य प्रभेदप्रसिद्धेः नहि तस्यार्थभेदोऽस्ति साक्षात्क्रियमाणस्यार्थस्याविशेषात् तद्वल्लिंगशब्दादिसामग्रीभेदात्परोक्षार्थविषयत्वाविशेषेप्यनुमानागमादीनां भेदप्रसिद्धिरिति नानुमानेंऽतर्भावः संभवति । तथा साध्यसाधनसंबंधव्याप्तिप्रतिपत्तौ न प्रत्यक्ष समर्थं । यावान् कश्चिद्धूमः स सर्वः कालांतरे देशांतरे च पावकजन्मा, अन्यजन्मा वा न भवति इत्येतावतो व्यापारान् कर्तुमसमर्थत्वात् । सन्निहितार्थमात्रादुत्पत्तेरविचारकत्वात् योगिप्रत्यक्षं तत्र समर्थमिति चेत् न देशकालयोगिप्रत्यक्षद्वयानतिक्रमात् । देशयोगिनः प्रत्यक्षं व्याप्तिप्रतिपत्तौ समर्थमित्ययुक्तं तत्रानुमानवैयर्थ्यात् । न हि योगिप्रत्यक्षेण साक्षात्कृतेषु साध्यसाधनविशेषेषु अशेषेषु फलवदनुमानं । अथ सकलयोगिप्रत्यक्षेण व्याप्तिप्रतिपत्तावदोष इति चेन्न उक्तदोषस्यात्रापि तदवस्थत्वात् । परार्थफलवदनुमानमिति चेत् ? न तस्य स्वार्थानुमानपूर्वकत्वात् । स्वार्थानुमानाभावे च योगिनः कथं परार्थानुमानं नाम । यदि पुनः सकलयोगिनः परानुग्रहाय प्रवृत्तत्वात् परानुग्रहस्य च शब्दात्मकपरार्थानुमानमंतरेण कर्तुमशक्तेः परार्थानुमानासिद्धिः, तस्याश्च स्वार्थानुमानासंभवेऽनुत्पद्यमानत्वात् स्वार्थानुमानासिद्धिरपि परप्रतिपादनप्रवृत्तस्य संभाव्यत एवेति मतं तदा स योगी स्वार्थानुमाने चतुरार्यसत्यानि निश्चित्य परार्थानुमानेन परं प्रतिपादयन् ग्रहीतव्याप्तिकमगृहीतव्याप्तिकं वा प्रतिपादयेत् ? यदि गृहीतव्याप्तिकं तदा कुतस्तेन गृहीता व्याप्तिः ? न तावदिंद्रियस्वसंवेदनमनोविज्ञानैस्तेषां तदविषयत्वात् । योगिप्रत्यक्षेण गृह्यते व्याप्तिः परेण तस्यापि देशयोगित्वात् इति चेत् तर्हि यावत्सु साध्यसाधनभेदेषु योगिप्रत्यक्षं देशयोगिनस्तावत्सु व्यर्थमनुमानं स्पष्टं प्रतिभातेश्वपि अनुमाने सकलयोगिनः सर्वत्रानुमानप्रसंगात् । समारोपव्यवच्छेदार्थमपि न तत्रानुमानं योगिप्रत्यक्षविषये समारोपानवकाशात् सुगतप्रत्यक्षविषयवत् । ततो न गृहीतव्याप्तिकं परं सकलयोगी प्रतिपादयितुमर्हति । नाप्यगृहीतव्याप्तिकं

अतिप्रसंगात् इति परप्रतिपादनानुपपत्तिः। तस्यां च न परार्थानुमानं संभवति तदसंभवे च न स्वार्थानुमानमवतिष्ठते सकलयोगिनस्तदव्यवस्थाने च न सकलयोगिप्रत्यक्षेण व्याप्तिग्रहणं युक्तिमधिवसति। प्रत्यक्षानुपलंभाभ्यां साध्यसाधनयोर्व्याप्तिप्रतिपत्तिरित्यप्यनेनापास्तं प्रत्यक्षेण व्याप्तिप्रतिपत्तिनिराकृतौ प्रत्यक्षांतरलक्षणेनानुपलंभेन तत्प्रतिपत्तिनिराकृतिसिद्धेः।

योप्याह कारणानुपलंभात् कार्यकारणभावव्याप्तिः। व्यापकानुपलंभाद् व्याप्यव्यापकभावः साकल्येन प्रतिपद्यत इत्यनुमानसिद्धा साध्यसाधनव्याप्तिः। तथाहि यावान् कश्चिद्धूमः स सर्वोप्यग्निजन्मा महाह्रदादिष्वग्नेरनुपलंभाद्धूमाभावसिद्धेरिति कारणानुपलंभानुमानं। यावंती शिंशपा सा सर्वा वृक्षस्वभावा। वृक्षानुपलब्धौ शिंशपात्वाभावसिद्धे इति व्यापकानुपलंभो लिंगं, एतावता साकल्येन साध्यसाधनव्याप्तिसिद्धिः इति सोऽपि न युक्तवादी तथानवस्थानुषंगात्। कारणानुपलंभव्यापकानुपलंभयोरपि हि स्वसाध्येन व्याप्तिर्न प्रत्यक्षतः सिद्ध्येत् पूर्वोदितदोषासक्तेः। परस्मादनुमानात्तत्सिद्धौ कथमनवस्था न स्यात्? प्रत्यक्षानुपलंभपृष्ठभाविनो विकल्पात् स्वयमप्रमाणकात् साध्यसाधनव्याप्तिसिद्धौ किमकारणं प्रत्यक्षानुमानप्रमाणपोषणं क्रियते? मिथ्याज्ञानादेव प्रत्यक्षानुमेयार्थसिद्धेर्व्याप्तिसिद्धिवत्। तस्माद्यथा प्रत्यक्षं प्रमाणमिच्छता सामस्त्येन तत्प्रामाण्यसाधनमनुमानमंतरेण नोपपद्यते इत्यनुमानमिष्टं। तथा साध्यसाधनव्याप्तिज्ञातप्रमाणमंतरेण नानुमानोत्थानमस्ति इति तदप्यनुज्ञातव्यं तच्चोहाख्यमविसंवादकं प्रमाणांतरं सिद्धमिति, न प्रत्यक्षानुमाने एव प्रमाणे इति प्रमाणसंख्यानियमो व्यवतिष्ठते। एतेन वैशेषिकप्रमाणसंख्यानियमो प्रत्याख्यातः।

स्यान्मतं साध्यसाधनसामान्ययोः क्वचिद्व्यक्तिविशेषे प्रत्यक्षत एव संबंधसिद्धेर्न प्रमाणांतरमन्वेषणीयं यावान् कश्चिद्धूमः स सर्वोऽपि अग्निजन्मानग्निजन्मा वा न भवति इत्यूहापोहविकल्पज्ञानस्य प्रमाणांतरत्वं संबंधग्राहिसमक्षप्रमाणफलत्वात्। क्वचिदनुमितानुमाने साध्यसाधने आदित्यगमनशक्तिरास्ति गतिमत्त्वात्। आदित्यो गतिमान् देशादेशांतरप्राप्तेः देवदत्तवत् संबंधबोधनिबंधनानुमानं फलवत् ततः प्रत्यक्षमनुमानमिति प्रमाणद्वयसंख्यानियमः कणचरमतानुसारिणां व्यवतिष्ठत एवेति तदप्यसारं सविकल्पकेनापि प्रत्यक्षेण साकल्येन साध्यसाधनसंबंधगृहीतुमशक्तेः। साध्यं हि किमग्निसामान्यं, अग्निविशेषोग्निसामान्यविशेषो वा? न तावदग्निसामान्यं सिद्धसाध्यतापत्तेः। नाप्यग्निविशेषस्तस्यानन्वयात्। बन्हिसामान्यविशेषस्य हि साध्यत्वे तेन धूमस्य संबंधः सकलदेशकालव्याप्यध्यक्षतः कथं सिद्ध्येत्? तथा तत्संबधासिद्धौ च यत्र यत्र यदा यदा धूमोपलंभः तत्र तत्र तदा तदाऽग्निसामान्यविशेषविषयमनुमानं नोदयमासादयेत्। न ह्यन्यथा संबंधग्रहणमन्यथानुमानोत्थानं नामातिप्रसंगात् ततः संबंधज्ञानं प्रमाणांतरमेव प्रत्यक्षानुमानयोस्तदविषयत्वात्। यच्चोक्तं प्रत्यक्षफलत्वाद्हापोहविज्ञानस्याप्रमाणत्वमिति तदप्यसम्यक् विशेषणज्ञानफलत्वाद्विशेष्यज्ञानस्याप्रमाणत्वानुषंगात् हानोपादानोपेक्षाबुद्धिफलकारणत्वाद्विशेष्यज्ञानस्य प्रमाणत्वे तत एवोहापोहविज्ञानस्य प्रमाणत्वमस्तु सर्वथा विशेषाभावात्। प्रमाणविषयत्वपरिशोधकत्वान्नोहः प्रमाणमित्यपि वार्तं प्रमाणविषयस्याप्रमाणेन परिशोधनविरोधात्। तथा तर्कः प्रमाणं प्रमाणविषयपरिशोधकत्वात् यस्तु न प्रमाणं स न प्रमाणविषयपरिशोधको दृष्टो यथा प्रमेयोऽर्थः प्रमाणविषयपरिशोधकश्च तर्कस्तस्मात्प्रमाणमिति केवलव्यतिरेकिणानुमानेनान्यथानुपपत्तिनियमनिश्चयलक्षणेन तर्कस्य प्रमाणत्वसिद्धेः, न वैशेषिकाणां प्रमाणद्वयसंख्यानियमः सिद्ध्येत्। एतेन द्वित्रिचतुःपंचषट्प्रमाणवादिनां प्रमाणसंख्यानियमः प्रतिध्वस्तः संख्यानां प्रत्यक्षानुमानाभ्यामिवागमादपि साध्यसाधनसंबंधासिद्धेः तर्कस्य तत्सिद्धिनिबंधनस्य प्रमाणांतरत्वोपपत्तेः। नैयायिकानां च प्रत्यक्षानुमानागमैरिवोपमानेनापि लिंगलिंगिग्रहणासंभवात्। प्रभाकराणां चं प्रत्यक्षानुमानोपमानागमैरिव अर्थापत्त्यापि हेतुहेतुमत्संबंधसिद्धेरसंभवात्। भट्टमतानुसारिणामपि प्रत्यक्षानुमानोपमानागमार्थापत्तिभिरिव अभावप्रमाणेनापि व्याप्तिनिश्चयानुपपत्तेस्तन्निश्चयनिबंधनस्योहज्ञानस्य प्रमाणांतरस्य सिद्धिरवश्यंभाविनी दुःशक्या निराकर्तुं।

ननूहः स्वविषये संबद्धोऽसंबद्धो वा न तावदसंबद्धस्तं प्रत्याययितुमीशोऽतिप्रसंगात्। संबद्धश्चेत् कुतस्तत्प्रतिपत्तिः? न तावत्प्रत्यक्षात् तस्य तदविषयत्वात्। नाप्यनुमानादनवस्थानुषंगात्। यदि पुनरुहांतरात्त-

त्संबंधसिद्धिः तदोहांतरस्यापि स्वविषयसंबंधसिद्धिपूर्वकत्वात् तस्याश्चापरोहनिबंधनत्वात् सैवानवस्था । प्रमाणांतरात्तत्सिद्धौ च स एव पर्यनुयोगः परापरप्रमाणांतरपरिकल्पनानुषंगात् केयं प्रमाणसंख्या व्यवतिष्ठेतेति केचित् तेषामपि प्रत्यक्षं स्वविषयं प्रतिबोधयत् तत्संबंधश्च नानुमानादेः सिद्ध्यति तस्य तदविषयत्वात् । प्रत्यक्षांतरात्तत्सिद्धौ तत्रापि प्रकृतपर्यनुयोगानिवृत्तेः कथमनवस्था न स्यात् यतः प्रत्यक्षं प्रमाणमभ्युपगमनीयमिति प्रतिपद्यामहे ।

स्यान्मतिरेषा प्रत्यक्षं स्वविषयसंबंधावबोधनिबंधनं प्रामाण्यमात्मसात्कुरुते तस्य स्वविषये स्वयोग्यतावलादेव प्रमाणत्वव्यवस्थितेः अन्यथा क्वचिदपूर्वार्थग्राहिणः प्रत्यक्षस्याप्रमाणत्वानुषंगात् इति सापि न साधीयसी तथोहस्यापि स्वयोग्यताविशेषसामर्थ्यादेव स्वविषयप्रत्यायनसिद्धेर्भवदुद्भावितदूषणवैयर्थ्यव्यवस्थानात् । योग्यताविशेषः पुनः प्रत्यक्षस्येव स्वविषयज्ञानावरणवीर्यांतरायक्षयोपशमविशेष एवोहस्यापि प्रतिपद्यते सकलबाधकवैधुर्यात् । यथा च प्रत्यक्षस्योत्पत्तौ मनोऽक्षादिसामिग्री योग्यतायाः सहकारिणी बहिरंगनिमित्तत्वात् तथोहस्यापि समुद्भूतौ भूयः प्रत्यक्षानुपलंभसामिग्रीबहिरंगनिमितभूतानुमन्यते तदन्वयव्यतिरेकानुविधायित्वादूहस्येति सर्वनिरवद्यसिद्धे चानुमानप्रमाणान्यथानुपपत्त्या तर्कस्य प्रमाणत्वे–प्रत्यभिज्ञानं प्रमाणं तर्कप्रमाणत्वान्यथानुपपत्तेः न ह्यप्रत्यभिज्ञाने विषये तर्कः प्रवर्तते अतिप्रसंगात् । नच गृहीतग्रहणात्प्रत्यभिज्ञानस्याप्रमाणत्वं शंकनीयं तद्विषयस्यास्मर्यमाणदृश्यमानपर्यायव्याप्येकद्रव्यस्य स्मरणप्रत्यक्षागोचरत्वात् अपूर्वार्थग्राहित्वासिद्धेः । नचेदं प्रत्यक्षेऽंतर्भवति प्रत्यक्षस्य वर्तमानपर्यायविषयत्वात् । नाप्यनुमाने लिंगानपेक्षत्वात् । न शाब्दे शब्दनिरपेक्षत्वात् । नोपमाने सादृश्यमंतरेणापि भावात् । नार्थापत्तौ प्रत्यक्षादिप्रमाणषट्कविज्ञातार्थप्रतिपत्तिमंतरेणापि प्रादुर्भावात् । नाभावे निषेध्याधारवस्तुग्रहणेन निषेध्यस्मरणेन च विनैवोत्पादादिति सर्वेषामेकद्वित्रिचतुःपंचषट्प्रमाणसंख्यानियमं विघटयति । एतेन स्मृतिः प्रमाणांतरमुक्तं तस्याश्च प्रत्यक्षादिष्वंतर्भावयितुमशक्तेः । न चासावप्रमाणमेव संवादकत्वात् कथंचिदपूर्वार्थग्राहित्वात् बाधाबर्जितत्वाच्चानुमानवदिति । येषां तु स्मरणमप्रमाणं तेषां पूर्वप्रतिपन्नस्य साध्यसाधनसंबंधस्य वाच्यवाचकसंबंधस्य च स्मरणसामर्थ्यादव्यवस्थितेः कुतोऽनुमानं शाब्दं वा प्रमाणं सिद्ध्येत् । तदप्रसिद्धौ च न संवादकत्वासंवादकत्वाभ्यां प्रत्यक्षतदाभासव्यवस्थितिरिति सकलप्रमाणविलोपापत्तिः ततः प्रमाणव्यवस्थामभ्यनुजानता स्मृतिरपि प्रमाणयितव्या इति न परेषां संख्यानियमः सिद्ध्येत् । स्याद्वादिनां तु संक्षेपात्प्रत्यक्षपरोक्षविकल्पात् प्रमाणद्वयं सिद्धत्येव तत्र सकलप्रमाणभेदानां संग्रहादिति सूक्तं ।

किं पुनः प्रत्यक्षमित्युच्यते विशदज्ञानात्मकं प्रत्यक्षं प्रत्यक्षत्वात् यत्तु न विशदज्ञानात्मकं तन्न प्रत्यक्षं यथानुमानादिज्ञानं प्रत्यक्षं च विवादाध्यासितं तस्माद्विशदज्ञानात्मकं । न तावदत्राप्रसिद्धो धर्मी प्रत्यक्षधर्मिणि केवलप्रत्यक्षवादिनामविप्रतिपत्तेः । शून्यसंवेदनाद्वैतवादिनामपि स्वरूपप्रतिभासनस्य प्रत्यक्षस्याभीष्टेः । प्रत्यक्षत्वस्य हेतोरसिद्धतापि अनेन समुत्सारिता प्रत्यक्षमिच्छद्भिः प्रत्यक्षत्वस्य तद्धर्मस्य स्वयमिष्टत्वात् । प्रतिज्ञार्थैकदेशासिद्धत्वं साधनस्य स्यादिति चेत् का पुनः प्रतिज्ञा तदेकदेशो वा यस्यासिद्धत्वं शंक्येत ? धर्मधर्मिसमुदायः प्रतिज्ञा तदेकदेशो धर्मी हेतुर्यथा नश्वरः शब्दो शब्दत्वादिति तथा साध्यधर्मः प्रतिज्ञैकदेशो यथा नश्वरः शब्दो नश्वरत्वात् सोयं द्विविधो प्रतिज्ञार्थैकदेशासिद्धो हेतुः स्यादिति चेत् ? न धर्मिणो हेतुत्वे कस्य चिदसिद्धतानुपपत्तेः । यथैव हि प्रत्यक्षप्रयोगकाले वादिप्रतिवादिप्रसिद्धो धर्मी तथा तस्य हेतुत्ववचनेऽपि नासिद्धिः । साध्यधर्मस्तु हेतुत्वेनोपादीयमानो न प्रतिज्ञातार्थैकदेशत्वेनासिद्धो धर्मिणोऽप्यसिद्धिप्रसंगात् । किं तर्हि ? स्वरूपेण वासिद्ध इति न प्रतिज्ञार्थैकदेशासिद्धो नाम हेत्वाभासः संभवतीति कथं प्रकृतहेतौ प्रतिज्ञार्थैकदेशासिद्धत्वं समुद्भावयन् भावितानुमानस्वभावः ? । धर्मिणो हेतुत्वेऽनन्वयप्रसंग इति चेत् न विशेषं धर्मिणं कृत्वा सामान्यं हेतुं ब्रुवतां दोषासंभवात् । प्रत्यक्षं हि विशेषरूपं धर्मी प्रत्यक्षसामान्यं हेतुः स कथमनन्वयः स्यात् सकलप्रत्यक्षविशेषस्य व्यापित्वात् । दृष्टांते क्वचिदभावात् अनन्वय इति चेत् न सर्वे भावाः क्षणिकाः सत्त्वात् इत्यादेरपि हेतोरनन्वयत्वप्रसक्तेः ।

अथास्य दृष्टांतेन अन्वयस्यापि साध्यधर्मिणि सर्वत्रान्वयसिद्धेर्विपक्षे बाधकप्रमाणसद्भावाच्च निर्दोषतामनुमन्यते तत एव प्रत्यक्षत्वस्य हेतोर्निर्दोषतास्तु सर्वथा विशेषाभावात् केवलव्यतिरेकिणोऽपि हेतोरविनाभावनिर्णयात् साध्यसाधनसामर्थ्यान्न काश्चिदुपालंभस्ततो निरवद्योऽयं हेतुः प्रत्यक्षस्य विशदज्ञानात्मकत्वं साधयत्येव। नचैतदसंभवि साध्यमात्मानं प्रतिनियतस्य ज्ञानस्य प्रत्यक्षशब्दवाच्यस्यार्थसाक्षात्कारिणः सर्वस्य कात्स्न्येन एकदेशेन वा वैशद्यसिद्धेर्बाधकाभावात्। अक्ष्णोति व्याप्नोति जानातीत्यक्षो हि—आत्मानमेव क्षीणावरणं क्षीणोपशांतावरणं वा प्रतिनियतस्य ज्ञानस्य प्रत्यक्षशब्दवाच्यस्य कथंचिदपि वैशद्यं संभाव्यमिति सूक्तं विशदज्ञानात्मकं प्रत्यक्षं।

तत्त्रिविधं—इंद्रियानींद्रियातींद्रियप्रत्यक्षविकल्पनात्। तत्रेंद्रियप्रत्यक्षं सांव्यवहारिकं देशतोविशदत्वात्। तद्वदनींद्रियप्रत्यक्षं तस्यांतर्मुखाकारस्य कथं चिद्वैशद्यसिद्धेः। अतींद्रियप्रत्यक्षं तु द्विविधं विकलप्रत्यक्षं सकलप्रत्यक्षं चेति। विकलप्रत्यक्षमपि द्विविधं—अवधिज्ञानं मनःपर्ययज्ञानं चेति सकलप्रत्यक्षं तु केवलज्ञानं तदेतत्त्रितयमपि मुख्यं प्रत्यक्षं मनोऽक्षानपेक्षत्वात् अतीतव्यवभिचारित्वात् साकारवस्तुग्राहित्वात् सर्वथा स्वविषयेषु वैशद्याच्च। तथा चोक्तं तत्त्वार्थवार्तिककारैः।

इंद्रियानींद्रियानपेक्षमतीतव्यभिचारं साकारग्रहणं प्रत्यक्षमिति

तत्रेंद्रियानींद्रियानपेक्षमिति वचनात् सांव्यवहारिकस्येंद्रियप्रत्यक्षस्यानींद्रियस्य च देशतो विशदस्य व्यवच्छेदसिद्धेः। अतीतव्यभिचारमिति वचनात् विभंगज्ञानस्यावधिप्रत्यक्षाभासस्य निवृत्तेः। साकारग्रहणमिति प्रतिपादनात् निराकारग्रहणस्य दर्शनस्य प्रत्यक्षत्वव्यावर्तनात्।

सूक्तं मुख्यं प्रत्यक्षत्रयं ननु स्वसंदेनप्रत्यक्षं चतुर्थं स्यादिति न मंतव्यं तस्य सकलज्ञानसाधरणस्वरूपत्वात्। यथैव हींद्रियप्रत्यक्षस्य स्वरूपसंवेदनमिंद्रियप्रत्यक्षमेव अन्यथा तस्य स्वपरस्वरूपसंवेदकत्वविरोधात् संवेदनद्वयप्रसंगाच्च। तथानींद्रियप्रत्यक्षस्य मानसस्य स्वरूपसंवेदनमानींद्रियप्रत्यक्षमेव तत एव तद्वदतींद्रियप्रत्यक्षत्रितयमेवेति न ततोऽर्थांतरं स्वसंवेदनप्रत्यक्षं। एतेन श्रुतज्ञानस्य स्वरूपसंवेदनमनींद्रियप्रत्यक्षमुक्तं प्रतिपत्तव्यं तस्यानींद्रियनिमित्तत्वात् विभ्रमज्ञानस्वरूपसंवेदनवत्। तथा च सकलं ज्ञानं स्वरूपसंवेदनापेक्षया प्रमाणं सिद्धं भावप्रमेयापेक्षायां प्रमाणाभासनिन्हवः।

किं पुनरिंद्रियप्रत्यक्षं ? इंद्रियप्रधान्यादिंद्रियबलाधानादुपजायमानं मतिज्ञानं—

तादिंद्रियानींद्रियनिमित्तं।

इति वचनात्। तच्चतुर्विधं—अवग्रहेहावायधारणाविकल्पात्। तत्र **विषयविषयिसन्निपातानंतरमाद्यग्रहणमवग्रहः। तद्गृहीतवस्तुविशेषाकांक्षणमीहा। भवितव्यताप्रत्ययरूपात्तदीहितविशेषनिश्चयोऽवायः। सावधारणं ज्ञानं कालांतराविस्मरणकारणं धारणाज्ञानं।** तदेतच्चतुष्टयमपि अक्षव्यापारापेक्षं अक्षव्यापाराभावे तदनुद्भवनात्। मनोऽपेक्षं च प्रतिहतमनसस्तदनुत्पत्तेः। तत एवेंद्रियप्रत्यक्षं देशतो विशदमविसंवादकं प्रतिपत्तव्यं स्पर्शनादीन्द्रियनिमित्तस्य बहुबहुविधक्षिप्रानिसृतानुक्तध्रुवेषु तदितरेष्वर्थेषु वर्तमानस्य प्रतींद्रियमष्टचत्वारिंशद्भेदस्य व्यंजनावग्रहभेदैरष्टचत्वारिंशता सहितस्य संख्याष्टाशीत्युत्तरद्विशती प्रतिपत्तव्या। तथा अनींद्रियप्रत्यक्षं बह्वादिद्वादशप्रकारार्थविषयमवग्रहादिविकल्पमष्टचत्वारिंशत्संख्यं प्रतिपत्तव्यं। यत्पुनरतींद्रियप्रत्यक्षविकल्पमवधिज्ञानं तत् षड्विधं अनुगामि-अननुगामि-वर्धमान-हीयमान-अवस्थित-अनवस्थितविकल्पात्। सप्रतिपाताप्रतिपातयोरत्रैवांतर्भावात्। संक्षेपतस्तु त्रिविधं देशावधि-परमावधि-सर्वावधिभेदात्। तत्र देशावधिज्ञानं षड्विकल्पमपि संभवति परमावधिज्ञानं तु संयमविशेषैकार्थसमवायिभवांतरापेक्षयाननुगामि प्रतिपातं च प्रत्येयं। तद्भवापेक्षया च तदनुगाम्येव नाननुगामि। वर्धमानमेव न हीयमानं। अवस्थितमेव नानवस्थितं। अप्रतिपातमेव नप्रतिपातं तथाविधविशुद्धिनिबंधनत्वात्। एतेन सर्वावधिज्ञानं व्याख्यातं। केवलं तद्वर्धमानमपि न भवति परमप्रकर्षप्राप्तत्वात् सकलावधिज्ञानावरणवीर्यांतरायक्षयोपशमवशात्प्रसूतत्वात्। अतिसंक्षेपतस्तु द्विविधमवधिज्ञानं भवप्रत्ययं

गुणप्रत्ययं चेति । तत्र भवप्रत्ययं बहिरंगदेवभवनारकभवप्रत्ययनिमित्तत्वात् । तद्भावे भावात् तदभावेऽभावात् तत्तु देशावधिज्ञानमेव । गुणप्रत्ययं तु सम्यग्दर्शनगुणनिमित्तमसंयतसम्यग्दृष्टेः । संयमासंयमगुणहेतुकं संयतासंयतस्य । संयमगुणनिबंधनं संयतस्य । सत्यंतरंगहेतौ बहिरंगस्य गुणप्रत्ययस्य भावे भावात् । तदभावे चाभावात् । तथा मनःपर्ययज्ञानं विकलमतींद्रियप्रत्यक्षं द्वेधा ऋजुमतिविकल्पात् । तत्रर्जुमतिमनःपर्ययज्ञानं निर्वर्तितप्रगुणवाक्कायमनस्कृतार्थस्य परमनोगतस्य परिच्छेदकत्वात्त्रिविधं । विपुलमतिमनःपर्ययज्ञानं तु निर्वर्तितानिर्वर्तितप्रगुणाप्रगुणवाक्कायमनस्कृतार्थस्य परमनसि स्थितस्य स्फुटतरमवबोधकत्वात् षट्प्रकारं, तथाविधमनःपर्ययज्ञानावरणवीर्यांतरायक्षयोपशमविशेषबलात् प्रादुर्भूतत्वात् । सकलमतींद्रियप्रत्यक्षं केवलज्ञानं सकलमोहक्षयात् सकलज्ञानदर्शनावरणवीर्यांतरायक्षयाच्च समुद्भूतत्वात् सकलवैशद्यसद्भावात् सकलविषयत्वाच्च । तद्वान् कश्चित्पुरुषविशेषो भवत्येव सुनिर्णीतासंभद्बाधकप्रमाणत्वात् । तथा शास्त्रज्ञानेन तद्वानुभयवादिप्रसिद्धः । नचात्रासिद्धं साधनं सर्वातींद्रियप्रत्यक्षवतः पुरुषस्य प्रत्यक्षादिप्रमाणैरबाध्यमानस्य सकलदेशकालपुरुषपरिषदपेक्षयापि सिद्धत्वात् सुखादिसंवेदनस्यापि तथैव प्रमाणत्वोपपत्तेः । अन्यथा कस्यचिदिष्टसिद्धेरसंभवात् । इति संक्षेपतो विशदं ज्ञानं सांव्यवहारिकं मुख्यं च प्ररूपितं विस्तरतस्तु तत्त्वार्थालंकारे परीक्षितमिह द्रष्टव्यं ।

संप्रति परोक्षमुच्यते —परोक्षमविशदज्ञानात्मकं परोक्षत्वात् यन्नाविशदज्ञानात्मकं तन्न परोक्षं यथातींद्रियप्रत्यक्षं परोक्षं च विवादाध्यासितं ज्ञानं तस्मादविशदज्ञानात्मकं । नचास्य परोक्षत्वमसिद्धं—अक्षेभ्यः परावृत्तत्वात् । **तथोपात्तानुपात्तपरप्रत्ययापेक्षं परोक्षमिति** तत्त्वार्थवार्तिककारैरभिधानात् । उपात्तो हि प्रत्ययः कर्मवशादात्मना करणत्वेन गृहीतः स्पर्शनादिः । ततोऽन्यः पुनर्बहिरंगः सहकारी प्रत्ययोऽनुपात्तः शब्दलिंगादिः तदपेक्षं ज्ञानं परोक्षमित्यभिधीयते । तदपि संक्षेपतो द्वेधा मतिज्ञानं श्रुतज्ञानं चेति **आद्ये परोक्षं** इति वचनात् । मतिश्रुतावधिमनःपर्ययकेवलानि हि ज्ञानं । तत्राद्ये मतिश्रुते सूत्रपाठापेक्षया लक्ष्येते ते च परापेक्षतया परोक्षे प्रतिपादिते । परानपेक्षाण्यवधिमनःपर्ययकेवलानि यथा प्रत्यक्षाणीति । तत्रावग्रहादिधारणापर्यंतं मतिज्ञानमपि देशतोवैशद्यसद्भावात्सांव्यवहारिकं, इंद्रियप्रत्यक्षमतींद्रियप्रत्यक्षं चाभिधीयमानं न विरुध्यते ततः शेषस्य मतिज्ञानस्य स्मृतिसंज्ञाचिंताभिनिबोधलक्षणस्य श्रुतस्य च परोक्षत्वव्यवस्थितेः । तदुक्तमकलंकदेवैः—

प्रत्यक्षं विशदं ज्ञानं मुख्यसंव्यवहारतः ।
परोक्षं शेषविज्ञानं प्रमाणमिति संग्रहः ॥ १ ॥

तत्र तदित्याकारानुभूतार्थविषया स्मृतिः अनींद्रियप्रत्यक्षं विशदत्वात् सुखादिसंवेदनवदित्येके[1] तदसत् । तस्मात्तत्र वैशद्यासिद्धेः पुनर्भावयतो वैशद्यप्रतीतेर्भावनाज्ञानत्वात् तस्य च भ्रांतत्वात् स्वप्नज्ञानवत् । पूर्वानुभूतेऽतीतेऽर्थे वैशद्यासंभवात् स्मृतिः परोक्षमेव श्रुतानुमितस्मृतिवत् इत्यपरे[2] तदित्युल्लेखस्य सर्वस्यां स्मृतौ सद्भावात् । सा च प्रमाणमविसंवादकत्वात् प्रत्यक्षवत् यत्र तु विसंवादः सा स्मृत्याभासा प्रत्यक्षाभासवत् । तथा तदेवेदमित्याकारं ज्ञानं संज्ञा प्रत्यभिज्ञा तादृशमेवेदमित्याकारं वा विज्ञानं संज्ञोच्यते । तस्या एकत्वसादृश्यविषयत्वाद्वैविध्योपपत्तेः । द्विविधं हि प्रत्यभिज्ञानं तदेवेदमित्येकत्वनिबंधनं । तादृशमेवेदति सादृश्यनिबंधनं च । ननु च तदेवेत्यतीतप्रतिभासस्य स्मरणरूपत्वात् इदमिति संवेदनस्य प्रत्यक्षरूपत्वात् संवेदनद्वितयमेवैतत् तादृशमेवेदमिति स्मरणप्रत्यक्षसंवेदनद्वितयवत् ततो नैकं ज्ञानं प्रत्यभिज्ञाख्यां प्रतिपद्यमानं संभवतीति काश्चित् सोऽपि न संवेदनविशेषविपश्चित् स्मरणप्रत्यक्षजन्यस्य पूर्वोत्तरविवर्तवर्त्येकद्रव्यविषयस्य प्रत्यभिज्ञानस्यैकस्य सुप्रतीतत्वात् । न हि तदिति स्मरणं तथाविधद्रव्यव्यवसायात्मकं तस्यातीतविवर्तमात्रगोचरत्वात् । नापीदमिति संवेदनं तस्य वर्तमानविवर्तमात्रविषयत्वात् । ताभ्यामुपजन्यं तु सकलज्ञानं तदनुवादपुरस्सरं द्रव्यं प्रत्यवमृशत् । ततो-

---

१ मीमांसकाः । २ सौगतादिनः ।

ऽन्यदेव प्रत्यभिज्ञानमेकत्वविषयं तदपह्नवे क्वचिदेकान्वयाव्यवस्थानात् संतानैकत्वसिद्धिरपि न स्यात्। नचैतदगृहीतप्रमाणादप्रमाणमिति शंकनीयं तस्य कथंचिदपूर्वार्थत्वात्। न हि तद्विषयभूतमेकं द्रव्यं स्मृतिप्रत्यक्षग्राह्यं येन तत्र प्रवर्तमानं प्रत्यभिज्ञानं गृहीतग्राहि मन्येत तद्गृहीतातीतवर्तमानाविवर्तितादात्म्यात्। द्रव्यस्य कथंचिदपूर्वार्थत्वेऽपि प्रत्यभिज्ञानस्य तद्विषयस्य नाप्रमाणत्वं लैंगिकादेरप्यप्रमाणत्वप्रसंगात् तस्यापि सर्वथैवापूर्वार्थत्वासिद्धेः। संबंधग्राहिविज्ञानाविषयात् साध्यादिसामान्यात् कथंचिदभिन्नस्यानुमेयस्य देशकालविशिष्टस्य तद्विषयत्वात् कथंचिदपूर्वार्थत्वसिद्धेः बाधकप्रमाणान्न प्रमाणं प्रत्यभिज्ञानमिति चायुक्तं तद्बाधकस्यासंभवात्। नहि प्रत्यक्षं तद्बाधकं तस्य तद्विषये प्रवृत्त्यसंभवात्। साधकत्ववद्बाधकत्वविरोधात्। यथा हि यद्यत्र विषये न प्रवर्तते न तत्तस्य साधकं बाधकं वा यथा रूपज्ञानस्य रसज्ञानं न प्रवर्तते च प्रत्यभिज्ञानस्य विषये प्रत्यक्षं तस्मान्न तद्बाधकं। प्रत्यक्षं हि न प्रत्यभिज्ञानविषये पूर्वदृष्टदृश्यमानपर्यायव्यापिनि द्रव्ये प्रवर्तते तस्य दृश्यमानपर्यायविषयत्वात् इति नासिद्धं साधनं। एतेनानुमानं प्रत्यभिज्ञानस्य बाधकं प्रत्याख्यातं तस्यापि प्रत्यभिज्ञानविषये प्रवृत्त्ययोगात्, क्वचिदनुमेयमात्रे प्रवृत्तिसिद्धेः। तस्य तद्विषये प्रवृत्तौ वा सर्वथा बाधकत्वविरोधात्। ततः प्रत्यभिज्ञानं स्वविषये द्रव्ये प्रमाणं सकलबाधारहितत्वात् प्रत्यक्षवत् स्मृतिवद्वा एतेन सादृश्यनिबंधनं प्रत्यभिज्ञानं प्रमाणमावेदितं बोद्धव्यं तस्यापि स्वविषये बोधाकाररहितत्वासिद्धेः। यथैव हि प्रत्यक्षं स्वविषये साक्षात्क्रियमाणे स्मरणं च स्मर्यमाणेऽर्थे बाधाविधुरं तथा प्रत्यभिज्ञानमेकत्र द्रव्ये सादृश्ये च स्वविषये न संभवद्बाधकमिति कथमप्रमाणमनुमन्येमहि। यत्पुनः स्वविषये बाध्यमानं तत्प्रत्यभिज्ञानाभासं यथा प्रत्यक्षाभासं स्मरणाभासं वा न च तस्याप्रमाणत्वे सर्वथा प्रमाणत्वं युक्तं प्रत्यक्षस्याप्यप्रमाणत्वप्रसंगात्। तस्माद्यथा शुक्ले शंखे पीताभासं प्रत्यक्षं तत्रैव शुक्लाभासेन प्रत्यक्षांतरेण बाध्यमानत्वात् अप्रमाणं न पुनः पीते कनकादौ पीताभासं प्रत्यक्षं। तथा तस्मिन्नेव स्वपुत्रादौ तादृशोयमिति प्रत्यभिज्ञानं सादृश्यनिबंधः स एवायमित्येकत्वनिबंधनेन प्रत्यभिज्ञानेन बाध्यमानमप्रमाणं सिद्धं न पुनः सादृश्य एव प्रवर्तमानं स्वपुत्रादिना सादृश्येऽन्यपुत्रादौ तादृशोऽयमिति प्रत्यभिज्ञानं तस्याबाध्यत्वेन प्रमाणत्वात्। एवं लूनपुनर्जातनखकेशादिरिति सादृश्यप्रत्यवमर्शिप्रत्यभिज्ञानं तत्र तस्याबाध्यमानतया प्रमाणत्वसिद्धेः। तथैव पूर्वानुभूते हि हिरण्यादौ प्रदेशविशेषविशिष्टे स्मरणं विपरीतदेशतया तत्स्मरणस्य बाधकमिति न तत्तत्र प्रमाणं। यथानुभूतप्रदेशे तु तथैव स्मरणं प्रमाणमिति बोद्धव्यं। तत इदमभिधीयते यतो यतोर्थी परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां न विसंवाद्यते तत्तत्प्रमाणं यथा प्रत्यक्षमनुमानं वा। स्मरणात् प्रत्यभिज्ञानाच्च अर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां न विसंवाद्यते च तस्मात्प्रमाणं स्मरणं प्रत्याभिज्ञानं चेति। तथा परोक्षमेतदविसंवादित्वात्। अनुमानवत्। साध्यसाधनसंबंधग्राहितर्कवद्वा विशदस्य भावनाज्ञानत्वात्। यावान् काश्चिद्धूमः स सर्वः पावकजन्मैव अपावकजन्मा वा न भवतीति सकलदेशकालव्याप्तसाध्यसाधनसंबद्धोहापोहलक्षणो हि तर्कः प्रमाणयितव्यः तस्य कथंचिदपूर्वार्थत्वात्। प्रत्यक्षानुपलंभगृहीतप्रतिनियतदेशकालसाध्यसाधनव्यक्तिमात्रग्राहित्वाभावात् गृहीतग्रहणसंभवात् बाधकवर्जितत्वाच्च। नहि तर्कस्य प्रत्यक्षं बाधकं तद्विषये तस्याप्रवृत्तेरनुमानवत् प्रवृत्तौ वा सर्वथा तद्बाधकत्वविरोधात् क्वचिदेव तद्बाधकोपपत्तेः। यस्य तु तद्बाधकं स तर्काभासो न प्रमाणमितीष्टं शिष्टैः स्मरणप्रत्यभिज्ञानाभासवत्। प्रत्यक्षानुमानाभासवद्वा तथा प्रमाणं तर्कस्ततोऽर्थे परिच्छिद्य प्रवर्तमानस्यार्थक्रियायां विसंवादाभावात् प्रत्यक्षानुमानवदिति प्रतिपत्तव्यं। परोक्षं चेदं तर्कज्ञानं अविसंवादकत्वात् अनुमानवत्। किं पुनरनुमानं नाम ?

साधनात्साध्यविज्ञानमनुमानं।

तत्र साधनं साध्याविनाभावियनिश्चयैकलक्षणं लक्षणांतरस्य साधनाभासेऽपि भावात्। स्वलक्षणस्य साधनस्य साधनीनुपपत्तेः पंचादिलक्षणवत्। नच सपक्षे सत्त्वं पक्षधर्मत्वं विपक्षे चासत्त्वमात्रं साधनलक्षणं पश्यामस्तत्पुत्रत्वादितरतत्पुत्रवदित्यत्र साधनाभासे तत्सद्भावसिद्धेः। सपक्षे हीतरत्र तत्पुत्रे तत्पुत्रत्वस्य साधनस्य श्यामत्वव्याप्तस्य सत्त्वं प्रसिद्धं। विवादाध्यासिते च तत्पुत्रे पक्षीकृते तत्पुत्रत्वस्य सद्भावात् पक्षधर्मत्वं। विपक्षे वा श्यामे क्वचिदन्यपुत्रे तत्पुत्रत्वस्याभावात् विपक्षेऽसत्त्वमात्रं च। नच तावता साध्यसाध-

नत्वं साधनस्य । ननु साकल्येन साध्यनिवृत्तौ साधननिवृत्तेरसंभवात् परत्र गौरेऽपि तत्पुत्रे तत्पुत्रत्वस्य भावात् न सम्यक् साधनमेतत् इति चेत् तर्हि कात्स्न्र्येन साध्यनिवृत्तौ साधननिवृत्तेर्निश्चयएवैकं साधनलक्षणं सएवान्यथानुपपत्तिनियमनिश्चयः स्याद्वादिभिः साधनलक्षणमभिधीयते तत्सद्भावे पक्षधर्मत्वाद्यभावेऽपि साधनस्य सम्यक्त्वप्रतीतेः उदेष्यति शकटं कृत्तिकोदयादित्यस्य पक्षधर्मत्वाभावेऽपि प्रयोजकत्वव्यवस्थितेः । न हि शकटे धर्मिण्युदेष्यत्तायां साध्यायां कृत्तिकाया उदयोऽस्ति तस्य कृत्तिकाधर्मत्वात् ततो न पक्षधर्मत्वं । यदि पुनराकाशं कालो वा धर्मी तस्योदेष्यच्छकटवत्त्वं साध्यं कृत्तिकोदयसाधनं पक्षधर्म एवेति मतं तदा धरित्रीधर्मिणि महोदध्याधारान्निमत्त्वं साध्यं महानसधूमवत्त्वं साधनं पक्षधर्मोऽस्तु तथा च महानसधूमो महोदधावग्निं गमयेदिति न कश्चिदपक्षधर्मो हेतुः स्यात् । अथेत्थमेतस्य साधनस्य पक्षधर्मत्वसिद्धावपि न साध्यसाधनसामर्थ्यमविनाभावियमनिश्चयस्याभावादित्यभिधीयते तर्हि स एव साधनलक्षणमक्षूणं परीक्षादक्षैरुपलक्ष्यते ।

योप्याह शकटोदयो भाविकारणं कृत्तिकोदयस्य तदन्वयव्यतिरेकानुविधानात् सति हि स्वकाले भविष्यति शकटोदये कृत्तिकोदय उपलभ्यते नासतीत्यन्वयव्यतिरेकानुविधानं सिद्धं भविष्यच्छकटकृत्तिकोदययोः कार्यकारणभावं साधयति विनष्टवर्तमानवदेव । यथैवोदगाद्भरणिः कृत्तिकोदयादित्यत्रातीतो भरण्युदयः कारणं, कृत्तिकोदयस्तत्कार्यं स्वकालेऽतीते सति भरण्युदये कृत्तिकोदयस्य भावादसत्यभावाच्च तदन्वयव्यतिरेकानुविधानात् कार्यकारणभावः । तथा भविष्यद्वर्तमानयोरपि प्रकृतसाध्यसाधनयोर्न्यायस्य समानत्वात् । नचैकस्य कृत्तिकोदयस्य भविष्यदतीतकारणद्वितयं विरुध्यते भिन्नदेशयोरिव भिन्नकालयोरपि सहकारित्वविरोधात् । सैहैकस्य कार्यस्य कारणं हि सहकारित्वनिबंधनं नाभिन्नकालत्वमभिन्नदेशवत् । नचातीतानागतौ भरण्युदयशकटोदयौ कृत्तिकोदयस्योपादानकारणं पूर्वकृत्तिकालक्षणस्यानुदयमापन्नस्य तदुपादानकारणत्वसंप्रतिपत्तेः ? इति सोऽपि न प्रातीतिकवचनः तथा प्रतीत्यभावात् । कार्यकालमप्राप्नुवतोर्विनष्टानागतयोः कारणत्वे हि विनष्टतमानागततमयोरपि कारणत्वं कथं निवार्यं ? प्रत्यासत्तिविशेषाभावादिति चेत् तर्हि स एव प्रत्यासत्तिविशेषः कारणत्वाभिमतयोरतीतानागतयोः कारणत्वे हेतुर्वक्तव्यः । स चातीतस्य कार्ये व्यापारस्तावन्न भवति सर्वथापि कार्यकाले तदसत्त्वादनागतवत् । तद्भावे भावप्रत्यासत्तिविशेष इत्यप्यसारं अतीतस्यानागतस्य चाभाव एव कार्यस्य भावात् भावे चाभावात् अन्यथा कार्यकारणयोरेककालतापत्तेः सकलसंतानानामेकक्षणवर्तित्वप्रसंगः । नैकक्षणसंतानो नाम तस्यापरामृष्टभेदनानाकार्यकारणलक्षणत्वात् ।

यद्यभ्यधायि कारणस्यातीतस्यानागतस्य च स्वकाले भावे कार्यस्य भावात् अभावे चाभावात् तदभावाभावोऽन्वयव्यतिरेकानुविधानलक्षणः प्रत्यासत्तिविशेषोऽस्त्येव इति तदप्यसंगतं कारणत्वानभिमतातीतानागततमयोरपि तथा तद्भावप्रसंगात् । कार्यस्य भिन्नदेशस्य तु कारणत्वे युक्तस्तद्भावभावः कलशकुंभकारादिवत् । कुंभकारादिषु हि भिन्नस्वदेशेषु सत्सु कलशस्य भावोऽसत्सु चाभावस्तेषां तत्र व्यापारात् । कारणत्वानभिमतस्य तु भिन्नदेशस्य न कार्ये तद्भावभावो तत्र तस्याव्यापारात् अतीतानागतवत् । सतो हि कस्य चित्कचिद्व्यापारः श्रेयान् न पुनरसतः खरविषाणादेरिवेति युक्तं ततो भिन्नदेशस्यापि कस्यचिदेकस्य कार्ये व्याप्रियमाणस्य सहकारिकारणत्वं प्रतीतिमनुसरति न पुनर्भिन्नकालस्य प्रतीत्यतिलंघनात् ततो न कृत्तिकोदयशकटोदययोः कार्यकारणभावः समवतिष्ठते व्याप्यव्यापकभाववत् । सत्यपि तयोः कार्यकारणभावे न हेतोः पक्षधर्मत्वं युज्यते इति पक्षधर्ममंतरेणापि हेतोर्गमकत्वसिद्धेर्न तल्लक्षणमुपेक्ष्यते । तथा न सपक्ष एव सत्त्वं निश्चितं तदभावेऽपि सर्वभावानामनित्यत्वे साध्ये सत्त्वादेः साधनस्य स्वयं साधुत्वसमर्थनात् । विपक्षे पुनरसत्त्वमेव निश्चितं साध्याविनाभावियमनिश्चयरूपमेवेति तदेव हेतोः प्रधानलक्षणमस्तु किमत्र लक्षणांतरेण ?

अथ मतमेतत्पक्षधर्मत्वमसिद्धत्वमसिद्धत्वव्यवच्छेदार्थं साधनस्य लक्षणं निश्चीयते । सपक्ष एव सत्त्वं विरुद्धत्वव्यवच्छेदाय । विपक्षे चासत्त्वं–अनेकांतित्वव्यवच्छित्तये । तदनिश्चये हेतोरसिद्धत्वादिदोषत्रयपरिहारा-

संभवात् त्रैरूप्यं तल्लक्षणं सफलमेव । तदुक्तं—

हेतोस्त्रिष्वपि रूपेषु निर्णयस्तेन वर्णितः ।
असिद्धविपरीतार्थव्यभिचारिविपक्षतः इति ॥ १ ॥

तदप्यपरीक्षिताभिधानं सौगतस्य हेतोरन्यथानुपपत्तिनियमनिश्चयादेव दोषत्रयपरिहारसिद्धेः स्वयमसिद्धस्यान्यथानुपपत्तिनियमनिश्चयासंभवात् । अनैकांतिकविपरीतार्थवत् तस्य तथोपपत्तिनियमनिश्चयरूपत्वात् । तस्य चासिद्धव्यभिचारिणि विरुद्धे च हेतावसंभावनीयत्वात् । रूपत्रयस्याविनाभावनियमप्रपंचत्वात् साधनलक्षणत्वे तत एव रूपप्रपंचकस्य साधनलक्षणत्वमस्तु । पक्षव्यापकत्वान्वयव्यतिरेकाबाधितविषयत्वासत्प्रतिपक्षरूपाणि हि पंचाप्यविनाभावनियमप्रपंच एव बाधितविषयस्य सत्प्रतिपक्षितस्य चाविनाभावनियमानिश्चयात् पक्षाव्यापकानन्वयाव्यतिरेकवत् । न पक्षधर्मत्वे सत्येव साधनस्य सिद्धत्वं येनासिद्धविवेकतस्तत्तस्य लक्षणं, अपक्षधर्मस्यापि सिद्धत्वसमर्थनात् । नापि सपक्षे सत्त्वे एव विपरीतार्थविवेकः सर्वानेकांतात्मकत्वसाधने सत्त्वादेः सपक्षे सत्त्वाभावेऽपि विरुद्धत्वाभावात् परस्य सर्वानित्यत्वसाधनवत् । नच व्यतिरेकमात्रे सत्यपि व्यभिचारिविवेके श्यामत्वे साध्येतत्पुत्रत्वादेर्व्यभिचारसाधनात् व्यतिरेकाविशेषस्तु तदेवान्यथानुपपन्नत्वमिति न त्रीणि रूपाण्यविनाभावनियमप्रपंचः तेषु सत्सु हेतोरन्यथानुपपत्तिदर्शनात् । तेषां तत्प्रपंचत्वे कालाकाशादीनामपि तत्प्रपंचत्वप्रसक्तिस्तेष्वपि सत्सु तद्दर्शनात् । तेषां सर्वसाधरणत्वान्न हेतुरूपत्वमित्यपि पक्षधर्मत्वादिषु समानं तेषामपि साधारणत्वाद्धेत्वाभासेष्वपि भावात् । ततोऽसाधारणं लक्षणमाचक्षाणैरन्यथानुपपन्नत्वमेव नियतं हेतुलक्षणं पक्षीकर्तव्यं । तथोक्तं—

अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किं
नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किं ॥ १ ॥ इति

एतेन पंचरूपाणि हेतोरविनाभावनियमप्रपंच एव इत्येतदपास्तं सत्यप्यबाधितविषयत्वे सत्प्रतिपक्षे चाविनाभावनियमानवलोकात् । पक्षव्यापकत्वान्ययव्यतिरेकवत् । स श्यामस्तत्पुत्रत्वादितरतत्पुत्रवत् इत्यत्र तत्पुत्रत्वस्य हेतोर्विषये श्यामत्वे बाधकस्य प्रत्यक्षादेरभावात् अबाधितविषयत्वसिद्धावपि अविनाभावनियमासत्त्वात् अश्यामेन तत्पुत्रेण व्यभिचारात् । तथा तस्य श्यामत्वसाधनानुमानस्य प्रतिपक्षस्यासत्त्वात् असत्प्रतिपक्षत्वे सत्यपि व्यभिचारात्साधनस्य तदभावः प्रतिपत्तव्यः । तदत्रैवं वक्तव्यं—

अन्यथानुपपन्नत्वं रूपैः किं पंचभिः कृतं
नान्यथानुपपन्नत्वं रूपैः किं पंचभिः कृतं ॥ १ ॥ इति

तदेवमन्यथानुपपत्तिनियमनिश्चय एवैकं साधनस्य लक्षणं प्रधानं तस्मिन्सति त्रिलक्षणस्य पंचलक्षणस्य प्रयोगो निवार्यते एवेति प्रयोगपरिपाट्याः प्रतिपाद्यानुरोधतः परानुग्रहप्रवृत्तैरभ्युपगमात् । तथा चाभ्यधायि **कुमारनंदि**भट्टारकैः—

अन्यथानुपपत्त्येकलक्षणं लिंगमंग्यते
प्रयोगपरिपाटी तु प्रतिपाद्यानुरोधतः ॥ १ ॥ इति

तच्च साधनं एकलक्षणं सामन्यादेकाविधमपि विशेषतोऽतिसंक्षेपाद्विविधं विधिसाधनं संक्षेपात्त्रिविधंमभिधीयते कार्यं कारणस्य, कारणं कार्यस्य, अकार्यकारणमकार्यकारणस्येति प्रकारांतरस्यात्रैवांतर्भावात् । तत्र कार्यं हेतुः, अग्निरत्र धूमात् इति कार्यकार्यादेरत्रैवांतर्गतत्वात् । कारणं हेतुः—अस्त्यत्र छाया छत्रात् इति कारणकारणादेरत्रानुप्रवेशान्नार्थांतरत्वं । न चानुकूलत्वमात्रमत्यक्षणप्राप्तं वा कारणं लिंगमुच्यते येन प्रतिबंधवैकल्यसंभवाद्व्यभिचारि स्यात् । द्वितीयक्षणे कार्यस्य पक्षीकरणादनुमानानर्थक्यं वा कार्याविनाभाविनियमतया निश्चितस्यानुमानकालप्राप्तस्य कारणस्य विशिष्टस्य लिंगत्वात् । अकार्यकारणं चतुर्विधं—व्याप्यं सहचरं पूर्वचरं, उत्तरचरं चेति । तत्र व्याप्यलिंगं व्यापकस्य यथा सर्वमनेकांतात्मकं सत्त्वादिति सत्त्वं हि वस्तुत्वं—

उत्पादव्ययध्रौव्ययुक्तं सत्

इति वचनात् । नच तदेकांतेन सुनयविषयेण व्यभिचारि तस्य वस्त्वंशत्वात् । सहचरं लिंगं यथा—अस्ति तेजसि स्पर्शसामान्यं (?) न रूपसामान्यस्य कार्यं कारणं वा नापि रूपसामान्यं स्पर्शसामान्यस्य तयोः सर्वत्र सर्वदा समकालत्वात् सहचरत्वप्रसिद्धेः । एतेन संयोगिन एकार्थसमवायिनश्च साध्यसमकालस्य सहचरत्वं निवेदितमेकसामग्र्यधीनस्यैव प्रतिपत्तव्यं समवायिनः कारणत्ववत् । पूर्वचरं लिंगं यथोदेष्यति शकटं कृत्तिकोदयात् इति पूर्वपूर्वचराद्यनेनैव संगृहीतं । उत्तरचरलिंगं यथा—उदगाद्भरणिः कृतिकोदयात् इति, उत्तरोत्तरचरमेतेनैव संगृह्यते तदेतत्साध्यस्य विधौ साधनं षड्विधमुक्तं । प्रतिषेधे तु प्रतिषेध्यस्य विरुद्धं कार्यं विरुद्धं कारणं विरुद्धाकार्यकारणं चेति । तत्र विरुद्धकार्यलिंगं-नास्त्यत्र शीतस्पर्शो धूमात् इति शीत स्पर्शेन हि विरुद्धो वन्हिः तस्य कार्यं धूम इति विरुद्धकारणं । नास्य पुंसोऽसत्यमस्ति सम्यग्ज्ञानात् इति विरुद्धं ह्यसत्येन सत्यं तस्य कारणं सम्यग्ज्ञानं यथार्थज्ञानं रागद्वेषरहितं तत्कुतश्चित्सुक्ताभिधानादेः प्रसिद्धयत् सत्यं साधयति । तच्च सिद्धयदसत्यं प्रतिषेधयति इति । विरुद्धाकार्यकारणं चतुर्विधं—विरुद्धव्याप्यं विरुद्धसहचरं विरुद्धपूर्वचरं विरुद्धोत्तरचरं चेति तत्र विरुद्धव्याप्यं नास्त्यत्र शीतस्पर्शः, औष्ण्यात् । औष्ण्यं हि व्याप्यमग्नेः स च विरुद्धः शीतस्पर्शेन प्रतिषेध्येनेति । विरुद्धसहचरं नास्त्यस्य मिथ्याज्ञानं सम्यग्दर्शनादिति मिथ्याज्ञानेन हि सम्यग्ज्ञानं विरुद्धं तत्सहचरं सम्यग्दर्शनमिति । विरुद्धपूर्वचरं नोदेष्यति मुहूर्तांते शंकटं रेवत्युदयात् । शकटोदयविरुद्धो ह्यश्वन्युदयः तत्पूर्वचरो रेवत्युदयः । विरुद्धोत्तरचरं—मुहूर्तात् प्राङ्नोदगाद्भरणीः पुष्पोदयादिति । भरण्युदयविरुद्धो हि पुनर्वसूदयः तदुत्तरचरः पुष्पोदय इति । तान्येतानि साक्षात्प्रतिषेध्यविरुद्धकार्यादीनि लिंगानि विधिद्वारेण प्रतिषेधसाधनानि षडभिहितानि । परंपरया तु कारणविरुद्धकार्यं व्यापकविरुद्धकार्यं कारणव्यापकविरुद्धकार्यं व्यापककारणविरुद्धकार्यं कारणविरुद्धकारणं व्यापकविरुद्धकारणं कारणव्यापकविरुद्धकारणं व्यापककारणविरुद्धकारणं चेति तथा कारणविरुद्धव्याप्यादीनि कारणविरुद्धचहचरादीनि च यथाप्रतीति वक्तव्यानि । तत्र कारणविरुद्धकार्यं—नास्त्यस्य हिमजनितरोमहर्षादिविशेषो धूमात् इति प्रतिषेध्यस्य हि रोमहर्षादिविशेषस्य कारणं हिमं तद्विरुद्धोऽग्निः तत्कार्यं धूम इति । व्यापकविरुद्धकार्यं नास्त्यत्र शीतसामान्यव्यासः शीतस्पर्शविशेषो धूमात् इति शीतस्पर्शविशेषस्य हि निषेध्यस्य व्यापकं शीतसामान्यं तद्विरुद्धोऽग्निः तस्य कार्यं धूम इति । कारणव्यापकविरुद्धकार्यं नास्त्यत्र हिमत्वव्याप्तहिमविशेषजनितरोमहर्षादिविशेषो धूमात् इति रोमहर्षादिविशेषस्य हि कारणं हिमविशेषस्तस्य व्यापकं हिमत्वं तद्विरुद्धोग्निः तत्कार्यं धूम इति । व्यापककारणविरुद्धकार्यं—नास्त्यत्र शीतस्पर्शविशेषस्तद्व्यापकशीतस्पर्शमात्रकारणहिमविरुद्धाग्निकार्यधूमादिति शीतस्पर्शविशेषस्य हि व्यापकं शीतस्पर्शमात्रं तस्य कारणं हिमं तद्विरुद्धोग्निस्तत्कार्यं धूम इति । कारणाविरुद्धकारणं—नास्त्यस्य मिथ्याचरणं तत्त्वार्थोपदेशग्रहणात् मिथ्याचरणस्य हि कारणं मिथ्याज्ञानं तद्विरुद्धं तत्त्वज्ञानं तस्य कारणं तत्त्वार्थोपदेशग्रहणं । तत्त्वार्थोपदेशश्रवणे सत्यपि कस्य चित्तत्त्वज्ञानासंभवाद् ग्रहणवचनं । तत्त्वार्थानां श्रद्धानपूर्वकं—अवधारणं हि ग्रहणमिष्टं, अन्यथास्य ग्रहणाभासत्वात् । मिथ्याचरणस्य वात्र नास्तिता साध्यते न पुनरनाचरणस्य तत्त्वार्थोपदेशग्रहणादुत्पन्नतत्त्वज्ञानस्याप्यसंयतसम्यग्दृष्टेश्चारित्रासंभवात्—अनाचारस्य प्रसिद्धेः । न तु मिथ्याचरणमप्यस्य संभवति तत्त्वज्ञानविरोधात् तेन सह तस्यानवस्थानात् इति । तथा व्यापकविरुद्धकारणं लिंगं—नास्त्यस्यात्मनि मिथ्याज्ञानं तत्त्वार्थोपदेशग्रहणात् इति आत्मनि मिथ्याज्ञानविशेषस्य व्यापकं मिथ्याज्ञानमात्रं तद्विरुद्धं सत्यज्ञानं तस्य कारणं तत्त्वार्थोपदेशग्रहणं यथार्थोपवर्णितमिति । कारणव्यापकविरुद्धकारणं—नास्त्यस्य मिथ्याचरणं तत्त्वार्थोपदेशग्रहणादिति अत्र मिथ्याचरणस्य कारणं मिथ्याज्ञानविशेषः तस्य व्यापकं मिथ्याज्ञानमात्रं तद्विरुद्धं तत्त्वज्ञानं, तस्य कारणं तत्त्वार्थोपदेशग्रहणमिति प्रत्येयं । व्यापककारणविरुद्धकारणं लिंगं नास्त्यस्य मिथ्याचरणविशेषस्तत्त्वार्थोपदेशग्रहणादिति मिथ्याचरण विशेषस्य हि व्यापकं मिथ्याचरणसामान्यं तस्य कारणं मिथ्याज्ञानं तद्विरुद्धं तत्त्वज्ञानं तस्य कारणं तत्त्वार्थोपदे-

(?) रूपसामान्यात् । स्पर्शसामान्यं हि-इति शोधितं ।

शग्रहणमिति तथा कारणविरुद्धव्याप्तं लिंगं न संति सर्वथैकांतवादिनः प्रशमसंवेगानुकंपास्तिक्यानि वैपर्यासिकमिथ्यादर्शनविशेषात् । प्रशमादीनां हि कारणं सम्यग्दर्शनं तद्विरुद्धं मिथ्यादर्शनसामान्यं तेन व्याप्यं मिथ्यादर्शनं वैपर्यासिकविशिष्टमिति । व्यापकविरुद्धव्याप्यं-न संति स्याद्वादिनो वैपर्यासिकादिमिथ्यादर्शनविशेषाः सत्यज्ञानविशेषात् इति वैपर्यासिकादिमिथ्यादर्शनविशेषाणां हि व्यापकं मिथ्यादर्शनसामान्यं तद्विरुद्धं तत्त्वज्ञानसामान्यं तस्य व्याप्यस्तत्त्वज्ञानविशेष इति । कारणव्यापकविरुद्धव्याप्यं—न संत्यस्य प्रशमादीनि मिथ्याज्ञानविशेषादिति, प्रशमादीनां हि कारणं सम्यग्दर्शनविशेषः तस्य व्यापकं सम्यग्दर्शनसामान्यं तद्विरुद्धं मिथ्याज्ञानसामान्यं तेन व्याप्तो मिथ्याज्ञानविशेष इति । व्यापककारणविरुद्धव्याप्यं लिंगं न संत्यस्य तत्त्वज्ञानविशेषाः मिथ्यार्थोपदेशग्रहणविशेषात् । तत्त्वज्ञानविशेषाणां व्यापकं तत्त्वज्ञानसामान्यं तस्य कारणं तत्त्वार्थोपदेशग्रहणं तद्विरुद्धं मिथ्यार्थोपदेशग्रहणसामान्यं तेन व्याप्तो मिथ्यार्थोपदेशग्रहणविशेष इति । एवं कारणविरुद्धसहचरं लिंगं-न संत्यस्य प्रशमादीनि मिथ्याज्ञानादिति प्रशमादीनां हि कारणं सम्यग्दर्शनं तद्विरुद्धं मिथ्यादर्शनं तत्सहचरं मिथ्याज्ञानमिति । व्यापकविरुद्धसहचरं—न संत्यस्य मिथ्यादर्शनविशेषाः सम्यग्ज्ञानादिति मिथ्यादर्शनविशेषाणां हि व्यापकं मिथ्यादर्शनसामान्यं तद्विरुद्धं तत्त्वार्थश्रद्धानं सम्यग्दर्शनं तत्सहचरं सम्यग्ज्ञानमिति । कारणव्यापकविरुद्धसहचरं—न संत्यस्य प्रशमादीनि मिथ्याज्ञानादिति प्रशमादीनां हि कारणं सम्यग्दर्शनविशेषास्तेषां व्यापकं सम्यग्दर्शनसामान्यं तद्विरुद्धं मिथ्यादर्शनं तत्सहचरं मिथ्याज्ञानमिति । व्यापककारणविरुद्धसहचरं न संत्यस्य मिथ्यादर्शनविशेषाः सत्यज्ञानादिति मिथ्यादर्शनविशेषाणां हि व्यापकं मिथ्यादर्शनसामान्यं तस्य कारणं दर्शनमोहोदयस्तद्विरुद्धं सम्यग्दर्शनं तत्सहचरं सम्यग्ज्ञानमिति । तदेत्सामान्यतो विरोधिलिंगं, प्रपंचतो द्वाविंशतिप्रकारमपि भूतमभूतस्य गमकमन्यथानुपपन्नत्वनियमनिश्चयलक्षणत्वात् प्रतिपत्तव्यं । भूतं भूतस्य प्रयोजकं कार्यादि षट्प्रकारं पूर्वमुक्तं । तदित्थं विधिमुखेन विधायकं-प्रतिषेधमुखेन प्रतिषेधकं च लिंगमभिधाय सांप्रतं प्रतिषेधमुखेन विधायकं प्रतिषेधकं च साधनमभिधीयते तत्राभूतं भूतस्य विधायकं-यथा-अस्त्यस्य प्राणिनो व्याधिविशेषो निरामयचेष्टानुपलब्धेरिति । तथा—अस्ति सर्वथैकांतवादिनामज्ञानादिर्दोषः युक्तिशास्त्राविरुद्धवचनाभावात् इति अस्त्यस्य मुनेराप्तत्वं विसंवादकत्वाभावात् । अभूदेतस्य तालफलस्य पतनकर्म वृंतसंयोगाभावात् इति बहुधा द्रष्टव्यं । तथैवाभूतमभूतस्य प्रतिषेधस्य प्रतिषेधकं यथा-नास्त्यत्र शवशरीरे बुद्धिर्व्यापारव्याहाराकारविशेषानुपलब्धेरिति कार्यानुपलब्धिः । न संत्यस्य प्रशमादीनि तत्त्वार्थश्रद्धानानुपलब्धेरिति कारणानुपलब्धिः । नास्त्यत्र शिंशपा वृक्षानुपलब्धेरिति व्यापकानुपलब्धिः । नास्त्यस्य तत्त्वज्ञानं सम्यग्दर्शनाभावात् इति सहचरानुपलब्धिः । न भविष्यति मुहूर्तांते शकटोदयः कृत्तिकोदयानुपलब्धेरिति पूर्वचरानुपलब्धिः । नोदगाद्भरणिर्मुहूर्तात्प्राक्कृत्तिकोदयानुपलब्धेरिति उत्तरचरानुपलब्धिः । एवं परंपरया कारणाद्यनुपलब्धिः व्यापकव्यापकानुपलब्ध्यादिकमपि बहुधा प्रतिषेधद्वारेण प्रतिषेधसाधनमवधारणीयं ।

अत्र संग्रहश्लोकाः—

स्यात्कार्यं कारणव्याप्यं प्राक् सहोत्तरचारि च
लिंगं तल्लक्षणव्याप्तेर्भूतं भूतस्य साधकं ॥ १ ॥
षोढा विरुद्धकार्यादि साक्षादेवोपवर्णितं
लिंगं भूतमभूतस्य लिंगलक्षणयोगतः ॥ २ ॥
पारंपर्यात्तु कार्यं स्यात् कारणं व्याप्यमेव च
सहचारि च निर्दिष्टं प्रत्येकं तच्चतुर्विधं ॥ ३ ॥
कारणाद्दिष्टकार्यादिभेदेनोदाहृतं पुरा
यथा षोडशभेदं स्यात् द्वाविंशतिविधं ततः ॥४॥
लिंगं समुदितं ज्ञेयमन्यथानुपपत्तिमत्

तथा भूतमभूतस्याप्यूह्यमन्यदपीदृशं ॥ ६ ॥
अभूतं भूतमुन्नीतं भूतस्यानेकधा बुधैः
तथा ऽभूतमभूतस्य यथायोग्यमुदाहरेत् ॥ ६ ॥
बहुधाप्येवमाख्यातं संक्षेपेण चतुर्विधं
अतिसंक्षेपतो द्वेधोपलंभानुपलंभभृत् ॥ ७ ॥

एतेन कार्यस्वभावानुपलंभविकल्पात् त्रिविधमेव लिंगमिति नियमः प्रत्याख्यातः सहचरादेर्लिंगांतरत्वात् प्रत्यक्षपूर्वकं त्रिविधमनुमानं-पूर्ववच्छेषवत्सामान्यतोदृष्टमित्यपि। यदि पूर्ववच्छेषवत् केवलान्वयि, पूर्ववत्सामान्यतोदृष्टं केवलव्यतिरेकि पूर्ववच्छेषवत्सामान्यतोदृष्टमन्वयव्यतिरेकि व्याख्यायते त्रिसूत्रीकरणादस्य सूत्रस्य तदा न किंचिद्विरुद्धं निगादितालिंगप्रकारेषु त्रिविधस्यापि संभवात्। यथोपपत्तिनियमात्केवलान्वयिनो गमकत्वाविरोधात्। तत्र वैधर्म्यदृष्टांताभावेऽपि साध्याविनाभावनियमनिश्चयात् । अथ पूर्ववत्कारणात्कार्यानुमानं शेषवत् कार्यात्कारणानुमानं सामान्यतो दृष्टं। अकार्यकारणादकार्यकारणानुमानं सामान्यतोऽविनाभावमात्रादिति व्याख्यायते तदापि स्याद्वादिनामभिमतमेव तथा सर्वहेतुप्रकारसंग्रहस्य संक्षेपतः प्रतिपादनात्। यदापि पूर्ववत्पूर्वलिंगलिंगिसंबंधस्य क्वचिन्निश्चयादन्यत्र पूर्ववद्वर्तमानं शेषवत्परिशेषानुमानं प्रसक्तप्रतिषेधे परिशिष्टस्य प्रतिपत्तेः । सामान्यतो दृष्टं विशिष्टव्यक्तौ संबंधाग्रहणात्सामान्येन दृष्टं यथा—गतिमानादित्यः देशादेशांतरप्राप्तेः देवदत्तवदिति व्याख्या विधीयते तदापि स्याद्वादिनां नानवधेयं प्रतिपादितहेतुप्रपंचस्यैव विशेषप्रकाशनात्। सर्वं हि लिंगं पूर्ववदेव परिशेषानुमानस्यापि पूर्ववत्त्वासिद्धेः, प्रसक्तप्रतिषेधस्य परिशिष्टप्रतिपत्त्यविनाभूतस्य पूर्वं क्वचिन्निश्चितस्य विवादाध्यासितपरिशिष्टप्रतिपत्तौ साधनस्य प्रयोगात् । सामान्यतोदृष्टस्य च पूर्ववत्त्वप्रतीतेः क्वचिद्देशांतरप्राप्तेः । गतिमत्यविनाभाविन्या एव देवदत्तादौ प्रतिपत्तेरन्यथा तदनुमानाप्रवृत्तेः । परिशेषानुमानमेव वा सर्वं संप्रतीयते पूर्ववतोऽपि धूमात्पावकानुमानस्य प्रसक्तौ पावकप्रतिषेधात् प्रवृत्तिघटनात्। तदप्रतिपत्तौ विवादानुपपत्तेरनुमानवैयर्थ्यात् तथा सामान्यतोदृष्टस्यापि देशांतरप्राप्तेरादित्यगत्यनुमानस्य तद्गतिमत्त्वस्य प्रसक्तस्य प्रतिषेधादुपपत्तेरिति । सकलं सामान्यतोदृष्टमेव वा सर्वत्र सामान्येनैव लिंगालिंगिसंबंधप्रतिपत्तेर्विशेषतस्तत्संबंधस्य प्रतिपत्तुमशक्तेः। केन चिद्विशेषेण लिंगभेदकल्पना न निवार्यते एव प्रकारांतरतस्तद्भेदकल्पनावत् । केवलमन्यथानुपपन्नत्वनियमनिश्चय एव हेतोः प्रयोजकत्वनिमित्तं तस्मिन् सति हेतुप्रकारभेदपरिकल्पनायाः प्रतिपत्तुरभिप्रायवैचित्र्यात्। वैचित्र्यं नान्यथेति सुनिश्चितं नश्चेतसि तथा प्रतीतेरबाध्यमानत्वात्। यदापि—अवीतं वीतं वीतावीतमिति लिंगं त्रिविधमनुमन्यते तदापि नान्यथानुपपन्नत्व नियमनिश्चयलक्षणमतिक्रम्य व्यवतिष्ठते। नापि प्रतिपादितहेतुप्रपंचबहिर्भूतं समयांतरभाषया केवलान्वय्यादि त्रयस्यैव तथाविधानात्। क्वचित्साध्यसाधनधर्मयोः साहचर्यमविनाभावनियमलक्षणमुपलभ्यान्यत्र साधनधर्मदर्शनात्। साध्यधर्मप्रतिपत्तिरावीतमुच्यते यथा गुणागुणिनौ परस्परं भिन्नौ भिन्नप्रत्ययविषयत्वात् घटपटवदीति तच्च केवलान्वयीष्यते कथंचिद्भेदएव साध्ये ऽन्यथानुपपन्नत्वसिद्धेः सर्वथा भेदे गुणगुणिभावविरोधात् गमकत्वासिद्धेः। तथा क्वचिदेकस्य धर्मस्य व्यावृत्तौ परस्य धर्मस्य व्यावृत्तिं नियमवतीमुपलभ्यान्यत्र तद्धर्मस्य निश्चयात् साध्यसिद्धिर्वीतं कथ्यते यथा सात्मकं जीवच्छरीरं प्राणादिमत्त्वात् इति तदिदं केवल व्यतिरेकीष्टं परिणामिनात्मना सात्मकत्वव्यावृत्तौ भस्मनि प्राणादिमत्त्वव्यावृत्तिनियमनिश्चयात् निरन्वय क्षणिकचित्तवत् कूटस्थेनात्मना प्राणाद्यर्थक्रियानिष्पादनविरोधात् । वीतावीतं तु तदुभयलक्षणयोगादन्वयव्यतिरेकि धूमादेः पावकाद्यनुमानं प्रसिद्धमेवेति न हेत्वंतरमस्ति ततः सूक्तं—अन्यथानुपपत्तिनियमनिश्चयलक्षणं साधनं अतिसंक्षेपविस्तरतोऽभिहितस्य सकलसाधनविशेषस्य तेन व्याप्तत्वात्। तथाविधलक्षणात्साधनात् साध्ये साधयितुं शक्ये, अभिप्रेते क्वचिदप्रसिद्धे च विज्ञानमनुमानमिति। साधयितुमशक्ये सर्वथैकांते साधनस्याप्रवृत्तेः तत्र तस्य विरुद्धत्वात् स्वयमनभिप्रेते चातिप्रसंगात् प्रसिद्धे च वैयर्थ्यात् तस्य साध्याभासत्व प्रसिद्धेः प्रत्यक्षादिविरुद्धस्यानिष्टस्य सुप्रसिद्धस्य च साधनाविषयत्वनिश्चयात्।

---

१ लिंगमिति पाठांतरं ।

तदुक्तं—अकलंकदेवैः—

साध्यं शक्यमभिप्रेतमप्रसिद्धं ततोऽपरं
साध्याभासं विरुद्धादि साधनाविषयत्वतः ॥ १ ॥

तदेत्साधनात् साध्यविज्ञानमनुमानं स्वार्थमभिनिबोधलक्षणं विशिष्टमतिज्ञानं साध्यं प्रत्यभिमुखान्नित्थमितात्साधनादुपजातबोधस्य तर्कफलस्याभिनिबोध इति संज्ञाप्रतिपादनात्। परार्थमनुमानमनक्षरश्रुतज्ञानं-अक्षरश्रुतज्ञानं च तस्य श्रोत्रमतिपूर्वकस्य च तथात्वोपपत्तेः ?। शब्दात्मकं तु परार्थानुमानमयुक्तं शब्दस्य प्रत्यवमर्शिनोऽपि सर्वस्य द्रव्यागमरूपत्वप्रतीतेः कथमन्यथा प्रत्यक्षमपि शब्दात्मकं परार्थं न भवेत् सर्वथा विशेषाभावात् प्रतिपादकप्रतिपाद्यजनयोः स्वपरार्थानुमानकार्यकारणत्वासिद्धेरुपचारादनुमानपरामर्शिनो वाक्यस्य परार्थानुमानत्वप्रतिपादनमविरुद्धं नान्यथातिप्रसंगादिति बोद्धव्यं। तदेत्परोक्षं प्रमाणमविशदत्वात् श्रुतज्ञानवत्।

किं पुनः श्रुतज्ञानमित्येतदभिधीयते—श्रुतज्ञानावरणवीर्यांतरायक्षयोपशमविशेषांतरंगे कारणे सति बहिरंगे मतिज्ञाने च, अनिंद्रियविषयालंबनं, अविशदं ज्ञानं श्रुतज्ञानं। केवलज्ञानं तीर्थकरत्वनामपुण्यातिशयोदयनिमित्तकभगवत्तीर्थकरध्वनिविशेषादुत्पन्नं गणधरदेवश्रुतज्ञानमेवमसंगृहीतं स्यादिति न शंकनीयं तस्यापि श्रोत्रमतिपूर्वकत्वात्। प्रसिद्धमतिश्रुतावधिमनःपर्ययज्ञानानि वचनजनितप्रतिपाद्यजनवचनश्रुतज्ञानवत्। समुद्रघोषजलधरस्वनश्रुतिजनिततदविनाभाविपदार्थविषयश्रुतज्ञानवद्वा ततो निरवद्यं श्रुतज्ञानलक्षणं-अव्याप्त्यतिव्याप्त्यसंभवदोषरहितत्वात्। अनुमानलक्षणवत्। तदेवंविधं श्रुतज्ञानं प्रमाणमविसंवादकत्वात् प्रत्यक्षानुमानवत्। नचासिद्धमविसंवादकत्वमस्येति शंकितव्यं ततोऽर्थे परिच्छिद्य प्रवर्तमानस्य विसंवादाभावात् सर्वदाऽर्थक्रियायां संवादप्रसिद्धेः प्रत्यक्षादिवत्।

ननु च श्रोत्रमतिपूर्वकश्रुतज्ञानादर्थे प्रतिपद्य वर्तमानस्यार्थक्रियायामविसंवादकस्य क्वचिदभावात् न प्रामाण्यं सर्वत्रानाश्वासादिति चेत् ? न प्रत्यक्षादेरपि शुक्तिकाशकलं रजताकारतया परिच्छिद्य तत्र प्रवर्तमानस्यार्थक्रियायां रजतसाध्यायामविसंवादविरहात्। सर्वत्र प्रत्यक्षेऽनाश्वासादप्रामाण्यप्रसंगात्। प्रत्यक्षाभासे विसंवाददर्शनान्न प्रत्यक्षेऽनाश्वासोऽनुमानवदिति चेत् तर्हि श्रुतज्ञानाभासाद्विसंवादप्रसिद्धेः सत्यश्रुतज्ञाने कथमनाश्वासः ? नच सत्यं श्रुतज्ञानमसिद्धं तस्य लोके प्रसिद्धत्वात् सुयुक्तिकसद्भावाच्च तथाहि श्रोत्रमतिपूर्वकं श्रुतज्ञानं प्रकृतं सत्यमेव अदुष्टकारणजन्यत्वात् प्रत्यक्षादिवत्। तद्विविधं सर्वज्ञासर्वज्ञवचनश्रवणनिमित्तत्वात्। तच्चोभयमदुष्टकारणजन्यं गुणवद्वक्तृकशब्दजनितत्वात्।

ननु च नद्यास्तीरे मोदकराशयः संतीति प्रहसनेन गुणवद्वक्तृकशब्दादुपजनितस्यापि श्रुतज्ञानस्यासत्यत्वसिद्धेर्व्यभिचारिगुणवद्वक्तृकशब्दजनितत्वमदुष्टकारणजन्यत्वे साध्ये ततो न तत्तद्गमकमिति न मंतव्यं प्रहसनपरस्य वक्तुर्गुणवत्त्वासिद्धेः प्रहसनस्यैव दोषत्वादज्ञानादिवत्। कथं पुनर्विवादापन्नस्य श्रोत्रमतिपूर्वकश्रुतज्ञानस्य गुणवद्वक्तृकशब्दजनितत्वं सिद्धं ? इति चेत् सुनिश्चितासंभवद्बाधकत्वादिति भाषामहे। प्रत्यक्षे ह्यर्थे प्रत्यक्षस्यानुमेयेऽनुमानस्यांत्यंतपरोक्षे चागमस्य बाधकस्यासंभवात् असंभवद्बाधकत्वं तस्य सिद्धं। देशकालपुरुषांतरापेक्षयापि संशयानुत्पत्तेः सुनिश्चितत्वविशेषणमपि साधनस्येति नासिद्धताशंकावतरति। नाप्यनैकांतिकता विपक्षे क्वचिदसंभवात्। न विरुद्धता सुनिश्चितासंभद्बाधकस्य श्रुतज्ञानस्य अगुणवद्वक्तृकशब्दजनितस्य वादिप्रतिवादिप्रसिद्धस्यासंभाव्यमानत्वात्। तथा व्याहतत्वाच्च। कथंचिदपौरुषेयशब्दजनितश्रुतज्ञानस्य तु गुणवद्वक्तृकशब्दजनितत्वेनादुष्टकारणजन्यत्वं सिद्धयेत्। ततश्च सत्यत्वमिति स्याद्वादिनां सर्वमनवद्यं पर्यायार्थिकनयप्राधान्यात् द्रव्यार्थिकनयगुणभावाच्च श्रुतज्ञानस्य गुणवद्वक्तृकशब्दजनितत्वसिद्धेः द्रव्यार्थकप्राधान्यात्पर्यायार्थिकगुणभावाच्च गुणवद्व्याख्यातृकशब्दजनितत्वोपपत्तेश्च। नच सर्वथा पौरुषेयःशब्दोऽपौरुषेयो वा प्रमाणतः सिद्धयते।

ननु च विवादापन्नः शब्दः पौरुषेय एव प्रयत्नानंतरीयकत्वात् पटादिवदित्यनुमानात् आगमस्य द्वादशांगस्यांगबाह्यस्य चानेकभेदस्य पौरुषेयत्वमेव युक्तं भारतादिवदिति कश्चित् सोऽप्येवं पृष्टः सन्नाचष्टां—किं

सर्वथा प्रयत्नांनतरीयत्वहेतुः कथंचिद्वा? सर्वथा चेत्? अप्रसिद्धः स्याद्वादिनो द्रव्यार्थादिप्रयत्नांनंतरीयकत्वादागमस्य । कथंचिच्चेद्विरुद्धः कथंचिदपौरुषयत्वसाधनात् । प्रयत्नानंतरीयकत्वं हि प्रवचनस्योच्चारकपुरुषप्रयत्नानंतरोपलंभात् स्यात् उत्पादकपुरुषप्रयत्नांनंतरोपलंभाद्वा ? प्रथमकल्पनायामुच्चारकपुरुषापेक्षया पौरुषेयत्वमेव तस्य संप्रति पुराणपुरुषोत्पादितकाव्यप्रबंधस्येव प्रसक्तं। न पुनरुत्पादकपुरुषापेक्षया प्रवचनस्यानादिनिधनस्योत्पादकपुरुषाभावात् । सर्वज्ञ उत्पादक इति चेत्? वर्णात्मनः पदवाक्यात्मनो वा प्रवचनस्योत्पादकः स स्यात् ? न तावद्वर्णात्मनस्तद्वर्णानां प्रागपि भावात् तत्सदृशानां पूर्वं भावो न पुनस्तेषां घटादीनामिवेति चेत् कथमिदानीमनुवादकस्तेषामुत्पादको न स्यात् ? तदनुवादात् प्रागपि तत्सदृशानामेव सद्भावात् तेषामनूद्यमानानां तदैव सद्भावात् । तथाच न कश्चिदुत्पादको वर्णानां सर्वस्योत्पादकत्वासिद्धेः । यथैव हि कुंभादीनां कुंभकारादिरुत्पादक एव न पुनरनुकारकस्तथा वर्णानामपीति तदनुवादकव्यवहाराविरोधः पूर्वोपलब्धवर्णानां सांप्रतिकवर्णानां च सादृश्यादेकत्वोपचारात्पश्चाद्वादकोऽनुवादक एव । असावाह वर्णान्नाहमिति स्वातंत्र्यपरिहरणात्पारतंत्र्यानुसरणादिति चेत् तर्हि यथा वर्णानां पठितानुवादकः तथा पाठयितापि तस्यापि स्वातंत्र्याभावात् सर्वस्य स्वोपाध्यायपरतंत्रत्वात् तत एवं वक्तव्यं—

नेह वर्णान्नरः कश्चित् स्वातंत्र्येण प्रपद्यते
यथैवास्मै परैरुक्तास्तथैवैतान्विवक्ष्यते ॥ १ ॥
परेप्येवं विवक्ष्यंति तस्मादेषामनादिता
प्रसिद्धा व्यवहारेण संप्रदायाव्यवच्छिदा ॥ २ ॥

तथा च सर्वज्ञोप्यनुवादक एव पूर्वपूर्वसर्वज्ञोदितानामेव चतुःषष्टिवर्णानामुत्तरोत्तरसर्वज्ञेनानुवादात् । तस्य पूर्वसर्वज्ञोदितवर्णानुपलंभे पुनरसर्वज्ञत्वप्रसक्तिः । तदेवमनादिसर्वज्ञसंततिमिच्छतां न कश्चित्सर्वज्ञो वर्णानामुत्पादकस्तस्य तदनुवादकत्वात् । पदवाक्यात्मनः प्रवचनस्योत्पादकः सर्वज्ञ इत्यप्येनेनापास्तं प्रवचनपदवाक्यानामपि पूर्वपूर्वसर्वज्ञोदितानामेवोत्तरोत्तरसर्वज्ञेनानुवादात् सर्वदांगप्रविष्टांगबाह्यश्रुतस्य शब्दात्मनो द्वादशविकल्पानेकविकल्पस्यान्यादृशवर्णपदवाक्यत्वासंभवात् तस्यापूर्वस्योत्पादकायोगात् ।

स्यान्मतं—महेश्वरोऽनादिरेकः सर्वज्ञो वर्णानामुत्पादकः प्रथमं सृष्टिकाले जगतामिवोपपन्नस्तस्य सर्वदा स्वतंत्रत्वात् सर्वज्ञांतरपरतंत्रतापायात् तदनुवादकत्वायोगादिति तदप्यसत्यं तस्यानादेरेकस्येश्वरस्याप्रपरीक्षायां प्रतिक्षिप्तत्वात्, परीक्षाक्षमत्वाभावात् कपिलादिवत् । संभवे वा सदैवैश्वरः सर्वज्ञो ब्राह्मेण मानेन वर्षाशतांते वर्षशतांते जगतां सृष्टा पूर्वस्मिन् पूर्वस्मिन् सृष्टिकाले स्वयमुत्पादितानां वर्णपदवाक्यानामुत्तरस्मिन्नुत्तरस्मिन् सृष्टिकाले पुनरुपदेष्टा कथमनुवादको न भवेत् ? । न ह्येकः कविः स्वकृतकाव्यस्य पुनः पुनर्वक्तानुवादको न स्यात् इति वक्तुं युक्तं ,

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्

इति वचनविरोधात् । एकस्य पुनः पुनस्तदेव वदतोऽनुवादासंभवे पुनरुक्तस्यैव सिद्धेः ततः कस्यचित्स्वयं कृतं काव्यं पुनः पुनर्वदतोऽनुवादकत्वे महेश्वरः सर्वदैवानुवादकः स्यात् । पूर्वपूर्ववादापेक्षयोत्तरोत्तरस्यानुवादरूपत्वात् । नच्च पूर्वपूर्ववर्णपदवाक्यविलक्षणान्येव वर्णपदवाक्यानि महेश्वरः करोति इति घटते तेषां कुतश्चित्प्रमाणादप्रसिद्धेः प्रसिद्धौ वा तेषां किमज्ञानात्तदा महेश्वरोऽप्रणेता स्यात् । अथाशक्तेरुतप्रयोजनाभावादिति ? न तावदज्ञानात् सर्वज्ञत्वविरोधात् तस्य सर्वप्रकारवर्णपदवाक्यवेदित्यासिद्धेः अन्यथानीश्वरत्वप्रसंगात् । नाप्यशक्तेः—ईश्वरस्यानंतशक्तित्ववचनात् । यदि ह्येकदा कानि चिदेव वर्णादीनि प्रणेतुमीश्वरस्य शक्तिर्नान्यानि तदा कथमनंतशक्तिः स्यादनीशवत् । प्रयोजनाभावान्नान्यानि प्रणयतीति चेत् न सकलवाचकप्रकाशनस्यैव प्रयोजनत्वात् सकलवाच्यार्थप्रकाशनवत् । सकलजगत्कारणवद्वा प्रतिपाद्यजनानुरोधात् केषां चिदेव वर्णादीनां प्रणयने जगदुपभोक्तृप्राण्यनुरोधात् केषांचिदेव जगत्कार्याणां करणं स्या-

१ गौतमीयं सूत्रं ।

न सर्वेषां । तथा चेश्वरकृतैः कार्यैः कार्यत्वादिति हेतुर्व्यभिचारित्वान्न सर्वकार्याणामीश्वरनिमित्तत्वं साधयेत् । नच सकलप्रकारवर्णादिवाचकप्रपंचं जिज्ञासमानः कश्चित्प्रतिपाद्य एव न संभवतीति वक्तुं युक्तं सर्वज्ञवचन स्याप्रतिग्राहकत्वप्रसंगात् । तत्संभवे च सर्गे सर्गे सकलवर्णादीनां प्रणेतेश्वरोऽनुवादक एव स्यात् न पुनरुत्पादकः सर्वदैवेति सिद्धं ततोऽनेक एव सर्वज्ञोऽस्तु किमेकेश्वरस्य कल्पनया यथा चैको नवामिति वदति तदेवान्यः पुराणमित्यनेकसर्वज्ञकल्पनायां व्याघातात् वस्तुव्यवस्थानासंभवस्तथैकस्यापीश्वरस्यानेकसर्ग कालप्रवृत्तावनेकोपदेशाभ्यनुज्ञानात् । तत्र पूर्वस्मिन् सर्गे नवामित्युपदेशीश्वरेण तदेवोत्तरस्मिन् सर्गे पुराणमित्युपदिश्यते न पुनरेकदैव नवं पुराणं चैकमिति व्याघातासंभवे कथमनेकस्यापि सर्वज्ञस्य कालभेदेन नवमिति पुराणमित्युपदेशतस्तत्त्ववचनव्याघातः ? इत्यलमनाद्येकेश्वरकल्पनया तत्साधनोपायासंभवात् ।

सोपायसिद्धस्तु सर्वज्ञोऽनेकः प्रमाणसिद्धः निरंतकालोच्छन्नस्य परमागमस्य प्रबंधेनाभिव्यंजकोऽनुवादक इति प्रयत्नानंतरमभिव्यक्तेः कथं चित्प्रयत्नानंतरीयकत्वं कथंचित्पौरुषेयत्वं साधयेत्-तथाहि—

परमागमसंतानमनादिनिधनक्रमं नोत्पादयेत्स्वयं कश्चित्सर्वज्ञोऽसर्ववेदिवत् ॥ १ ॥
यथैकः सकलार्थज्ञः स्वमहिम्ना प्रकाशयेत् तथान्योऽपि तमेवं चानादिः सर्वज्ञसंततिः ॥२॥
सिद्धा तत्प्रोक्तशब्दोत्थं श्रुतज्ञानमशेषतः प्रमाणं प्रतिपत्तव्यमदुष्टोपायजत्वतः ॥ ३ ॥
ततो बाह्यं पुनर्द्वेधा पौरुषेयपदक्रमात् जातमार्षादनार्षाच्च समासव्यासतोन्वितात् ॥ ४ ॥
तत्रार्षमृषिभिः प्रोक्तादुष्टैर्वचनक्रमात् समुद्भूतं श्रुतज्ञानं प्रमाणं बाधकात्ययात् ॥ ५ ॥
अनार्षं तु द्विधोद्दिष्टं समयांतरसंगतं लौकिकं चेति तन्मिथ्या प्रवादिवचनोद्भवं ॥ ६ ॥
दुष्टकारणजन्यत्वादप्रमाणं कथं च न सम्यग्दृष्टेस्तदेतत्स्यात् प्रमाणं सुनयार्पणात् ॥ ७ ॥

नन्वदुष्टकारणजन्यत्वेन श्रुतज्ञानस्य प्रमाणत्वसाधने चोदनाज्ञानस्य प्रामाण्यं स्यात् पुरुषदोषरहितायाश्चोदनायाः सर्वथाप्यपौरुषेयजनितत्वात् ।

तदुक्तं—

चोदनाजनिता बुद्धिः प्रमाणं दोषवर्जितैः ।
कारणैर्जन्यमानत्वाल्लिंगाप्तोक्त्यक्षबुद्धिवत् ॥ १ ॥

तदेतदुक्तं—

गुणवत्कारणजन्यत्वस्यादुष्टकारणजन्यत्वशब्देनाभिप्रेतत्वात् लिंगाप्तोक्त्यक्षबुद्धिषु तथैव तस्य प्रतिपत्तेः । न हि लिंगस्यापौरुषेयत्वमदुष्टं साध्याविनाभावनियमनिश्चयाख्येन गुणेन गुणवत्त्वस्यादुष्टत्वस्य प्रतीतेः । तथाप्रोक्तेरविसंवादकत्वगुणेन गुणवत्त्वस्य तथाक्षाणां चक्षुरादीनां नैर्मल्यादिगुणेन गुणवत्त्वस्येति ।

ननु चादुष्टत्वं दोषरहितत्वं कारणस्य तच्च क्वचिद्दोषविरुद्धस्य गुणस्य सद्भावात् । तथा मन्वादिस्मृतिवचने क्वचिद्दोषकारणभावात् । यथा चोदनायां तदुक्तं—

शब्दे दोषोद्भवस्तावद्वक्त्रधीनमिति स्थितं
तदभावः क्वचित्तावद्गुणवद्वक्तृकत्वतः ॥ १ ॥
तद्गुणैरपकृष्टानां शब्दे संक्रांत्यसंभवात्
यद्वा वक्तुरभावेन न स्युर्दोषा निराश्रयाः ॥ २ ॥

तदप्यसारं सर्वत्र गुणाभावस्यैव दोषवत्त्वात्, गुणसद्भावस्यैव चादोषप्रतीतेरभावस्य भावांतरस्वभावत्वासिद्धेः, अन्यथा प्रमाणविषयत्वविरोधात् । गुणवद्वक्तृकत्वस्य हि दोषरहितस्य वक्तृकत्वस्य संप्रत्ययः कथमन्यथा गुणदोषयोः सहानवस्थानं युज्येत ? रागद्वेषमोहादिवक्तुर्दोषाविताभिधानहेतवः । तद्विरुद्धाश्च वैराग्यक्षमातत्त्वावबोधास्तदभावात्मकाः सत्याभिधानहेतवो गुणा इति परीक्षकजनमनसि वर्तते नच मन्वादयः स्मृतिशास्त्राणां प्रणेतारो गुणवंतस्तेषां तादृशगुणाभावात् । निर्दोषवेदपराधीनवचनत्वात्तेषां गुणवत्त्वमित्यप्यसंभावनीयं वेदस्य गुणवत्त्वासिद्धेः पुरुषस्य गुणाश्रयस्याभावात् । यथैव हि दोषवान् वेदान्निवर्तमानो

निर्दोषतामस्य साधयेत् तथासौ गुणवानपि–अगुणवत्तामिति न वेदो गुणवान्नाम । यदि पुनरपौरुषेयत्वमेव गुणस्तदानादिम्लेच्छव्यवहारस्यापि गुणवत्त्वं–अपौरुषेयत्वाविशेषात् ।

तदेवं—

नादुष्टा चोदना पुंसोऽसत्त्वाद्गुणवतः सदा
तद्व्याख्यातुः प्रवक्तुर्वा म्लेक्षादिव्यवहारवत् ॥ १ ॥
तया यज्जनितं ज्ञानं तन्नादुष्टनिमित्तजं
सिद्धं येन प्रमाणं स्यात् परमागमबोधवत् ॥ २ ॥
वेदस्य पौरुषेयस्योच्छिन्नस्य चिरकालतः
सर्वज्ञेन विना कश्चिन्नोद्धर्तातीन्द्रियार्थदृक् ॥ ३ ॥
स्याद्वादिनां तु सर्वज्ञसंतानः स्यात्प्रकाशकः
परमागमसंतानस्योच्छिन्नस्य कथंचन ॥ ४ ॥
सर्वभाषाकुभाषाश्च तद्वत्सर्वार्थवेदिभिः
प्रकाश्यते ध्वनिस्तेषां सर्वभाषास्वभावकः ॥ ५ ॥
तत्प्रमाणं श्रुतज्ञानं परोक्षं सिद्धमंजसा
अदुष्टकारणोद्भूतेः प्रत्यक्षवदिति स्थितं ॥ ६ ॥

ततः सूक्तं प्रत्यक्षं परोक्षं चेति द्वे एव प्रमाणे प्रमाणांतराणां सकलानामप्यत्र संग्रहात् इति संख्याविप्रतिपत्तिनिराकरणमनवद्यं स्वरूपविप्रतिपत्तिनिराकरणवत् ।

विषयविप्रतिपत्तिनिराकरणार्थं पुनरिदमभिधीयते—द्रव्यपर्यायात्मकः प्रमाणविषयः प्रमाणविषयत्वान्यथानुपपत्तेः प्रत्यक्षविषयेण स्वलक्षणेन, अनुमानादिविषयेण च सामान्येन हेतोर्व्यभिचार इति न मंतव्यं तथाप्रतीत्यभावात् । न हि प्रत्यक्षतः स्वलक्षणं पर्यायमात्रं सन्मात्रमिवोपलभामहे । नाप्यनुमानादेः सामान्यद्रव्यमात्रं विशेषमात्रमिव प्रतिपद्येमहि सामान्यविशेषात्मनो द्रव्यपर्यायात्मकस्य जात्यंतरस्योपलब्धेः प्रवर्तमानस्य च तत्प्राप्तेः अन्यथार्थक्रियानुपपत्तेः । न हि स्वलक्षणमर्थक्रियासमर्थं क्रमयौगपद्यविरोधात् सामान्यवत् । नच तत्र क्रमयौगपद्ये संभवतः परिणामाभावात् । क्रमाक्रमयोः परिणामेन व्याप्तत्वात् सर्वथाप्यपरिणामिनः क्षणिकस्य नित्यस्य च तद्विरोधसिद्धेः प्रसिद्धे च सामान्यविशेषात्मनि वस्तुनि तदंशमात्रे विशेषे सामान्ये वा प्रवर्त्तमानं कथं प्रमाणं नाम प्रमाणस्य यथावस्थितवस्तुग्रहणलक्षणत्वात् तदेकदेशग्राहिणः सापेक्षस्य सुनयत्वान्निरपेक्षस्य दुर्णयत्वात् । तत एव न तद्विषयेणानेकांतः साधनस्य स्यात् । तत्र प्रमाणविषयत्वस्य हेतोरप्रवृत्तेः । अतःसिद्धो द्रव्यपर्यायात्मार्थः प्रमाणस्येति तद्विप्रतिपत्तिनिवृत्तिः ।

फलविप्रतिपत्तिनिवृत्त्यर्थं प्रतिपाद्यते–प्रमाणात्फलं कथंचिद्भिन्नमभिन्नं च प्रमाणफलत्वान्यथानुपपत्तेः । हानोपादानोपेक्षाबुद्धिरूपेण प्रमाणफलेनानेकांत इति न शंकनीयं तस्याप्येकप्रमात्रात्मना प्रमाणादभेदसिद्धेः प्रमाणपरिणतस्यैवात्मनः फलपरिणामप्रतीतेः, अन्यथा संतानांतरवत्प्रमाणफलभावविरोधात् । साक्षादज्ञाननिवृत्तिलक्षणेन प्रमाणादभिन्नेन प्रमाणफलेन व्यभिचार इत्यप्यपरीक्षिताभिधानं तस्यापि कथंचित्प्रमाणाद्भेदप्रसिद्धेः प्रमाणफलयोर्निरुक्तिसाधनविरोधात् । करणसाधनं हि प्रमाणं स्वार्थनिर्णीतौ साधकतमत्वात् । स्वार्थनिर्णीतिरज्ञाननिवृत्तिः फलं भावसाधनं तत्साध्यत्वात् । एतेन कर्तृसाधनात् प्रमाणात्कथंचिद्भेदः प्रतिपादितः तस्य स्वार्थनिर्णीतौ स्वतंत्रत्वात् । स्वतंत्रस्य च कर्तृत्वात् स्वार्थनिर्णीतिस्तु अज्ञाननिवृत्तिस्वभावायाः क्रियात्वात् । नच क्रियाक्रियावतोऽर्थांतरमेवानर्थांतरमेव वा क्रियाक्रियावद्भावविरोधात् । भावसाधनात्प्रमाणादज्ञाननिवृत्तिरभिन्नैवेति,अयुक्तं प्रमातुरुदासीनावस्थायामव्याप्रियमाणस्य प्रमाणशक्तेर्भावसाधन प्रमाणस्य व्यवस्थापितत्वात् तस्याज्ञाननिवृत्तिफलत्वासंभवात् । स्वार्थव्यवसितौ व्याप्रियमाणं हि प्रमाणमज्ञानानिवृत्तिं साधयेत् नान्यथा अतिप्रसंगात् । ततः सूक्तं—

प्रमाणात्कथंचिद्भिन्नाभिन्नं फलमिति

ततस्तस्य सर्वथा भेदे बाधकवचनात् । अभेदवत्संवृत्या प्रमाणफलव्यवहार इत्यप्रातीतिकवचनं परमार्थतः स्वेष्टसिद्धिविरोधात् ततः पारमार्थिकप्रमाणं फलं चेष्टसिद्धिलणमभ्यनुज्ञातव्यं । ततःसर्वपुरुषार्थ-सिद्धिविधानादिति संक्षेपः ।

इति प्रमाणस्य परीक्ष्य लक्षणं विशेषसंख्याविषयं फलं ततः
प्रबुध्य तत्त्वं दृढशुद्धदृष्टयः प्रयांतु विद्याफलमिष्टमुच्चकैः ॥ १ ॥

इति श्रीस्याद्वादविद्यापतिश्रीविद्यानंदस्वामिविरचिता प्रमाणपरीक्षा समाप्ता ।



नीचे लिखे सनातनजैनग्रंथ हमारे पास मिलते हैं।

महापुराण (जिनसेनाचार्यकृत आदिपुराण) हिंदी अनुवाद सहित खंडशः प्रकाशित होता है १४)
प्रमेयकमलमार्त्तंड न्याय-प्रभाचंद्राचार्यकृत ४)
परीक्षामुख न्याय प्रमेयरत्नमाला टीका १)
सनातनजैनग्रंथमालाः प्रथमगुच्छक इसमें रत्नकरण्डश्रावकाचार, पुरुषार्थसिद्ध्युपाय, आत्मानुशासन, समाधिशतक, नयविवरण, युक्त्यनुशासन, तत्त्वार्थसूत्र (मोक्षशास्त्र) तत्त्वार्थसार, अध्यात्मतरंगिणी (समयसारके कलशे), बृहत्स्वयंभूस्तोत्र, आप्तपरीक्षा, आप्तमीमांसा सटीक, परीक्षामुख और आलापपद्धति इस प्रकार १४ ग्रंथ छपे हैं रेशमी गुटका १)
जिनशतक सटीक-भगवत्समंतभद्राचार्यकृत ॥)
सुभाषितरत्नसंदोह-अमितिगत्याचार्यकृत इसमें ३३ विषयोंका अपूर्व वर्णन व उपदेश है ॥)
जीवंधरचंपूकाव्य-भट्टारहरिचंद्रस्य १)
क्षत्रचूड़ामणि-हिंदी टीकासह वादीभसिंहसूरिकृत ॥)
नेमिनिर्वाण काव्य-महाकवि वाग्भट्टकृत ॥=)
काव्यानुशासन सटीक ,, ।=)
वाग्भट्टालंकार सटीक ,, ॥)
अलंकारचिंतामणि-अजितसेनाचार्यकृत ॥)
चंद्रप्रभचरित-महाकाव्य वीरनंदी कृत ॥)
धर्मशर्माभ्युदय-भट्टारहरिचंद्रस्य १)
द्विसंधानमहाकाव्य-सटीक धनंजयकृत १॥)
यशतिलकचंपूकाव्य-सटीक महाकवि सोमदेवसूरिकृत प्रथम खंड ३॥) उत्तरखंड मूल २॥)
पार्श्वाभ्युदय सटीक-महाकवि श्रीजिनसेनाचार्य कृत इसमें मेघदूतके प्रत्येक श्लोकके प्रत्येक पाद की पूर्ति की गई है ॥)
जीवंधरचरित्र-भगवद्गुणभद्राचार्य कृत ॥)
पंचाध्यायी-जैनसिद्धांतोंका अपूर्व ग्रंथ ॥)
मोक्षशास्त्र-(जैनदर्शन) हिंदीटीकासह उमास्वामी॥)
जिनसहस्रनाम-जिनसेन और आशाधरकृत =)
गोमट्टसार-(जीवकांड) उत्थानिका मूलगाथा और संस्कृत छाया सहित (गुटका) ।=)
गोमट्टसार-(कर्मकांड) हिंदी टीकासहित ३)
प्रवचनसार-संस्कृत हिंदी टीकासहित ३)
न्यायदीपिका-हिंदी टीकासह ॥।)
पुरुषार्थसिद्ध्युपाय-हिंदी टीकासह १।)
बृहद्द्रव्यसंग्रह-सटीक व हिंदी टीका सहित २)
ज्ञानार्णव-(योगप्रदीप) हिंदी टीका सहित ४)
सप्तभंगीतरंगिणी-हिंदी टीका सह १)
पंचास्तिकाय समयसार-हिं० टी० सह १॥)
समयसार-कुंदकुंद स्वामीकृत हिं०टी० सह ४)
विश्वलोचनकोश-श्रीधरसेनकृत हिं०टी०स० १।=)
शाकटायन प्रक्रियासंग्रह-अभयचंद्र कृत ३।)
भगवती आराधनासार-प्रा. हिं०टी०स० ४)
षट्पाहुड कुंदकुंदाचार्य-कृत ,, १)
धर्मसंग्रहश्रावकाचार- ,, २)
परमात्मप्रकाश प्राकृत- ,, ।=)
गणरत्नमहोदधि-(शब्दार्णवका गणपाठ) २)
नीतिवाक्यामृतं सोमदेवसूरिकृत, १)
यशोधरचरित काव्य-वादिराजसूरिकृत ॥)
गद्यचिंतामणि-वादीभसिंहसूरिकृत २)
रत्नकरंडश्रावकाचार-सान्वयार्थ ।)
द्रव्यसंग्रह-सान्वयार्थ ।)
भक्तामरस्तोत्र-आदिनाथस्तोत्र सान्वयार्थ ।)
भट्टाकलंकचरित्र-और अकलंकस्तोत्र हिंदी =)
सूक्तमुक्तावली-हिंदी पद्य व सान्वयार्थ ।=)
बारसअणुवेक्खा-कुंदकुंदस्वामी कृत हिंदी =)
जैननित्यपाठसंग्रह-१६ पाठोंका गुटका ।=)
प्राणप्रियकाव्य-भक्तामरस्तोत्रकी समस्यापूर्ति =)
भद्रबाहुचरित्र-हिंदीभाषाअनुवाद सहित ॥=)
वसुनंदिश्रावकाचार प्राकृत ,, ॥)
प्रश्नोत्तररत्नमालिका-महाराज अमोघवर्ष कृत =)
मोक्षशास्त्र (तत्त्वार्थसूत्र) मूल =)॥

(इनके सिवाय हिंदीभाषामें अनेक ग्रंथ मिलते हैं)

मिलनेका पता—

मैनेजर—श्रीजैनग्रंथरत्नाकर कार्यालय

हीराबाग—पोष्ट—गिरगांव (बंबई)

इस ग्रंथमालामें नीचे लिखे ग्रंथ छपेंगे ।

ग्रंथनाम ।	ग्रंथकर्त्ताओं के नाम ।
जैनदर्शनग्रंथ ।	
तत्त्वार्थाधिगममोक्षशास्त्रपर गंधहस्तमहाभाष्य (८४००० श्लोक)	श्रीमत्स्वामी समंतभद्राचार्य
,, राजवार्तिकालंकार	श्रीमद्भट्टाकलंकदेव
,, श्लोकवार्तिकालंकार	स्याद्वादविद्यापति श्रीमद्विद्यानंदस्वामी
जैनसिद्धांतग्रंथ ।	
गोमट्टसार टीका	श्रीमदभयचंद्रसिद्धांतचक्रवर्ति
गोमट्टसार टीका	श्रीकेशववर्णी
परमात्मप्रकाश सटीक	श्रीयोगींद्रदेव
नाटकत्रय सटीक	श्रीमदमृतचंद्रसूरिप्रभृति
जैनन्यायग्रंथ ।	
न्यायविनिश्चयालंकार	श्रीमद्भट्टाकलंकदेव
न्यायकुमुदचंद्रोदय	श्रीमत्प्रभाचंद्राचार्य
आप्तमीमांसालंकृति (अष्टसहस्री)	स्याद्वादविद्यापति श्रीमद्विद्यानंदस्वामी
जैनव्याकरणग्रंथ ।	
शब्दानुशासन (शाकटायन व्याकरण)	श्रुतकेवलिदेशीयश्रीमत् शाकटायनाचार्य
शब्दानुशासन अमोघवृत्ति सहित	अमोघाचार्य (?)
शब्दार्णवचंद्रिका (लघुवृत्ति)	सोमदेवसूरि
शब्दार्णव (जैनेंद्र महावृत्ति सहित)	श्रीमत्पूज्यपादस्वामी देवनंद्याचार्य
शब्दार्णव (भाष्य वा न्यास)	श्रीमत्प्रभाचंद्राचार्य
जैनसाहित्यग्रंथ ।	
अलंकारचिंतामणि सटीक	श्रीमदजितसेनाचार्य (वादीभसिंहसूरि)
विक्रांतकौरवीय नाटक	महाकवि हस्तिमल्ल
अंजनापवनंजय नाटक	,, ,,
मैथिलीपरिणय नाटक सुभद्रा नाटिका च	,, ,,
चतुःसंधान, सप्तसंधान, चतुर्विंशतिसंधान	श्रीमत्पंडितराज जगन्नाथ महाकवि
पौराणिक काव्यग्रंथ ।	
त्रिषष्टिशलाका महापुराण (प्राकृत)	श्रीमत्पुष्पदंताचार्य
हरिवंशपुराण और पद्मपुराण ,,	,, ,,
पद्मपुराण (जैनरामायण १८००० श्लोक)	श्रीमद्रविषेणाचार्य
पांडवपुराण (जैनमहाभारत) पार्श्वपुराण	महाकविश्रीमद्वादिराजसूरि
गणितज्योतिष ग्रंथ ।	
गणितसारसंग्रह	गणिताचार्यशिरोमणि श्रीवीरनंदाचार्य
त्रिलोकसार सटीक (प्राकृत)	श्रीनेमिचंद्राचार्य जैनसिद्धांतचक्रवर्ति
भद्रबाहुसंहिता ,, सार्द्धद्वयद्वीपप्रज्ञप्ति	ज्योतिषाचार्य श्रीमद्भद्रबाहुस्वामी
जंबूद्वीपप्रज्ञप्ति ,,	श्रीपद्मनंद्याचार्य
चंद्रसूर्यप्रज्ञप्ति ,,	श्रीमदमितगत्याचार्य